March 1915.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINRY SANSKRIT WORKS.

NO. 207.

बृहदारण्यकवार्तिकसारः

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARAṆYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SASTRI VAJHE.

FASCICULUS III-३

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT BOOK-DEPOT. BENARES.

AGENTS:—

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, ·LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

Registered According to Act XXV. of 1867.

...कसारप्रारम्भः।

प्रथमो ऽध्यायः

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥

श्रीमत्सुरेश्वराचार्यपादाब्जभ्रमरा इमे ॥
वार्त्तिकेक्षुरसं पीत्वा तृप्यन्त्वात्मानुभूतितः ॥१॥

* श्रीगणेशाय नमः *

निजपदभक्तजनानामजलिखितशिरोलिपिं प्रमार्ष्टि ॥
हंसपदं दत्त्वा यः शंसतु तं राममादराद्वाणी ॥ १ ॥
यतो जगत्समुद्भूतिसम्भूतिपरिभूतयः ॥
तं वन्दे राममात्मानं चिदानन्दघनं गुरुम् ॥ २ ॥
येनोद्धृतो वार्तिकाब्धेः सारो विबुधतुष्टिदः ॥
अविद्यातज्जतापघ्नं विद्यारण्यगुरुं भजे ॥ ३ ॥
पूर्वाचार्याँल्लोकवन्द्यान्नत्वाऽऽनन्दगिरीयतः ॥
व्याख्या वार्तिकसारस्य लघु संगृह्य लिख्यते ॥ ४ ॥
मणयो मणितत्त्वज्ञैः सञ्चितास्तत्र केचन ॥
बालिशेन समानीताः किं न ग्राह्यास्तदर्थिना ॥ ५ ॥

इह खलु लोकानुग्रहैकरसतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहाः विद्यारण्यश्रीचरणाः श्रीसुरेश्वरवार्तिकसारं जिघृक्षवस्तत्राधिकारिविषयप्रयोजनानि निर्दिशन्ति । *श्रीम-

संसा
प्रारब्धेयं प्र
अत्र चोपनिषच्छब्दा
तच्छब्दावयवार्थस्य विद्यायामेव

दिति। इमे इत्यनेन बुद्धिस्थाः साधनचतुष्टयसम्पन्ना गृह्यन्ते। आचार्येषु दृढभक्ताः विवेकादिसम्पन्नाः प्रागनायासेन प्रत्यग्जिज्ञासवो ऽत्राधिकारिणः। एतद्ग्रन्थाभ्यासजन्यब्रह्मात्मैकज्ञानाभिव्यक्तं तृप्तिशब्दितं निरतिशयं स्वस्वरूपभूतं ब्रह्मसुखं फलम्। तदेवाज्ञातं सत् विषय इत्युक्तं भवति। अनेन प्रत्यक्तत्त्वानुसन्धानलक्षणं मङ्गलमपि कृतमिति ज्ञेयम् ॥ १ ॥ सुखाभिव्यञ्जकज्ञानस्योपनिषद्वाक्यमात्रेण सम्भवात्किं नूतनकृतिकरणक्लेशेनेत्याशङ्क्य, उपक्रमादिलिङ्गैरुपनिषत्तात्पर्यनिर्णयेन जातमपि ज्ञानं नाविद्यानिवर्तनक्षममिति तदर्थमियं कृतिरर्थवतीत्याह। *संसारेति। *वेदान्तोपनिषत्परेति। उपनिषत्तात्पर्यनिर्णयपरेत्यर्थः। यद्यपि इयं कृतिः काण्वोपनिषन्मात्रतात्पर्यनिरूपणपरा तथापि प्रसङ्गात्सर्वोपनिषदर्थस्य चतुर्थे वक्ष्यमाणत्वात्सामान्येन वेदान्तोपनिषत्परेत्युक्तम्। अस्याः कृतेर्वार्तिकापेक्षया विशेषं दर्शयितुं प्रयत्नेनेत्युक्तं, तथा च ललितपदसन्दर्भैः कतिपयैरेव श्लोकैरत्र वार्तिकार्थः सर्वोऽपि संगृह्य वर्ण्यत इति भावः। आरभ्यत इति वक्तव्ये प्रथमं बुद्ध्या संगृहीतत्वादारब्धेत्युक्तम् ॥२॥ ननूपनिषच्छब्दस्य ग्रन्थपरत्वमुक्तमयुक्तम् "उपनिषदं भो ब्रूहि" इत्यादौ ब्रह्मविद्यायामेव तत्प्रयोगदृष्टेरन्यायश्चानेकार्थत्वमित्याशङ्क्य, उत्तरमाह। *अत्र चेति चशब्दाद् ग्रन्थान्तरे चाध्यात्मिके प्रवृत्तमुपनिषत्पदं ब्रह्मविद्यामात्रमाहेति दर्शयति। तत्र हेतुः *तदिति ॥३॥ अवयवार्थं दर्शयि-

उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते ॥
सामीप्यतारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात् ॥ ४ ॥
त्रिविधस्य सदर्थस्य निशब्दोऽपि विशेषणम् ॥
उपनीयेममात्मानं ब्रह्मापास्तद्वयं यतः ॥ ५ ॥
निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत ॥
निहत्यानर्थमूलं साऽविद्यां प्रत्यक्तया परम् ॥ ६ ॥
गमयत्यस्तसम्भेदमतो वोपानिषद्भवेत् ॥

तुम् उपेत्युपसर्गस्य वाच्यार्थमाह *उपेति। तस्यैव लक्ष्यार्थमाह। *तत्प्रतीचीति। तत्रहेतुः *सामीप्येति। सामीप्यमव्यवहितत्वम्। अन्तर्बहिर्विभागशून्ये प्रतीचि पर्यवस्यति "अनन्तरोऽबाह्यः" इति श्रुतेः। अतः सर्वतो व्यवधानाभावोपलक्षितं चैतन्यम् उपोपसर्गलक्षितमित्यर्थः ॥ ४ ॥ उपसर्गान्तरस्य धातोश्चार्थमाह। *त्रिविधस्येति। *सदर्थस्येति। क्विबन्तस्य सदेर्विशरणादिकर्तृत्वाख्यस्त्रिविधोऽर्थः। "षद्लृ विशरणगत्यवसादनेषु" इति स्मृतेः। तस्योपशब्दवन्निशब्दोऽपि वक्ष्यमाणरीत्या त्रिविधस्यापि समर्पणद्वारा विशेषणमित्यर्थः। इत्थमवयवार्थत्वेऽपि कथं विद्यायामेवोपनिषत्पदमित्याशङ्क्य, उपसर्गयोर्धातोश्चार्थावनुवदन् विशेषणविशेष्ययोर्विद्यागमकत्वात्सैवोपनिषदित्याह *उपनीयेति। त्वमर्थं शुद्धमुपोपलक्षितं प्रत्यञ्चं ब्रह्म ग्राहयित्वा विद्या सकार्यामविद्यां पूर्वावस्थातः शिथिलयति अतो ऽवयवार्थस्य पौष्कल्यात् सैवोपनिषदित्यर्थः ॥ ५ ॥ ६ ॥ सम्प्रत्युपसर्गार्थं धात्वर्थं चावसादनत्वमनुवदन्विद्यायामेव तत्प्रवृत्तौ प्रकारान्तरमाह। *प्रवृत्तीति। प्रवृत्तिहेतवो रागादयस्तानशेषेण तद्धेत्वज्ञानस्य प्रत्यङ्मात्रतया निरासद्वारा विद्या नाशयति अतः सैवोपनिषदित्यर्थः ॥ ७ ॥ विद्यैव चेदुपनिषदिष्टा तर्हि कथं ग्रन्थे तच्छब्दः प्रयु-

प्रवृत्तिहेतून्निश्शेषांस्तन्मूलोच्छेदकत्वतः ॥ ७ ॥
यतोऽवसादयेद्विद्या तस्मादुपनिषद्भवेत् ॥
यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः ॥ ८ ॥
भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा ॥
ऐकात्म्यविषयान्नान्यो वेदान्तवचसां यतः ॥ ९ ॥
लभ्यते विषयः कश्चित्तस्मात्तद्धीस्तमोपनुत् ॥
सा चात्मोत्पत्तितो नान्यद् ध्वान्तध्वस्तावपेक्षते १०॥
प्रत्यग्विविदिषासिद्धै वेदानुवचनादयः ॥
ब्रह्मावाप्त्यै तु तत्त्यागस्त्यागेनैक इतिश्रुतेः ॥ ११ ॥

क्तः ? इत्याशङ्क्य, साध्यसाधनयोरभेदोपचारादिति सदृष्टान्तमाह । * यथोक्तेति ॥ ८ ॥ ननु वेदान्तानामैक्यं विषयः तत्र चाध्यक्षादिविरोधात्तेषां सम्पदादिपरत्वं, तथा चैक्यधीरप्रमेति तदर्थं ग्रन्थारम्भो व्यर्थस्तत्राह* ऐकात्म्येति। उपक्रमादितात्पर्यलिङ्गैरैक्यपरत्वे वेदान्तानां सम्पदादिपरत्वायोगादध्यक्षादिविरोधस्य परिहरिष्यमाणत्वादैक्यज्ञानस्य प्रमात्वेन फलत्वमित्यर्थः ॥ ९ ॥ ऐक्यधियः प्रमात्वे ऽप्यन्यानपेक्षायास्तस्याः मोहानिवर्तकत्वान्न फलवत्त्वमित्याशङ्क्य, अन्यत् किं कर्म ज्ञानाभ्यासो वा तया ऽपेक्ष्यते ? नोभयमपीत्याह । *सा चेति । प्रत्यग्धीः नान्यापेक्षा तत्त्वधीत्वात् शुक्तितत्त्वधीवत् । न हि मानस्य स्वफले तदितरापेक्षेति भावः ॥ १० ॥ तथापि "धर्मात्सुखं च ज्ञानं च" इतिस्मृत्या धर्मशब्दितावश्यानुष्ठेयकर्मभ्य एव ज्ञानोत्पत्तिसम्भवात्किंमनेन ग्रन्थारम्भेणेत्यत आह। *प्रत्यगिति । वेदानुवचनादिधर्माः सत्त्वशुद्धिविविदिषाहेतवः। "विविदिषन्ति यज्ञेन" इत्यादिश्रुतेः । स्मृतिस्तु परम्परया तेषां ज्ञानहेतुत्वादर्थवतीति भावः ।किंच सर्वकर्मत्यागस्य ज्ञानाङ्गत्वेन श्रुतत्वादपि न कर्मणां

न कर्मणा न प्रजया न धनेनामृता जनाः ॥
त्यागेनैके ऽमृतत्वं त आनशुः शुद्धबुद्धयः ॥ १२ ॥
नन्वभ्युदयवत्साध्या मुक्तिरप्राप्तरूपतः ॥
सिषाधयिषया चातोऽधिकारी न बुभुत्सया ॥१३॥
नैवं साध्याऽप्यसौ मुक्तिः स्वर्गवन्नैव जन्यते ॥
किन्त्वभिव्यज्यते बोधात्प्रदीपेन घटो यथा ॥१४॥
तमोमात्रान्तरायत्वात्तमसो विद्यया हतेः ॥
व्यज्यमानैव सा साध्येत्युपचारात्प्रयुज्यते ॥१५॥
चिकित्सयेव सम्प्राप्यं स्वास्थ्यं रोगार्दितस्य तु ॥
आत्माविद्याहतेर्बोधात्तत्कैवल्यमवाप्यते ॥ १६ ॥
ब्रह्म वा इदमग्रेऽभूत्तदात्मानमवेत्पुनः ॥

साक्षाद् ज्ञानहेतुत्वमित्याह । * ब्रह्मेति । तुशब्दोऽवधारणार्थः त्याग इत्यनेन सम्बध्यते । उक्तश्रुतिमेव व्यनक्ति । *नेति । तथा च विवेकादिसम्पन्नस्य सर्वकर्मत्यजः प्रत्यक्तत्त्वजिज्ञासोरयमारम्भः ॥ १२ ॥ जिज्ञासोराधिकारमुक्तमाक्षिपति । *नन्विति ॥ १३ ॥ अप्राप्तरूपत्वादितिहेतुरप्रसिद्ध इति परिहरति । * नैवमिति । तर्हि पुंव्यापारवैयर्थ्यमत आह । * साध्याऽपीति । तथाचाभिव्यक्त्यर्थः पुरुषयत्न इति भावः ॥ १४ ॥ ॥ १५ ॥ मुक्तिर्वस्तुतः साध्या प्रेप्सितत्वात् स्वर्गादिवदित्याशङ्क्य, व्यभिचारमाह । * चिकित्सयेति । स्वरूपेऽवस्थानं हि स्वास्थ्यं, तत्सदातनमेव रोगाभिभूतमौषधादिना तद्विगमने प्राप्यते तद्वत् बोद्धुरात्मत्वेन स्थिताऽपि मुक्तिरविद्यापिहिता तद्बोधात् तद्ध्वस्तेराप्येत्युपचर्यते । अत उक्तहेतो रोगिप्रेप्सितस्वास्थ्ये व्यभिचार इत्यर्थः ॥१६॥ मुक्तेरात्मत्वेन नित्याप्तत्वे मानमाह । *ब्रह्मेति ॥ १७ ॥ मुक्तेर्नित्याप्तत्वे फलितमाह । * सुषुप्तेति ।

अहं ब्रह्मेति तस्मात्तत्सर्वमासीदिति श्रुतिः ॥१७॥
यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिः ॥
सुषुप्तनरवच्छ्रुत्या बोध्यते प्रेर्यते न तु ॥ १८ ॥
प्रेर्यतेऽभ्युदये कर्त्ता नृतन्त्रे विधिवाक्यतः ॥
किमत्र विधिना कार्यमनृतन्त्रे चिदात्मनि ॥१९॥
जिज्ञासोरधिकारोऽतो न सिषाधयिषोरिति ॥
सुस्थमेतदथैतस्य दार्ढ्यायैव मतान्तरम् ॥ २० ॥
पर आहात्मनः स्वास्थ्यं श्रेयो यद्यभिवाञ्छसि ॥
कर्मभ्य एव तत्सिद्ध्येच्छ्रुतत्वात्कर्मणः श्रुतौ ॥२१॥
न च कर्मातिरेकेण मुक्त्यभ्युदयसाधनम् ॥

यथा पार्श्वस्थेन सुप्तः पाणिपेषणादिना बोध्यते नानुष्ठाप्यते तथा मुमुक्षुरपि तत्त्वमादिश्रुत्या " नासि त्वं संसारी ब्रह्मैव" इति व्युत्पाद्यते न किञ्चित् कार्यते इत्यर्थः ॥ १८ ॥ " ननु स्वर्गकामो यजेत " इत्यादिवत् " प्रज्ञां कुर्वीत " इत्यादिना ज्ञानं विधीयते ऽतो विधेयधात्वर्थसाध्या मुक्तिः स्वर्गादिवदित्याशङ्क्य, युक्तः कर्मणि विधिः पुरुषतन्त्रत्वात्तस्य, ज्ञानस्य तु पुंसाऽननुष्ठेयत्वादत्र श्रुतोऽपि विधिस्तद्धेतुपदार्थविवेकपर इत्यर्थमभिप्रेत्याह * प्रेर्यत इति ॥१९॥ विध्यभावे फलितं दर्शयन्नुत्तरग्रन्थस्य पौनरुक्त्यं परिहरति । * जिज्ञासोरिति ॥२०॥ स्वतःसिद्धाऽपि मुक्तिः कर्मणैव सिध्यति तस्यैव पुमर्थहेतुत्वेन श्रुतत्वादिति शङ्कते । * पर इति । स्वास्थ्यं स्वरूपावस्थानलक्षणम् । श्रेयः कैवल्यमित्यर्थः ॥ २१ ॥ कर्मेतरपुमर्थसाधनाभावे हेतुमाह * निषेधेति । सर्वस्यापि वेदार्थस्य विधिनिषेधतच्छेषत्वेन समाप्तेः कर्मैव पुरुषार्थहेतुरतो मुक्तिरपि स्वर्गवत् साध्येत्यर्थः ॥ २२ ॥ सिद्धबोधिवाक्यानां विधिशेषत्वेन

निषेधविधिमात्रत्वाद्वेदार्थस्येह सर्वतः ॥ २२ ॥
वचसामक्रियार्थानां विधिनैवैकवाक्यताम् ॥
जैमिनिर्न्यायिद्वक्चाह नातः स्वार्थे प्रमाणता ॥२३॥
कर्मापेक्षाऽपि नानित्या मुक्तिर्जन्यत्ववर्जनात् ॥
शिष्यते केवलं स्वास्थ्यमस्वास्थ्यस्य चिकित्सने ॥२४॥
निषिद्धकाम्ययोस्त्यागात्कर्मणोर्नित्यकर्मणः ॥
करणात्प्रत्यवायस्य हतेश्चास्य चिकित्सनम् ॥२५॥
काम्यकर्मपरित्यागाद्देवादित्वं न ढौकते ॥
निषिद्धस्य निरस्तत्वान्नारकीं नैत्यधोगतिम् ॥ २६ ॥
नित्यानुष्ठानतश्चेमं प्रत्यवायो न संस्पृशेत् ॥
आगामिजन्मनोऽसत्त्वे निर्विघ्नं स्वास्थ्यमिष्यताम् २७॥
शरीरारम्भकं कर्म भोगेन क्षीयते ततः ॥
विनाऽप्यैकात्मसम्बोधान्मुक्तिः सिद्धाऽन्तरात्मनः २८॥
स्वात्मनः कर्मशेषत्वे तद्धियः कर्मशेषता ॥
अर्थवादो भवेत्सर्वमात्मज्ञानफलं श्रुतम् ॥ २९ ॥
स्वरूपेऽवस्थितिर्मुक्तिरात्मनः सा च साधनात् ॥
सिध्यतीति वदन्पूर्ववादी कस्मान्न लज्जते ॥ ३० ॥

प्रामाण्यं जैमिनेरपि सम्मतमित्याह । * वचसामिति ॥२३॥२४॥ क्रियाफलस्यापि मुक्तेर्नित्यत्वं साधयति । *निषिद्धेति ॥२५॥ उक्तमेवार्थं विवृणोति । *काम्येति ॥२६॥ न ढौकते न प्राप्नोति ॥२७॥२८॥ "ब्रह्म वेद ब्रह्मैव भवति" इत्यादौ ज्ञानस्यापि फलं श्रूयते इत्याशङ्क्य, आत्मनः कर्मशेषत्वात्तत्संस्कारकज्ञाने श्रूयमाण-फलस्यापापश्लोकश्रवणवदर्थवादतेत्याह । *स्वात्मन इति॥२९॥ ऐकभविकन्यायेन परोक्तां मुक्तिं तदुक्तविरोधप्रकटनेन दूषयति। स्वरूप इति ॥३०॥ उक्तहेत्वनुष्ठानात्मागात्मा तत्र स्वरूपेऽवस्थितो

तत्रात्मा किं स्वरूपे प्राङ् न तस्थावुत तस्थिवान् ॥
आद्ये तन्न स्वरूपं स्यादात्मनः सर्वदा ऽसतः ॥३१॥
अथावस्थित एवायं किमर्थं हेतुमार्गणम् ॥
स्थितत्वहेत्वपेक्षायामनिर्मोक्षः प्रसज्यते ॥ ३२ ॥
विषयाभ्यासजास्वास्थ्यनुत्त्यर्थं हेतुमार्गणम् ॥
इति चेद्विषयाभ्यासो निर्हेतुर्वाऽथ हेतुमान् ॥ ३३ ॥
न मुक्तिराद्ये हेतुश्च धर्मादिरथवेतरः ॥
नेतरो दुर्निरूपत्वाद्धर्माधर्मौ च चिन्तय ॥ ३४ ॥
किमसङ्गस्वभावस्य विषयैः सङ्गतिं बलात् ॥
कुरुतः कर्तृरूपस्य सङ्गयोग्यस्य वा वद ॥ ३५ ॥
भल्लातकाङ्कवद्वस्त्रे बलात्कर्तुं न शक्यते ॥
न हि व्योम घटीकर्तुं कुशलो ऽपीह शक्नुयात् ॥३६॥
आत्मा कर्त्रादिरूपश्चेन्मा काङ्क्षीस्तर्हि मुक्तताम् ॥

न वेति विकल्प्य दूषयति *तत्रेत्यादिना। असतः असत्त्वात्। यत्र स्वत एव सदाऽनवास्थितस्तन्नात्मस्वरूपम् आगन्तुकत्वात् धर्मव-दित्यर्थः ॥३१॥३२॥ न स्वरूपावस्थानार्थमुक्तमुपायमुपगच्छामः किन्तु संसृष्टेषु विषयेष्वसकृदनुभवजनितपापशमनायेति शङ्कते *विषयेति॥३३॥ स्वभावादेवात्मनि चैतन्यवद्विषयसम्पर्क इत्या-द्यपक्षमनिर्मोक्षप्रसङ्गेन दूषयति * न मुक्तिरिति। विषयसंसर्गः सहेतुरिति पक्षं विकल्प्य दूषयति *हेतुश्चेत्यादिना ॥३४॥३५॥ *भल्लातकेति। यथा वस्त्रे वस्तुतोऽकलङ्के भल्लातकफलं संसृज्य-मानं तत्र कलङ्कयति नैवमसङ्गात्मनि धर्माधर्मावनर्थयोगविधा-यकावित्यर्थः। तयोरात्मन्यनर्थसम्बन्धाधानासामर्थ्ये साधर्म्य-दृष्टान्तेनाप्याह *न हीति। यथा कुशलः कुलालो मृदं घटीकरोति तद्वन्न नभो घटीकर्त्तुमलमित्यर्थः ॥ ३६ ॥ द्वितीयमनूद्य दूष-

न हि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः ॥३७॥
नतु कर्तृत्वभोक्तृत्वकार्यमेवात्मसंस्मृतिः ॥
नतु तच्छक्तिरित्यात्मा मुक्तः स्याच्छक्त्यवस्थितौ ॥३८॥
नैवं शक्तेरवस्थाने तत्कार्यस्यानिवारणात् ॥
शक्तिस्वरूपहाने तु शक्तिमद्वस्तुनिन्हुतिः ॥ ३९ ॥
अथ कार्यानभिव्यक्तिर्निमित्तासम्भवान्न तत् ॥
धर्मादेः शक्तिरूपेण सम्भवः केन वार्यते ॥ ४० ॥
तस्मात्कर्तृस्वभावस्य दुर्लभा मुक्तिरात्मनः ॥
साधनं च निषिद्धादिवर्जनं दुःशकं तथा ॥ ४१ ॥
सूक्ष्मापराधसंदृष्टेरतियत्नवतामपि ॥

यति *आत्मेति ॥३७॥ नात्मा कर्तृत्वादिकार्यस्वरूपः किन्तु तच्छक्तिस्वभावः, तथा च कर्तृत्वादिकार्यनिवृत्तावप्युपपन्नाऽऽत्मनो मुक्तिरिति शङ्कते *नन्विति ॥३८॥ कर्तृत्वादिकार्यवन्मुक्तौ तच्छक्तिरपि कदाचिन्नश्यति न वेति विकल्प्य उभयत्र दोषमाह *नैवमिति ॥३९॥ न शक्तेः स्वरूपनाशो मुक्तिः किन्तु शक्तेर्यत्कार्यं तदनभिव्यक्तिरिति शङ्कते *अथेति। कार्यानभिव्यक्तेः स्वापादौ सत्त्वादतिप्रसङ्गोऽत आह *निमित्तेति। स्वापादौ पुनरभिव्यक्तिनिमित्तादृष्टादीनि सन्ति, मुक्तौ तु तदभावान्नातिप्रसङ्ग इत्यर्थः। मुक्तौ धर्मादेरपि कर्तृत्वादिवच्छक्तिरूपेण स्थितिसम्भवात्कदाचित्कार्यव्यक्तिः स्यात्तथा चानिर्मोक्ष इति दूषयति *न तदित्यादिना ॥४०॥ विषयाभ्यासजास्वास्थ्यनुत्तये कार्यानभिव्यक्तये वा परकीयोपायो नोपयोगीत्युक्तम्, इदानीं तदुपाय एव दुष्करोऽप्रामाणिकश्चेत्याह *साधनं चेति॥४१॥ *निपुणोऽपीति। पुण्यदेशवासात्पुण्यस्य पापदेशवासात्पापस्य वोत्पत्ति-

निषिद्धकाम्ये निःशेषे वर्जयेन्निपुणोऽपि कः ॥ ४२ ॥
मुमुक्षुः काम्यपापे द्वे वर्जयेदिति चोदना ॥
नास्ति वेदे क्वचिद्येन वचनात्तत्प्रकल्प्यते ॥ ४३ ॥
काम्यादिवर्जनं चैतत्स्वकपोलप्रकल्पितम् ॥
अतः प्रामादिकात्काम्यान्निषिद्धाच्च पुनर्जनिः ॥ ४४ ॥
अथापराधो यस्यास्ति जायतामेष यस्य तु ॥
नापराधो मुच्यते ऽसाविति चेद्वर्धतां भवान् ॥ ४५ ॥
सापराधत्वतो मुक्तिः संदिग्धैव प्रसज्यते ॥
द्विजातीनां खरादेस्तु त्वदुक्त्या स्यादसंशयम् ॥ ४६ ॥
नित्यस्य फलमिष्टंचेदुपात्तदुरितक्षयः ॥
तथापि काम्यपुण्यानां क्षयो नादुरितत्वतः ॥ ४७ ॥
उपपातकमल्पं चेत्क्षीयतां नित्यकर्मणा ॥

दुष्परिहरेति भावः ॥ ४२ ॥ ४३ ॥ यतो निषिद्धकाम्यवर्जनमशक्यम् अतस्तत्पक्षे पुनर्जननमावश्यकमित्याह *अत इति॥४४॥ यस्य निषिद्धादिवर्जनमशक्यं तस्य जन्मास्तु, यस्य तु क्षपिताशेषकल्मषस्य सूक्ष्मापराधो ऽपि नास्ति तस्योक्तविधया मुक्तिरस्तीति शङ्कते *अथेति। मनुष्यमात्रे ऽपराधस्य सन्दिग्धत्वान्मुक्तौ निःसन्दिग्धाधिकारस्त्वन्मते गर्दभादेरेव स्यादिति सोपहासमुत्तरमाह *वर्द्धतामिति ॥४५॥४६॥ अपि च "धर्मेण पापमपनुदति"इति श्रुतेर्दुरितानां नित्यादिना क्षयेऽपि सुकृतानां तदविरोधादनारब्धपुण्यकृतदेहान्तरं दुर्वारमित्याभिप्रेत्याह *नित्यस्येति ॥४७॥ *अनन्तेति। "श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम्। चाण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति" इति स्मृतेरित्यर्थः। एतेनोपात्तान्यपि सर्वाणि कर्माणि सम्भूय एकमेव

अनन्तदेहहेतूनां हत्यादीनां कुतः क्षयः ॥ ४८ ॥
पापं पुण्यकृतां नेदृङ् नास्ति स्वर्गावरोहिणाम् ॥
श्वशूकरादिजन्मोक्तेर्विप्रक्षत्रादिजन्मवत् ॥ ४९ ॥
रमणीयतराचारा विप्रक्षत्रादियोनयः ॥
कपूयचरणाः श्वादियोनयः स्युरिति श्रुतिः ॥ ५० ॥
नित्यकर्मभिरप्यस्ति स्वर्गः काम्याग्निहोत्रवत ॥
आपस्तम्बेन तत्प्रोक्तमाम्रवृक्षानिदर्शनात् ॥ ५१ ॥
फलार्थे निर्मिते त्वाम्रे छायागन्धावचारितौ ॥
तथा वर्णाश्रमाचारादनुगच्छेत् त्रिविष्टपम् ॥ ५२ ॥
निषिद्धकाम्यानित्यानि पूर्वजन्मसु चात्र च ॥
कृतानि सन्त्यनन्तानि स्वास्थ्यं तत्रात्मनः कुतः॥५३॥
ऐकात्म्यज्ञानतः कर्मक्षयं चेदात्थ तर्हि ते ॥

देहमारभन्त इति तदभिमतैकभविकत्वमपि निरस्तमिति ध्येयम् ॥४८॥ धर्माभिरतानामनेकजन्मारम्भकं पापं नास्ति अन्यथा न धर्मे प्रवृत्तिः स्यादित्याशङ्क्य, स्वर्गच्युतानामपि सूकरादिजन्मश्रवणान्नैवमित्याह *पापमित्यादिना । तथा चानन्तपुण्यकरणेऽपि ज्ञानं विना न मुक्तिरिति भावः ॥४९॥५०॥ किञ्च नित्यकर्मणां दुरितक्षयातिरिक्तफलश्रवणादपि न त्वन्मते मुक्तिः सम्भवतीत्याह *नित्येति । तत्र तद्यथा "आम्रे फलार्थे निमित्ते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते" इत्यापस्तम्बस्मृतिमर्थतः पठति *फलार्थमिति । निमित्ते निर्मिते आरोपिते वा ॥५१॥५२॥५३॥ इदानीं निरूद्धगतिकः सिद्धान्तमालम्बते *ऐकात्म्येति । मन्मतप्रवेशे मम यथा निश्चिता मुक्तिस्तद्वत्तवापीत्याह *तर्हीति ॥५४॥ तस्मान्मुमुक्षुणा सर्वकर्म-

निर्विघ्ना मुक्तिरस्त्वद्य ममैव ह्नि न संशयः ॥ ५४ ॥
तेन निःसारतां बुध्वा कर्मणां वेदतत्त्ववित् ॥
ऐकात्म्यज्ञानमन्वेति कर्मत्यागपुरःसरम् ॥ ५५ ॥
यत्तूक्तं कर्मशेषत्वमात्मतज्ज्ञानयोर्न तत् ॥
न तावदात्मा तच्छेषोऽनुवृत्तेर्लोकमोक्षयोः ॥ ५६ ॥
ज्ञानं कस्यात्मनोऽत्र स्यादिह कर्तृपरात्मसु ॥
देहात्मधीर्भोगहेतुर्वैदिकं कर्म न स्पृशेत् ॥ ५७ ॥
देहान्तराभिसम्बन्धी न चात्मास्तीति जानतः ॥
विवेकिनो न युक्तेयं प्रवृत्तिः पारलौकिकी ॥ ५८ ॥
बाढं कर्त्रात्मधीः कर्महेतुश्चेदस्तु तावता ॥
किमायातं कर्मघातिपरब्रह्मात्मवेदने ॥ ५९ ॥

संन्यासपूर्वकं श्रवणाद्येव कर्त्तव्यमित्युपसंहरति *तेनेति ॥ ५५ ॥ यागादिकर्तृत्वादात्मनस्तद्द्वारा तज्ज्ञानस्यापि कर्माङ्गतेति पूर्वपक्षोक्तमनुवदति *यत्त्विति । आत्मनस्तावन्न कर्माङ्गता तस्य कृष्यादावपि कर्तृत्वेन यागादिना ऽव्यभिचरितसम्बन्धाभावादित्याह *नेति ॥ ५६ ॥ आत्मज्ञानमङ्गमित्यत्राप्यात्मपदार्थो देहो वा अन्तःकरणविशिष्टो वा ऽशनायाद्यतीतो वेति विकल्पयति *ज्ञानमिति ॥ आद्यं दूषयति *देहात्मेति ॥ ५७ ॥ कर्त्रात्मनो लौकिकसाधारणत्वेऽपि तस्य देहातिरिक्तत्वधियः क्रतोरन्यत्रानुपयोगात्तज्ज्ञानं कर्माङ्गमिति मत्वा द्वितीयं शङ्कते *देहान्तरेति ॥ ५८ ॥ कर्तृत्वादिविशिष्टात्मज्ञानस्याङ्गत्वेऽप्यस्मदभिमतवेदान्तवेद्यात्मतज्ज्ञानयोर्न कर्माङ्गता, प्रत्युत कर्मनिर्मूलहेतुत्वमित्याह *बाढमिति ॥५९॥ उक्तमेवार्थं स्पष्टयति *व-

वर्णाश्रमवयोवस्थाध्यासं कर्मोपजीवति ॥
वर्णाश्रमादि हन्त्येतत्परब्रह्मात्मवेदनम् ॥ ६० ॥
कर्तृभोक्त्रादिरूपत्वं प्रत्यगज्ञानहेतुजम् ॥
ज्ञाते प्रतीचि तद्रूपमपैति स्वाप्नरूपवत् ॥ ६१ ॥
दारपुत्रधनादीनि कर्मसाधनतां ययुः ॥
यानि तान्यपयान्तीति किमु वक्तव्यमात्मनः ॥६२॥
देहतद्बाह्यरूपं यद्विशेषणमुदीर्यते ॥
प्रतीचो निर्विशेषस्य तदज्ञानं विना न हि ॥ ६३ ॥
चोरोऽसौ मामभिप्रैतीत्येवं चोरविशेषणम् ॥
स्थाणौ सम्भावयत्यज्ञो न त्वभिज्ञस्तमो विना॥६४॥
करोम्यन्धो द्विजो बालो दग्धाश्छिन्नोऽहमित्यपि ॥

र्णेति। अहं ब्राह्मणः गृही युवा ऽरोगीत्यध्यासं विना कर्मणि प्रवृत्त्ययोगात् विशिष्टात्मधियस्तदङ्गत्वेऽपि न शुद्धात्मधियस्तदङ्गता तस्यास्तन्निवर्त्तकत्वादिति भावः ॥ ६० ॥ सत्यस्य कर्तृत्वादेः कथं ज्ञाननिवर्त्यत्वमित्याशङ्क्य, कर्तृत्वादिरात्मनि कल्पितः दृश्यत्वात्स्वप्नगजादिवदित्यभिप्रेत्याह *कर्त्रिति ॥ ६१ ॥ प्रत्यक्तत्त्वसाक्षात्कारेणात्मधर्मत्वेन प्रतीतकर्तृत्वादिनिवृत्तौ कर्मसाधनीभूतबाह्यदारादिनिवृत्तिः कैमुतिकन्यायसिद्धेत्याह *दारेति । *कर्मसाधनतां ययुरिति। सभार्यस्य जातपुत्रस्य धनवत आधानादिविधानादिति भावः ॥६२॥ किञ्च देहादेरात्मनश्चाहं मनुष्य इत्यादिविशेषणविशेष्यत्वेन प्रतीतिर्देहादेः कल्पितत्वमन्तरा न घटत इत्याह *देहेति ॥ ६३ ॥ मोहादेवान्यदन्यस्य विशेषणमित्युक्तं दृष्टान्तेन स्पष्टयति *चोर इति । यो हि पुरः स्थितं स्थाणुं स्थाणुत्वेन न वेद स त्वसौ चोर इत्यभिप्रेत्यागच्छतीति चोरेण तं विशिनष्टि, यस्तु पुरोवर्तिनं स्थाणुं स्थाणु-

नाविद्यामन्तरेणैतैः प्रत्यगात्मा विशिष्यते ॥ ६५ ॥
इयमेवात्मनो ऽविद्या कर्माधिकृतिकारणम् ॥
अधिक्रियन्ते येनैते बृहस्पतिसवादिषु ॥ ६६ ॥
सर्वकर्मसमुच्छेदि ज्ञानं वेदान्तमानजम् ॥
तन्मूलाज्ञानघातित्वान्नास्य कर्माङ्गता ततः ॥६७॥
यच्चोक्तमर्थवादत्वं ब्रह्मज्ञानफलस्य तत् ॥

त्वेन वेद स तं तेन न विशिनष्टि, अतो ऽन्वयव्यतिरेकाभ्यां स्थाणोर्मोहादेव पुंविशेषणत्वं तथा ऽन्यत्रापीत्यर्थः ॥ ६४ ॥ मोहाद्दतेऽपि दण्ड्ययमित्यादौ विशेषणविशेष्यभावो दृष्ट इत्याशङ्क्य अगृहीतभेदयोर्विशेषणविशेष्यत्वेन प्रतीतौ मोहो हेतुरुक्तः । दण्डीत्यादौ तयोर्भेदग्रहाद्वैषम्यमित्यभिप्रेत्य निर्विशेषात्मना सहागृहीतभेदविशेषणान्युदाहरति * करोमीति ॥ ६५ ॥ कर्त्रादीनामज्ञातभेदानां पुंस्थाणुविशेषणत्ववदात्मविशेषणत्वस्याविद्याकृतत्वेऽपि प्रकृतधर्माधिकारे किमायातं ? तत्राह * इयमेवेति । इयमविद्या ऽविद्याधीनविशेषणविशेष्यताऽऽत्मनः कर्मसम्बधब्राह्मण्याद्यभिमानहेतुर्येन ब्राह्मणादयो बृहस्पतिसवादिषु स्वामित्वेन सम्बध्यन्ते तादृशाभिमाने हेतुर्विशेषणविशेष्यभावापन्ना ऽविद्यैवेति पूर्वेणान्वयः । तथा च कर्मसम्बन्धनिमित्तब्राह्मणाद्यभिमानस्याविद्यकत्वादविद्वान्कर्माधिकारीति भावः ॥ ६६ ॥ अविदुषः कर्माधिकारित्वे फलितमाह *सर्वेति । प्रमाणजन्यं ज्ञानं कर्ममूलाज्ञाननिवर्तकत्वेन कर्मोच्छेदकं यस्मात्ततोऽस्य न कर्माङ्गतेति योजना ॥६७॥ शुद्धात्मज्ञानस्य कर्मानङ्गत्वे तत्फलश्रुतेः ब्रह्मात्मैक्यपरत्वेन स्वार्थपरत्वाभावादर्थवादत्वेऽपि न गुणवादता किन्तु "यन्न दुःखेन

अभ्युपैम्यर्थवादत्वं वचसोऽन्यपरत्वतः ॥ ६८ ॥
विरोधानुपलम्भेनापापश्लोकश्रुतेरिव ॥
नैवाभूतार्थवादत्वं किन्तु भूतार्थवादता ॥ ६९ ॥
कुतो विरोधः शङ्क्येत प्रत्यक्षे ब्रह्मधीफले ॥
ब्रह्मत्वमात्मनो दृष्ट्वा नोत्तरेत्संसृतिं कथम् ॥ ७० ॥
उत्तीर्य संसृतिं भूयः कर्तृत्वादीन्न वीक्षते ॥
रोगादिवदनर्थत्वात्कर्तृत्वादिजिहासतः ॥ ७१ ॥
कर्तृत्वादिस्वभावस्य दृश्यत्वात्तु दृगात्मनि ॥
अविद्याकल्पितत्वं स्याद् दृगात्मा तु न दृश्यते ॥७२॥
प्रमाता साक्षिणा दृश्यो मातुर्मानं प्रजायते ॥

सम्भिन्नमित्यादिवत् भूतार्थवादतेत्याह *यच्चेत्यादि ॥६८॥६९॥ विदितब्रह्मणोऽपि कर्तृत्वाद्यनिवृत्तेः "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिफलश्रुतेरपि गुणार्थवादत्वमित्याशङ्क्य असम्यग्ज्ञानिनां तथात्वे ऽप्यप्रतिबद्धसाक्षात्कारवतामसङ्गाद्वितीयपरमानन्दस्यानुभविकत्वान्न विरोधशङ्केत्याह *कुतो विरोध इति ॥७०॥ *न वीक्षत इति। पूर्ववदात्मनिष्ठतया न पश्यतीत्यर्थः। कर्तृत्वादेर्जिहासितत्वे हेतुः *रोगेति। आदिशब्देन अहिकटकादिग्रहः ॥७१॥ कर्तृत्वादेः सत्यत्वात्तत्त्यागः कथं घटेतेत्याशङ्क्य, तन्मिथ्यात्वसाधकं पूर्वोक्तानुमानं स्मारयति *कर्तृत्वेति । दृश्यत्वं चैतन्यविषयत्वमतो नात्मनि व्यभिचार इत्याह *दृगात्मेति ॥ ७२ ॥ कर्तृत्वादेरात्मधर्मत्वाभावानुमानं तद्धर्मत्वग्राहकाहंप्रत्ययबाधितमित्याशङ्क्य, स किं प्रत्ययः प्रमातृविषयः साक्षिविषयो वा ? तत्राद्यमङ्गीकृत्य द्वितीयं दूषयति *प्रमातेत्यादिना । यस्मान्मात्रादित्रयं दृश्यं तस्मान्मात्रादित्रयसाक्षी न स्वविषयप्रमातृकर्तृकमेयगोचरक्रियाव्याप्यो भवति । यथा न वह्निः स्वदाह्यो-

मानेन मीयते मेयं साक्षिदृश्यं त्रयं ततः ॥ ७३ ॥
मातृस्थं मेयगं मानं प्रतीचि त्रयसाक्षिणि ॥
न व्यापारयितुं शक्यं वन्हिं दग्धुमिवोल्मुकम् ॥७४॥
परार्थसंहतानात्मभोग्यकर्त्रादिबोधिना ॥
मानेन तद्विरुद्धोऽर्थः साक्ष्ययं मीयते कथम् ॥ ७५ ॥
साक्षिसाक्ष्याभिसम्बन्धः साक्षिवस्तुनि कल्पितः ॥
साक्ष्यापेक्ष्यं न साक्षित्वं केवलानुभवात्मनि ॥७६॥
इच्छाद्वेषादयोऽप्येते न चिदात्मनि सम्मताः ॥
कामः सङ्कल्प इत्येवं मनोधर्मत्वसंश्रवात् ॥ ७७ ॥

ल्मुकक्रियाव्याप्यस्तद्वदित्यर्थः ॥ ७३ ॥ ७४ ॥ नन्वात्मा मात्रादिग्राहकग्राह्यः प्रमात्रादेरविलक्षणत्वात् प्रमात्रादिवदित्याशङ्क्यासिद्धो हेतुरित्यभिप्रेत्याह *परार्थेति ॥ साक्षी प्रमात्रादिविलक्षणः अपरार्थत्वात् व्यतिरेके मात्रादिवदित्यभिप्रेत्य दृष्टान्ते परार्थत्वं साधयति । *संहतेति । विमतं परार्थं संहतत्वात् गृहवदित्यर्थः । प्रमात्राद्यनात्मबोधिप्रत्ययेन तद्विलक्षणः साक्षी न विषयीकर्त्तुं शक्यः पराञ्चानस्य प्रतीचि प्रवृत्तिविरोधादिति भावः ॥ ७५ ॥ नन्वात्मनः साक्षित्वे साक्ष्येण सह सम्बन्धो वाच्यः, अन्यथा तत्साक्षित्वानुपपत्तिः, तथा चासङ्गत्वहानेरत आह *साक्षीति । यथा "सविता प्रकाशते" इत्यत्र प्रकाश्यमनपेक्ष्यापि सवितुः प्रकाशकत्वनिर्देशः, एवमात्मनः साक्ष्यमनपेक्ष्यापि साक्षित्वव्यपदेशो घटते, तदपेक्षत्वेऽपि तत्सम्बन्धस्य कल्पितत्वान्नासङ्गत्वहानिरित्यर्थः ॥७६॥ इच्छादीनामात्मधर्मत्वात्तदधीनकर्तृत्वादिरपि तद्धर्म इति नैयायिकास्तान्प्रत्याह *इच्छेति । इच्छादयः क्वचिदाश्रिताः गुणत्वाद्रूपवदित्यनुमानात्पारिशेष्यात्तेषामात्मगुणतेत्याशङ्क्य, श्रुतिविरोधान्नैवमित्याह *काम इति ॥ ७७ ॥

आत्मनश्चेदमी सर्वे ऽनर्थं कुर्यात्स्वयं कथम् ॥
आत्मा जानन्यथा शत्रोस्तथा तस्मादनात्मवान् ॥७८॥
अविद्ययाऽऽत्मधर्मत्वे दोषः कश्चिन्न विद्यते ॥
तद्वर्जनस्य संसिद्धेर्वेदान्तैरात्मबोधनात् ॥ ७९ ॥
परागर्थप्रमेयेषु या फलत्वेन सम्मता ॥
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ ८० ॥

किं चामी चेदात्मधर्मा एषामनर्थहेतुत्वमात्मा वेत्ति न वा ? तत्राद्यं दूषयति *अनर्थमिति । स्वयं स्वस्येति यावत् । कुर्यात् इच्छादिसामग्रीं कथं सम्पादयेत् बुद्धिपूर्वकारी नात्मनोऽनर्थं करोतीत्यत्र वैधर्म्यदृष्टान्तमाह *यथा शत्रोरिति । तस्मात् द्वितीयः परिशिष्टः ततश्च प्राप्तं तेषामज्ञानकार्यत्वमित्यभिप्रेत्याह *तस्मादिति । अनात्मवानबुद्धिमानज्ञानीत्यर्थः ॥ ७८ ॥ अज्ञानकार्यत्वेऽपि तेषामनर्थहेतुत्वं तुल्यम् अनाद्यज्ञानस्यात्मवन्निवृत्त्ययोगादित्याशङ्क्य, विरोधिसन्निपातेऽनादिप्रागभावनिवृत्तिवद्वेदान्तजन्यज्ञानाभिव्यक्तचैतन्येन तस्यापि निवृत्तिसम्भवान्मैवमित्याह *अविद्ययेति ॥ ७९ ॥ नन्वविद्यानिवृत्तेरात्ममात्रत्वान्न तत्र तस्योपायत्वम् उपायोपेयत्वस्य भेदापेक्षत्वात्तत्राह *परागिति । अस्यार्थः । पराचः शब्दादयोऽर्थाः येषां प्रमेयास्तानि प्रत्यक्षादिप्रमाणानि परागर्थप्रमेयाणि तेषु फलत्वेन सम्मता या संवित् वस्तुतस्तु न फलं जन्माभावात् सैव परमात्मस्वरूपा वेदान्तोक्तिलक्षणप्रमाणस्य प्रमेयस्तात्पर्यगम्योऽर्थः । तथाचाविद्याविरोध्याकारेणोपायत्वं तन्निवृत्त्याऽऽत्मना च फलत्वादुपेयतेत्येकत्रैवात्मन्याकारभेदादुभयथात्वमिति ॥८०॥ अपि चाद्वितीयात्मबोधिवेदा-

अबोधकत्वान्नो मात्वं स्यादितोऽन्यार्थकल्पने ॥
वेदान्तानामतो ध्यानविध्याद्यर्थो न कल्प्यताम्॥८१॥
नन्वेवमपि मानत्वव्याघातः स्यात्क्रियाविधेः ॥
अद्वयात्मनि सम्बुद्धे कर्मानुच्छित्त्यसम्भवात् ॥ ८२ ॥
नैतदेवं यतो शेषमानानामपि मानता ॥
आपरात्मावबोधात्स्याद्बोधात्पूर्वमबाधनात् ॥ ८३ ॥
ऊर्ध्वं त्विष्टममानत्वमैकात्म्यमतिबाधनात् ॥
मानान्यपि च बाध्यन्ते मानेन प्रबलेन हि ॥ ८४ ॥
श्येनादिविधिबाधः स्यादाहिंसाविधिना यथा ॥
तथैवैकात्म्यमानेन द्वैतमानं प्रबाध्यताम् ॥ ८५ ॥
श्येनाहिंसाविधी एतौ दृष्टादृष्टार्थभेदतः ॥
व्यवस्थितौ तयोरेकमबाध्यममतं यदि ॥ ८६ ॥

न्तानामन्यार्थत्वकल्पनेऽबोधकतालक्षणमप्रामाण्यं स्यादतः कार्यार्थत्वं न कल्प्यमित्याह *अबोधकत्वादिति ॥ ८१ ॥ अद्वयानुभवविषयत्वं वेदान्तानाममृष्यन्नाशङ्कते *नन्विति। अद्वितीयात्मनि वेदान्तप्रामाण्येऽपि तज्ज्ञानेन कारकादिभेदस्यापहृतत्वात्कर्मकाण्डप्रामाण्यं व्याहन्येत तथा च तदेकदेशवेदान्तेष्वप्यनाश्वासः प्रसज्येतेति भावः ॥८२॥ किं तस्याप्रामाण्यं ज्ञानात्पूर्वं व्याहन्येत पश्चाद्वा ?। नाद्य इत्याह *नैतदिति। आत्मज्ञानपर्यन्तं मानत्वे हेतुमाह *बोधादिति ॥ ८३ ॥ द्वितीयमिष्टापत्त्या दूषयति *ऊर्ध्वमिति। ननु मानानां परस्परबाध्यबाधकभावो न दृष्टचरोऽत आह *मानानीति ॥८४॥८५॥ क्रोधारातिवशीकृतचित्तस्य दृष्टहिंसार्थतया श्येनादिविधिः जितक्रोधस्यादृष्टार्थतया न हिंस्यादिति विधिरिति व्यवस्थिताधिकारकत्वान्न तयोर्बाध्यबाधकतेति शङ्कते *श्येनेति । *अबाध्यममतमिति । अबा-

तर्ह्यद्वैतद्वैतमाने तत्त्वातत्त्वार्थगोचरे ॥
उभयोर्व्यवतिष्ठेतां नरयोर्मुक्तबद्धयोः ॥ ८७ ॥
कर्माण्यतो विधीयन्तामविवेकिनरं प्रति ॥
न तु विध्वस्तसकलकर्महेतुं बुधं प्रति ॥ ८८ ॥
सम्यग्विमृदिताशेषध्वान्तस्य च न पूर्ववत् ॥
अज्ञानादि पुनः कर्तुं शक्यते हेत्वसम्भवात् ॥ ८९ ॥
सर्वकर्मनिरासेऽतोऽधिकारः स्याद्विवेकिनः ॥
बुभुत्सोरपि संसिद्धो बुद्धत्वपदवाञ्छनात् ॥ ९० ॥
कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते ॥

ध्यमिति कृत्वोदाहरणमसम्मतमित्यर्थः ॥ ८६ ॥ प्रकृतेऽपि विद्वदविद्वद्विषयतया काण्डद्वयव्यवस्थोपपत्तेर्न बाध्यबाधकतेत्याह *तर्हीति ॥ ८७ ॥ ८८ ॥ अथ विद्वानपि यथापूर्वं मानतो व्यवहरति तत्कथं ज्ञानादूर्ध्वं विध्याद्यप्रामाण्यं? तत्राह *सम्यगिति । अत्राज्ञानशब्दस्तज्जन्यकर्मपरः । न च विदुषो मानप्रवृत्तिहेत्वज्ञानविलये व्यवहारानुपपत्तिरिति वाच्यम् । बाधितानुवृत्त्याऽपि तत्सम्भवादित्यर्थः ॥८९॥ फलितमाह *सर्वेति । विवेकिनः साक्षात्कारवतः । अथ यद्यविद्याविषयः कर्माधिकारस्तर्हि विविदिषासंन्यासो न स्यादित्याशङ्क्याह *बुभुत्सोरिति । विविदिषोद्देशेन कर्मविधानात्तत्सिद्धौ तेन प्रयोजनाभावाद्विविदिषोरपि कर्मत्यागो घटते इति भावः ॥९०॥ विविदिषोः कर्मत्यागे युक्त्यन्तरमाह *कारकेति । कर्त्रादिकारकाणां व्यवहारो नाम कर्म तस्मिन् सति जिज्ञास्यमानं शुद्धं वस्तु वीक्षितुं न क्षमः कर्मापहृतधीत्वादतो न जिज्ञासोः कर्माधिकारः । आरुरुक्षोर्मुनेर्योगमित्यादिस्मृतेरिति भावः ॥ किञ्च निष्प्रपञ्चतत्त्वे विवेकविषयीकृते कर्मनिमित्ताभिमानशैथिल्यान्न तस्मिन्नधिकार इत्या-

शुद्धे वस्तुनि सिद्धे तु कारकव्यापृतिर्न हि ॥ ९१ ॥
कारकाकारकधियोर्नैकदैकत्र वस्तुनि ॥
विरोधात्सम्भवोऽस्तीह प्रकाशतमसोरिव ॥ ९२ ॥
अविरोधः क्रमेण स्यात् स्थितिगत्योरिवेति चेत् ॥
नात्मज्ञानस्य कूटस्थवस्तुतन्त्रत्वहेतुतः ॥ ९३ ॥
नौष्ण्यात्मको मितो वन्हिः क्रमशो ऽक्रमशो ऽथवा ॥
वस्तुतः शीततामेति कर्तृतन्त्रं तथा भवेत् ॥ ९४ ॥
भेदाभेदावुपाश्रित्य यो ऽप्याह ज्ञानकर्मणोः ॥
एकाधिकारं, सोऽप्यत्र विरुद्धत्वं कथं नुदेत् ॥ ९५ ॥
अतश्चाज्ञानकर्मादिधर्मशून्यमविक्रियम् ॥
अक्रियाकारकं वाञ्छन्नानन्दं श्रुतिमानतः ॥ ९६ ॥

ह *शुद्धे वस्तुनीति ॥ ९१ ॥ अपि च विवेकिनस्तावदकारकात्मधीरस्ति तस्य कर्माधिकारे कारकधीर्वाच्या, तयोश्च यौगपद्यं क्रमो वा ? नाद्य इत्याह *कारकेति ॥९२॥ द्वितीयमुत्थापयति *अविरोध इति । दूषयति *नेति। अकारकधियोऽविकारिब्रह्मविषयत्वात्तस्यां कर्मप्रवृत्तिनिमित्तकारकधीर्नोत्पद्यते तन्निमित्तजात्याद्यभिमानभङ्गादित्यर्थः ॥ ९३ ॥ अकारकब्रह्मणि मिते कारकधीर्नोदेतीत्यत्र दृष्टान्तमाह *नौष्ण्यात्मक इति । ननु षोडशिग्रहणाग्रहणवदात्मनि कारकाकारकत्वे स्यातामिति नेत्याह *कर्तृतन्त्रमिति। पुरुषकृतिसाध्ये कर्मणि तत्सम्भवेऽपि व्यवस्थितरूपे आत्मनि विकल्पायोग इत्यर्थः ॥ ९४ ॥ भास्करमतमाशङ्क्य निरस्यति *भेदेति। वास्तवयोरेकत्रासम्भवादिति भावः ॥९५॥ श्रुतिस्मृत्युपपत्तिभिः साधितं जिज्ञासोरपि कर्मानाधिकारमुपसंहरति *अत इति । *तज्ज्ञानन्निति। अज्ञानादिसकलानर्थशून्यनिरतिशयपरमानन्दस्य मुमुक्षुणा ज्ञानमात्रेण प्राप्यतां तु-

तद्विरुद्धफले बाह्यसाधने ऽनेककारके ॥
कथं कर्मणि तज्ज्ञानन्मनो दध्याद्धसन्नपि ॥ ९७ ॥
वारिपथ्याशनोपेतं सर्वानर्थविवर्जितम् ॥
मार्गं त्यक्त्वा सुधीः को वा पिपासत्यतथाविधे॥९८॥
विरक्तस्य तु जिज्ञासोर्ज्ञानान्नान्यद्व्यपेक्षणम् ॥
कर्मापेक्षा हि साध्येऽर्थे सिद्धेऽर्थे न तदर्थकम् ॥ ९९ ॥
ऐकात्म्यमेव तन्मेयं तस्यैवाप्रतिबोधतः ॥
बुद्धो भेदो न तन्मेयो भेदाभेदौ तु दुःशकौ ॥ १०० ॥
नन्वविद्यावदिष्टं चेद्ब्रह्म दोषो महानयम् ॥
निरविद्ये च विद्याया आनर्थक्यं प्रसज्यते ॥ १ ॥

च्छकर्मफलस्य बाह्यबहुसाधनसाध्यतां जानन्हसन्नपि लीलया कर्म न करोतीत्यर्थः ॥९६॥९७॥ समीचीनोपायलाभे बुद्धिपूर्वकारी तद्विरुद्धे न प्रवर्तेत इत्यत्र लौकिकदृष्टान्तमाह *वारीति ॥८९॥ अथ कर्मणैव हि संसिद्धिमित्यादिस्मृत्या कर्मणो मुक्तिहेतुत्वप्रतीतेः कथं तस्यातथाविधत्वम् ? अत आह * विरक्तस्येति । स्मृतौ सिद्धिपदं शुद्धिपरमिति भावः ॥ ९९ ॥ ज्ञानस्य मुक्तिहेतुत्वेऽपि नाद्वैतविषयस्य तद्धेतुता येन तस्मिन्सति कर्माधिकारो न स्यात्किन्तु तटस्थेश्वरविषयस्येत्याशङ्क्य, श्रुतेरज्ञातार्थपरत्वान्नैवमित्याह *ऐकात्म्येति । बुद्ध इति, अनुमानादिनेति शेषः । भेदशब्देन भिद्यत इति व्युत्पत्त्याऽद्वैतव्यतिरिक्तः सर्वोऽपि विवक्षितः ॥ १०० ॥ ब्रह्मणोऽप्यज्ञातत्वमाक्षिपति *नन्विति । ज्ञानरूपं ब्रह्म नाज्ञानमास्कन्दति व्याघातादित्यर्थः । मास्तु तर्हि ब्रह्मण्यविद्येत्याशङ्क्य, तर्हि तदभिन्नजीवेऽपि तदयोगात् ज्ञानवैयर्थ्यमित्याह *निरविद्येति ॥ १ ॥ ब्रह्मणो वास्तवं नि-

मैवं नभःस्थसूर्यस्य समेघामेघते इव ॥
सविद्यनिरविद्यत्वे किं न स्तो दृष्टिभेदतः ॥ २ ॥
अविचारात् घनच्छन्नो निर्घनस्तु विचारतः ॥
अतत्त्वतत्त्वदृष्टिभ्यां ब्रह्मापि द्विविधं तथा ॥ ३ ॥
अस्याविद्येत्यविद्यायामेवासित्वा प्रकल्प्यते ॥
ब्रह्मद्वारा त्वाविद्येयं न कथञ्चन युज्यते ॥ ४ ॥
न जानाम्यहमित्येषाऽनुभूतिः सर्वसम्मता ॥
तत्राविद्याचिदात्मानौ तत्सम्बन्धश्च भान्त्यमी ॥ ५॥
अविचाराद्भासमाना विचाराद्विनिवर्तते ॥
अविद्येयं चिदात्मा तु भात्येवासौ निरन्तरम् ॥ ६ ॥
अविद्या त्वविचारेण भासते, तन्निरूपणे ॥
अविद्वान्वाऽथ विद्वान्वा नोभावप्यत्र शक्नुतः ॥७॥

रविद्यत्वं, साविद्यत्वं तु काल्पनिकमतो नोक्तदोष इति सदृष्टान्तमाह *मैवमिति ॥ २ ॥ ३ ॥ उक्तमेवार्थं सङ्क्षेपविस्तराभ्यामाह *अस्येति । अविद्यायामासित्वा स्थित्वा विचारमकृत्वेति यावत् । ब्रह्मद्वारा ब्रह्मीभूतदृष्ट्या ॥ ४ ॥ विचारशून्यैः प्रत्यक्त्त्वे कल्पिताऽविद्यास्तीति पूर्वार्द्धेनोक्तम् अर्थं विस्तरेणाह *नेति ॥ ५ ॥ साक्षिनिष्ठतयाऽविद्याऽनुभूयते चेत्तर्हि सत्यैवास्त्वित्यत्राह *विचारादिति । यदि सा सत्या स्याद्विचारजन्यसाक्षात्कारानन्तरमपि चैतन्यवदेव प्रतीयेतेत्यभिप्रेत्याह *चिदात्मा त्विति ॥६ ॥ तर्हि तस्याः कल्पितत्वे तन्निरासयत्नवैयर्थ्यमित्याशङ्क्य, तस्याः कल्पितत्वं केनापि ज्ञातुं न शक्यत इत्याह *अविद्येति । भासते इत्यनन्तरं यद्यपि तथापीति द्वयमध्याहर्तव्यम् ॥७॥ उभयोरशक्तिं क्रमेणाह *अविद्यावानि-

अविद्यावानविद्यात्वं न निरूपयितुं क्षमः ॥
ब्रह्मबोधात्पुरा तस्या वस्तुत्वेनैव भासनात् ॥ ८ ॥
न निरूपयते विद्वान्विद्यादृष्ट्यैव बाधनात् ॥
वेद्यं ब्रह्मैव विद्यायां भासते बाध्यते तु सा ॥ ९ ॥
निद्राया न हि निद्रात्वं निद्राणेन निरूप्यते ॥
अनिद्राणोऽप्यपश्यंस्तां न निरूपयितुं क्षमः ॥ १० ॥
अथ बुध्वा ऽनुभूतां तामनिद्राणःपरामृशेत् ॥
परामृशत्वविद्यां च बोधादूर्ध्वं बुधस्तथा ॥ ११ ॥
अविद्याब्रह्मसम्बन्धमविद्यादृष्टिकल्पितम् ॥
परामृशत्यतः सिद्धमस्याविद्येत्युदीरितम् ॥ १२ ॥
अविद्यावृत्तवीक्षायां ब्रह्मसम्बन्धतेत्यपि ॥

ति । अविद्यात्वं कल्पितत्वम् । निरूपयितुं साक्षात्कर्तुम् ॥ ८ ॥ विद्यादृष्ट्येत्युक्तं विवृणोति *वेद्यमिति । तस्याः प्रत्यङ्मात्रकालीनत्वं बाध्यत्वमित्यर्थः ॥ ९ ॥

उक्तमर्थं दृष्टान्तेन स्पष्टयति *निद्राया इति। निद्राशब्देनात्र तज्जन्यो स्वप्नो लक्ष्यते, तस्य निद्रात्वं कल्पितत्वमिति ॥ १० ॥ निद्राणस्य तत्काले कल्पितत्वज्ञानाभावेऽपि बोधानन्तरं तस्य बाध्यत्वलिङ्गेन तदस्तीति शङ्कते * अथेति । तर्हि तद्विद्वानपि विचारशून्येन मया प्रत्यगभिन्ने ब्रह्मणि कल्पिताऽविद्येति जानातु अथापि तन्निवृत्तये पूर्वं प्रवृत्तिर्नानुपपन्नेत्यभिप्रेत्याह *परामृशत्विति ॥ ११ ॥ यतो ऽविचारदशाकल्पितं परामृशत्यतोऽस्याविद्येति श्लोकपूर्वार्धार्थ उपपद्यत इत्याह *अविद्येति ॥ १२ ॥ वृत्तानुवादपूर्वकं ब्रह्मद्वारेत्युत्तरार्द्धं व्याचष्टे *अविद्यावृत्तेति । अविचारदशायामित्यर्थः । ब्रह्मवृत्तेति । पर-

ब्रह्मवृत्तपरीक्षायां नासौ ब्रह्मस्पृगिष्यते ॥ १३ ॥
तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ॥
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥ १४ ॥
अतः प्रमाणतोऽशक्या ऽविद्याऽस्येति परीक्षितुम् ॥
कीदृशी वा कुतो वेति ब्रह्मदृष्ट्या कथञ्चन ॥ १५ ॥
वस्तुनोऽन्यत्र मानानां व्यापृतिर्न हि युज्यते ॥
अविद्या च न वस्त्विष्टं मानयोगासहिष्णुतः ॥ १६ ॥
अविद्याया अविद्यात्वमिदमेवात्र लक्षणम् ॥
मानयोगासहिष्णुत्वमसाधारणमिष्यते ॥ १७ ॥
मानेन ब्रह्मवीक्षायामविद्यागन्धवर्जनात् ॥
ब्रह्मद्वारेति सुष्टूक्तं नोक्तदोषद्वयं ततः ॥ १८ ॥
एवं चाज्ञातमैकात्म्यं सुस्थाऽतो ऽस्यैव मेयता ॥

मार्थतो विचार्यमाण इत्यर्थः ॥ १३ ॥ उक्तमर्थं विवृणोति *तत्त्वमिति ॥ १४ ॥ यतो वाक्योत्थविद्या सकार्याविद्यायास्त्रिकालवर्त्तिनीमपि सत्तां न मृष्यते ऽतो मुक्तस्य सकार्याविद्याऽस्तीति न मानतः शक्यं निश्चेतुमित्याह *अत इति॥१५॥ अज्ञानस्याप्रामाणिकत्वमनुमानेनापि साधयितुं व्याप्तिमाह *वस्तुन इति । यन्मानायोग्यं तदवस्तु यथा शशशृङ्गमिति व्याप्तियुक्त्याऽनुमानमाह *अविद्येति॥ विमतं मानयोग्यं शास्त्रार्थत्वाद्ब्रह्मवदित्यनुमानमाशङ्क्य, हेत्वसिद्धिमभिसन्धायाह *अविद्याया इति ॥ १७ ॥ अत एवोक्तं साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रकाश्यत इति । सङ्ग्रहश्लोकशेषस्य निराविद्यतामाह *मानेनेति ॥ १८ ॥ एवं साविद्यत्वनिरविद्यत्वं दृष्टिभेदेन ब्रह्मण्युपपादितम् अतोऽस्याज्ञातत्वेन वेदान्तप्रमेयत्वं सुस्थमित्याह *एवं चेति । नन्वेवमपि प्रत्यक्षविरुद्धत्वादद्वैतस्य तद्बोधकशा-

प्रत्यक्षं द्वैतबोध्यत्र दौर्बल्यान्न विरुध्यते । १९ ॥
आसन्नत्वादाश्रयत्वाद्वैशद्याच्चात्मवस्तुनः ॥
तद्बोधिशास्त्रं प्रत्यक्षात्प्रबलं द्वैतबोधिनः ॥ २० ॥
प्रत्यक्षं तद्यथा ऽऽसन्नं परोक्षार्थावबोधिनः ॥
सर्वप्रत्यक्तमे तद्वद्बोधो वाक्योत्थ आत्मनि ॥ २१ ॥
आत्मानं सत्यमाश्रित्य मिथ्याद्वैतं प्रसिध्यति ॥
आत्मानुभववैशद्याज्जडार्थो विशदीभवेत् ॥ २२ ॥
अतः प्रबलमानेन ब्रह्मतत्त्वेऽवबोधिते ॥
विद्याफलस्य प्रत्यक्षान्नास्याभूतार्थवादता ॥ २३ ॥
ननु निर्धूतशोकादि फलं यत् श्रूयते श्रुतौ ॥
आत्मविद्यास्तुतिर्ह्येषा विद्यायां पुम्प्रवृत्तये ॥ २४ ॥

स्वस्य ग्रावप्लवनादिवाक्यवदप्रामाण्यमित्याशङ्क्य, तस्य प्रत्यक्षापेक्षया प्रबलत्वान्न तद्बाध्यतेत्याह *प्रत्यक्षमिति ॥१९॥ तस्य प्राबल्ये हेतुत्रयमाह *आसन्नत्वादिति ॥२०॥ आद्यं हेतुं विवृणोति *प्रत्यक्षमिति। परोक्षादनुमेयाद्वस्तुनः सकाशात्प्रत्यक्षविषयभूतं वस्तु यथा सन्निहितमिष्टं तथा ब्रह्मात्मनि वेदान्तवाक्यजो बोधः सर्वतः सन्निहितं विषयीकरोति तद्विषयात्मनः प्रत्यक्तमत्वादित्यर्थः॥२१॥ द्वितीयतृतीयौ विशदयति* आत्मानमिति । कल्पितस्य सत्याधिष्ठानमन्तरा स्थित्यनुपपत्तेरित्यर्थः । *आत्मेति । घटाद्यवच्छिन्नचैतन्यस्फूर्त्या तत्स्फूर्तिरिति भावः ॥२२॥ तस्माद् ब्रह्मज्ञानफलवाक्यस्य गुणार्थवादत्वं नेति प्रकृतमुपसंहरति* अत इति। तत्र विद्वत्प्रत्यक्षमपि हेतुं करोति *विद्येति॥२३॥ विद्याफलविषयमागमं "तरति शोकमात्मवित्" इत्यादिकमनुभवविरोधादपाकुर्वन्नाशङ्कते *नन्विति । फलं, ज्ञानस्येति शेषः ॥ २४ ॥ यत्तु तत्र विद्वत्प्रत्यक्षमुक्तं तत्प्रत्याह *मनोराज्येति ।

मनोराज्यसमं मन्ये सर्वमेतत्कृतं फलम् ।
न प्रत्येमि यतः साक्षात्प्रत्यक्षं ज्ञानतः फलम् ॥२५॥
अत्रोच्यते फलं त्विष्टं गम्यमानं प्रमाणतः ॥
त्यक्त्वा कल्पयसे कस्मादनिष्टामश्रुतां स्तुतिम् ॥२६॥
स्वप्नस्थानादिसञ्चारिविज्ञानमयनामकः ॥
धीस्थचैतन्यबिम्बोऽयं सदा शोचतु मुह्यतु ॥ २७ ॥
बहुशोऽसङ्गवचसा निःसङ्गत्वं ब्रुवाणया ॥
श्रुत्यैव शोकमोहादि बिम्बात्मनि निवारितम् ॥२८॥
अहं दुःखीतिधीर्मूढं शोचन्तं प्रतिबिम्बितम् ॥
चिदाभासं प्रगृह्णातु किमायातं चिदात्मनि ॥ २९ ॥
आभासगतशोकादि स्वात्मन्यारोप्यते यदि ॥

विद्याया दृष्टफलत्वे विदुषि मय्यप्युपलभ्येत नोपलभ्यते ततस्त्वदनुभवो ऽसम्मत इत्यर्थः ॥ २५ ॥ श्रुतेः शोकनाशपरतात्यागे तस्यानिष्टत्वं वा हेतुः वाक्यादनवगम्यमानत्वं वेति विकल्पमभिसन्धाय क्रमेण निरस्यति *फलमिति ॥ २६ ॥ नन्वनुक्तोपालम्भोऽयं अहं दुःखीत्यादिप्रत्यक्षविरोधादात्मनः शोकादिनाशपरत्वं फलश्रुतेर्नास्तीत्युक्तत्वादित्याशङ्क्य, प्रत्यक्षश्रुत्योर्भिन्नविषयत्वादविरोध इत्याह *स्वप्नेत्यादि । स्थानत्रयसञ्चारोक्त्याऽऽगमापायिभ्यः स्थानतदभिमानिभ्योऽन्यं तत्साक्षिणं सदानुभूतिस्वभावं प्रत्यञ्चमुक्त्वा तस्यावस्थात्रयासम्बन्धात्तत्सम्बन्धाधीनदुखाभावमाह वेदः, अतः प्रत्यक्षश्रुत्योर्भिन्नविषयतया विरोधसमाधेः श्रुत्यैवोक्तत्वान्न तत्र विरोधशङ्केत्यर्थः ॥ २७ ॥ ॥२८॥२९॥ चिदात्मनो निर्दुःखत्वेऽसङ्गश्रुत्या तद्गतशोकनिवारणमनुपपन्नम् अप्रसक्तत्वादित्याशङ्क्य, वस्तुतस्तदभावेऽप्यारो-

आरोपोऽपोद्यते श्रुत्या निःसङ्गत्वादिबोधनात् ॥३०॥
चित्स्वरूपचिदाभासौ वाक्याहम्बुद्धिगोचरौ ॥
अदुःखिदुःखिनौ भूत्वा ऽनुभूयेते यथायथम् ॥ ३१ ॥
बोधात्प्राग्द्विविधं दुःखमेकं बुद्धिस्वभावजम् ॥
रोगावमानदारिद्र्यपुत्रहान्यादिरूपकम् ॥ ३२ ॥
अपरं त्वीदृशे दुःखे मग्नोऽहं बहुजन्मसु ॥
इत उद्धर्तुमात्मानं न शक्नोमीति मोहजम् ॥ ३३ ॥
तत्राद्यं कर्मजत्वेन नश्येद्भोगादृते न हि ॥
द्वितीयं भ्रमजं तत्त्वबोधादेव निवर्तते ॥ ३४ ॥
हर्षशोकौ विभ्रमोत्थौ कर्मोत्थसुखदुःखयोः ॥
बोधहेयौ हर्षशोकौ भोक्तव्ये तु सुखेतरे ॥ ३५ ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥
मत्वा धीरो हर्षशोकौ जहातीतिवचः प्रमा ॥ ३६ ॥

पितं तन्निषिध्यते इत्याह *आभासेति । यदि यस्मात् ॥ ३० ॥ प्रत्यक्षश्रुत्योर्भिन्नविषयत्वमुक्तमुपसंहरति *चिदिति । यथायथं विभज्यानुभूयेते, विद्वद्भिरिति शेषः ॥ ३१ ॥ किञ्च चिदाभासेऽपि पूर्ववन्न सर्वदुःखानुवृत्तिः किन्तु कतिपयदुःखस्यैव निष्फलस्येति वक्तुं बोधात्पूर्वं दुःखद्वैविध्यं दर्शयति *बोधात्प्रागिति । स्वाभाविकं विवृणोति *रोगेति ॥३२॥ मोहजमाह *अपरमिति ॥ ३३ ॥ ३४ ॥ बोधानन्तरमपि प्रारब्धप्रापितसुखदुःखयोर्भोक्तव्यत्वेऽपि तज्जन्यहर्षशोकयोर्नानुवृत्तिः तयोर्भ्रान्तिमात्रजन्यत्वादित्याह *हर्षेति । सुखदुःखयोः, फलभूताविति शेषः । मदविशेषः सुखफलं हर्षः, रोदनताडनादि दुःखफलं शोकः ॥३५॥ उक्तेऽर्थे प्रमाणमाह *दुःखेष्विति । प्रमा प्रमाणम् ॥३६॥ मत्वा

धीरत्वं बुद्धतत्त्वस्य तत्त्वानुस्मृतिसन्ततेः ॥
पुनरप्युदियाद्भ्रान्तेर्वासनाविस्मृतिक्षणे ॥ ३७ ॥
पुनः संस्मृतिहेया ऽसावित्थं धीरैर्बुधैः सदा ॥
फलेऽनुभूयमाने त्वं कथमेतन्निरस्यसि ॥ ३८ ॥
श्रुतादपि न चेद्वाक्याज्जायेत फलवन्मतिः ॥
शङ्केतैवं जायते तु धीः शास्त्रादधिकारिणः ॥ ३९ ॥
नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः ॥

धीर इति धैर्यं हर्षशोकप्रहाणे हेतुरित्युक्तम् । धैर्येऽपि निरन्तरं तत्त्वानुसन्धानं हेतुरित्याह *धीरत्वमिति । भवतीति शेषः । तर्हि तत्त्वविस्मृतिकाले धैर्यापगमेन भ्रान्त्या हर्षादिवासना पुनरुदेष्यतीति शङ्कते *पुनरिति ॥३७॥ उदिताऽपि सा क्षणेन तत्त्वस्मृत्या निरस्यते इत्याह *पुनरिति । विद्वदनुभवमुपपाद्य एवमनुभूयमानं ज्ञानफलं दुरपह्नवमित्याह *इत्थमिति ॥३८॥ प्रत्यक्षं विद्याफलमित्येतन्मनोराज्यसममिति यदुक्तं तत्परिहरति *श्रुतादिति । श्रुतात्तत्त्वमस्यादिवाक्यादधिकारिणोऽपि फलवज्ज्ञानं यदि नोत्पद्येत तदा त्वदुक्तमाशङ्क्येत, न चैतदस्ति, "अधिकारिणः प्रमितिजनको वेदः" इति न्यायतस्तस्य वाक्यार्थधीसम्भवात्तत्फलोपलब्धेश्च । न ह्यनधिकारिणस्तदनुपलम्भः फलाध्यक्षं क्षेप्तुं क्षमते अयोग्यानुपलम्भत्वादिति भावः ॥ ३९ ॥ अधिकारिणो ऽपि मानान्तरान्न यथोक्तधीर्वस्तुनो मानान्तरायोग्यत्वादिति प्रसङ्गादाह *नित्येति । ननु वाक्यमपि यथोक्तार्थज्ञानजनकं न भवति श्रुतवाक्यानामपि सर्वेषां तदनुपलम्भादित्याशङ्क्य, अनधिकारिणां वाक्यार्थानुपलम्भस्तु पदार्थज्ञानाभावात् तदभावश्चाविवेकात्,तथाच जाग्रदाद्यवस्थातदभि-

वाक्यार्थस्यापि च ज्ञानं पदार्थस्मृतिपूर्वकम् ॥ ४० ॥
अन्वयव्यतिरेकाभ्यां पदार्थः स्मार्यते ध्रुवम् ॥
सम्यक्स्मृतपदार्थस्तु वाक्येऽधिक्रियते पुमान् ॥ ४१॥
युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ॥
अनभिज्ञेऽनर्थकं स्याद्बधिरेष्विव गायनम् ॥ ४२ ॥
शोधितत्वंपदार्थज्ञः साक्षादेव प्रपद्यते ॥
वाक्यादद्वैतमात्मानं दशमस्त्वमसीतिवत् ॥ ४३ ॥
नवसङ्ख्याहृतज्ञानो दशमो विभ्रमाद्यथा ॥
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥४३॥
अपविद्धद्वयोऽप्येवं तत्त्वमस्यादिना विना ।
वेत्ति नैकलमात्मानं प्रत्यङ्मोहाप्रबाधतः ॥ ४५ ॥
दशमस्त्वमसीत्यस्माद्दशमत्वं निजात्मनि ॥

मानिभ्यः परस्परं व्यावृत्तेभ्यस्तदनुस्यूतं साक्षिणमिदमंशाद्विविच्य तद्विलक्षणत्वेन यस्तु जानाति तस्याधिकारिणो वाक्यमर्थवत्, इतरस्य बधिरेषु गानवत् श्रुतमपि वाक्यमकिञ्चित्करमित्याह *वाक्यार्थस्येत्यादि॥४०॥४१॥४२॥शुद्धं त्वंपदार्थं जानाति चेत्तस्यैवापरोक्षसंविदात्मकत्वात् किं वाक्येनेत्यत आह *शोधितेति।वाक्यादेवेत्यन्वयः। तत्र दृष्टान्तमाह *दशम इति ॥४३॥ दृष्टान्तं विवृण्वन् दार्ष्टान्तिकमाह *नवेति द्वाभ्याम्। यथा वस्तुतो दशमः कश्चित्स्वात्मानं मैत्रोऽस्मीति अपरोक्षं तांश्च पश्यन्नपि नवपुरुषगणनमुषितबुद्धिर्दशमस्त्वमसीति वाक्यादृते दशमोऽस्मीति न वेत्ति एवमपरोक्षस्याप्यात्मनो ऽद्वितीयत्वेनाज्ञातत्वाद्वाक्यप्रमाणकतेत्यर्थः ॥ ४४ ॥ ४५ ॥ वाक्यं न साक्षात्कारजनकं वाक्यत्वात्सम्मतवदित्याशङ्क्य तत्रैव व्यभिचार-

साक्षात्करोति ब्रह्मत्वमेवं वाक्याच्चिदात्मनि ॥४६॥
बुभुत्सोच्छेदिनैवास्य सदसीत्यादिना दृढा ॥
प्रतीचि प्रतिपत्तिः स्यात्प्रत्यगज्ञानबाधतः ॥ ४७ ॥
अमात्वशङ्काऽसद्भावान्मानान्तरैश्चाविरोधतः ॥
सदसीत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् ॥४८॥
वाक्याधिकारहेतौ च पदार्थप्रतिशोधने ॥
सन्न्यास उपकारीति प्राहतुर्हि श्रुतिस्मृती ॥ ४९ ॥
त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ॥
त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥५०॥
मुक्तेश्च बिभ्यतो देवा मोहेनापिदधुर्नरान् ॥
ततस्ते कर्मसूद्युक्ताः प्रवर्त्तन्ते विचक्षणाः ॥ ५१ ॥
अतः संन्यस्य सर्वाणि कर्माण्यात्मावबोधतः ॥

माह *दशम इति ॥ ४६ ॥ बुभुत्सितस्य शब्दबोध्यत्वादात्मनश्चापरोक्षत्वेनातथात्वादशाब्दत्वमित्याशङ्क्य सामान्यतः तस्य दृष्टत्वेऽप्यद्वितीयानन्दत्वेनादृष्टत्वाद् बुभुत्साऽप्यस्ति अतस्तन्निवर्तकवाक्येनाबाधितासन्दिग्धावबोधः स्यादेवेत्याह *बुभुत्सेति ॥ ४७ ॥ वाक्यादेव ज्ञानमुत्पद्यते इत्युपपादितमुपसंहरति *अमात्वेति । असदिच्छेदः ॥ ४८ ॥ एवं च शोधितपदार्थस्य पुंसो वाक्यार्थे ऽधिकार इत्युक्तम् एवं पदार्थशोधने च त्यक्तसर्वकर्मण एवाधिकार इत्याह *वाक्येति ॥ ४९ ॥ श्रुतिमुदाहरति *त्याग इति । मोक्षशब्देन तद्धेतुज्ञानं लक्ष्यते ॥ ५० ॥ तर्हि मुक्तिकारणं ज्ञानमुद्दिश्य सर्वे किमिति न प्रव्रजेयुरित्याशङ्क्याह *मुक्तेरिति ॥ ५१ ॥ यतो देवमायानिमित्ता नराणां कर्मसु प्रवृत्तिरतस्तदुपसादितमोक्षाभिलाषो विवेकी स-

हत्वा ऽविद्यां धियैवेयात्तद्विष्णोः परमं पदम् ॥५२॥
इति भाल्लविशाखायां श्रुतिवाक्यमधीयते ॥
सर्वकर्मनिरासेन तस्मादात्मधियो जनिः ॥ ५३ ॥
प्रवृत्तिलक्षणो योगो ज्ञानं सन्न्यासलक्षणम् ॥
तस्माज्ज्ञानं पुरस्कृत्य सन्न्यसेदिह बुद्धिमान् ॥५४॥
इत्येवमादिवाक्यानि नानास्मृतिषु कोटिशः ॥
ज्ञानाय विदधत्युच्चैः सन्न्यासं सर्वकर्मणाम् ॥५५ ॥
यदुक्तं पूर्वपक्षादौ श्रुतत्वात्कर्मणः श्रुतौ ॥
विमुक्तिहेतुः कर्मेति तत्रेदमभिधीयते ॥ ५६ ॥
केन चोक्तं क्रिया मुक्तौ साधनत्वं न गच्छति ॥
तमेतमिति नाश्रौषीः संस्कारा इति च स्मृतिम् ॥५७॥

र्वकर्माण्यविवेकपूर्वकाणि त्यक्त्वा श्रवणादिपरिपाकलब्धज्ञानाग्निनाऽविद्यां दग्ध्वा ज्ञानानन्दसदेकतानमवच्छिन्नं पदं प्राप्नुयादित्याह *अत इति ॥ ५२ ॥ एषां वाक्यानां स्वकपोलकल्पितत्वं वारयति *इतीति ॥५३॥ स्मृतिमुदाहरति *प्रवृत्तीति । युज्यतेऽनेनेति योगः कर्म तेन हि पुमान्फलेन सम्बध्यते सप्रवृत्तिलक्षणः रागादिपूर्वकव्यापारहेतुक इत्यर्थः । पुरस्कृत्य उद्दिश्य ॥ ५४ ॥ ५५ ॥ एवं स्वमतं प्रसाध्य परोक्तदूषणलेशाननुभाष्य दूषयति *यदुक्तमित्यादिना ॥५६॥ तत्र किं कर्म साक्षान्मोक्षहेतुरुत परम्परया ? । नाद्यः । प्रापकाभावादित्यभिप्रेत्य कल्पान्तरमङ्गीकरोति *केनेति । विविदिषाद्वारा संस्कारद्वारा वा कर्म मुक्तिहेतुरित्युपगमादिति भावः । तत्राद्ये विविदिषावाक्यं प्रमाणयति *तमेतमिति । द्वितीये "यस्यैते चत्वारिंशत्संस्काराः"इत्यादिस्मृतिं दर्शयति *संस्कारा इति ॥ ५७॥ एवं च कर्माणि शुद्ध्यादिद्वारलाभे तैः प्रयोजनाभावात् ज्ञा-

चित्ते विविदिषोत्पत्तौ रागादेर्वा विनाशने ॥
कर्मापक्षीयते न्यासे ज्ञानकाले न गच्छति ॥ ५८ ॥
यच्चोक्तं कर्मणो नान्यन्मुक्त्यभ्युदयसाधनम् ॥
अस्तीति, तदसद्यस्मात्त्यागज्ञाने स्फुटं श्रुते ॥ ५९ ॥
निषेधविधिमात्रत्वं कर्मकाण्डस्य युज्यते ॥
न युक्तं ब्रह्मकाण्डस्य तत्र ब्रह्मावबोधनात् ॥६० ॥
वचसामाक्रियार्थानां जैमिनिर्विधिशेषताम् ॥
यत्प्राह तत्कर्मकाण्डे ज्ञेयं तद्विषयत्वतः ॥ ६१ ॥
अथातो ब्रह्मजिज्ञासेत्येवं व्यासेन कीर्त्तनात् ॥
धर्ममात्रस्य जिज्ञासाविषयो जैमिनेर्मतः ॥ ६२ ॥
विधिभक्तेन वेदान्ते किमर्थो विधिरुच्यताम् ॥

नाङ्गत्वेन तेषां त्याग एवेत्याह * चित्त इति ॥ ५८ ॥ उक्तरीत्या संन्यासज्ञानयोः पुमर्थहेतुत्वसिद्धेश्चोद्यान्तरमपि निरस्तमित्याह *यच्चेति ॥ ५९ ॥ * निषेधेति। कर्मकाण्डगतानामक्रियार्थानां वाक्यानां पुमर्थत्वाय विधिनिषेधशेषत्वेऽपि पुमर्थभूतब्रह्मबोधिवाक्यानां न तच्छेषतेत्यर्थः ॥ ६० ॥ अत एवानर्थक्यमतदर्थानामिति जैमिनीयवाक्यमपि कर्मकाण्डपरमित्याह । *वचसामिति ॥ ६१ ॥ किञ्च यदि सर्वेषां वस्तुबोधिवाक्यानां विधिशेषता स्यात् तदा सर्वज्ञबादरायणो ब्रह्ममीमांसां नारभेत, तेनारब्धत्वादपि जैमिनिवाक्यं कर्मकाण्डपरमित्याह *अथात इति ॥ ६२ ॥ किञ्च आत्मज्ञानविधेः प्रयोजनमपि नास्तीत्याह *विधिभक्तेनेति । वेदान्तप्रमेयस्य पुमर्थत्वसिद्धये वा विधिः, उत्पन्नज्ञानस्य विरोधिवृत्तिभिरन्यथात्वनिरसनाय वा, अविद्यानिरासार्थं वा, विद्याफलसिद्धये वेति

पुमर्थत्वं तु मेयस्य स्वाभाव्यान्न विधेर्बलात् ॥६३ ॥
विज्ञानमानन्दमिति ह्यात्मैवेति श्रुतिस्तथा ॥
पुमर्थस्यैव वेदान्तमेयत्वं प्रत्यपादयत ॥ ६४ ॥
अथोत्पन्नस्य बोधस्य संसारक्लेशबुद्धिभिः ॥
यदन्यथात्वं तद्ध्येयं विधानेन तदप्यसत् ॥ ६५ ॥
तज्ज्ञानं यस्य सञ्जातं जातमेवास्य नान्यथा ॥
गर्भस्थस्यापि हि सतो वामदेवस्य तद्यथा ॥ ६६ ॥
अविद्याया निरासार्थं विधिरित्यप्यसङ्गतम् ॥
उत्पन्ना चेत्तत्त्वविद्या नाविद्यां न निरस्यति ॥ ६७ ॥
दृष्टो ह्यविद्याविध्वंसो व्याधभावनयाऽन्विते ॥
राजसूनौ स्मृतिप्राप्ते व्याधभावनिवर्त्तनात् ॥ ६८ ॥
एवमेवात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः ॥
लब्धैकात्म्यस्मृतेर्व्येति सर्वाऽविद्या सकार्यका ॥६९॥

किंशब्दार्थः। आद्यं प्रत्याह *पुमर्थत्वमिति *आत्मैवेति। "आत्मैवानन्दः" इत्यादिश्रुतिरित्यर्थः ॥ ६३ ॥ ६४ ॥ द्वितीयमनुभाष्य दूषयति * अथेति। यथा वामदेवस्य मुनेर्मूत्रपुरीषाद्यनेकदोषदूषिते गर्भाशये शयानस्यापि पूर्वजन्मानुष्ठितश्रवणादिसंस्कृतस्य सम्यक् ज्ञानं जातं "तद्धैतत्पश्यन्" इति श्रुतेः। न च तत्कुतश्चिद् बाध्यते, एवमन्यस्यापि शुद्धबुद्धेः श्रवणादिजन्यज्ञानस्य नान्यथात्वं, न हि विपर्यासेन सम्यग्धीर्बाध्यत इति भावः ॥६५॥६६॥ तृतीयं निराकरोति * अविद्याया इत्यादिना। यथा कुतश्चिन्निमित्ताद्व्याधकुलसंवर्धितस्य राजसूनोः "नासि त्वं व्याधसूनू राजपुत्रस्त्वम्" इत्याप्तवाक्येन "राजपुत्रोऽहम्" इति स्मृतिप्राप्तौ चिरगृहीतोऽपि व्याधभावो निवर्त्तते एवं गुरूपदि-

न विद्याफलसिध्यर्थं विधिरित्यपि युज्यते ॥
विलक्षणं विधिफलाद्विद्याफलमिहोच्यते ॥ ७० ॥
उत्पत्तिराप्तिः संस्कारो विकारश्च विधेः फलम् ॥
मुक्तिर्विलक्षणैतेभ्यस्तेनेहानर्थको विधिः ॥ ७१ ॥
अनन्यायत्तसंसिद्धेर्निरविद्यात्मवस्तुनः ॥
न क्रियात्वं फलत्वं वा नापि कारकरूपता ॥ ७२ ॥
अतोऽत्र विध्यभावोऽयं न कथं चन दूषणम् ॥

ष्टवाक्यार्थज्ञानादेवात्मज्ञस्य सकार्याऽविद्या व्येति नश्यतीत्यर्थः ॥६७॥६८॥६९॥ चतुर्थं निरस्यति॥ न विद्येति ॥ ७० ॥ वैलक्षण्यमेव व्यनक्ति॥ उत्पत्तिरिति ॥ न तावन्मुक्तिरुत्पत्तिरुत्पाद्या वा । अक्रियात्वादनादित्वाच्च । नाप्याप्तिराप्या वा । असम्बद्धत्वात्प्राप्तरूपत्वात् । नापि संस्कारः संस्कार्या वा । अगुणत्वादनाधेयातिशयत्वाच्च । नापि विकारो विकार्या वा । अकार्यत्वादपरिणामित्वाच्च । तस्मान्न विधिफलं मुक्तिरित्यर्थः । फलितमाह ॥ तेनेति ॥७१॥ ज्ञाने विध्यसम्भवाद् ब्रह्मणस्तदशेषत्वेऽप्युपास्तिविधिसम्भवात्तच्छेषताऽस्त्वत आह॥ अनन्येति। न हि ब्रह्म उपास्तिविधिशेषः, तच्छेषत्वप्रयोजकीभूतक्रियादेस्तस्मिन्दुःसाधनत्वात् । न तावत्कारकाधीनात्मलाभत्वं ब्रह्मणोऽस्ति, अनन्याधीनसिद्धिकत्वात् । नाप्यविद्यावत्कारकत्वं, निरविद्यत्वात् । नापि फलत्वं, क्रियाजन्यत्वाभावात् । तस्माद्ब्रह्मणो नोपासनाविधिशेषत्वमपीत्यर्थः ॥ ७२ ॥ विधिशेषत्वाभावे वेदान्ताप्रामाण्यं मन्वाना वेदोषरा वेदान्ता इति केचित् तान् प्रत्याह ॥ अत इति ॥ सति विधौ शुद्धे ब्रह्मणि वेदान्तप्रामाण्यायोगात्तदभावे पुमर्थब्रह्मबोधित्वाद्युक्ता प्रशंसेति भावः

अलङ्कृतिरियं साध्वी वेदान्तेषु प्रशस्यते ॥ ७३ ॥
चोदनाभिर्नियुक्तोऽहं तथा ब्रह्माहमित्यपि ॥
परस्परविरुद्धत्वादेकदैकत्र न द्वयम् ॥ ७४ ॥
स्वामी सन्न हि भृत्येन स्वामिनेव नियुज्यते ॥
सम्बोधनीय एवासौ सुप्तो राजेव बन्दिभिः ॥७५॥
यत्रैतस्यात्मभावेन श्रुत्या ब्रह्मावबोध्यते ॥
न तत्र करणापेक्षा नेतिकर्त्तव्यता तथा ॥ ७६ ॥
यत्र त्वेष विधिस्थाने प्रहितः स्यात्फलेच्छया ॥
इतिकर्त्तव्यता तत्र करणादानमेव च ॥ ७७ ॥

॥७३॥ किंच ज्ञानविधिषु विद्वान्नियोज्यो विविदिषुर्वा ? नाद्यः इत्याह *चोदनाभिरिति ॥७४॥ न द्वितीय इत्याह *स्वामीति। विविदिषुः संसारमार्गादुत्तीर्णत्वाद्वेदस्य स्वामी ततस्तेन नासौ प्रेर्यते किंतु "देहादिसाक्षी त्वं ब्रह्मैवासि" इति वेदैरसौ बोधनीयस्तस्मान्नियोज्याभावान्न नियोग इति वेदान्तेषु न विधिरिति भावः ॥ ७५ ॥ वेदान्तेषु नियोगाख्यविधिनिरासेन ब्रह्मणस्तच्छेषत्वाभावेऽपि भावनाख्यविधिसम्भवात्तच्छेषत्वं तदवस्थमित्याशङ्क्याह * यत्रेति ॥ यत्राम्नाये तत्पदलक्ष्यं ब्रह्म त्वंपदलक्ष्यप्रत्यक्त्वेन तत्त्वमादिश्रुत्या बोध्यते, तत्र ज्ञातब्रह्मतत्त्वस्यापेक्ष्यमाणफलांशाभावान्न करणेतिकर्त्तव्यतापेक्षा युक्ताऽतो न वेदान्तेष्वंशत्रयवती भावनेत्यर्थः ॥ ७६ ॥ ननु तेषु नास्ति चेदंशत्रयवती भावना कुतस्तर्हि तस्याः सम्भावनेति तत्राह * यत्रेति ॥ ज्ञाताविध्यर्थः पुमान्यत्र वाक्ये स्वर्गादीच्छया प्रेरितः स्याद्यत्र करणेतिकर्त्तव्यतयोरुपादानं भाति तत्रांशत्रयसम्भवात्तद्वान्भावनाख्यो विधिरपि विधिस्थाने युक्त इति भावः ॥७७॥ तत्त्वमस्यादिवाक्यार्थधियोऽपि कर्मवाक्यार्थधीवत्पु-

आप्ताशेषपुमर्थस्य त्यक्तानर्थस्य च स्वतः ॥
अनात्मनीव नेच्छेयं कथं चित्स्यादिहात्मनि ॥ ७८ ॥
तन्निवृत्तौ निवर्त्तेत इतिकर्त्तव्यसाधने ॥
निरन्तरायतो ऽशेषपुमर्थस्यात्मरूपतः ॥ ७९ ॥
ननु मोहान्तरायायां मुक्तावस्तु यथोदितम् ॥
एकदेशो विकारो वा संसारीति मते कथम् ॥ ८० ॥
विकारावयवावेतौ वास्तवौ यदि सम्मतौ ॥
तदा न कर्मणा मुक्तिर्नापि ज्ञानेन कर्हिचित् ॥ ८१ ॥
यदा त्वविद्ययाऽध्यस्तं संसारित्वं न वास्तवम् ॥
तदा ह्यविद्याविध्वस्तावधिकारो न कर्मणि ॥ ८२ ॥

मर्थहेतुत्वात्तदिच्छया प्रवृत्तेरितिकर्त्तव्यताद्यादानद्वारा वेदान्तेष्वंशत्रयवती भावना स्यादित्याशङ्क्याह *आप्तेति। वाक्यात् ज्ञाततत्त्वस्याप्तानन्दत्वात्त्यक्तानर्थत्वाच्चानात्मनि स्वर्गादाविवापवर्गे नेच्छा सङ्गच्छते तस्यात्मत्वेनाप्तत्वादित्यर्थः॥७८॥ एवं फलेच्छानिवृत्तौ तदविनाभूतकरणाद्याकाङ्क्षानिवृत्तिमाह * तन्निवृत्ताविति ॥ मुमुक्षोः कथमाकाङ्क्षाऽभावः मुमुक्षुत्वव्याघातात्तत्राह ॥ *निरन्तरायत इति ॥ तत्तदाकाङ्क्षायामपि ज्ञाततत्त्वो न किंचित्कामयते। ज्ञानविधिः खल्वत्र निराचिकीर्षित इति भावः॥७९॥ उक्ताया मुक्तेः कर्मानपेक्षत्वेऽपि ब्रह्मविकारस्तदंशो वा जीव इति पक्षे ज्ञानस्याकारकत्वाज्जीवस्य परैक्यं कैवल्यं क्रियासाध्यमिति अभिसन्धाय शङ्कते * नन्विति ॥ ८० ॥ अस्मिन्पक्षे तयोः संसारित्वं वास्तवमध्यस्तं वा ? नाद्यः, अग्न्यौष्ण्यवत्स्वाभाविकधर्मस्य केनाप्यनिवृत्तेरित्याह * विकारेति ॥ ८१ ॥ द्वितीये ज्ञाततत्त्वस्य कर्मणि नाधिकार इत्याह * यदेति ॥८२॥

तदा तु कल्पनाः सर्वा विकारावयवादिकाः ॥
वृथैवैताः ह्यविद्यैव सर्वाः सम्पादयिष्यति ॥ ८३ ॥
स्वतो निःश्रेयसं पूर्णं तदपूर्णमविद्यया ॥
आभासते वृथैवास्याः प्रध्वंसो विद्यया भवेत् ॥ ८४ ॥
प्रध्वस्तायामविद्यायां पूर्णमेवावशिष्यते ॥
अनर्थको विधिस्तस्मात्सर्वो निःश्रेयसं प्रति ॥ ८५ ॥
निःशेषवाङ्मनःकायप्रवृत्त्युपरमात्मिका ॥
ब्रह्मनिष्ठेह वेदान्तैः पुंसः सम्पद्यते भृशम् ॥ ८६ ॥
ब्रह्मात्मतत्त्वव्युत्पत्तिमात्रेणात्राधिकारिता ॥
भवत्येव हि जिज्ञासोर्विरक्तस्य मुमुक्षतः ॥ ८७ ॥
ननूपक्रमसंहारपर्यालोचनया बुधैः ॥

किंचास्मिन्पक्षे ऽखण्डस्यैवाविद्यया संसारित्वोपपत्तौ विकारादिकल्पना मुधेत्याह * तदा त्विति ॥८३॥ एवं पूर्णब्रह्मणोऽविद्यया विद्यमानसंसारित्वप्रतीतौ तस्याः विद्यामात्रनिरस्यत्वाद्विधिवैयर्थ्यमित्याह * स्वत इत्यादिना ॥८४॥ ८५ ॥ यथोक्तं ज्ञानमुपनिषद्भ्यो न सिध्यति अधीतोपनिषदामपि केषांचिदनुपलम्भात्तस्मादुक्तफलमसम्भावितमिति तत्राह * निःशेषेति । इह मुमुक्षूणां मध्ये यस्य पुंसः स्वाभाविकाशेषव्यापारोपरमरूपा भृशं ब्रह्मनिष्ठा तन्मात्रपरताऽस्ति तस्य वेदान्तैः सम्पद्यते विद्येत्यनुषङ्गः ॥ ८६ ॥ ननु तत्त्वविदज्ञो वा ज्ञानहेतुष्वधिक्रियते? नाद्यः तस्य जिज्ञासोपरमात् । न द्वितीयः। अज्ञाते जिज्ञासाऽयोगादित्याशङ्क्य अधीतसाङ्गस्वाध्यायजन्यव्युत्पत्तिशङ्कितापातज्ञानवतोऽत्राधिकार इत्याह * ब्रह्मेति ॥ ८७॥ विधान्तरेण काण्डयोराधिकारभेदमाक्षिपति* नन्विति ॥ इषेत्वे-

वेदस्यैकार्थतात्पर्यमेकवाक्यतयोदितम् ॥ ८८ ॥
तेन निःशेषवेदोक्तकर्मानुष्ठानशालिनः ॥
विद्याधिकारो न ब्रह्मव्युत्पत्त्यादेर्हि केवलात् ॥८९॥
मैवं निःशेषवेदार्थमनुष्ठातुं नरः कथम् ॥
पुमायुषाऽपि शक्तः स्याद्येन ज्ञानेऽधिकारिता ॥९०॥
ततोऽधिकार्यभावेन वेदान्तानाममानता ॥
प्रसज्येत ततः शुद्धचित्तो विद्याधिकारभाक् ॥९१॥
संस्कारमात्रकारित्वं सर्वेषामपि कर्मणाम् ।
संस्कारः पच्यते पुंसः पूर्वजन्मकृतैरपि ॥ ९२ ॥
एवमत्रैकवाक्यत्वं नानुष्ठेयसमाप्तितः ॥

त्याद्युपक्रमस्य "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादेरुपसंहारस्य चालोकनया वेदस्यैकवाक्यतयैकार्थपरत्वं निश्चितमित्यर्थः॥८८॥ ततः किमित्यत आह *तेनेति । तेन एकवाक्यत्वहेतुना । दर्विहोममारभ्य यावत्सत्रं कर्मानुष्ठितवतो ज्ञानाधिकारिता ततो निःशेषकर्मानुष्ठानानन्तरं ज्ञाननियोगमनुतिष्ठतो मुक्तिर्न जिज्ञासोरित्यर्थः ॥ ८९ ॥ वेदोक्तसकलकर्मकारिणो ज्ञानाधिकारित्वे तत्करणस्याशक्यत्वाज्ज्ञानाधिकार्यसिद्धेस्तन्नियोगो निरधिकारः स्यादिति दूषयति * मैवमिति ॥ ९० ॥ इहैव सर्वकर्मकारिणो ज्ञानानधिकारित्वे फलितमाह * तत इति ॥ ९१ ॥ सर्ववेदस्यैकवाक्यत्वमुक्तमन्यथयति * संस्कारेत्यादिना ॥ ब्रह्मज्ञानोपकारकचित्तसंस्कारहेतुत्वात्कर्मणामर्थद्वारोपकार्योपकारकत्वमात्रेण काण्डयोरेकवाक्यत्वं, तथाचातीतजन्मकृतसुकृतैरपि विषयनैराश्यात्मकसंस्कारोत्पत्तिसम्भवेन जिज्ञासयैव मोक्षेऽधिक्रियते इत्यर्थः ॥ ९२ ॥ अपि चास्मन्मते ऽधिकारिचिन्तैव न कार्येत्यभिसन्धाय विकल्पयति * किंचेति । विकल्पस्य प्रकृता-

वैराग्यादिमतः पुंसस्तेन विद्याधिकारिता ॥ ९३ ॥
किञ्च ज्ञानमदृष्टार्थमुत दृष्टार्थमुच्यताम् ॥
कस्मिन्त्सत्यत्र किं ते स्यादिति चेद् भाष्यते शृणु॥९४॥
ब्रह्मज्ञानमदृष्टार्थमग्निहोत्रादिवद्यदि ॥
ततोऽधिकाराचिन्ता स्यात्कृतेऽप्यफलशङ्कया ॥९५॥
कामिनाऽप्यग्निहोत्रादि शूद्रेणानधिकारिणा ॥
कृतमप्यफलं तेन यत्नात्तत्र निरूप्यताम् ॥ ९६ ॥
दृष्टार्थत्वेऽपि तद्दृष्टम् अविद्यानाशमात्रकम् ॥
ततोऽपि चाधिकं किञ्चिद्यल्लभ्यमधिकारतः ॥ ९७ ॥
अविद्यानाशमात्रं तु विद्योत्पत्त्यैव लभ्यते ॥
पुमर्थस्य समाप्तत्वादधिकं नार्थ्यतेऽण्वपि ॥ ९८ ॥
अविद्याघस्मरज्ञानजन्ममात्रावलम्बिनः ॥
पुमर्थादधिकं धीमान्किं वा कामयते परम् ॥ ९९ ॥
भिद्यते हृदयग्रन्थिरित्याद्यपि च यत्फलम् ॥

नुपयोगमाशङ्क्याह * कस्मिन्निति ॥ ९४ ॥ ज्ञानस्यादृष्टार्थत्वपक्षेऽधिकारिनिश्चयं विना कामनामात्रेण प्रेक्षावत्प्रवृत्त्यनुपपत्तेस्तत्राधिकाराचिन्ता सफलेत्याह * ब्रह्मेति ॥ ९५ ॥ ९६ ॥ दृष्टार्थत्वं विकल्पयति * दृष्टार्थत्वेऽपीति ॥ तद् दृष्टम् तस्य ज्ञानस्य फलं दृष्टमित्यर्थः ॥९७॥ आद्ये आह * अविद्येति। अयं भावः अस्मिन्कल्पे ऽन्वयव्यतिरेकसिद्धफलत्वाच्छुक्त्यादिज्ञानवदात्मज्ञानस्य फलवत्त्वं निश्चित्य तत्कामस्याधिकारसिद्धेस्तद्विचारो मृषैवेति ॥ ९८ ॥ उक्तमेवार्थं स्पष्टयति * अविद्याघस्मरेति । शास्त्रादविद्याध्वंसिज्ञानलाभमात्राधीनपुरुषार्थस्य सम्भवेऽधिकमदृष्टफलं नार्थ्यते इत्यर्थः ॥ ९९ ॥ अविद्यानाशव्यतिरेकेण हृदयग्रन्थ्यादिनाशोऽपि ज्ञानफलमिति द्वितीयफलमाशङ्क्य तस्या-

अविद्यानाश एवैतदन्तभर्वति नो पृथक् ॥ १०० ॥
नासङ्गात्मविदा किञ्चिद्ग्रन्थिरात्मनि वीक्ष्यते ॥
अन्योन्याध्यासरूपस्य ग्रन्थेर्बोधे निवर्त्तनात् ॥१॥
नन्वविद्यानाशमात्रं दृष्टं विद्याफलं यदि ॥
अधीतवेदवेदार्था मुच्येरन्नखिलास्तदा ॥ २ ॥
मैवं विद्योदयो नास्ति प्रतिबन्धक्षयं विना ॥
अधीतवेदवेदार्थोऽप्यत एव न मुच्यते ॥ ३ ॥
प्रतिबन्धोऽप्रस्तुतश्चेद्बोधस्योदय ऐहिकः ॥
आमुष्मिकोऽन्यथेत्याह व्यासः सूत्रेण निर्णयम् ॥४॥
प्रतिबन्धक्षयो भूतो भवन्भावी त्रिधा मतः ॥
वामदेवशुकादीनां भूतो गर्भेऽवबोधनात् ॥ ५ ॥
वर्त्तमानोऽस्मदादीनां शृण्वन्तोऽपीह जन्मनि ॥
ये तत्त्वं नैव बुध्यन्ते तेषां भावीति निश्चयः ॥ ६ ॥

विद्यानिवृत्तिनान्तरियकतया न पृथक्फलत्वं, अतस्तत्रापि नाधिकारिचिन्तेत्याह * भिद्यत इति ॥ २०० ॥ आत्मनि कर्तृत्वाध्यासस्याविद्यानिवृत्त्या निवृत्तिं विद्वदनुभवेन द्रढयति * नासङ्गेति ॥ १ ॥ ज्ञानस्य दृष्टफलत्वे ऽतिप्रसङ्गमाशङ्क्य परिहरति * नन्वित्यादिना ॥ २ ॥ ३ ॥ अवगतशास्त्रार्थस्यापि प्रतिबन्धात् साक्षात्कारो नोदेति इत्यत्र "ऐहिकमप्रतिबन्धे तद्दर्शनात्" इति व्याससूत्रं संवादयति * प्रतिबन्ध इति ॥४॥ * प्रसङ्गात् प्रतिबन्धक्षये कालनियममाह *प्रतिबन्धेति ॥ ५ ॥ *अस्मदादीनामिति ॥ श्रवणानन्तरं येषां ज्ञानोदयः तेषां प्रतिबन्धनाशोऽनुवर्तमानः, येषां तु जन्मान्तरश्रुतवाक्यस्मरणाद्बोधस्तेषां भूत इत्यर्थः ॥ ६ ॥ इदानीन्तनानामप्रतिबद्धज्ञाना-

न चास्मदादिबोधस्य बोधाभासत्वशङ्कया ॥
प्रतिबन्धः कल्पनीयो ऽनुभूतिः शङ्क्यते कथम् ॥ ७ ॥
असंदिग्धाविपर्यस्तबोधः शास्त्रान्निजात्मनि ॥
उदितश्चेत्ततो ऽन्या काऽनुभूतिः प्रार्थ्यते वद ॥ ८ ॥
बोधेऽप्यनुभवो यस्य न कथंचन जायते ॥
तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥ ९ ॥
यस्य त्वनुभवे शङ्का प्रतिबन्धोऽस्तु तस्य सः ॥
किं नश्छिन्नमशङ्कस्य बोधस्तेन न वार्यते ॥ १० ॥
रागो लिङ्गमबोधस्येत्युक्तं यत्तत्तथैव हि ॥
आत्मधर्मतया रागं मन्वानो न हि तत्त्ववित् ॥ ११ ॥
रागो जडस्य धर्मश्चेत्किमायातं चिदात्मनि ॥

भात्रमाशङ्क्य किमसंदिग्धाविपर्यस्तज्ञानमेव नास्ति आधुनिकानामिति प्रतिबन्धः कल्प्यते, उत ज्ञाने सत्यप्यनुभवाभावाद्यथा परकीयं दुःखं तद्वाक्याज्ज्ञानतोऽपि न तदनुभवस्तद्वदिति, आहोस्विदग्रे संशयदर्शनात्, रागाद्यनिवृत्तेर्वा ? नाद्यः, तादृशज्ञानस्य स्वानुभवसिद्धस्य दुरपन्हवत्वादित्याह * अनुभूतिरिति ॥ ७ ॥ द्वितीयं प्रत्याह * असंदिग्धेति । निजात्मनि इत्यस्यायमर्थः- परकीयदुःखस्य परोक्षतया तज्ज्ञाने सत्यपि साक्षात्कारपर्यन्तानुभवाभावस्तत्र सम्भवति, प्रकृते त्वात्मनो नित्यापरोक्षत्वेन तन्निश्चयव्यतिरेकेण नानुभव इति ॥ ८ ॥ अपरोक्षवस्तुज्ञानव्यतिरेकेणानुभवो नेति मन्यमाना अतिमन्दा इत्याह *बोध इति ॥९॥ तृतीयकल्पम् अङ्गीकरोति *यस्य त्विति ॥ १० ॥ चतुर्थमनुवदति *राग इति । उक्तम्, अभियुक्तैरिति शेषः ॥ अ-

रागादिहीन आत्मैव बोध्योऽस्माभिर्न चेतरः ॥१२॥
बोधात्पुराऽपि नीराग आत्मेति यदि मन्यसे ॥
स्वस्ति तेऽस्तु नमस्यामो यथाशास्त्रार्थवादिनम् ॥१३॥
पुरेत्थं चेन्न जानासि जानीह्यथ श्रुतेर्मुखात् ॥
यदावरकमज्ञानं तद्बोधेन विनश्यति ॥ १४ ॥
आत्मन्यतिशयः कश्चेन्न कोऽपीत्येतदुत्तरम् ॥
चित्ते वाऽतिशयः कश्चेद्बोध एवेति विद्धि भोः॥१५॥
न रागो नष्ट इति चेदत्यल्पमिदमुच्यते ॥
जाड्यं यच्चित्तगं नैतन्नष्टमित्यपि चोदय ॥ १६ ॥
स्वभावश्चेद्धियो जाड्यं रागः किं परतो भवेत् ॥
रागाख्यवृत्तिः परत इति चेत्परमीरय ॥ १७ ॥
भोग्यसौन्दर्यविज्ञानं तत्परं रागकारणम् ॥
यदि तर्हि विजानीहि भोग्यदोषं प्रमाणतः ॥ १८ ॥
गुणदोषदृशौ भोग्यरागवैराग्यकारणे ॥

भियुक्तवचनस्य तात्पर्यमाह *आत्मेति॥११॥१२॥अथान्तः करणनिष्ठतया रागानुवृत्त्यङ्गीकारे आत्मनोऽपि सदा नीरागत्वाद्बोधवैयर्थ्यमिति शङ्कते *बोधादिति। आत्मनो वस्तुतो नीरागत्वमङ्गीकरोति * स्वस्तीति ॥ १३ ॥ तर्हि बोधवैयर्थ्यमित्याशङ्क्य अन्यधर्मस्य रागादेरात्मन्यारोपनिमित्ताज्ञाननिवर्तकज्ञानाभावे आत्मनि नीरागताया दुर्ज्ञानत्वान्नैवमित्याह *पुरेति ॥ चेच्छब्दोऽवधारणार्थः ॥ १४ ॥ * न कोऽपीति ॥ अविद्यानिवृत्तेः स्वरूपमात्रत्वादिति भावः ॥ १५ ॥ १६ ॥ १७ ॥ रागस्य कादाचित्कधर्मतया जाड्यवैलक्षण्येऽपि तन्निवृत्तिप्रयोजकविषयदोषदर्शनमेव कार्यं न तु तदनुवृत्तिमात्रेणोत्पन्नब्रह्मबोधे

ब्रह्मबोधात्पुरा सिद्धे बोधादूर्ध्वं च तत्तथा ॥ १९ ॥
परमानन्दबोधे तु तदन्यस्यास्ति दुष्टता ॥
अर्थसिद्धेति चेन्मैवमल्पानन्दाविचारणात् ॥ २० ॥
न हि लब्धगजेनापि राज्ञाऽश्वस्त्यज्यते क्वचित् ॥
रुग्णोऽश्व इति जानंस्तु त्यजेदेव न संशयः ॥ २१ ॥
ब्रह्मबोधो ब्रह्मतत्त्वं बोधयेन्नान्यवस्तुषु ॥
दोषं बोधयते तस्य तद्बोधाविषयत्वतः ॥ २२ ॥
मिथ्यात्वदोषो बुद्धश्चेद्रागोऽप्येष विबुध्यते ॥
रागः सत्यो भोग्यजातं मिथ्येति न हि शास्त्रधीः॥२३॥
मिथ्यैवागाभिजन्मापि प्रसज्येतेति चेन्न ते ॥
भोग्यं तद्रागजन्मानि मिथ्येत्येवं विजानतः ॥ २४ ॥
सन्त्वनेकानि जन्मानि शास्त्रात्तत्त्वमजानतः ॥
ज्ञानाज्ञानकृते मोक्षजन्मनी इति हि स्थितिः ॥२५॥

ऽसम्भावना कार्येत्यभिप्रायेणाह * यदीति ॥ १८ ॥ १९ ॥ ननु निरतिशयानन्दं दृष्टवतः क्षुद्रसुखाभिलाषायोगान्न भोग्यदोषदृष्टिः कार्येति शङ्कते *परमेति ॥ अधिकानन्दवतोऽपि दोषदृष्टिं विना स्वल्पानन्दरागो न निवर्त्तते इत्यन्वयव्यतिरेकाभ्यां दर्शयति *मैवमित्यादिना ॥ २० ॥ २१ ॥ किञ्च किं ब्रह्मज्ञानेन विषयदोषस्यापि विषयीकरणात्तद्दृष्टिर्न पृथक्कार्येत्युच्यते, किं वा तेन विषयमिथ्यात्वनिश्चयात् । नाद्यः, तस्य ब्रह्ममात्रविषयत्वादित्याह * ब्रह्मेति ॥ २२ ॥ द्वितीये रागमिथ्यात्वस्यापि निश्चितत्वात्तदनुवृत्तौ न किञ्चिद्बाधकमित्याह । *मिथ्यात्वेति ॥ २३ ॥ मिथ्याभूतस्यापि रागस्यानुवृत्तौ बाधकमाशङ्क्य ज्ञानेनाज्ञाननिवृत्तौ तस्याकिञ्चित्करतेत्याह *मि-

इयताऽपि प्रयासेन रागः सम्पाद्य एव किम् ॥
इति चेन्न वयं रागं सम्पादयितुमुद्यताः ॥ २६ ॥
रागं द्विषन्भवान्ब्रह्मनिष्ठां त्यक्तुमिहोद्यतः ॥
तस्य ते ब्रह्मनिष्ठायास्तं त्यागं वारयाम्यहम् ॥ २७ ॥
वृश्चिकादपसर्पन् यः सद्यः सर्पेण मार्यते ॥
सोढ्वाऽपि वृश्चिकोत्पन्नं दुखं जीवत्वसौ नरः ॥२८॥
ब्रह्मनिष्ठामवाप्तस्य रागाद्यवसरः कुतः ॥
इति चेत्स्वस्ति ते ब्रह्मनिष्ठायास्तु विरागिणे ॥२९ ॥
बोधात्प्रागेव संसारदोषदृक्चेद्विरज्यते ॥
विरज्यत्वथ पापेन रागश्चेत्स चिकित्स्यताम् ॥ ३० ॥
दोषदृष्टिब्रह्मनिष्ठाद्वयमत्र महौषधम् ॥
कर्मजस्याचिकित्स्यस्य भोगादेव निराक्रिया ॥ ३१॥
कादाचित्कं रागलेशं चिकित्सितुमशक्नुवन् ॥

ध्यैवेत्यादिना ॥ २४ ॥ २५ ॥ २६ ॥ *तस्य त इति । अयमर्थः । यस्तु ब्रह्मज्ञाने जातेऽपीषद्रागानुवृत्तिमात्रेण ज्ञाने सन्दिहानस्तदनादृत्य व्यापारान्तरे प्रवर्तते तस्य पुरुषार्थभ्रंशो मा भूदिति रागाद्यनुवृत्तिमात्रेण ब्रह्मज्ञानेऽनादरो न कार्यः किंतूत्पद्यमानरागादिप्रतीकारपूर्वकं ब्रह्मनिष्ठाऽभिधेयताचिन्तनादिना तदेकपरतैव कार्येत्युपदिश्यत इति ॥ २७ ॥ २८ ॥ ननूक्तब्रह्मनिष्ठयैव रागनिवृत्तिसम्भवात्किं प्रतीकारान्तरेणेति चेदोमित्याह * ब्रह्मेति ॥ २९ ॥ बोधात्पूर्वमेव त्यक्तरागादेस्तदनन्तरं कथमनुवृत्तिरित्याशङ्क्य कर्मणां वैचित्र्यात्त्यक्तस्याप्यनुवृत्तिर्घटते इत्याह * बोधादिति ॥ ३० ॥ ३१ ॥ उक्तमे-

यो ब्रह्मबोधे सन्देग्धि कदा स्यात्तस्य निश्चयः॥३२॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥
इत्युक्ताः प्रतिबन्धस्य सूचकाः संशयादयः ॥ ३३ ॥
यो जानाति श्रद्दधाति निश्चिनोति च शास्त्रतः ॥
प्रतिबन्धो न तस्यास्ति मादृशस्य कदाचन ॥ ३४ ॥
प्रतिबन्धविहीनस्य ज्ञानेनाज्ञाननाशनम् ॥
दृष्टं फलं विजानीयात्तृप्तिर्भोजनतो यथा ॥ ३५ ॥
लभ्यमाने दृष्टफले कृत्स्नकर्माननुष्ठितेः ॥
नाधिकारो निवार्योऽत्र जिज्ञासोर्मुक्तिकामिनः॥३६॥
ननु मानादविज्ञाता विमुक्तिः काम्यते न हि ॥
ज्ञातायां स्वात्मरूपत्वात्सुतरां नास्ति कामना ॥३७॥
न युक्तं कामना मुक्तौ पुंसां नास्तीति भाषितुम् ॥

वार्थं पुनः सङ्ग्रहेण दर्शयति *कादाचित्कमित्यादिना ॥ ३२ ॥ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ज्ञानस्य दृष्टफलत्वे फलितमाह * लभ्यमानमिति ॥ ३६ ॥ ननु ज्ञानाधिकारिणो मोक्षकामना विशेषणं, सा चाज्ञाते वा मोक्षे स्याज्ज्ञाते वेति शङ्कते *नन्विति ॥ आद्यं प्रत्याह * मानादिति ॥ अनुभूते कामनेति स्थितेरित्यर्थः ॥ द्वितीयं निराह *ज्ञातायामिति ॥ आत्मरूपत्वेन ज्ञाता मुक्तिरात्मत्वान्न कामनामर्हति । अप्राप्ते स्मर्यमाणे कामनासम्भवादिति भावः ॥ ३७ ॥ न खल्वात्मनो ब्रह्मत्वलक्षणा मुक्तिरज्ञाता स्वप्रकाशत्वात् । नापि ज्ञानोदयात् प्राक् मानतो ज्ञाता मानान्तराविषयत्वात्, अतश्च सामान्यरूपेण ज्ञाते मानतश्चाज्ञाते मोक्षे कामना सम्भवतीति परिहरति *न युक्तमिति ॥

देशकालानवच्छिन्नसुखाद्यर्थित्वदर्शनात ॥ ३८ ॥
प्रीत्युत्कर्षो नरैर्लोके काम्यमानोऽभिवीक्ष्यते ॥
दृष्टादृष्टार्थसम्बन्धिविषयेष्वविशेषतः ॥ ३९ ॥
नान्यत्र परमानन्दादुत्कर्षः पर्यवस्यति ॥
परमानन्दरूपा हि विमुक्तिः श्रुतिसम्मता ॥ ४० ॥
आत्यन्तिकसुखप्राप्तिदुःखविच्छेदकाङ्क्षिणः ॥
अर्थतो मुक्तिमेवामी कामयन्ते ऽखिला जनाः ॥४१॥
स्वर्गादिकाम्यपि जनो मुक्तिं कामयते खलु ॥
मुक्तिं कामयमानोऽन्यत्कटाक्षेणापि नेक्षते ॥ ४२ ॥
तत्र साधनसाध्यत्वान्नाशि स्वर्गादिकं सुखम् ॥
अभिव्यञ्जकतन्त्रस्तु मोक्षस्तेनाक्षयो मतः ॥ ४३ ॥
ननु नाशिसुखप्राप्तिः पुमर्थो नेष्यते यतः ॥

किंच "निरवधिकसुखं मे स्यात्कदापि दुःखं मा भूत्"इति सर्वप्राणभृतां प्रार्थना प्रतीयते । सा चानवच्छिन्नानन्दाशेषानर्थोच्छेदात्मनि मोक्षेऽर्थात्पर्यवस्यतीत्याह *देशेत्यादिना ॥ ३८ ॥ ॥ ३९ ॥ ४० ॥ ननु स्वर्गकामस्यापि मुमुक्षुत्वे कर्मज्ञानयोरधिकारभेदो न स्यादित्याशङ्क्य तत्कामनाया अर्थान्मोक्षविषयत्वेऽपि मुमुक्षुः स्वर्गादिकं न वाञ्छतीति भेदमाह * मुक्तिमिति ॥ ४१ ॥ ४२ ॥ स्वर्गकामनाया एव मोक्षकामनात्वे स्वर्गस्यापि नित्यत्वं स्यादित्याशङ्क्य अखण्डब्रह्मसुखस्यापि विषयसम्पर्कजन्यवृत्तिविशिष्टत्वेन जातस्यैव स्वर्गशब्दार्थत्वान्मैवमित्याह * तत्रेति । मुक्तेस्तद्वैलक्षण्यमाह * अभिव्यञ्जकेति ॥ ४३ ॥ स्वर्गशब्दस्य वृत्तिविशिष्टसुखलेशवाचित्वममृष्यमाणः शङ्कते * नन्विति । प्रेक्षावत्कामनाया मोक्षेतरतु-

तृष्णया साधयन्प्रीतिं न प्रीतिलवमिच्छति ॥ ४४ ॥
न हि प्रीतेरियत्तायाः स्वर्गशब्दोऽस्ति वाचकः ॥
परमानन्दरूपेण स्वर्गशब्दार्थलक्षणात् ॥ ४५ ॥
यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ॥
अभिलाषोपनीतञ्च सुखं स्वर्गपदास्पदम् ॥ ४६ ॥
तस्मात्स्वर्गस्य मोक्षत्वादग्निहोत्रादिकर्मणाम् ॥
मोक्षसाधनतैवेति मतं चेत्तन्न युज्यते ॥ ४७ ॥
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥
इत्यादिशास्त्रतः कर्मफलेयत्ताऽवधार्यते ॥ ४८ ॥
यत्रापि स्वर्गशब्देन न विशेषोऽवधारितः ॥

च्छसुखाविषयत्वे हेतुमाह * यत इति ॥ तृष्णया प्रेरितः प्रीतिं सम्पादयन्नल्पामापादयितुं यतो नेच्छति ततः स्वल्पप्रीतेर्नेष्यमाणतेत्यर्थः ॥ ४४ ॥ ननु स्वर्गकामवाक्ये स्वर्गशब्दस्याल्पतरसुखविशेषवाचित्वात्कथं तस्य मोक्षवाचित्वमित्याशङ्क्याह *न हीति । प्रीतेरियत्ता परिमाणं तस्य स्वर्गशब्दो न वाचकः इयत्तापरिच्छिन्नप्रीतिविशेषाणामानन्त्यात्, तत्र शक्तेरयोगात्सामान्यगृहीतशक्तेरविशेषितसुखमात्रवाचित्वादपवर्गस्य च तावन्मात्रत्वाद्युक्तं स्वर्गशब्दस्यापवर्गैकवाचकत्वमित्यर्थः । अर्थवादोक्तस्वर्गशब्दार्थस्वरूपपर्यालोचनयाऽपि तस्य मोक्षवाचित्वमित्याह * परमेति । स्वर्गपदस्य मोक्षवाचित्वे फलितमाह * तस्मादिति ॥ ४७ ॥ स्वर्गपदस्यैव वा इयत्तानवच्छिन्नप्रीतिवाचित्वं कर्मफलवाचिपदमात्रस्य वा । नान्त्यः, कर्मफलविशेषे इयत्ताश्रवणादित्याह *सप्तेति ॥ ४८ ॥ आद्यं प्रत्याह *यत्रापीति *शास्त्रान्तरेणेति । क्रतुफलस्यापीन्द्राद्यान-

शास्त्रान्तरेण तत्रापि सविशेषोऽवधार्यताम् ॥ ४९ ॥
तृष्णया साधकः प्रीतिलवमन्यत्र वाञ्छति ॥
पशुवृष्ट्यादिकामानां भूयसामिह दर्शनात् ॥ ५०॥
अनर्थकोऽन्यथा चित्राकारीर्यादिविधिर्भवेत् ॥
स्वर्गलक्षणमप्यस्ति सोमलोकादिभूमिषु ॥ ५१ ॥
कृष्यादिवत्कर्मजन्यस्वर्गस्य क्षयसंश्रवात् ॥
न मोक्षरूपता तस्मात्कर्म त्याज्यं मुमुक्षुणा ॥ ५२ ॥
प्रत्यक्षश्रुतिविध्यन्तविहितानामकारणात् ॥
त्यागेऽतिसाहसं मन्ये ननु यागादिकर्मणाम् ॥ ५३ ॥
प्रत्यक्षोपनिषद्वाक्यविहितायास्ततोऽपि च ॥

न्दस्य शतगुणतारतम्यादिवाचिनेत्यर्थः ॥ ४९ ॥ यदुक्तं तृष्णया साधयन्नित्यादि तद् दूषयति * तृष्णयेति । अन्यत्र, मोक्षादिति शेषः ॥ ५० ॥ यदुक्तं यन्न दुःखेनेत्यादिना स्वर्गशब्दस्य मुक्तिवाचित्वमिति तत्प्रत्याह * स्वर्गेति । सोमलोकादिषु, जायमानसुखस्येति शेषः । न च सोमलोकादेरनित्यत्वान्न च ग्रस्तमनन्तरमिति कथमिति शङ्क्यम् । मानुष्यसुखवत्क्षणिकं न भवतीत्येवंपरत्वात्तस्येति ॥ ५१ ॥ "यत्कृतकं तदनित्यम्" इति व्याप्त्या कर्मजन्यत्वे मोक्षस्यानित्यत्वं दुर्वारमित्याह *कृष्यादिवदिति । स्वर्गमोक्षयोर्भेदे फलितमाह *तस्मादिति ॥ ५२ ॥ अर्थवादवाक्येभ्यो विधिवाक्यस्य बलीयस्त्वात्कर्मणोऽपि मुक्तिहेतुत्वमिति शङ्कते *प्रत्यक्षेति ॥ विधिरेव विध्यन्तः "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिः । स च प्रत्यक्षश्रुतिषु दृष्टस्तेन विहितानामग्निहोत्रादीनां विना हेतुं त्यागस्य साहसमात्रत्वात्कर्मसमुच्चितज्ञानाधीनो मोक्ष इत्यर्थः ॥५३॥

ऐकात्म्यज्ञाननिष्ठायास्त्यागोऽतीव हि साहसम्॥५४॥
विचार्यमाणे यत्नेन कर्मत्यागस्य सम्भवात् ॥
न किंचित्साहसं त्वस्ति प्रत्यक्षश्रुतिवाक्यतः ॥५५॥
तस्मात्सिद्धोऽधिकारोऽत्र ब्रह्मरूपं विविक्षतः ॥
जिज्ञासोरेव कर्त्तुस्तु न सिषाधयिषोरिति ॥ २५६ ॥

इति वार्तिकसारे ऽधिकारिपरीक्षाप्रथमप्रकरणं समाप्तम् ॥

शमादिवाक्ये विरक्तस्य संन्यासो विहितः । तस्यैव श्रोतव्यादिवाक्ये श्रवणाद्यावृत्त्या ब्रह्मनिष्ठोक्ता, तस्यास्त्यागः समुच्चयपक्षे स्यात् । न चानेकोपनिषत्प्रसिद्धस्य त्यागो युक्तः, कर्मत्यागादपि तत्त्यागस्यातिसाहसत्वात् । तस्मादैकात्म्यज्ञानमात्रं मोक्षहेतुरिति सिद्धान्तयति * प्रत्यक्षोपनिषदिति ॥ ५४ ॥ वस्तुतस्तु "त्यागेनैके अमृतत्वमानशुः" "ब्राह्मणो निर्वेदमायात्" "यदि वेतरथा" "ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादिश्रुतिशतेभ्यः संन्यासविधानात्कर्मतत्त्यागयोर्विरक्ताविरक्तविषयत्वेन व्यवस्थासम्भवाच्च साहसशङ्कैव नास्तीत्याह * विचार्येति ॥ ५५ ॥ परमप्रकृतमुपसंहरति * तस्मादिति * विविक्षत इति । प्रवेष्टुमिच्छत इत्यर्थः ॥ २५६ ॥

इति वार्तिकसारव्याख्यायाम् अधिकारिपरीक्षाप्रथमप्रकरणं समाप्तम् ॥

सिद्धेऽधिकारे वेदान्तसम्बन्धोऽथाभिधीयते ।
असम्बन्धे तु शास्त्रेऽस्मिन्नधिकार्थप्रवृत्तितः ॥ १ ॥
तस्यास्य कर्मकाण्डेन सम्बन्धं श्रुतिरब्रवीत् ॥
तमेतमिति वाक्येन साध्यसाधनलक्षणम् ॥ २ ॥
वेदानुवचनं यज्ञस्तपो दानमनाशकम् ॥
आत्मतत्त्वे विविदिषां जनयन्तीति हि श्रुतम् ॥३॥
वेदानुवचनादीनामैकात्म्यज्ञानवाञ्छने ॥
नित्यानां विधिरित्येवमेकं तावदिदं मतम् ॥ ४ ॥
यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणाम् ॥
वेदः स्यात्सर्व एवात ऐकात्म्यज्ञानसिद्धये ॥ ५ ॥
प्लवा ह्येते यज्ञरूपा अदृढा इति निन्दनात् ॥
काम्यैर्विविदिषोत्पत्तिर्नेति चेन्न विधानतः ॥ ६ ॥

पूर्वोत्तरग्रन्थयोः सङ्गतिमाह * सिद्ध इति। अधिकारविचारानन्तरं सम्बन्धविचारे हेतुमाह * असम्बन्ध इति। कर्मानुष्ठानानन्तरमेव ज्ञाने प्रवृत्तिनियमस्तयोः सम्बन्धं विना न घटत इति तद्द्वारा काण्डयोरपि सम्बन्धो वक्तव्य इत्यर्थः ॥ १ ॥ * तस्यास्येति। वक्तव्यसम्बन्धस्य ज्ञानकाण्डस्येत्यर्थः ॥ २ ॥ तमेतमितिवाक्यमर्थतः पठन्नुक्तसम्बन्धं व्यनक्ति * वेदेति ॥३॥ ॥ ४ ॥ नित्यनैमित्तिकानामेव विविदिषाहेतुत्वं यज्ञेनेत्यादिवाक्येनोच्यते इति मतमुक्त्वा यज्ञेनेत्यविशेषश्रुतेः काम्यानामपि कर्मणां विविदिषाद्वारा विद्याहेतुत्वमिति मतान्तरमाह * यद्वेति ॥ ५ ॥ निन्दाश्रुतेः काम्यानां कार्यतैव नास्ति कुतस्तु धीहेतुत्वमिति शङ्कते * प्लवा इति । काम्यानामकार्यत्वं न युक्तं विहितत्वादिति परिहरति * न विधानत इति ॥ ६ ॥ नि-

काम्यान्यपि विधीयन्ते विधिभिर्नित्यकर्मवत् ॥
काम्यैश्चातोऽस्ति धीशुद्धिः फलासक्तिस्तु निन्द्यते॥७॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥
इत्यादि कृष्णगीतायामुक्तमासक्तिवर्जनम् ॥ ८ ॥
आसक्त्या दुष्टचित्तस्य कर्मजा शुद्धिरप्यसौ ॥
भोगायैवोपयुक्ता स्यान्न विवेकाय कर्हिचित् ॥ ९ ॥
विड्वराहादिदेहेन न ह्यैन्द्रं भुज्यते पदम् ॥
अतो भोगोऽपि तां शुद्धिं स्वसिद्ध्यर्थमपेक्षते ॥१०॥
अनासक्तौ तु भोगोऽयं प्राप्नोति न विरुध्यते ॥
नित्यकर्मस्विवैतेषु शुद्धिप्राधान्यसम्भवात् ॥ ११ ॥
नित्येषु शुद्धेः प्राधान्याद्भोगोऽप्यप्रतिबन्धकः ॥
भोगं भङ्गुरमीक्षन्ते बुद्धिशुद्ध्यनुरोधतः ॥ १२ ॥
कर्मणा पितृलोकः स्यादित्येवं नित्यकर्मणाम् ॥
फलं श्रुतं तथाप्येतैर्वेदनेच्छाऽपि जायते ॥ १३ ॥
यस्याकृतौ प्रत्यवायस्तन्नित्यं काम्यमन्यथा ॥

न्दावचनस्य तर्हि का गतिः? तत्राह *फलेति। ब्रह्मार्पणबुद्ध्याऽनुष्ठितानां काम्यानामपि कर्मणां विविदिषाहेतुत्वमित्यर्थः ॥ ७ ॥ ८ ॥ अथासक्तिपूर्वकृतानामपि कर्मणां विहितत्वाच्छुद्धिजनकत्वमप्यस्तीत्याशङ्क्य तथापि तज्जन्या शुद्धिरासक्त्या प्रतिबद्धत्वाद्विवेकाय नालमित्याह * आसक्त्येति ॥ ९ ॥ विवेकाजनकत्वे सा शुद्धिर्व्यर्थेति नेत्याह * विड्वराहेति ॥ १० ॥ अनासक्त्या तु कृतानां काम्यानां नान्तरीयकभोगहेतुत्वेऽपि शुद्धिहेतुत्वमाह * अनासक्ताविति ॥११॥ नित्यकर्मस्विवेत्युक्तं दृष्टान्तं प्रकटयति * नित्येष्विति ॥ १२ ॥ १३ ॥ सर्वकर्मणा-

इत्थं सकाम्यनित्यानां ज्ञानेच्छाहेतुता स्थिता॥१४॥
अभिचारादिकाम्यं तु विहितत्वेऽपि निन्दितम् ॥
फलदोषेण दुष्टत्वाज्ज्ञानार्थत्वं न तस्य हि ॥ १५ ॥
काम्यं ससङ्गं ज्ञानाय यदि नालं तथापि च ॥
पुंसां वैराग्यहेतुत्वादुपकार्येव तन्मतम् ॥ १६ ॥
असह्यदुःखफलतः स्वकार्यविनिवृत्तिकृत् ॥
विरक्तिहेतुः कर्म स्यात्प्रतिषिद्धं यथा तथा ॥ १७ ॥
अपि काम्यं कृतं सर्वं दुःखात्मकफलत्वतः ॥
आविरिञ्च्यात्स्वकार्येभ्यः स्यादेव विनिवृत्तये ॥१८॥
उपासनं तु यत्किञ्चिद्विद्याप्रकरणे श्रुतम् ॥

मासक्तिशून्यानां ज्ञानहेतुत्वेऽहि नित्यकाम्यविभागः कथम् ? इत्याशङ्क्याह * यस्येति । अकृतौ अकरणे ॥१४॥ * फलदोषेणेति। श्येनादीनां हिंसाफलकत्वाद्धिंसायाश्च निषिद्धत्वान्निषिद्धफलकानां तादृशानां न ज्ञानहेतुत्वमित्यर्थः ॥ १५ ॥ तेषां ज्ञानहेतुत्वे कर्मकाण्डैकदेशस्य ज्ञानकाण्डसम्बन्धेऽपि न कृत्स्नस्य तेन सङ्गतिरित्याशङ्क्य, तेषामपि परम्परयोपकारित्वमाह *काम्यमिति । ससङ्गं दुष्टफलकम् ॥ १६ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *असह्येति। यथा निषिद्धं हननादिकर्म श्वशूकराद्याप्तिरूपदुःसहफलत्वान्निषेधशास्त्रार्थज्ञानवतस्ततो वैराग्यहेतुतया स्वयमननुष्ठीयमानं स्वफलात्पुंसो निवर्त्तकं, तथा श्येनाद्यपि परम्परया दुःखहेतुत्वाद्वैराग्यहेतुरित्यर्थः ॥ १७॥ नित्यनैमित्तिकानामेव धीहेतुत्वपक्षे सर्वेषामपि काम्यकर्मणामेवमेवोपकारित्वमित्याह * अपीति । काम्यकर्मफलाद्देवत्वादेरपि विवेकिनो विरक्तिर्घटते तस्यानित्यत्वादिबहुदोषदुष्टत्वादिति भावः ॥१८॥ * एवं

तदप्यैकात्म्यविज्ञानयोग्यत्वायैव कल्प्यते ॥ १९ ॥
चित्तस्यैकाग्र्यजननाद् ब्रह्मलोकाप्तितोऽथवा ॥
ज्ञानएवोपासनानि पर्यवस्यन्ति सर्वथा ॥ २० ॥
एवं चाखिलवेदस्य वेदनार्थत्वकारणात् ॥
श्रुतं विविदिषार्थत्वं यज्ञदानादिकर्मणाम् ॥ २१ ॥
यद्वा कर्माणि पुरुषं संस्कुर्वन्ति स्मृतेर्बलात् ॥
अष्टाचत्वारिंशदिति स्मृतिः संस्कारवादिनी ॥२२॥
यस्यैतदुक्तसंस्काराः सम्पद्यन्ते यथाविधि ॥
स ब्रह्मणः सलोकत्वं सायुज्यं वा समाप्नुयात् ॥२३॥
विशेषः को विविदिषौ संस्कृते वेति चेच्छृणु ॥
अवश्यं भाविनी सिद्धिराद्येऽन्यत्र तु पाक्षिकी॥२४॥

चेति। एवमुक्तप्रकारेण वेदोदितसकलकर्मणां ज्ञाने विनियोगसम्भवाद्यज्ञादिकर्मणां विविदिषाद्वारा ज्ञाने हेतुत्वं विविदिषावाक्ये श्रुतम्, उपपद्यत इति शेषः ॥१९॥२०॥२१॥ एवं विविदिषाद्वारा कर्मणां ज्ञानहेतुत्वमुक्त्वा तेषां संस्कारद्वारा तद्धेतुत्वमिति पक्षान्तरमाह *यद्वेति। "गर्भाधानादयः सहधर्मचारिणीसंयोगान्ताश्चतुर्दश, पञ्चमहायज्ञाः, सप्तहोमसंस्थाः, सप्तहविःसंस्थाः, सप्तपाकसंस्थाः, एते मिलित्वा चत्वारिंशत्, अनश्नन्संहिताध्ययनं, प्रायणं, कर्मजपः, उत्क्रामणं, दैहिकं, भस्मसमूहनं, अस्थिसञ्चयनं, श्राद्धानि, एतेऽष्टौ। यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः स ब्रह्मणः सायुज्यं सलोकतामाप्नोति" इति स्मृतिं तत्र प्रमाणयति * अष्टेति ॥ २२ ॥ २३ ॥ पक्षद्वयेऽपि कर्मणां ज्ञानार्थत्वेऽपि द्वारभेदादवान्तरफलभेदमाकाङ्क्षापूर्वकं दर्शयति *विशेष इत्यादिना ॥ २४ ॥ अखिलसाधनं श्रवणतत्साधन-

जाता विविदिषाऽवश्यं सम्पाद्याखिलसाधनम् ॥
स्वफलं जनयेदाशु बुभुक्षादिर्यथा तथा ॥ २५ ॥
प्रतिबन्धकपाप्मानं नाशयेच्चित्तसंस्कृतिः ॥
साधनानि तु बोधस्य सम्पाद्यानि प्रयत्नतः ॥ २६ ॥
वर्णाश्रमादिशास्त्रेण प्रेरितो ऽकरणे भयम् ॥
पश्यन्करोति यत्कर्म तत्संस्कारकमुच्यते ॥ २७ ॥
तमेतमिति वाक्येन प्रेरितो बोधवाञ्छया ॥
अन्तर्यामिण्यर्पयेद्यत्तत्स्याद्विविदिषाकरम् ॥ २८ ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २९ ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः
इत्थं विविदिषाकारि कर्म कृष्णेन वर्णितम् ॥ ३० ॥
आश्रमार्थप्रयुक्तानां कर्मणामीश्वरार्पणम् ॥
कार्यं पृथक्प्रयोगस्तु नेति सूत्रकृदब्रवीत् ॥ ३१ ॥
वाक्याद्वेदनसौन्दर्यबोधाद्विविदिषाजनिः ॥

गुर्वादिकम् ॥ २५ ॥ २६ ॥ यावज्जीवादिविधिप्रयुक्त्या ऽकरणे प्रत्यवायभिया ऽनुष्ठितकर्मणां संस्कारहेतुत्वं, विविदिषावाक्यप्रयुक्त्या ब्रह्मार्पणबुद्ध्याऽनुष्ठितकर्मणां विविदिषाहेतुत्वमिति प्रयुक्तिभेदमप्याह * वर्णेत्यादिना ॥२७॥२८॥२९॥३०॥

यावज्जीवादिवाक्यविहिताग्निहोत्रादीनामाश्रमार्थत्वेन कृतानामेवेश्वरार्पणं कार्यं न ज्ञानार्थत्वेनापि पृथक्कार्यमित्यत्र व्याससम्मतिमाह *आश्रमेति॥ "विहितत्वाच्चाश्रमकर्मापि" इति सूत्रेणामुमुक्षूणामपि तत्तदाश्रमकर्माण्यनुष्ठेयानीत्युक्त्वा "सहकारित्वेन च" इत्युत्तरसूत्रेण तेषामेव विद्याहेतुत्वमुक्तवानित्यर्थः॥३१॥

विषयसौन्दर्यमात्रलभ्यत्वादिच्छायाः कथं कर्मसाध्यत्वमित्याश-

यद्यप्यथाप्यात्मबोधे सम्पाद्या कर्मणा रुचिः ॥ ३२ ॥
दुग्धे पित्तवतोऽस्तीच्छा रुचिर्नास्ति ततोऽनयोः ॥
रुचीच्छयोर्महान्भेदो रुचिर्विविदिषाऽत्र हि ॥ ३३ ॥
महापापवतां नृणां ज्ञानयज्ञो न रोचते ॥
इति पौराणिकाः प्राहुः पुण्यसाध्या ततो रुचिः ॥ ३४॥
रुचिद्वारोपकुर्वन्ति कर्माण्यात्मविमुक्तये ॥
अज्ञानस्याविरोधित्वान्न साक्षादात्मबोधवत् ॥ ३५॥
अविद्याया न चोच्छित्तौ ज्ञानादन्यदपेक्ष्यते ॥
ज्ञानोत्पत्तौ न चैवान्यच्छमादिभ्यो ह्यपेक्ष्यते ॥ ३६॥
शमाद्युत्पत्तये नान्यद् बुद्धिशुद्धेरपेक्ष्यते ॥
बुद्धिशुद्धौ च नित्यादिकर्मभ्यो नान्यदिष्यते ॥ ३७ ॥
पारम्पर्येण कर्मैव वेदनायोपयुज्यते ॥
साधनं कर्म तेनैतत्साध्यं ब्रह्मात्मवेदनम् ॥ ३८ ॥
इत्येवमभिसम्बन्धः कर्मविज्ञानकाण्डयोः ॥
इतोऽन्यथाऽभिसम्बन्धे न किंचिन्मानमीक्ष्यते ॥३९॥

क्क्ष तस्यास्तदसाध्यत्वेऽपि ज्ञाने रुचिः कर्मभिः साध्यत इति तयोर्भेदमाह *वाक्यादित्यादिना । "तरति शोकमात्मवित्" इत्यादिवेदनसौन्दर्यबोधकवाक्यादित्यर्थः ॥ ३२ ॥ कर्मणां परम्परया मुक्तिहेतुत्वमुपपाद्य तेषां साक्षान्मुक्तिहेतुत्वपक्षं दूषयति * अज्ञानस्येति । आत्मबोधवन्नोपकुर्वन्तीत्यनुषङ्गः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ये तु कामप्रविलयनेन वा प्रपञ्चविलयनेन वा सोपानमार्गगत्या वा ज्ञानकर्मसमुच्चयेन वा काण्डद्वयस्य सम्बन्धं वदन्ति तेषां मतमप्रामाणिकत्वादनादेयमित्याह * इतोऽन्यथेति ॥ ३९ ॥

अन्ये त्वाहुर्न शक्नोति कामसन्दूषिताशयः ॥
द्रष्टुं परममद्वैतं सर्वकामासमाप्तितः ॥ ४० ॥
कर्मभिर्विविधैर्धीमान् सविराडाद्युपासनैः ॥
वैराजान्तं फलं भुक्त्वा तदैकात्म्यं प्रपद्यते ॥ ४१ ॥
सर्वभोगोपभोगेन कृत्स्नकामलयाध्वना ॥
यान्ति मुक्तेरानुगुण्यं कर्माणि निखिलान्यपि ॥ ४२ ॥
ब्रह्मानन्दः श्रुतोऽप्यत्र साक्षादविषयीकृतः ॥
दृष्टानन्दाभिलाषं स न मन्दीकर्त्तुमप्यलम् ॥ ४३ ॥

तदप्रामाणिकत्वं स्पष्टायितुं तत्राद्यपक्षमुत्थापयति * अन्ये त्विति । कामध्वस्तेर्ज्ञानाधिकारहेतुत्वं साधयति * नेत्यादिना । अन्वयव्यतिरेकाभ्यां कामध्वस्तेरात्मधीहेतुत्वासिद्धिरित्यर्थः ॥ ४० ॥ ४१ ॥ अस्तु तर्हि प्रथममेव कामध्वस्त्या ज्ञानाधिकार इत्याशङ्क्याह * सर्वभोगेति । सर्वे कामाः स्वर्गादयस्तद्भोगसमाप्तौ तेभ्यो रागपरावृत्तिः नत्वादावेव तदप्राप्तेस्तद्भोगस्य तेभ्यो रागध्वस्तिहेतोरसत्त्वादित्यर्थः। तर्हि स्वर्गादीनामादावेवाप्तिद्वारा कामध्वंसोऽपि स्यादत आह *कर्माणीति । दर्वीहोममारभ्य सत्रान्तानि कर्माणि विराट्सूत्रोपासनासहितैर्मनुष्यत्वमारभ्य सूत्रान्तं फलं क्रमेण प्राप्य सौत्रान् भोगान् भुक्त्वा तद्देहमानी सन् तदन्यानुपभुक्तकामयितव्यकर्मफलाभावात्सर्वतो निवृत्तकाम आत्मरूपमनुभवति एवं कर्मणां कामलयमुखेन धीहेतुत्वे द्वारं प्राजापत्यपदमित्यर्थः ॥ ४२ ॥ ननु श्रुतो ब्रह्मानन्द एव रागं निरुन्ध्यात् किं तत्प्रविलयनेन ? अत आह * ब्रह्मेति । स श्रुतोऽप्यननुभूतः नानुभूतसजातीयफलरागप्रसरं मन्दीकर्त्तुमपि पारयति ॥ ४३ ॥ भोगस्य राग-

कामप्रविलयायातो विधयः कर्मकाण्डगाः ॥
प्रलीनकामो विज्ञानकाण्डे ऽधिक्रियते पुमान् ॥ ४४ ॥
नैवं न कामसम्प्राप्त्या तन्नाशोऽब्दशतैरपि ॥
तत्सेवातो विवृद्धिः स्यान्निवृत्तिर्दोषदर्शनात् ॥ ४५ ॥
न जातु कामः कामानामुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ ४६ ॥
गुणस्यादर्शनाद्दोषदृष्टेर्वा क्षीणकामनः ॥
सर्वक्लेशोपशान्त्यर्थमात्मज्ञानं समाश्रयेत् ॥ ४७ ॥
कामाश्रितो विधिः कामं दोषवन्न विलापयेत् ॥
कामुकः सन् प्रवर्तेत नात्मज्ञाने कथञ्चन ॥ ४८ ॥
उद्विजेताथवा ज्ञानात्सर्वपुम्भोगघस्मरात् ॥
तथाच रागिगीतायां पठ्यते वचनं त्विदम् ॥ ४९ ॥
अपि वृन्दावने शून्ये शृगालत्वं स इच्छति ॥
न तु निर्विषयं मोक्षं कदाचिदपि गौतम ॥ ५० ॥

वृद्धिहेतोर्न तन्निवर्तकत्वमिति दूषयति * नैवमिति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ विषयेषु गुणदोषदृष्टिदृष्टिमतः श्रवणादौ प्रवृत्तिः सम्भाव्यत इत्युक्त्वा कामप्रविलयार्थं कर्मानुष्ठितस्तत्प्रवृत्तिरेव न सम्भवतीत्याह * कामेति । "एवंकाम एतत्कुर्यात्" इति श्रूयमाणो विधिर्विषयदोषदर्शनाभावे तत्रैव पुनः पुना रागमुत्पादयतीत्यर्थः ॥ ४८ ॥ न केवलं ज्ञाने प्रवृत्त्यभावः विषयवासनाऽऽविष्टचित्तस्य वैषयिकसर्वभोगनाशकाद् ज्ञानाद्भीतश्च भवतीत्याह *उद्विजेतेति ॥४९॥ किञ्च प्राजापत्यपदस्य द्वारत्वं युक्तिबलात् श्रुतेर्वा ? नाद्य इत्याह *न

वैराजान्तं फलं भुक्त्वा मुच्येतेति यदीरितम् ॥
क्रममुक्तौ तत्तथाऽस्तु न तु सद्यो विमोचने ॥ ५१ ॥
द्वारं न नियतं मुक्तेः प्राजापत्यं पदं भवेत् ॥
न ह्युपाधिषु तत्त्वस्य विशेषः कश्चिदीक्ष्यते ॥५२॥
नाकाशस्याविशेषोऽस्ति कुम्भद्रोण्याद्युपाधिषु ॥
दूरान्तिकादिभिन्नेषु कल्पिताकल्पितेष्वपि ॥ ५३ ॥
अतः प्रजापतौ तत्त्वं कृमौ वा न विशिष्यते ॥
तर्कादागमतश्चापि तद्योय इति हीदृशात् ॥ ५४ ॥
प्रत्यबुध्यत देवानां मध्ये योऽयं स एव तत् ॥
अभवन्नान्य इत्याह श्रुतिर्वैषम्यवारिणी ॥ ५५ ॥
एको देवः सर्वभूतेष्विति चाहापरा श्रुतिः ॥
अतश्चोपाधिवैशेष्यान्नात्मतत्त्वं विशिष्यते ॥ ५६ ॥
सद्यो मुक्तिं वाञ्छतोऽतो दोषदृष्ट्या विलीयते ॥
कामोऽतः कर्मकाण्डस्य तात्पर्यं नैव तल्लये ॥ ५७ ॥
अन्ये तु मन्वते केचिद्गम्भीरन्यायवादिनः ॥
भेदस्य विलयो वेदे गम्यते कस्य चित्कचित् ॥ ५८ ॥

हीति तर्कादित्यन्तेन ॥ ५२ ॥ कल्पिताकल्पितेषु उत्पन्नोत्पत्स्यमानेषु ॥ ५३ ॥ द्वितीयं प्रत्याह * आगमत इति । न विशिष्यत इत्यनुषङ्गः ॥ ५४ ॥ प्रपञ्चविलयद्वारा कर्मकाण्डस्येतरशेषत्वमिति मतमुत्थापयति * अन्ये त्विति । प्रपञ्चाभावपरत्वे शास्त्रस्य प्रपञ्चो नास्तीत्येतावता ऽलं किं बहुवाक्येनात आह * भेदस्येति । निषेध्यबाहुल्यान्निषेधकवेदस्यापि युक्तं तथात्वमिति भावः ॥ ५८ ॥ कर्मविधयस्तत्कार्यतां

देहात्मभावविलयः स्वर्गकामपदे खलु ॥
देहाद्भिन्नोऽधिकार्यत्र स्वर्गभोग्यवगम्यते ॥ ५९ ॥
रागाद्युत्थप्रवृत्तीनां निषेधेषु लयोऽञ्जसा ॥
विधिष्वपि लयस्तासां कार्यान्तरवियोगतः ॥ ६० ॥
लोकेऽपि चानभिप्रेतात्पथः साक्षान्निवारणम् ॥
मार्गान्तरोपदेशाद्वा वेदेऽप्येवं प्रतीयताम् ॥ ६१ ॥
एवं रागादिहेतूत्थप्रवृत्तिलयवर्त्मना ॥
आत्मज्ञानाधिकारार्था निःशेषविधयः स्थिताः ॥६२॥

बोधयन्ति न प्रपञ्चाभावमत आह *देहेति॥ ननु यागस्य स्वर्गसाधनत्वपरमिदं न कस्यचिल्लयपरमित्याशङ्क्याह *देहादिति। अत्र कालान्तराधिगतस्वर्गभोगशक्तोऽधिकारी सिद्धः, स च देहाद्भिन्नो, देहस्यात्रैव भस्मीभूतस्य तद्भोगायोगात्, अतो देहात्मलये प्रमातव्ये तत्रैव वाक्यतात्पर्यं, यागस्य स्वर्गसाधनत्वं तु देवताधिकरणन्यायेनान्यपरादपि वाक्याच्छक्यं प्रमातुमिति भावः॥५९॥ काम्यविधीनां लयपरत्वमुक्त्वा निषेधवाक्यानामपि तत्परत्वमाह * रागादीति ॥ नित्यनैमित्तिकविधीनां तात्पर्यमाह *विधिष्विति ॥ कथं तर्हि विधिनिषेधयोर्भेदः? तत्राह *कार्येति ॥ "सायं प्रातर्जुहुयात्" इत्यादिव्यापारान्तरोक्तिमुखेन तत्काले कार्यान्तरं वारयन्तः तदभावे नित्यादिविधयः पर्यवस्यन्तीत्यर्थः ॥ ६० ॥ कल्पनालाघवात्ते ऽपि कस्मादभावमेव नाभिदधीरन्नित्याशङ्क्य ईदृशाया अपि वाक्यप्रवृत्तेर्लोकसिद्धत्वान्न दोष इत्याह * लोकेऽपीति ॥ ६१ ॥ उक्तमर्थं निगमयति *एवमिति। प्रवृत्तिलय इति देहादिलयस्याप्युपलक्षणम्। अधिकारो नियोगः। विधिशब्दो निषेधोपलक्षणम् ॥ ६२ ॥

मैवं किं भेदविलयो विधीनां फलकाङ्क्षया ॥
तात्पर्यादात्मबोधस्य हेतुत्वाद्वाऽत्र कल्प्यते ॥ ६३ ॥
नाद्यस्तावद्यतोऽशेषा न कर्मविधयः फलात् ॥
स्ववाक्यावगतात्किञ्चिदपेक्षन्ते फलान्तरम् ॥ ६४ ॥
तात्पर्यं च विधीनां स्यात्कर्मानुष्ठान एव हि ॥
अन्तरेण त्वनुष्ठानं स्वर्गपश्वाद्यसम्भवात् ॥ ६५ ॥
श्रुतेर्विलयतात्पर्ये फलमाकस्मिकं भवेत् ॥
फलार्थे चेल्लयो न स्यान्नोभयं वाक्यभेदतः ॥ ६६ ॥
श्रुतेऽपि स्वर्गतात्पर्ये कल्पना चेल्लयेऽर्थतः ॥
तन्न प्रत्यक्षवचनाद्देहादिलयसिद्धितः ॥ ६७ ॥
साक्षाद्धस्तिनि दृष्टेऽपि न हि हस्तिपदानुमा ॥
अस्थूलादिवचः साक्षाद्देहादिप्रतिषेधकृत् ॥ ६८ ॥
नात्मबोधोऽपि भेदस्य लयाद्भवति कुत्रचित् ॥

किं भेदलयो विध्यपेक्षिताविनाशिफलसिद्ध्यर्थं विधिकाण्डार्थत्वेन कल्प्यते, विधेर्लयपरत्वाद्वा, लयस्यात्मधीहेतुत्वाद्वेति विकल्पयति * किमिति ॥ ६३ ॥ तत्राद्यं निरस्य द्वितीयं प्रस्याह । * तात्पर्यमिति ॥ अनुष्ठानतात्पर्यहेतुमाह * अन्तरेणेति ॥ ६५॥ लयपरत्वे बाधकमप्याह * श्रुतेरिति ॥ फलार्थे फलस्वरूपे तात्पर्यमित्यनुषङ्गः॥६६॥ श्रुतेः फलपरत्वप्रतीतावपि देहादिलये तत्कल्प्यते ऽन्यथाऽऽमुष्मिके कर्मणि पुरुषं प्रवर्त्तयितुमसामर्थ्यादिति शङ्कित्वा परिहरति * श्रुतेऽपीति ॥६७॥ देहादिलयस्य शाब्दत्वे सम्भवत्यार्थिकं न कल्प्यमित्यत्र प्राकृतदृष्टान्तमाह * साक्षादिति ॥ ६८ ॥ तृतीयेऽपीदं वक्तव्यं, किं भेदलयः साक्षादात्मज्ञानहेतुर्भेदकारणनिवर्त्तनद्वारा वा ?

अलयेऽप्युपपन्नत्वाल्लये सुप्तावनीक्षणात् ॥ ६९ ॥
गुरुशास्त्राद्यविलये बोधोऽयमुपपद्यते ॥
लयमात्रेण चेद्बोधः सुप्तौ केन निवार्यते ॥ ७० ॥
सर्पाभासलयेऽपीयं रज्जुस्तमसि नेक्ष्यते ॥
प्रत्युताभाससर्पोऽयं लीयते रज्ज्ववेक्षणात् ॥ ७१ ॥
अथ प्रपञ्चनाशेन नाश्यते भेदकारणम् ॥
नैवं न कार्यनाशेन कारणं नश्यति क्वचित् ॥ ७२ ॥
कारणं किमविद्या स्याद्वस्तु वा तत्त्वबोधतः ॥
अविद्यानाशनं तत्र प्रपञ्चविलयोऽफलः ॥ ७३ ॥
वास्तवोऽयं प्रपञ्चश्चेत्स विलाप्यो न केनचित् ॥
अन्यथा स्वात्मतत्त्वस्य विलयो नैव वार्यते ॥ ७४ ॥
किञ्च कृत्स्नस्य विलयः कर्तुं शक्यो न जन्मभिः ॥
लयस्तु जायते स्वापे स्वत एव न शास्त्रतः ॥ ७५ ॥
किञ्च भावी न चोच्छेद्यो भूतोऽप्युपरतः स्वतः ॥
प्रपञ्चो वर्त्तमानस्तु कार्यत्वान्नश्यति स्वतः ॥ ७६ ॥
किञ्च भेदलयेनैव सर्वानर्थप्रहाणतः ॥

नाद्यः, अन्वयव्यतिरेकव्यभिचारादित्याह * नात्मेति ॥ ६९॥ उक्तमेव व्यनक्ति * गुर्विति ॥ ७० ॥ जाग्रत्यन्वयव्यभिचारमाह * सर्पेति । किञ्च भेदलयस्य न बोधहेतुत्वं बोधस्यैव तद्धेतुत्वदर्शनादित्याह * प्रत्युतेति ॥ ७१ ॥ द्वितीयमनूद्य प्रत्याह * अथेति ॥ ७२ ॥ प्रपञ्चकारणमविद्येति पक्षं दूषयति * तत्त्वेति ॥ नाशनं, स्यादिति शेषः ॥ ७३ ॥ तस्य सत्यत्वे तत्कार्यप्रपञ्चस्यापि सत्यत्वनियमात्तल्लय एव न सम्भवति कुतस्तेन कारणलय इत्याह * वास्तव इति ॥ ७४ ॥

पुरुषार्थस्य संसिद्धेर्विद्यानैष्फल्यमापयेत् ॥ ७७ ॥
अत ऐकात्म्ययाथात्म्यज्ञानादज्ञानहानतः ॥
सिद्धे पुमर्थे विलयकल्पना निष्प्रयोजना ॥ ७८ ॥
इष्टसाधनता बोध्या विधिभिः सकलैरपि ॥
अनिष्टसाधनत्वं तु निषेधैरिति हि स्थितिः ॥ ७९ ॥
सोपानपङ्क्तिगत्येव हर्म्यपृष्ठाधिरोहणम् ॥
अशेषकर्मक्रमतोऽधिकारं केचिदूचिरे ॥ ८० ॥
संध्यावन्दनमारभ्य क्रमानुष्ठितकर्मभिः ॥
सहस्रवर्षसत्रान्तैर्ज्ञानितामधिरोहति ॥ ८१ ॥
यथैव नगराध्वस्थग्रामगत्युपदेशनम् ॥
नगराध्वोपदेशस्य शेषत्वं प्रतिपद्यते ॥ ८२ ॥
तथैव मोक्षमार्गस्थस्वर्गादिगतिभाषणम् ॥
मोक्षमार्गोपदेशस्य शेषत्वं किं न गच्छति ॥ ८३ ॥

॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ विधीनां भेदलयपरत्वाभावे कुत्र तात्पर्यम् ? अत आह * इष्टेति ॥ ७९ ॥ यथा प्रासादशिखरमारुरुक्षुः सोपानपूर्वक्रमेण तदारोहति, एवं मुमुक्षुरपि स्वर्गादिद्वारा मोक्षमारोक्ष्यति अतः स्वर्गादिहेतुसर्वकर्मानुष्ठानानन्तरं ज्ञानाधिकारितेति मतान्तरमाह * सोपानेति ॥८०॥ ॥ ८१ ॥ सोपानगमनस्य हर्म्यारोहणशेषत्वं प्रत्यक्षं, नैवं स्वर्गादिकर्मणां ज्ञानशेषत्वं प्रामाणिकमित्यत आह * यथैवेति द्वाभ्यां ॥ विमताः ज्ञेयशेषाः तदार्थिनं प्रत्युपदिश्यमानत्वाद्यदेवं तदेवं यथा नगरजिगमिषुं प्रति मार्गग्रामगत्युपदेशो नगरगतिशेष इति भावः ॥ ८२ ॥ ८३ ॥ तत्रैव पक्षान्तरमा-

यद्वोपच्छन्दनार्थानि स्वर्गादीनि विमुक्तये ॥
नगराप्त्यै तदध्वस्थग्रामादिगुणगीरिव ॥ ८४ ॥
एवं च सति दृष्टेन द्वारेणैवोपकारिणः ॥
आत्मज्ञानाधिकारस्य विधयः सकला अपि ॥ ८६ ॥
मैवं ग्रामगतेः पुंसोऽनर्थ्यत्वादस्तु शेषता ॥
स्वयमेव पुमर्थत्वात्स्वर्गादेः शेषता कथम् ॥ ८६ ॥
यदुपच्छन्दनार्थत्वं नृवाक्ये तत्समञ्जसम् ॥
वेदे तु वक्त्रराहित्यादभिप्रायाद्यसम्भवः ॥ ८७ ॥
यद्वा तत्रैव तात्पर्यं यत्रोपच्छन्द्य नीयते ॥

ह * यद्वेति । यथोपच्छन्दनेन बालं नगरं निनीषुः तं मार्गस्थग्रामेष्वन्नपानादिभोगोपकरणानि वर्णयति तथा सांसारिकसुखविलक्षणमोक्षकामिनां मुक्त्यर्थप्रवृत्तये प्ररोचनाय कर्मविधयोऽपि स्वर्गादीन्यादिश्य तद्भोगेन तत्र वैराग्यभाजो ज्ञानाधिकारितामापाद्य मोक्षे पर्यवस्यन्तीत्यर्थः * दृष्टेनेति ॥ तद्भोगानन्तरं तत्कर्मप्रवृत्तिनिरोधद्वारेत्यर्थः ॥ ८४ ॥ ८५ ॥ नगरमार्गस्थग्रामगतेर्नगरं जिगमिषोरनर्थितत्वात्तदुक्तेः स्वार्थे विफलत्वात्फलवन्नगरगत्युक्तिशेषता युक्ता, स्वर्गादेः पुमर्थत्वान्न मुक्तिशेषत्वं, तथा चोक्तानुमाने स्वार्थे फलविधुरत्वमुपाधिरित्यभिसन्धाय दूषयति * मैवमिति ॥ ८६ ॥ मुमुक्षुप्रवृत्तये प्ररोचनार्था विधय इत्युक्तं तत्प्रत्याह * यदिति ॥८७॥

वक्तुरभावेऽप्यभिप्रायमङ्गीकृत्य दूषयति * यद्वेति । यथा बालः ग्रामादिगुणोक्तेस्तत्रैव तात्पर्यं प्रत्येति नगरप्राप्त्यभिप्रायस्याज्ञातत्वान्न ज्ञाताज्ञातयोः शेषशेषिता, तद्वद्विधीनामपि स्वर्गपरत्वमेवेति भावः । तत्रैव तात्पर्यं, यतः प्रतिपत्ता प्रत्येतीति

ततश्च विधितात्पर्यं स्वर्ग एव न मोक्षणे ॥ ८८ ॥
दृष्टद्वारं च रागादिप्रवृत्तिप्रतिबन्धनम् ॥
यदि तर्हि निषेधेषु द्वारं भवतु तत्तथा ॥ ८९ ॥
विधयस्तु निरुन्धन्ति न रागं रागहेतवः ॥
वर्धयन्ते प्रत्युतामी रागं भोगप्रधानतः ॥ ९० ॥
अशेषकर्मानुष्ठानमल्पायुषि न सम्भवेत् ॥
सोपानपङ्क्तिन्यायोऽतो मन्दबुद्धिप्रकल्पितः ॥ ९१ ॥
अपरे मन्वते मोक्षे ज्ञानकर्मसमुच्चयः ॥
प्रधानगुणभावेन त्रिविधोऽसौ समुच्चयः ॥ ९२ ॥
ज्ञानं प्रधानं केषाञ्चिदन्येषां कर्ममुख्यता ॥
समप्राधान्यमुभयोरपरेषां मते स्थितम् ॥ ९३ ॥
अन्तरङ्गं यथा वस्तु नित्यप्राप्तं महाफलम् ॥
एकरूपं च विज्ञानं कस्तस्यान्यसमुच्चयः ॥ ९४ ॥
अन्तरङ्गं हि विज्ञानं प्रत्यङ्मात्रैकसंश्रयात् ॥
बहिरङ्गं तु कर्म स्याद्बाह्यद्रव्याश्रयत्वतः ॥ ९५ ॥
सत्यन्तरङ्गे विज्ञाने बहिरङ्गं न सिध्यति ॥
अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ॥ ९६ ॥

शेषः ॥ ८८ ॥ यदुक्तं प्रवृत्तिनिरोधद्वारा विधीनामुपकारकत्वमिति तदनूद्य दूषयति * दृष्टेति ॥ ८९ ॥ ९० ॥ समुच्चयपक्षं दूषयितुं तदवान्तरभेदं दर्शयति ॥ * अपर इति ॥ ९१ ॥ ॥ ९२ ॥ ९३ ॥ परस्परविरुद्धत्वान्न ज्ञानकर्मणोः समुच्चय इति दर्शयितुं ज्ञानस्वरूपं तावदाह * अन्तरङ्गमिति ॥ ९४ ॥ अन्तरङ्गत्वयथावस्तुत्वनित्यप्राप्तत्वमहाफलत्वैकरूपत्वानि क्रमेणोपपादयन् तद्विरुद्धकर्मणां समुच्चयं निरस्यति * अन्तरङ्गं

यथावस्त्वात्मविज्ञानं मोहमात्राश्रयाः क्रियाः ॥
सम्यग्ज्ञाने कुतः कर्म कर्महेतूपमर्दनात् ॥ ९७ ॥
नित्यप्राप्तं च विज्ञानं प्रतीचः सन्निधेः सदा ॥
कर्मानित्यं पृथग्रूपं नित्यं चानित्यबाधकम् ॥ ९८ ॥
क्षयी कर्मार्जितो लोकः स्वराड् ब्रह्मावबोधतः ॥
लब्धे त्रैलोक्यराज्ये तु भिक्षामाद्रियते कथम् ॥ ९९ ॥
एकरूपं हि विज्ञानमेकरूपात्ममेयतः ॥
भिन्नरूपाणि कर्माणि बहुकारकसंश्रयात् ॥ १०० ॥
एकरूपस्य मोक्षस्य भिन्नरूपं न साधनम् ॥
एकरूपस्य मोक्षस्य त्वेकरूपं हि साधनम् ॥ १०१ ॥
ऐकात्म्यवस्तुयाथात्म्यबोधे जात्यादिबाधनात् ॥
न कर्म कुरुते किन्तु कृतं प्रत्युत शोचति ॥ १०२ ॥
अयथावस्तुसर्पादिज्ञानं हेतुः पलायने ॥
रज्जुज्ञानेऽहिधीध्वस्तौ कृतमप्यनुशोचति ॥ १०३ ॥
एवं च ज्ञानिनः कर्मासम्भवाज्ज्ञानकर्मणोः ॥
न सम्भवति मोक्षार्थस्त्रिविधोऽपि समुच्चयः १०४ ॥
तस्मात्कामलये भेदलये सोपानवर्त्मनि ॥
समुच्चये च सम्बन्धो न युक्तः काण्डयोर्द्वयोः ॥ १०५ ॥
परिशेषात्पुरा प्रोक्तः साध्यसाधनलक्षणः ॥
सम्बन्धोऽत्रावगन्तव्यो ज्ञानकर्माख्यकाण्डयोः ॥ १०६ ॥
इति वार्त्तिकसारे सम्बन्धपरीक्षाप्रकरणं समाप्तम् ॥

हीत्यादिना ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ स्वराट् स्वानन्दतुष्टो, भवतीति शेषः ॥ ९९ ॥ एवं विरुद्धत्वात्समुच्चयं निरस्य ज्ञानानन्तरं कर्माधिकारहेतुब्राह्मण्याद्यभिमानाभावेन तत्र

सम्बन्धसिद्धौ वेदान्तप्रामाण्यं चिन्त्यतेऽधुना ॥
अप्रामाण्ये तु सम्बन्धः पूर्वोक्तः प्रविलीयते ॥ १ ॥
केचित्कार्यैकनिष्ठत्वं कृत्स्नवेदस्य मन्वते ॥
ततो ब्रह्मणि सिद्धार्थे वेदान्तानाममानता ॥ २ ॥
न प्रवृत्तिनिवृत्तिभ्यां शून्यस्य वचसो यतः ॥
क्वचिदर्थोऽत्र दृष्टोऽतो वस्तुनि स्यादमानता ॥ ३ ॥
उत्तमप्रोक्तशब्दार्थे मध्यमव्यवहारतः ॥
बालो व्युत्पद्यते तस्माद् व्युत्पत्तिरपि कार्यगा ॥४॥
शुक्लां गामानयेत्युक्ते कं चिद्गोकर्मिकां क्रियाम् ॥
कुर्वाणमपि वीक्ष्याज्ञः कुरुते कारणानुमाम् ॥ ५ ॥
ज्ञातं ध्रुवमनेनैतद्यद्गोकर्मकमीक्ष्यते ॥

प्रवृत्त्ययोगाच्च न समुच्चय इत्याह * ऐकात्म्येति ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥

इति वार्त्तिकसारटीकायां सम्बन्धपरीक्षा प्रकरणं समाप्तम् ।

वेदान्तप्रामाण्यं सिद्धवत्कृत्य तस्य पूर्वकाण्डेन सम्बन्धो दर्शितः, इदानीं तदेव प्रामाण्यं दर्शयति *सम्बन्धसिद्धाविति । उक्तसम्बन्धसिद्धिनिमित्तमित्यर्थः ॥ १ ॥ पूर्वपक्षमाह * केचिदिति ॥ २ ॥ ३ ॥ पुमर्थहेतुप्रवृत्त्यजनकवस्तुबोधित्वेन निष्फलत्वाद्वेदान्तानामप्रामाण्यमुक्त्वा प्राथमिकव्युत्पत्तौ कार्यान्विते पदानां शक्तिनिश्चयादपि तदमानत्वमाह * उत्तमेति॥४॥ व्युत्पत्तिप्रकारमभिनयति * शुक्लामिति द्वाभ्याम् । * कारणानुमामिति ॥ गोकर्मकानयनप्रवृत्तिः स्वविषयज्ञानसाध्या प्रेक्षावत्प्रवृत्तित्वात् मत्प्रवृत्तिवदित्यनुमाय, ज्ञानं च वाक्यजन्यं वाक्ये सति जातत्वात्पूर्वमभावादिति निश्चित्य वाक्यस्य गोकर्मकान-

तत एतस्य वाक्यस्य गवानयनबोधिता ॥ ६ ॥
कार्यार्थएव सद्भावाद् व्युत्पत्तिपुरुषार्थयोः ॥
विधेय एव वेदार्थो न सिद्धः कोऽपि कुत्रचित् ॥ ७ ॥
मन्त्रार्थवादनाम्नां च कार्यार्थानुप्रवेशतः ॥
प्रामाण्यं न स्वतस्तस्मात्कार्ये वेदस्य मानता ॥८॥
वेदान्तानामतो वाच्यं कार्यार्थानुप्रवेशनम् ॥
प्रामाण्यं वा निषेद्धव्यमत्र प्रतिविधीयते ॥ ९ ॥
किं मेयाभावतः प्रोक्ता वेदान्तानाममानता ॥
किं वा मीमांसकम्मन्यतया कार्यैकरागतः ॥ १० ॥
न मेयाभावशङ्काऽस्ति सर्वव्यापृतिसाक्षिणः ॥
चिदात्मनोऽपलापे तु जगदान्ध्यप्रसङ्गतः ॥ ११ ॥
निःशेषमातृतद्वृत्तिजन्मनां सर्वदाऽस्ति हि ॥

यनपरत्वं जानातीत्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ कार्यस्यैव वेदार्थत्वे सिद्धबोधिमन्त्रादीनामप्रामाण्यं स्यादित्याशङ्क्य तेषां तच्छेषत्वेन प्रामाण्यमाह * मन्त्रेति ॥८ ॥ सर्ववेदस्य कार्यार्थत्वे फलितमाह * वेदान्तानामिति ॥ ९ ॥ व्युत्पत्तिफलयोरनुपपत्तिमात्रं वेदान्ताप्रामाण्यप्रयोजकमुत प्रयोजकान्तरमप्यस्ति ? नाद्यः, तस्य तुच्छत्वात्परिहरिष्यमाणत्वाच्चेत्यभिसन्धाय द्वितीयं विकल्पयति * किमिति ॥ मीमांसकम्मन्यता नाम कार्यार्थत्वं शब्दानां स्वभाव इत्यभिनिवेशः॥१०॥ *नेति। साक्षिण एव मेयत्वादिति शेषः ॥११॥ सर्वव्यवहारसाक्षित्वमुपपादयति*निःशेषेति ॥ १२ ॥ उक्तमर्थं व्याचष्टे * लिङ्गेत्यादिना ॥ १३ ॥ १४ ॥ १५ ॥ नन्वात्मनो विकाराहते बुद्ध्यादिव्याप्तौ बुद्ध्यादेरपि विना विकारं बाह्यान्तरविषयाकारभासनं स्यात्

स्वप्रकाशात्मचैतन्यव्याप्तिर्वस्तुस्वभावतः ॥ १२ ॥
लिङ्गदेहःप्रमाताऽत्र कामाद्यास्तस्य वृत्तयः ॥
चैतन्येन वियुक्तास्ता जायन्ते न कदाचन ॥ १३ ॥
लिङ्गतद्वृत्तिसम्भूतौ सत्यां चिद्व्याप्तये न हि ॥
कश्चिद्धेतुरपेक्ष्योऽस्ति खव्याप्तौ कलशेष्विव ॥१४॥
आकाशवस्तुस्वाभाव्यमात्रादेव न कारकात् ॥
वियता पूर्णता कुम्भस्यैवं दृक्पूर्णता धियाम् ॥१५॥
घटदुःखादिरूपित्वं धियां धर्मादिहेतुतः ॥
निर्हेतुस्तु स्वतःसिद्धदृग्व्याप्तिर्नित्यसन्निधेः ॥ १६ ॥
बुद्धितद्वृत्तिभावस्तदभावश्चाप्यनन्यमात् ॥
यतः सिद्ध्यते सोऽर्थो ज्ञेयः सिद्धः स्वतः सदा॥१७॥
ननु प्रमाणविरहात्स्वतःसिद्धो यदीक्ष्यते ॥
वाक्यस्य बुद्धबोधित्वादप्रामाण्यं प्रसज्यते ॥ १८ ॥

बोद्धृत्वाविशेषादिति चेत्, नेत्याह * घटेति । बुद्धेर्घटाद्याकारभजनमदृष्टकृतं न स्वारसिकं बुद्धितद्बोध्योः परिच्छिन्नत्वात्, अतो युक्तं बुद्धेर्विकारद्वारा विषयाकारत्वमित्यर्थः । बुद्धेः प्रत्यगाकारभजनं तु न धर्मादिकृतमित्याह * निर्हेतुरिति । तत्र हेतुमाह * नित्येति ॥ १६ ॥ स्वतःसिद्धा दृग्व्याप्तिरित्युक्तं, दृशः स्वतःसिद्धत्वं कथमित्याशङ्क्याह *बुद्धीति ॥ बुद्धितद्वृत्तिभावाभावौ यतो भासेते सोऽर्थः सदा ज्ञेय इति सम्बन्धः । तस्य स्वप्रकाशत्वे मानान्तरानपेक्षत्वं हेतुमाह * अनन्यमादिति । स्वविषयमानं विना भानादित्यर्थः ॥ १७ ॥ बुद्ध्यादिसाक्षी कूटस्थस्वप्रकाशो वेदान्तमेय इत्युक्तं, तर्हि तत्र तेषामनुवादकत्वादप्रामाण्यमिति शङ्कते *नन्विति ॥

मैवमप्रतिबद्धत्वाच्चिदेकरसवस्तुनः ॥
तद्व्युत्पत्तेः पुरा पश्चाद्बोधो व्युत्पत्तिमात्रतः ॥१९॥
बोधाबोधौ नृभिर्दृष्टौ स्वानुभूत्यैव वस्तुनः ॥
दृष्टे चानुपपन्नत्वं किंबलादभिधीयते ॥ २० ॥
वेदान्तशास्त्रव्युत्पत्तेः पुरा कः प्रतिबुध्यते ॥
को वा व्युत्पत्तितस्तूर्ध्वं बुद्धिमान्न विबुध्यते ॥२१॥
एवं सार्वजनीनौ तौ बोधाबोधौ चिदात्मनः ॥
अपह्नोतुं कथं नाम शक्यौ स्यातां कुतार्किकैः ॥२२॥
स्वप्रकाशोऽप्यसम्बुद्धः सुप्त्यादावनुभूयते ॥
अस्वप्रकाशतायां तु सुप्त्यादिः केन सिध्यति ॥२३॥
असम्बुद्धस्तदा बोधहेतुमात्राद्यभावतः ॥
अत एव न मानेन सुषुप्त्यादिः प्रसिध्यति ॥ २४ ॥

प्रमाणविरहात्तद्विनाभावादिति यावत् ॥ १८ ॥ वाक्योत्थज्ञानात्पूर्वं "मामहं न जानामि" इति सार्वजनीनानुभवेनैव स्वप्रकाशस्याप्यज्ञातत्वान्न बुद्धबोधित्वेनाप्रामाण्यमिति परिहरति *मैवमिति। तर्ह्यज्ञातत्वेऽपि कदाचित् ज्ञानं न स्यादित्याशङ्क्य व्युत्पत्तिशब्दितश्रवणादिना अपरोक्षबोधोदयान्मैवमित्याह *पश्चादिति ॥ १९ ॥ स्वप्रकाशे कादाचित्कं ज्ञानमनाद्यज्ञानं चायुक्तमित्याशङ्क्याह * बोधेति ॥ २० ॥ नृभिर्दृष्टावित्युक्तं व्यनक्ति * वेदान्तेति ॥ २१ ॥ २२ ॥ न केवलमुक्तानुभवादेवात्मा स्वप्रकाशः किन्त्वनुभवान्तरादपीत्याह * स्वप्रकाश इति ॥ सुप्तोत्थितस्य "अस्वाप्सं न किञ्चिदवेदिषम्" इति परामर्शस्तत्कालीनस्वप्रकाशानुभवं विना न सिध्यतीत्यर्थः ॥ २३ ॥ उक्तानुभवेनात्मनः स्वप्रकाशत्वेऽपि कथमज्ञातत्वं तत्राह *असम्बुद्ध इति ॥ तदा प्रमात्राद्यभावादेव योग्यानुपलम्भात्स्वापा-

सुषुप्त्यादेश्च संसिद्धिर्मात्रादिविरहेऽपि या ॥
सा त्विहान्तरसम्बुद्धस्वप्रकाशचिदाश्रयात् ॥ २५ ॥
न चाभावप्रमाणात्सा सति मातर्यभावमा ॥
मात्राद्यभावसंसिद्धिः कथं मात्रादिपूर्विका ॥ २६ ॥
एवं सर्वव्यवहृतिप्रसाधकचिदात्मनि ॥
सति स्पष्टेऽत्र वेदान्ता मेयहीनाः कथं वद ॥ २७ ॥
सर्वमानस्वभावस्य परीक्षायां चिदात्मनि ॥
मेये कैमुतिकन्यायासिद्धा वेदान्तमानता ॥ २८ ॥
यमप्रमाय मानानि नानात्मानं प्रमिन्वते ॥
वस्तुवृत्तानुरोधेन कथं तत्राप्रमावचः ॥ २९ ॥
चैतन्यमनभिव्यज्य चेत्यं व्यञ्जयितुं न हि ॥

दिसिद्धिरिति मतमप्यपास्तमित्याह * अत एवेति ॥ २४ ॥ ज्ञानविरोध्यज्ञानमनुभवमाश्रित्य तत्प्रसादात्कथं सिध्यति? न हि विरोधिनः साधकत्वमाश्रयत्वं चेत्याशङ्क्याह * सुषुप्त्यादेरिति ॥ मात्राद्यभावेऽपि या स्वापमूर्च्छादेः स्फूर्तिः साऽपीह व्यवहारभूमौ भवन्ती प्रत्यग्भूताज्ञानानुभवात्मकवस्त्ववष्टम्भाद्भवति। तथाच ज्ञानविरोधिस्वापादिसिद्धिवत्तद्विरोध्यज्ञानसिद्धिरप्यनुभवादेवेत्यर्थः ॥ २५ ॥ योग्यानुपलम्भात्तत्सिद्धिर्नेत्युक्तं विवृणोति *न चेति। किंच मात्राद्यभावः स्वापादिस्तस्य स्फूर्तिर्न मात्रादिनिमित्ता स्वस्य स्वाभावासाधकत्वादतोऽनुभवादुक्तस्वापादिसिद्धिवदज्ञानसिद्धिरपीत्याह * मात्रादीति। न च निवर्तकस्याज्ञानाश्रयत्वायोगः, वाक्योत्थबोधस्यैव निवर्तकत्वादिति भावः ॥२६॥ साक्षिणो वेदान्तमेयत्वमुक्तमुपसंहरति * एवमिति ॥ २७॥ कैमुतिकन्यायमेव दर्शयति * यमप्रमायेति ॥२८॥

शक्नुवन्ति प्रमाणानि चैतन्यं व्यञ्जयन्त्यतः ॥ ३० ॥
प्रकाशमगृहीत्वा न प्रकाश्यं रूपमीक्षते ॥
चक्षुः, तेन प्रकाशस्य ग्रहणं रूपतः पुरा ॥ ३१ ॥
तथैव चिदभिव्यक्तिश्चेत्याभिव्यक्तितः पुरा ॥
अनात्मग्राहकैर्मानैरत आत्मा प्रमीयते ॥ ३२ ॥
चिदात्मबोधनार्थैव प्रवृत्तायाः श्रुतेश्चिति ॥
मानत्वं किमु वक्तव्यं प्रकाशग्राहिनेत्रवत् ॥ ३३ ॥
मीमांसकम्मन्यताऽपि मानवृत्तानभिज्ञताम् ॥
तव प्रकटयत्यत्र कार्यरागे निमज्जतः ॥ ३४ ॥ ३९ ॥
मानं हि व्यञ्जकं तच्च समानं सिद्धकार्ययोः ॥
अतः सर्वस्य वेदस्य बोधकत्वात्प्रमाणता ॥ ३५ ॥
वेदान्तवचसां स्वार्थे प्रामाण्यं न विहन्यते ॥
मानलक्षणसद्भावाज्ज्योतिष्टोमादिवाक्यवत् ॥ ३६ ॥
यद्धेतुकं प्रमाणत्वं वेदान्तानां समर्थ्यते ॥
तेनैव हेतुना कर्मकाण्डस्यापि प्रमाणता ॥ ३७ ॥
वेदान्तानाममानत्वं येन वा हेतुनोच्यते ॥

२९॥ अमुमेव श्लोकं विवृणोति * चैतन्यमिति ॥३०॥३१॥३२॥ आलोकाद्यभिव्यक्तरूपादिग्राहिणश्चक्षुरादेः प्रथममालोकादिग्रहणवच्चिदभिव्यक्तचेत्यग्राहिमानानामपि चिदात्मबोधकत्वेऽनन्यविषयतत्त्वमादेः प्रतीचि प्रामाण्यमवश्यम्भावीत्याह * चिदात्मेति ॥३३॥ द्वितीयं पक्षमनूद्य दूषयति * मीमांसकमिति ॥ ३४ ॥ मानस्वभावमेव प्रकटयति * मानं हीति ॥ व्यञ्जकम् अज्ञातार्थबोधकम् ॥३५॥ ३६ ॥ * यद्धेतुकमिति ॥ प्रामाण्यहेतोरज्ञातज्ञापकत्वस्य तुल्यत्वात्तदपि तयोस्तुल्यमित्य-

तेनैव हेतुना कर्मकाण्डस्यापि प्रसज्यते ॥ ३८ ॥
बोधकत्वेन मानत्वं काण्डयोरुभयोः समम् ॥
अकार्यबोधेनामात्वं कर्मकाण्डेऽप्यवारणम् ॥ ३९ ॥
कार्यं कालत्रयास्पर्शि त्वदभीष्टं न तत्क्वचित् ॥
कर्मकाण्डेऽपि सम्भाव्यं नृशृङ्गादविशेषतः ॥ ४० ॥
अतः समीहितोपायतया वस्त्ववबोधनात् ॥
कर्मकाण्डस्य मानत्वं कार्यैः प्रेरणया न तु ॥ ४१ ॥
तथाच वस्तुयाथात्म्यज्ञापनेन प्रमाणता ॥
वेदान्तानां कुतो न स्यात्प्रत्यक्षादौ तदीक्षणात्॥४२॥
मन्त्रादेः कार्यशेषत्वं त्वयोक्तं तत्तथैव तत् ॥
अथापि त्वदभीष्टं यत्कार्यं तन्मानवर्जितम् ॥ ४३ ॥

र्थः । कर्मकाण्डविरोधाज्ज्ञानकाण्डप्रामाण्यमित्याशङ्क्य वैपरीत्यापत्तेर्मैवमित्याह * वेदान्तानामिति ॥ ३८ ॥ तथापि सिद्धवस्तुमात्रबोधिवेदान्तानाममानत्वमिति शङ्कते * कार्येति । तर्हि इष्टसाधनताबोधककर्मकाण्डस्याप्रामाण्यापत्तिरित्याह * कर्मेति ॥ ३९ ॥ इष्टसाधनत्वस्यैव तदर्थत्वं वक्तुं पराभिमतनियोगं दूषयति * कार्यमिति ॥ ४० ॥ तस्माच्छ्रेयःसाधनत्वं यागादेर्बोधयतो विधेरिव वस्तुतत्त्वबोधकतत्त्वमादिवचसोऽपि प्रामाण्यमविरुद्धमित्याह * अत इत्यादिना ॥ ४१ ॥ बोधकमेव मानं न प्रेरकमित्यत्र दृष्टान्तमाह * प्रत्यक्षादाविति ॥ ४२ ॥ अपिच मन्त्रवत्सिद्धबोधिवाक्यानामपि प्रामाण्यमविरुद्धमिति वक्तुं तेषां पराभिमतकार्यशेषत्वेन प्रमाणत्वमुक्तं निरस्यति *मन्त्रादेरिति ॥४३॥ * अत इति । स्वर्गादिसाधनत्वेन कृतिसा-

अतो यदेव साध्यार्थसाधनत्वेन गम्यते ॥
वेदात्तदेव साध्यत्वात्कार्यं नान्यत्ततः पृथक् ॥ ४४ ॥
कार्यशेषोऽप्यर्थवादो न स्वार्थेऽत्यन्तमप्रमा ॥
गुणानुवादभूतार्थरूपैस्त्रैविध्यसम्भवात् ॥ ४५ ॥
विरोधे गुणवादः स्यादनुवादोऽवधारिते ॥
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥ ४६ ॥
आदित्यो यूप इत्यत्र प्रत्यक्षेण विरोधतः ॥
आदित्य इव पूतत्वगुणको यूप उच्यते ॥ ४७ ॥
अग्निर्हिमस्य भैषज्यमिति लोकप्रसिद्धितः ॥
अनूद्यार्थमिमं तेन विधिं प्रत्युपयुज्यते ॥ ५८ ॥
मेधातिथिं जहारेन्द्र इत्यपूर्वार्थबोधनात् ॥
एति मात्वमिहाभावादनुवादविरोधयोः ॥ ४९ ॥
मन्त्रनाम्नोरयं न्यायो योज्यः सिद्धप्रमापणे ॥
इत्थं सिद्धाऽन्यशेषाणामपि स्वार्थे प्रमाणता ॥ ५० ॥
किमुतानन्यशेषाणां वेदान्तानां चिदात्मनि ॥
मात्वं, तेनास्ति नैवान्यन्मानमैकात्म्यबोधकृत् ॥५१॥
ननु सर्वप्रमाणानि स्वस्वप्रमेयावभासने ॥

ध्यत्वेन च प्रतीयमानयागाद्यतिरिक्तं कार्यं नास्तीत्यर्थः ॥४४॥ तथाप्यन्यशेषस्य मन्त्रादेः कथं स्वार्थे प्रमाणत्वमित्याशङ्क्य अन्यपरस्यापि वाक्यस्य मानान्तरविरोधाभावे प्रतीयमानार्थे प्रामाण्यं सम्भवतीति देवताधिकरणोक्तं न्यायं वक्तुमुपक्रमते * कार्येति ॥ ४५ ॥ त्रिविधमप्यर्थवादं सोदाहरणं विशदयति *विरोधे इत्यादिना ॥४६॥४७॥४८॥ अभूतार्थवादस्यैव विधिशेषत्वेन प्रमाणत्वमुक्त्वा भूतार्थवादस्याज्ञातज्ञापकत्वेन विरोधाभावाच्च

आत्मानं व्यञ्जयन्त्यादाविति पूर्वं त्वयेरितम् ॥ ५२ ॥
बाढं चिन्मात्रमखिलैः प्रमाणैर्व्यज्यतामिति ॥
अद्वितीयात्मतत्त्वं तु वेदान्तैरेव मीयते ॥ ५३ ॥
यदप्युक्तं प्रवृत्तिं वा निवृत्तिं वा विना ऽऽगमे ॥
पुमर्थो नेति, तन्नैव मोक्षस्य पुरुषार्थतः ॥ ५४ ॥
निःशेषसुखसम्प्राप्तेः सर्वानर्थहतेस्तथा ॥
मुक्तिरेव पुमर्थः स्यात्पुम्भिर्नार्थ्यो ऽतथाविधः ॥५५॥
कृत्स्नेष्टार्थस्य सम्प्राप्तिः कृत्स्नानर्थहतिस्तथा ॥
आत्मस्वरूपान्नान्यत्र सम्भाव्येते प्रमाणतः ॥ ५६ ॥
व्युत्पत्तिरपि कार्येऽर्थे नियन्तुं नैव शक्यते ॥
पुत्रस्ते जात इत्यादौ सिद्धे व्युत्पत्तिरीक्ष्यते ॥ ५७॥
श्रोतुर्मुखविकासेन वाक्यार्थं हर्षकारणम् ॥
निश्चित्य तद्विशेषं तु पश्चाद् व्युत्पद्यते शनैः ॥५८॥
न च सिद्धार्थवाक्यस्य लोके स्यादपुमर्थता ॥
पुत्रजन्म श्रुतवतः पितुरानन्ददर्शनात् ॥ ५९ ॥

स्वार्थे मानतामाह * मेयेति ॥४९॥५०॥५१॥ वेदान्तैकवेद्यत्वे ब्रह्मणः सर्वप्रमाणवेद्यत्वोक्तिर्विरुध्येतेति शङ्कते * नन्विति ॥ ५२ ॥ सोपाधिकस्य सर्वप्रमाविषयत्वेऽपि निरुपाधिकस्य वेदान्तैकविषयत्वमविरुद्धमिति परिहरति * बाढमिति ॥ ५३ ॥ पूर्वपक्षोक्तदूषणाभासावनूद्य निराकरोति * यदपीत्यादि ॥ ५४ ॥* मुक्तिरेवेति ॥ न प्रवृत्तिनिवृत्ती पुमर्थ इत्यर्थः ॥५५॥ * तद्विशेषमिति ॥ प्रयोगान्तरेष्वावापोद्धारक्रमेणेत्यर्थः ॥५८॥ ननु लोके सिद्धबोधिवाक्यानां न पुमर्थहेतुत्वं दृष्टमतो वेदान्तस्यापि न तद्धेतुतेत्यत आह * न चेति ॥ ५९ ॥ * नि-

किञ्चाध्यस्ताहिदष्टस्य तद्विषव्याप्तचेतसः ॥
स्रगियं न फणीत्युक्ते दृष्टा विषनिराक्रिया ॥ ६० ॥
कुतूहलवतां तद्वन्निवृत्ताख्यानमात्रतः ॥
दृष्टा नराणां निःशेषकुतूहलनिराक्रिया ॥ ६१ ॥
व्युत्पत्तिः पुरुषार्थश्च सिद्धे सम्भवतः स्वतः ॥
वेदान्तानां प्रमाणत्वं निर्विघ्नं ब्रह्मणि स्थितम् ॥६२॥
केचिदाहुः पदार्थत्वात्प्रमाणान्तरगम्यता ॥
आत्मनो नागमात्सिद्धिर्व्रीह्याद्यन्यपदार्थवत् ॥ ६३ ॥
व्रीह्याज्याग्निसमिद्भाः क्रियाकाण्डे समीरिताः ॥
पदार्था लोकतः सिद्धास्तथैवात्मेति गम्यताम् ॥६४॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तितः ॥
विविच्यात्माऽवगन्तव्यः प्रत्यभिज्ञानतस्तथा ॥६५॥
सदा व्यभिचरन्त्येव जाग्रदाद्याः परस्परम् ॥

वृत्तेति । भारतकथाद्यैरित्यर्थः । व्युत्पत्तिरित्युपलक्षणं विषयादिसम्भवाच्चेति ॥ ६० ॥ ६१ ॥ ६२ ॥ सिद्धेऽप्यर्थे व्युत्पत्त्यादिसम्भवाद्वेदान्ताः प्रमाणमित्युक्तं, सम्प्रति वेदान्तेषु जागरादिवासनानिरोधस्य मनोनिरोधस्य चाभिधीयमानत्वात्तत्परा एव ते, न मानान्तरासिद्धात्मनि प्रमाणमिति मतमाह * केचिदिति । आत्मनो व्रीह्यादिवत्सिद्धार्थत्वेन मानान्तरयोग्यत्वात्तत्संवादविसंवादाभ्यां न वेदान्तगम्यता इत्यर्थः । आत्मन इत्यनन्तरमत इत्यध्याहार्य्यम् ॥ ६३ ॥ दृष्टान्तं स्पष्टयति * व्रीहीति ॥ ६४ ॥ किं तदात्मगमकमानमत्राह * अन्वयेति ॥ ६४ ॥ उक्तमेव व्यनक्ति * सदेति ॥ ६५ ॥ येषु व्यावर्त्तमानेषु यदनुवर्त्तते तत्तेभ्यो भिन्नं यथा कुसुमेभ्यः सूत्रम् , इति

तत्र व्यभिचरत्येतन्न चैतन्यं कदाचन ॥ ६६ ॥
व्यावृत्तेभ्योऽनुवृत्तस्य विवेकः सार्वलौकिकः ॥
ततश्चिज्जाग्रदादिभ्यो विविक्तेत्यनुमीयते ॥ ६७ ॥
यः पुरा स्वप्नमद्राक्षमस्वाप्सं चापि मूढधीः ॥
सोऽहं जागर्मीति पुंसां प्रत्यभिज्ञाऽऽत्मगोचरा ॥६८॥
प्रत्यभिज्ञानुमानाभ्यामात्मन्यवगते सति ॥
मानव्यापारसमाप्तेर्न भूयो मानमपेक्ष्यते ॥ ६९ ॥
मानान्तरेण तत्सिद्धेर्नात्र व्याप्रियते वचः ॥
वासनानां निरोधे ऽतः पुमान् श्रुत्या नियुज्यते ॥७०॥
अनिरोधे वासनानामन्तकालेऽनुवर्त्तनात् ॥
भावि जन्मानिवार्यं स्यादन्त्यप्रत्ययकारितम् ॥७१॥
यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम् ॥
तं तमेवेति कौन्तय सदा तद्भावभावितः ॥ ७२ ॥
जाग्रत्स्वप्नसुषुप्त्याख्या याश्चानात्मार्थवासनाः ॥
निरोधनीयास्ताः सर्वा बिभ्यता भाविजन्मनः ॥७३॥
अनात्मप्रत्ययानन्तारितस्वात्मैकभावना ॥
कार्या, तया निरुध्यन्ते वासना जन्महेतवः ॥ ७४ ॥

व्याप्तिमभिसन्धायाह * व्यावृत्तेभ्य इति ॥ ६६ ॥ ६७ ॥ *माव्यापारेति । मानव्यापारस्यात्मस्फुरणस्य तदज्ञानहानेर्वा प्रत्यभिज्ञानादिना प्राप्तत्वादित्यर्थः ॥ ६८ ॥ आत्मनो मानान्तरयोग्यत्वे फलितमाह * नात्रेति । कुत्र तर्हि वेदान्तवचसो व्यापारस्तत्राह *वासनानामिति ॥ ६९ ॥ तन्निरोधस्यावश्यकतामाह *अनिरोधे इत्यादिना॥७०॥७१॥७२॥७३॥तत्रोपायमाह * अनात्मेति ॥ ७४ ॥ उक्तेऽर्थे प्रमाणप्रदर्शनपूर्वकमात्मप्रतिपादकसत्यादिवाक्यानामुपयोगमाह * उपासीतेति ॥७५॥

उपासीत स्वमात्मानामिति साक्षाद्विधिश्रुतिः ॥
तत्राङ्गभावसिद्ध्यर्थं चिदात्माऽनूद्यते श्रुतौ ॥ ७५ ॥
आत्मैकप्रत्ययो यावत्स्वभावात्सन्ततो भवेत् ॥
कुर्यादुपासनं तावत् क्षीयन्ते वासनास्ततः ॥ ७६ ॥
अन्यदृष्ट्या जाग्रदाद्याः कल्प्यन्तां क्षीणवासने ॥
विदुष्ययं, स्वदृष्ट्या तु स्वात्मनोऽन्यन्न पश्यति॥७७॥
देहं विनश्वरमवास्थितमुत्थितं वा
सिद्धो न पश्यति यतो ऽध्यगमत्स्वरूपम् ॥
दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः ॥ ७८ ॥
तस्मादशेषवेदान्ता वासनानां निरोधने ॥
नियुञ्जन्ते हि पुरुषमात्मोपासनमार्गतः ॥ ७९ ॥
अथवा मनसो रोधे मुमुक्षन्तं नियुञ्जते ॥
तस्मिन्निरुद्धे निखिला निरुध्यन्ते हि वासनाः ॥८०॥
तावन्मनो निरोद्धव्यं हृदि यावद्गतं क्षयम् ॥
इति श्रुतिर्मनोरोधं विदधाति विमुक्तये ॥ ८१ ॥
पातञ्जलं योगशास्त्रं मनोरोधे समाप्यते ॥
प्रवृत्तमनसो बन्धस्तन्निवृत्तौ विमुक्तता ॥ ८२ ॥
वासनामात्रहेतुत्वादात्मनोऽनर्थसङ्गतेः ॥

उक्तोपासनाया अवधिमाह *आत्मेति॥७६॥७७॥ क्षीणवासनस्य विदुषो देहप्रतीतिर्नेत्यत्र श्रीमद्भागवतश्लोकं संवादयति *देहमिति॥७८॥७९॥पक्षान्तरमाह *अथवेति ॥८०॥८१॥८२॥ वासनामनसोर्नाशादेव मुक्तिरित्यत्र युक्तिमप्याह * वासनेति ॥ ८३ ॥ आत्मनः प्रत्यभिज्ञादिना चिन्मात्रसिद्धावपि तद-

अन्योपायोऽस्तु वा मा वा निरोधादेव मुक्तता॥८३॥
स्वयञ्ज्योतिःस्वभावत्वान्निरुद्धस्वान्तवासनः॥
प्रमान्तरानपेक्षो हि स्वयमात्मा प्रकाशते ॥ ८४ ॥
एवं कार्यमुखेनैव ज्योतिष्टोमादिवाक्यवत् ॥
वेदान्तानां प्रमाणत्वं नाक्षवद्वस्तुनीष्यते ॥ ८५ ॥
इति व्याचक्षते मन्दा नियोगार्थैकरागिणः ॥
नैतत्साध्वभ्यधाय्यत्र नियोगस्यानपेक्षणात् ॥ ८६ ॥
कामितार्थस्य संसिद्धेर्लौकिकादेव मानतः ॥
वैदिकेन नियोगेन किं कार्यं वद बुद्धिमन् ॥ ८७ ॥
मनसो वासनानां च भावे ऽनर्थोऽस्ति जाग्रति ॥
तदभावे सुषुप्त्यादावनर्थो नैव वीक्ष्यते ॥ ८८ ॥
अन्वयव्यतिरेकाभ्यां निरोधो ऽनर्थवारणे ॥
उपाय इति विज्ञातः किमपूर्वं विधीयते ॥ ८९ ॥
अन्तरेणापि वेदोक्तं बौद्धादेरिव सिद्ध्यति ॥

द्वितीयत्वसिद्धये वेदान्तापेक्षा नेत्याह * स्वमिति । निरस्तसमस्तमनोवासनो निष्प्रत्यनीकतया स्वयमेव प्रकाशते । अद्वयत्वस्यापि तावन्मात्रत्वान्नान्यापेक्षेति भावः ॥८४॥८५॥ वासनानिरोधान्मोक्षपक्षे नियोगं विनाऽपीष्टार्थसिद्धेर्वेदवचसो वैयर्थ्यमिति दूषयति * नैतदिति ॥ ८६ ॥ ८७ ॥ लौकिकमानादेव तत्सिद्धिमुपपादयति * मनस इति ॥८८॥८९॥ वैदिकवचो विनैव मोक्षाख्यपुमर्थस्य तद्धेतोर्मनोनिरोधस्य च लिङ्गादिना सिद्धत्वे बौद्धादेरिव तवापि वेदानर्थक्यमिति फलितमाह * अन्तरेणेति ॥९०॥ बौद्धादेरिवेति दृष्टान्तं स्पष्टयति * शून्यमिति । असमर्थः । अहमहमिति सन्तानपतितानि विज्ञाना-

पुरुषार्थो विमोक्षाख्यो वेदान्तो निष्फलो भवेत्॥९०॥
शून्यं स्वलक्षणं दुःखं क्षणिकं चेति भावनात् ॥
तदन्यवासनारोधे मुक्तिः स्यादिति सौगतः ९१ ॥
त्यक्त्वाऽपि वैदिकं मार्गं वासनानां निरोधतः ॥
न सम्पादयितुं मोक्षं शक्नोष्येवानिरूपणात् ॥ ९२ ॥
वासनाशब्दवाच्याः किं संस्काराः स्मृतिहेतवः ॥
नेत्रादिव्यवहारो वा, नाद्ये तद्रोधसम्भवः ॥ ९३ ॥
व्यतीतानेकजन्मोत्थवासनानामनन्ततः ॥
तासां निरोधो ऽसम्भाव्यो जन्मन्येकत्र मानवैः॥९४॥
कासां चिदप्यसम्भाव्य उपायस्यानवेक्षणात् ॥
चिरव्यवहितोऽप्यर्थो ऽकस्मात्स्मर्यतएव हि ॥९५॥
किञ्च यां वासनां रोद्धुमिच्छेत्तद्विषये मनः ॥
सदेव सावधानं सद् दृढं प्रत्युत वासयेत् ॥ ९६ ॥

नि स्थायित्वानुसन्धानकल्पनाभ्यां रागादिदोषैर्विषयैश्चोपप्लुतान्युत्पद्यन्ते तत्र सर्वं क्षणिकमिति भावनया स्थायित्वादिकल्पना निवर्तते, स्वलक्षणभावनया द्रव्यगुणादिविशेषणविशेष्यकल्पना नश्यति, दुःखमिति भावनया रागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः क्षीयन्ते, शून्यमिति भावनया विषयोपप्लवविगमः, ततः सर्वोपप्लवरहितविज्ञानोत्पत्तिर्मुक्तिरिति ॥ * अनिरूपणादिति। अशक्यत्वादित्यर्थः ॥९१॥९२॥ अशक्यत्वमुपपादयितुं विकल्पयति * वासनेति । आद्येऽपीदं वक्तव्यं– किं सकलवासनानां निरोधो मुक्तिहेतुः कासां चिदेव वा ? तत्राद्यं प्रत्याह * नेति ॥९३॥९४॥ द्वितीयं प्रत्याह * कासां चिदिति॥९५॥९६॥ नेत्रादिव्यवहारो वासनेति पक्षेऽपि

निवारयितुमिच्छन्तश्चतुर्थीचन्द्रदर्शनम् ॥
कस्मादपि गृहच्छिद्रात्पश्यन्त्येव यथा तथा ॥ ९७॥
नेत्रादिव्यवहाराश्चेद्वासनाः स्युस्तथापि च ॥
तन्निरोधान्न मोक्षोऽस्ति विना ब्रह्मात्मदर्शनम् ॥९८॥
वासनानामभावेऽपि सुषुप्त्यादौ न मुक्तता ॥
मानव्यापारविरहान्न प्रतीतिर्दृगात्मनः ॥ ९९ ॥
हेतुश्चात्मानर्थसङ्गे ह्यविद्यैव न वासना ॥
वासनानामपि युतौ सैव यस्मादपेक्ष्यते ॥ १०० ॥
अविद्यामन्तरेणात्मन्यसङ्गे वासनायुतिः ॥
अनर्थसङ्गतिर्वैषा शङ्कितुं न च शक्यते ॥ १०१ ॥
न वासनानिरोधेन नापि चित्तनिरोधतः ॥
शक्योच्छेत्तुमविद्यैषा विनैकात्म्यावबोधनम् ॥१०२॥
सति त्वात्मावबोधेऽस्मिन्नविद्याया निवृत्तितः ॥
वासनाऽनर्थसङ्गोऽयं स्वतोऽसङ्गान्निवर्त्तते ॥ १०३ ॥
साक्षादात्मावबोधेन प्रत्यग्ध्वान्तच्छिदा न चेत् ॥

तस्य दुर्निरोधत्वमुदाहरणमुखेनाह * निवारयितुमित्यादिना। वासनानिरोधस्य शक्यत्वेऽपि न तावन्मुक्तिः, प्रतीचोऽद्वयानन्दत्वबोधकमानाभावे तत्स्फुरणायोगादित्याह *तथापीत्यादिना ॥९७॥९८॥९९॥ किञ्चात्मनः प्रमातृत्वाद्यारोपनिमित्तमज्ञानं तावदङ्गीकर्त्तव्यम् अन्यथा कामादीनामपि तत्रारोपायोगात्। न च तेषामात्मधर्मत्वं शङ्क्यम् असङ्गत्वव्याघातात्, एवं सति ज्ञानं विनाऽज्ञाननिवृत्त्ययोगात्तेन तन्निवृत्तौ वासनानामप्यात्मन्यारोपनिवृत्तेर्विरोधवैयर्थ्यमिति मत्वाऽऽह *हेतुरित्यादिना ॥१००॥ १०१॥१०२॥१०३॥ ऐक्यभावनयैवाज्ञानमपि निवर्ततां तथा न

दुःखादिवासनाध्वस्ता कथं तद्वासना नुदेत् ॥१०४॥
उपासनाचित्तरोधविधी यावुदितौ त्वया ॥
तौ स्तां तथैव बोधस्य हेतुत्वेनाभ्युपैमि तौ ॥ १०५॥
लौकिकव्यवहारेषु प्रवृत्ता धीरुपासनात् ॥
अन्तर्मुखा सती स्वात्मविचारक्षमतां व्रजेत् ॥१०६॥
शब्दस्पर्शादिरहितमात्मानं स्थूलधीर्न हि ॥
द्रष्टुं शक्नोति सौक्ष्म्यार्थं धीनिरोधो विधीयताम्॥१०७॥
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ॥
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मयेति श्रुतेर्वचः ॥१०८॥
अन्तर्मुखा सूक्ष्मबुद्धिः शास्त्रजन्यविवेकतः ॥
पश्यत्यद्वैतमात्मानं न पुनर्वीक्षतेऽन्यथा ॥ १०९ ॥
प्रमितस्यात्मतत्त्वस्य बाधाभावात्सदा तथा ॥
अर्थात्सिद्धा वासना स्यादन्त्यबुद्धिश्च नान्यथा॥११०॥

विधिवैयर्थ्यमित्याशङ्क्याह * साक्षादिति । प्रमाणजन्यज्ञानेन प्रत्यगज्ञानोच्छेदो यदि न स्यात्तदा चिरनिरूढानिबद्धदुःखादिवासनाभिध्वस्ताऽल्पकालीनैक्यवासना कथमज्ञानं नुदेत्? न कथञ्चिदित्यर्थः॥१०४॥तर्हि तावदेव निरोद्धव्यमित्यादिविधेः का गतिः? तत्राह * उपासनेति ॥ १०५ ॥ वाक्येनैव ज्ञानोत्पत्तिसम्भवान्न तद्धेतुत्वेनापि तद्विधानमित्याशङ्क्य तयोर्ज्ञानोपयोगं दर्शयति * लौकिकेत्यादिना ॥१०६॥ ऐकाग्र्यं विना आत्मयाथात्म्यज्ञानमसम्भवीत्यत्र श्रुतिं प्रमाणयति *एष इति। अग्रया एकाग्रया विवेकतः कर्तृत्वाद्यसम्पृक्ततया॥१०७॥१०८॥एवंविधज्ञानोत्पत्तावात्मवासनाया आमरणं स्वभावादेवानुवृत्तिसम्भवादन्त्यप्रत्ययार्थमपि न बोधानन्तरं निरोधविधिरित्याह *प्रमितस्ये-

अन्त्यबुद्धेरन्यथात्वासम्भवे जन्म भाव्यपि ॥
न भवेद्विदुषस्तस्माज्ज्ञानिनोऽनर्थको विधिः ॥ १११॥
ननु सार्थो विधिर्यस्मात्सिद्धो देहं न पश्यति ॥
अविधौ चित्तचाञ्चल्याद् दृश्येतैव स्वकं वपुः ॥११२॥
नैतत् किं वासनारोधात्किं वा चित्तनिरोधतः ॥
अद्वितीयात्मबोधाद्वा देहादर्शनमुच्यताम् ॥ ११३ ॥
नाद्यौ श्लोके तयोस्तत्र हेतुत्वानभिधानतः ॥
यतोऽध्यगमदित्येवं बोधो हेतुतयोच्यते ॥ ११४ ॥
अज्ञानेऽन्यदिव स्याच्चेत्तत्रान्योऽन्यत्प्रपश्यति ॥
ज्ञानेऽभूत्सर्वमात्मैव केन कं कोऽत्र पश्यति ॥११५॥
यस्मिन्त्सर्वाणि भूतानि ह्यात्मैवाभूद्विजानतः ॥
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ११६ ॥
इत्याद्याः श्रुतयो बोधादज्ञानप्रविलापनात् ॥
अनात्मदृष्टिशोकादीन्वारयन्ति न रोधतः ॥ ११७ ॥
चित्तस्य वासनानां वा निरोधाद् यो न पश्यति ॥
सुप्तेषुकारवत्तस्य विद्यया न विलापनम् ॥ ११८ ॥

ति॥१०९॥११०॥१११॥एवमप्यनात्मप्रदर्शननिवृत्त्यर्थं तद्विधानमिति शङ्कते *नन्विति॥११२॥भागवतश्लोके ज्ञानादेव देहाद्यदर्शनमुच्यते न निरोधादतस्तदर्थमपि न बोधानन्तरं निरोधविधिरित्याह-*नैतदित्यादिना॥११३॥ ज्ञानादेवानात्मधीनिवृत्तिरित्यत्र "यत्र वा अन्यदिव स्यात्" इति श्रुतिमपि प्रमाणयति *अज्ञान इति॥११४॥ ११५॥११६॥११७॥ किञ्च रज्जुज्ञानेन सर्पलयवत्प्रत्यक्तत्त्वसाक्षात्कारेण द्वैतलयो यदि न स्यात्तदा वासनानिरोधात्तदप्रतीतिर्न मुक्तिहेतुरित्याशयेनाह * चित्तस्येति ॥ ११८ ॥ सुप्तेषुकारव-

निद्राभिभूतचित्तस्य यदन्यादर्शनं न तत् ॥
बोधप्रयुक्तं तद्वत्स्याद्विषणारोधवादिनः ॥ ११९ ॥
इष्वासक्तमनस्केन ह्यन्यचित्ततया पुरः ॥
सैन्यं न दृश्यते तद्वद्वासनारोधवादिनः ॥ १२० ॥
उपासनाव्यग्रतया यदन्यादर्शनं न तत् ॥
बोधप्रयुक्तं योषादिचिन्तायामपि सम्भवात् ॥ १२१॥
बोधलीनो भ्रमः पूर्वसंस्कारादनुवर्तते ॥
स्वप्नभ्रान्त्योर्बाधितयोरपि स्मृतिरुदेति हि ॥ १२२॥
बाधितस्यानुवृत्तिस्तु न जन्मानर्थकारणम् ॥
भ्रष्टबीजोपमा सर्वमोक्षशास्त्रेषु डिण्डिमः ॥ १२३॥
अनुवृत्तिं च ये सोढुमशक्तास्ते निरोधने ॥
मनसो वासनानां वा प्रवर्तन्तां निजेच्छया ॥१२४॥
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥

दित्युक्तं दृष्टान्तद्वयं क्रमेण व्यनक्ति * निद्रेत्यादिना ॥११९॥ प्रत्यक्तत्त्वबोधं विना ऽन्यासक्ततया यत्प्रपञ्चादर्शनं तन्निष्फलं कामुकेऽपि तत्सम्भवादित्याह * उपासनेति ॥१२०॥१२१॥ ननु बोधबाधितोऽपि प्रपञ्चो बाधितस्वप्नगजादिवत् पुनः कदाचित्प्रतीयेत तन्निवारणाय निरोधविधिरित्याशयेन शङ्कते * बोधेति ॥ भ्रमशब्दः कर्मव्युत्पत्त्या प्रपञ्चपरः ॥१२२॥ किं तत्प्रतीतेर्जन्मादिहेतुत्वात्तन्निरासाय निरोधविधिरुत दृष्टदुःखहेतुत्वाद्वा ? आद्यं प्रत्याह * बाधितस्येति ॥ १२३ ॥ द्वितीयेऽप्यन्वयव्यतिरेकाभ्यामेव तत्र प्रवृत्तिसम्भवाद्विधिवैयर्थ्यमित्याह * अनुवृत्तिमिति ॥ १२४ ॥ एवं वेदान्तानां निरोधविधिपरत्वाभावे ऽद्वितीयात्मपरत्वं सिद्ध्यतीत्याह

नैवास्ति किञ्चित्कर्त्तव्यमस्ति चेन्न स तत्त्ववित्॥१२५॥
ज्ञानेऽधिकारासिद्ध्यर्थमुपासाधीनिरोधयोः ॥
विधेः सिद्धे ऽधिकारेऽथ वेदान्ता आत्मबोधिनः॥१२६॥
व्रीह्यादिवत्पदार्थत्वाद्योक्ता मान्तरगम्यता ॥
तत्र हेतुरसिद्धः स्यादवाच्यत्वान्निजात्मनः ॥ १२७॥
न पदार्थो न वाक्यार्थ आत्माऽयं वस्तुवृत्ततः ॥
तत्प्रत्याख्यानश्रुत्यैव तद्याथात्म्यावबोधनात्॥१२८॥
यदनभ्युदितं वाचा वाग्येनाभ्युद्यते सदा ॥
ब्रह्म विद्धि तदेव त्वं न त्विदं यदुपासते ॥ १२९ ॥
इति वाग्विषयत्वं तु प्रत्याख्यायाथ साक्षिणः ॥
वाक्प्रेरकत्वमात्रेण याथात्म्यमवबोध्यते ॥ १३० ॥
प्रत्यभिज्ञानुमानाभ्यां चिद्वस्त्ववगमे सति ॥
अद्वितीयब्रह्मतत्त्वरूपत्वं नावबुध्यते ॥ १३१ ॥

---

* ज्ञान इति । ज्ञाने योग्यतासिद्ध्यर्थं ज्ञानशेषत्वेन निरोधविधेः प्रवृत्तौ सिद्धायामित्यर्थः ॥ १२५ ॥ पूर्वपक्षोक्तदूषणमनूद्य प्रत्याह *व्रीहीति ॥ १२६ ॥ १२७ ॥ पदार्थत्वहेतोरसिद्धिमेवाह * नेति । तर्हि कथमस्य वेदान्तार्थत्वं ? तत्राह * तदिति । पदार्थत्वादिसर्वो विशेषस्तच्छब्दार्थः । द्वितीयस्तच्छब्द आत्मविषयः ॥१२८॥ उक्तेऽर्थे यद्वाचेत्यादिश्रुतिं प्रमाणयति *यदिति ॥१२९॥१३०॥ यदुक्तं प्रत्याभिज्ञानादिनाऽऽत्मनो ज्ञातत्वान्न वेदान्तवेद्यतेति तत्राह *प्रत्यभिज्ञेति । सति सत्यपि । अखण्डानन्दत्वेन ज्ञातस्यैवात्मनः पुमर्थत्वादिति भावः ॥१३१॥ ननु वेदान्ता नियोगनिष्ठाः शब्दप्रमाणत्वाज्ज्योतिष्टोमादिवाक्यवत्, ततो न ते विध्यस्पृष्टमात्मानं बोधयन्तीति तत्सिद्धौ नियोगापेक्षादुर्वारेति नेत्याह * न हीति ॥ १३२ ॥ उक्तमर्थं प्रप-

वेदान्तानामतो वस्तुन्यक्षवन्मात्वमीक्ष्यताम् ॥
न हि कार्यव्यपेक्षाऽस्ति कार्यसाधकसाक्षिणः॥१३२॥
स्वानुभूतिबलादेव भवताऽपि विभाव्यते ॥
कार्यादिनिखिलो मेयो नानुभूतिस्तु कार्यतः ॥१३३॥
यस्याप्रसिद्धिर्नाज्ञानात्प्रसिद्धिर्नापि मानतः ॥
तस्यानुभवतत्त्वस्य कुतोऽन्यापेक्षतोच्यते ॥ १३४ ॥
स्वप्रकाशात्मदृष्ट्यैव स्वात्मतत्त्वं प्रसिध्यति ॥
तद्व्युत्पत्त्यै परापेक्षा नानुभूत्यात्मवस्तुनः ॥१३५॥
अविद्याया निवृत्त्यर्थमेव व्युत्पत्त्यपेक्षिता ॥
स्वसत्तास्फूर्तिसिद्ध्यर्थं नान्यत्किञ्चिदपेक्ष्यते ॥१३६॥
असज्जडमपि द्वैतं यद्योगादस्ति भाति च ॥
तत्सच्चिद्रूपमन्यस्मात्कथं सिद्धिमपेक्ष्यते ॥ १३७ ॥
नन्वदृष्टं पुमर्थत्वमनुभूते कदाचन ॥
दृष्टाऽनुभूयमानस्य स्वर्गादेः पुरुषार्थता ॥ १३८ ॥

श्चयति * स्वानुभूतीति । नियोगवादिनाऽपि चिदात्मवशादेव नियोगादिजडोऽर्थोऽवगम्यते तथाच तत्साधकचिद्धातुः स्वसिद्धौ न नियोगाद्यपेक्षते, न हि सविता रूपादिप्रकाशकः तदपेक्षया प्रकाशत इति भावः ॥ १३३ ॥ १३४ ॥ ज्ञानाज्ञानाभ्यां प्रसिद्ध्यप्रसिद्ध्योरभावे वेदान्तमेयत्वमात्मनो व्याहन्येतेत्यत आह * स्वप्रकाशेति द्वाभ्याम् । अनुदितानस्तमितकूटस्थबोधैकरसस्य सिद्धावन्यानपेक्षत्वेऽपि तदावरकाज्ञाननिवृत्तये व्युत्पत्तिशब्दितवेदान्तजन्यापरोक्षबोधस्यापेक्षितत्वान्नोक्तविरोध इति भावः ॥ १३५ ॥ १३६ ॥ आत्मनो नियोगानपेक्षत्वमुपसंहरति *असदिति । तथा चोक्तानुमानमप्रयोजकं मन्त्रादौ व्यभिचारि चेति भावः ॥ १३७ ॥ एवमप्यपुमर्थस्यात्मस्वरूपानुभवस्य कथं

ततो ऽपुमर्थरूपां तामनुभूतिं श्रुतिः कथम् ॥
प्रतिपादयतीत्येतच्चोद्यं मूढेषु शोभते ॥ १३९ ॥
प्रमाणमूलभूतत्वादनुभूतेः पुमर्थता ॥
अनुभूतिप्रसिद्ध्यर्थं प्रमाणव्यापृतिर्भवेत् ॥ १४० ॥
स्वर्गानुभूतिरेवार्थ्या पुम्भिर्न स्वर्गमात्रकम् ॥
नो चेत्स्वर्गोऽन्यदीयोऽपि सर्वदाऽर्थ्येत मानवैः॥१४१॥
दुःखानुभूतेरर्थ्यत्वं न दृष्टमिति चेत्तदा ॥
सुखस्यापि पुमर्थत्वहेतुत्वमनुमन्यताम् ॥ १४२ ॥
अतो विज्ञानमानन्दं ब्रह्मेति श्रुतिरब्रवीत् ॥
या प्रतीतिर्घटादीनां तद्विज्ञानमिदं मतम् ॥ १४३ ॥
प्रतीतेर्मफलत्वेन कथं मेयैकनिष्ठता ॥

वेदान्तमेयत्वमिति शङ्कते * नन्विति । कस्य तर्हि पुमर्थता ? तत्राह *दृष्टेति ॥१३८॥१३९॥ चोद्यस्य मोहमूलत्वमेव दर्शयति *प्रमाणेति । यत्नपूर्वं नृत्यादिसामग्रीसम्पादनात्तस्याः पुमर्थतेत्यर्थः ॥ १४० ॥ स्वर्गादेः पुमर्थत्वमुक्तं दूषयति * स्वर्गेति ॥ १४१ ॥ अनुभूतेः पुमर्थत्वेऽतिप्रसङ्गमाशङ्क्य सुखानुभवस्यैव पुमर्थत्वं, स च क्वचित्सुखविषयः क्वचित्सुखाभिन्न इत्यभिसन्धायाह * दुःखेत्यादिना ॥ १४२ ॥ यतो ज्ञानसुखयोरन्यतरस्य न पुमर्थत्वमतो ब्रह्मणः पुमर्थत्वं दर्शयितुं तस्य श्रुतिरुभयरूपतामाहेत्यर्थः ननु स्वरूपानुभवस्योक्तश्रुत्या पुमर्थत्वासिद्धावपि प्रमाणफलभूतत्वादिति पूर्वोक्तहेतुना कथं तत्सिद्धिः ? न हि नित्यानुभवस्य मानजन्यत्वं तत्राह * या प्रतीतिरिति। घटविज्ञानमेवेदं श्रुत्युक्तं स्वरूपज्ञानमित्यर्थः ॥१४३॥ घटनिष्ठस्य घटज्ञानस्य कथं स्वरूपज्ञानाभेदस्तत्राह * प्रतीतेरिति । न

माक्रियाफलयोगोऽयं युक्तो मातरि भोक्तरि ॥१४४॥
लौकिको वैदिकः सर्वो व्यवहारो जगत्यपि ॥
भोक्त्रर्थ एव तेनास्य प्राधान्यं भोक्तुरिष्यते॥१४५॥
न वा अरे पत्युरिति तदेतत्प्रेय इत्यपि ॥
निखिलेऽपि जगत्यत्र प्राधान्यं स्वात्मनः श्रुतम्॥१४६॥
न प्रमाता प्रमाणं वा क्रिया मेयफलानि वा ॥
प्राधान्यायेह दृश्यन्ते ह्यभोक्तृत्वेन हेतुना ॥ १४७॥
आत्मनः कर्त्रवस्थाऽपि भोक्त्रर्थेति विनिश्चयः ॥

मानजन्यं मानफलं किन्तु तज्जन्यवृत्त्यभिव्यक्तघटाद्यवच्छिन्नस्वरूपज्ञानमेव, अतो न तस्य मेयनिष्ठतेत्यर्थः । ननु फलस्यास्वातन्त्र्यादाश्रयो वाच्यः, तत्र परिशेषान्मेयाश्रितत्वं, नेत्याह * माक्रियेति । मानस्य हि फलं मातारमाश्रयते, क्रियाफलं तु भोक्तारं, न च तौ भिद्येते ऽतो मानक्रियाया यदभिव्यक्तानुभवाख्यं फलं तस्य तत्तन्मेयोपहितत्वेनात्मनिष्ठत्वमुपपद्यत इत्यर्थः ॥ १४४ ॥ निरतिशयसुखस्वरूपे चिदात्मनि वेदान्तमानतेत्यत्रैव सर्वप्राधान्यं हेत्वन्तरमाह * लौकिक इति ॥ १४५ ॥ प्रतीचो निखिलव्यवहारशेषित्वेन प्राधान्यमुक्त्वा तस्य निरतिशयसुखत्वे प्रमाणं वदन् तेनापि प्राधान्यमाह * न वा इति ॥ १४६ ॥ मात्रादौ प्रधाने सति कथं भोक्तृप्राधान्यं तत्राह * नेति । इह व्यवहारभूमौ ॥ १४७ ॥ ननु कर्त्रवस्था क्रियाश्रयत्वात्प्रधानं तत्कथं भोक्तुरेव प्राधान्यं तत्राह * आत्मन इति । ननु विषयाभिनिवेशवान् पुमान् पुत्राद्येव प्रधानं मन्यत इत्यत आह * यत इति । कर्तृत्वस्य भोक्त्रर्थत्वे यदन्यत्पुत्रादि तत्सर्वं तदर्थमेव, अन्यत्राभिनिवेशस्तु भ्रान्तेरिति

यतोऽतोऽपरमप्येतद्लोकार्थं विनियुज्यते ॥ १४८ ॥
क्रियथोपहितः कर्त्ता माता मानोपधानतः ॥
अनुपाधिश्चिदात्मा तु भोक्तेत्यत्र विवक्षितः ॥१४९॥
भुजिक्रियावेशतो यो भोक्ताऽसावत्र कर्त्तरि ॥
अन्तर्भूतः, प्रधानत्व चिन्मात्रस्यात इष्यते ॥ १५० ॥
न चात्मानुभवादन्यो विषयः कैश्चिदिष्यते ॥
अपि सर्वप्रमाणानां किमु वेदान्तशासने ॥ १५१ ॥
चिदात्मानं विना नैव वस्त्वन्यन्मानभूमिगम् ॥
इत्येषोऽर्थोऽतियत्नेन ह्युपरिष्टात्प्रवर्तते ॥ १५२ ॥
तदित्थं सर्ववेदान्ता न निरोधविधायिनः ॥
किं त्वात्मानं प्रमिमत इत्येतदिह सुस्थितम् ॥१५३॥
चित्तवद्वासनारोधतात्पर्येऽत्र निराकृते ॥
प्रतिपत्तिविधौ शास्त्रतात्पर्यं केचिदूचिरे ॥ १५४ ॥

भावः ॥ १४८ ॥ नन्वेवं भोक्तुरेव प्राधान्ये तत्रैव वेदान्ताः पर्यवस्येयुर्न शुद्धे इत्यत आह * क्रिययेति ॥ १४९ ॥ विवक्षायां हेतुमाह * भुजिक्रियेति । अन्तःकरणाद्युपहितस्य सुखदुःखानुभवितुः कर्तृकोटिप्रविष्टस्य कल्पितत्वादुक्तप्राधान्यसिद्ध्यर्थं भोक्तृपदेन चिन्मात्रं विवक्षितमित्यर्थः ॥ १५० ॥ अपि च सर्वमानमेयस्यात्मनो वेदान्तमेयत्वं कैमुतिकन्यायासिद्धमित्याह * न चेति । वेदान्तेष्वनुभवात्मनोऽन्यो विषयो नेति किमु वक्तव्यं तस्यैवाज्ञातत्वादित्यर्थः ॥ १५१ ॥ तस्य सर्वमानमेयत्वं मेयपरीक्षायां च वक्ष्यत इत्याह * चिदिति ॥ २५२ ॥ प्रकरणार्थमुपसंहरति * तदिति ॥ १५३ ॥ वृत्तानुवादपुरःसरं मतान्तरमाह * चित्तेति ॥ १५४ ॥ विधिपरत्व-

आत्मा द्रष्टव्य इत्येवं प्रतिपत्तिविधिः श्रुतः ॥
कोऽसावात्मेति वीक्षायां सर्वमात्मेति वर्ण्यते॥१५५॥
सत्यज्ञानादिवाक्यानि तत्त्वमस्यादिकान्यपि ॥
विधिशेषतया ब्रह्म स्वात्मत्वेनार्पयन्ति हि ॥१५६॥
विधिशेषतया यूपाहवनीयाद्यलौकिकम् ॥
शास्त्रेणैवार्प्यते यद्वत्तथा ब्रह्माप्यलौकिकम् ॥ १५७॥
यद्वा स्वरूपवाक्यानि स्वरूपविधिमार्गतः ॥
बोधपर्यवसायीनि ततो बोधविधिर्मतः ॥ १५८ ॥
कर्मोत्पत्तिविधिर्यद्वत् कर्मबोधे व्यवस्थितः ॥
आत्मतत्त्वविधिस्तद्वदात्मबोधेऽवतिष्ठताम् ॥ १५९ ॥
अष्टाकपाल आग्नेय इत्यत्र द्रव्यदेवते ॥
कर्मस्वरूपम्, उत्पत्तिविधिनाऽनेन बोध्यते ॥ १६० ॥

मेव प्रतिपादयति * आत्मेति ॥ १५५ ॥ वेदान्तानां विधिपरत्वे ऽलौकिकब्रह्मणो मानान्तरेणाप्यसिद्धेः कथं तद्विशेषितदर्शनविधानमित्याशङ्क्य यथा यूपादिरलौकिकार्थो "यूपे पशुं बध्नाति" इत्यादिविधिशेषतया "यूपं तक्षति" इत्यादिनाऽर्प्यते तथा ब्रह्मणोऽपि द्रष्टव्यविधिशेषत्वेन सत्यज्ञानादिवाक्येनार्पणमित्याह *सत्येत्यादिना । तथाच वस्तुन्यवान्तरतात्पर्यमिति भावः ॥१५६॥१५७॥ तत्रैव पक्षान्तरमाह *यद्वेति॥१५८॥ कर्मणीव वेदान्तेषु विधिद्वयमङ्गीकृत्य स्वरूपबोधकसत्यादिवाक्यानां ज्ञातव्यपदाध्याहारेणोत्पत्तिविधित्वं तावदभिधाय उक्तमर्थं दृष्टान्तेन स्पष्टयति * कर्मेति ॥१५९॥ दृष्टान्ते उत्पत्तिविधेर्बोधपर्यवसायित्वं दर्शयति * अष्टेति ॥ १६० ॥ तत्रैवाधि-

स्वर्गकामो यजेतेति विधिरेषोऽधिकारिणम् ॥
उत्पत्तिविधिबुद्धेऽस्मिन्ननुष्ठातुं प्रवर्त्तयेत् ॥ १६१ ॥
तथा द्रष्टव्य आत्मेति प्रेरयन्मोक्षकामिनम् ॥
अधिकारविधिस्त्वेष प्रतिपत्तौ भविष्यति ॥१६२ ॥
अबुद्धं बोधयंस्तद्वदप्रवृत्तं प्रवर्त्तयन् ॥
उत्पत्त्याख्योऽधिकाराख्यो विधिरेष द्विरूपकः ॥१६३॥
एवं विधिमिहेच्छन्ति विध्ययोग्येऽपि वस्तुनि ॥
विधिरागवशात्केचित् तान्प्रतीदमथोच्यते ॥ १६४ ॥
प्रतिपत्तिविधिस्तावन्नात्मा द्रष्टव्य इत्ययम् ॥
विधेर्भाव्यार्थनिष्ठत्वाद्वस्तुन्यनुपपत्तितः ॥ १६५ ॥
किमैकात्म्यं विधेयं स्यात् किं वा तद्दर्शनं वद ॥
नोभयत्र विधिर्युक्तः पुंव्यापारानधीनतः ॥ १६६ ॥
सिद्धेऽसिद्धेऽथ वैकात्म्ये विधिर्नैवोपपद्यते ॥
नाकाशे नापि तत्पुष्पे विधिः सम्भाव्यते क्वचित् ॥१६७॥

कारविधेर्व्यापारं दर्शयन् तन्न्यायेन द्रष्टव्य इत्यादेरप्यधिकारविधित्वमाह * स्वर्गेत्यादि । प्रतिपत्तौ प्रेरयन्निति सम्बन्धः ॥१६१॥ १६२॥ उत्पत्त्यधिकारविध्योः स्वरूपं क्रमेण दर्शयति *अबुद्धमिति ॥ १६३ ॥ उक्तविधिद्वयमप्यत्र न घटत इति समाधत्ते * तान्प्रतीति ॥ १६४ ॥ पुरुषकृतिसाध्यधात्वर्थस्यैव विधिविषयत्वादात्मतज्ज्ञानयोरतथात्वान्नात्मज्ञाने विधिरित्याह * प्रतिपत्तीति ॥ १६५ ॥ १६६ ॥ उभयत्र साधारणमुक्त्वा प्रत्येकं दोषमाह * सिद्ध इति । अन्योन्याश्रयमेव विशदयति * दर्शनादित्यादिना । ब्रह्मविशेषितज्ञानस्य विधेयत्वे विधेः पूर्वं ब्रह्मज्ञानं वाच्यं, तच्च ज्ञानविधिवादिनो विध्यन्तरमनुष्ठानद्वारा सिद्ध्यतीत्यर्थः ॥ १६७ ॥ यदुक्तं सत्यादिवाक्या-

न विधिर्दर्शनेऽपि स्यादन्योन्याश्रयदोषतः ॥
दर्शनाद्विधिसंसिद्धेर्विधेर्दर्शनसिद्धितः ॥ १६८ ॥
पुंसाऽऽत्मदर्शने ज्ञाते विधिना प्रेर्यते पुमान् ॥
अज्ञाते विषये तत्र प्रेरणा नैव युज्यते ॥ १६९ ॥
ज्ञायमाने दर्शनेऽर्थादात्मा दृश्यतया तदा ॥
ज्ञातोऽतो दर्शने सिद्धे पश्चात्सिध्यति तद्विधिः॥१७०॥
विधिना प्रेरितो मर्त्यो ऽनुतिष्ठाति ततः परम् ॥
दर्शनं सिध्यतीत्येवमन्योन्याश्रय ईरितः ॥ १७१ ॥
न च यूपादिवच्छक्यं वेदेनैव समर्पणम् ॥
ऐकात्म्यस्य स्वतःसिद्धेः साध्यत्वाद्यूपवस्तुनः ॥ १७२ ॥
सिद्धं चेद्दर्शयेद्वेदः प्रसिद्धं दर्शनं तदा ॥
तन्निष्ठमेव वाक्यं स्यात् का वाऽस्य विधिशेषता॥१७३॥
तस्माद् द्रष्टव्य इत्येष प्रतिपत्तिविधिर्न हि ॥
बहिर्मुखत्वव्यावृत्तिर्विधेरर्थताऽथवा ॥ १७४ ॥
नापि स्वरूपवाक्यानि विधातुं बोधमीशते ॥
विधिप्रयोजनस्यात्र दुर्निरूपत्वहेतुतः ॥ १७५ ॥

द् ब्रह्मणो विधिशेषतयाऽर्पणमिति तत्राह * नेति ॥ १६८ ॥ ॥१६९॥१७० ॥ १७१ ॥ १७२॥ सिद्धस्यापि ब्रह्मणो यूपादिवद्विधिशेषतया समर्पणे को दोषः ? इत्याशङ्क्य कूटस्थं ब्रह्म यदि वेदो बोधयेत् तर्हि तस्योपक्रमादिषड्विधलिङ्गैस्तत्परत्वमेव स्यान्न विधिपरत्वं तदाऽस्मन्मतमेव प्रकर्षेण सिद्धं भवतीत्याह * सिद्धमिति । स्वप्रधानतया प्रतीतस्यान्यशेषत्वकल्पनमनुचितमिति भावः ॥ १७३ ॥ स्वमते द्रष्टव्य इत्यादेरर्थं वदन्नाधिकारविधिनिराकरणमुपसंहरति * तस्मादिति ॥ १७४ ॥ स्वरूपविधिमपि प्रत्याह * नापीति ॥ १७५ ॥ दुर्निरूपत्वं द-

किं विधिर्वस्तुसिद्ध्यर्थः किंवा विज्ञानसिद्धये ॥
यद्वा निश्चयसिद्ध्यर्थं विवक्षासिद्धयेऽथवा ॥ १७६ ॥
पुमर्थसिद्धये वोत निरपेक्षत्वसिद्धये ॥
पदानामन्वयार्थं वा सर्वथाऽपि न युज्यते ॥ १७७ ॥
न तावद्वस्तुसिद्ध्यर्थं क्रियते व्यापृतिर्विधेः ॥
सर्वमात्मेत्यत्येव वाक्यादक्षवद्वस्तुसाधनात् ॥ १७८ ॥
आत्मा ब्रह्मेति विज्ञानं विधिं नैव व्यपेक्षते ॥
यस्मात्तच्छ्रुतवाक्यस्य स्वयमेवोपजायते ॥ १७९ ॥
यजेतेति विधिज्ञानं वाक्यात्स्यान्न विधेर्बलात् ॥
विधिज्ञाने विधेः क्लृप्तावनवस्था प्रसज्यते ॥ १८० ॥
अथैतद्विधिविज्ञानं वेदाधीतिविधेर्बलात् ॥

र्शयितुं विकल्पयति * किमित्यादिना ॥ १७६ ॥ १७७ ॥ आद्यं दूषयति * न तावदित्यादिना ॥ १७८॥ विधिविधुरवाक्याद्वस्तुसद्भावमात्रसिद्धावपि वस्तुनः प्रत्यगभिन्नत्वज्ञानाय विधिरिति द्वितीयकल्पं प्रत्याह * आत्मेति ॥ १७९ ॥ अधिकारिणो विध्यनपेक्षाद्वाक्यादेव ज्ञानमुत्पद्यते इत्यत्र दृष्टान्तमाह * यजेतेति । ननु स्वर्गकामवाक्ये यागकार्यताज्ञानमपि विधिमपेक्ष्यैव जायत इति चेत्, किं तदेतद्वाक्यस्थमपि विधिमपेक्ष्य जन्यते विध्यन्तरं वा अध्ययनविधिं वा ?।नाद्य इत्याह *न विधेरिति । "यागः इष्टसाधनम्" इति वाक्यादपि तज्ज्ञानोत्पत्तिदर्शनादिति भावः । * विधीति । तत्रापि विध्यन्तरं विना तदर्थज्ञानायोगादिति भावः ॥ १८० ॥ तृतीयमुत्थापयति * अथेति । यद्यपि वाक्यस्य स्वार्थबोधकत्वं नान्यापेक्षं तथापि तदभ्युपेत्य अध्ययनविधेः काण्डद्वयसाधारणत्वात्तेनैवा-

तर्ह्यात्मबोधस्तेनैव विहितो नात्र तद्विधिः ॥ १८१ ॥
स्वपरोभयनिर्वाहसामर्थ्याङ्गीकृतेरिह ॥
वेदाधीतिविधेरर्थज्ञाने विध्यन्तरं न हि ॥ १८२ ॥
वस्तुतस्त्वर्थबोधो न कश्चिद्विधिमपेक्षते ॥
मानस्य मेयबोधित्वस्वाभाव्यादक्षलिङ्गवत् ॥ १८३ ॥
अथ निश्चयसिद्ध्यर्थं विधिरित्येतदप्यसत् ॥
स निश्चयो वः किं शब्दादुतान्यस्मादितीर्यताम्॥१८४॥
शब्दाचेन्निश्चयो जातो विधिस्तत्र निरर्थकः ॥
अन्यस्मान्निश्चयः स्याचेत्सापेक्षत्वं प्रसज्यते ॥ १८५ ॥
अथार्थस्य विवक्षार्थं विधिरित्यप्यसङ्गतम् ॥
स्वतो विवक्षितार्थाः स्युः शब्दा असति बाधके॥१८६॥
विध्यर्थस्य विवक्षार्थमन्यथाऽन्यो विधिर्भवेत् ॥
विवक्षा लौकिकेऽप्यर्थे दृश्यते हि विधिं विना॥१८७॥
मतं पुमर्थसिद्ध्यर्थं ज्ञानस्य विधिरिष्यते ॥

त्मज्ञानोत्पत्तेर्नात्र विधिकल्पनमित्याह * तर्हीति ॥ १८१ ॥ अधीतिविधेरप्यन्याशङ्कां वारयति * स्वपर इति ॥ १८२ ॥ अभ्युपगमं त्यजति * वस्तुत इति । अन्यथाऽधीतिविधेरप्यन्यापेक्षा दुर्वारेति भावः ॥ १८३ ॥ शब्दाद् ब्रह्मज्ञाने जातेऽपि विषयनिश्चयाय विधिना प्रवर्त्यते पुमानिति तृतीयकल्पमनुभाष्य दूषयति * अथेति द्वाभ्याम् ॥ १८४ ॥ १८५ ॥ वाक्यस्य वस्तुनि तात्पर्यज्ञाने विधिः कल्प्यत इति चतुर्थमनूद्य प्रत्याह * अथार्थस्येत्यादिना ॥ १८६ ॥ १८७ ॥ पञ्चमकल्पमुत्थापयति * मतमिति । यागादौ फलस्य विध्यधीनत्वाद् ब्रह्मज्ञानस्यापि फलत्वोपगमात्पुमर्थसिद्धये विधिः तदनभ्यु-

फलस्य विध्यधीनत्वादुपेक्षाफलताऽन्यथा ॥ १८८ ॥
ज्ञेयव्यक्त्यतिरेकेण न विज्ञानात्फलान्तरम् ॥
इष्यते, कर्मवन्नातस्तदर्थं विधिकल्पना ॥ १८९ ॥
कर्मणो बोधमात्रेण न स्वर्गः प्राप्यते पितुः ॥
अनुष्ठानात् अतस्तत्रानुष्ठानाय विधिर्मतः ॥ १९० ॥
तत्त्वावबोधमात्रेण मुक्तिः सिद्धा न तत्र तु ॥
अनुष्ठानं किमप्यस्ति किमर्था विधिकल्पना ॥ १९१ ॥
ज्ञेयाभिव्यक्तिरेवात्र फलं सा च प्रमाणजा ॥
न वैधीति पुमर्थोऽत्र सिद्ध्यत्येव विधिं विना ॥१९२॥
अथ मान्तरसापेक्षा सिद्धवाक्यस्य मानता ॥
निरपेक्षं विधेर्मात्वं तदर्थो विधिरित्यसत् ॥ १९३ ॥
वस्तु मान्तरयोग्यं चेद्विधौ सत्यपि तत्तथा ॥
हरीतकीं भक्षयेति विधिर्मूलमपेक्षते ॥ १९४ ॥
आयुर्वेदवचो मूलं विधेर्विहितभक्षणे ॥
तदपेक्ष्य भिषक्प्रोक्तविधिः प्रामाण्यमाव्रजेत् ॥१९५॥
वस्तु चेन्मान्तरायोग्यमविधौ च प्रमा वचः ॥

पगमे तस्याविवक्षितफलता स्यादित्यर्थः ॥ १८८ ॥ वाक्यादखण्डाकारबोधोत्पत्तिमात्रेण सकलपुरुषार्थसिद्धेर्न तदर्थं तत्र विधिरिति दूषयति * ज्ञेयेति ॥ १८९ ॥ कर्मवदित्युक्तदृष्टान्तं विवृण्वन्दार्ष्टान्तिकमपि स्पष्टयति * कर्मण इत्यादिना ॥ १९० ॥ १९१ ॥ १९२ ॥ वेदान्तानां मानान्तरानिरपेक्षत्वाय विधिरिति षष्ठमनूद्य दूषयति * अथेति ॥ १९३ ॥ वाक्यस्य सापेक्षत्वनिरपेक्षत्वे प्रतिपाद्यवस्तुनो मानान्तरयोग्यत्वायोग्यत्वकृते न तस्य सिद्धत्वसाध्यत्वकृते इत्युदाहरणमुखेन प्रतिपादयति * वस्त्वित्यादिना ॥ १९४ ॥ १९५ ॥

सहस्राक्षो गोत्रभिच्चेत्ययं मन्त्रः स्वतः प्रमा ॥१९६॥
अद्वैतं मान्तरायोग्यं वेदो दोषविवर्जितः ॥
अतस्तद्बोधिवेदस्य निरपेक्षप्रमाणता ॥ १९७ ॥
न चान्वयो विध्यपेक्षः क्रियामात्रेण सिद्धितः ॥
तत्त्वमस्यादिवाक्येषु साऽस्त्येवास्यादिका क्रिया॥१९८॥
पराभिमतसत्ताऽत्र नासिशब्दार्थ इष्यते ॥
सत्ताजातेर्जडत्वेन चिदात्मत्वविरोधतः ॥ १९९ ॥
नाभूतं भवनं चार्थो नित्यत्वादात्मवस्तुनः ॥
चिद्रूपमेव शून्येन वैलक्षण्यात्सदुच्यते ॥ २०० ॥
शब्दाद्यगोचरोऽप्यर्थो लक्षणापाश्रयात् श्रुतौ ॥
सदित्यादिपदैः साक्षादात्माऽस्माकमितीर्यते ॥२०१॥

---

१९६ ॥ फलितमाह * अद्वैतमिति ॥ १९७ ॥ पदानामन्वयसिद्धये विधिरिति सप्तमं दूषयति * न चेति। * क्रियामात्रेणेति। विधिं विनेत्यर्थः। यद्यपि क्रियां विनाऽपि "अयमात्मा ब्रह्म"इत्यादावभेदान्वयः सिध्यति अथाप्यगत्येदमुक्तमिति ध्येयम् ॥ १९८ ॥ तत्त्वमस्यादिवाक्यस्य क्रियाकारकानेकार्थबोधित्वे ऽखण्डार्थत्वक्षतिरित्याशङ्क्य क्रियापदवाच्यत्वेनाभिमतसत्तादेरभेदान्वयायोग्यस्य तदर्थत्वेनानभ्युपगमान्नोक्तदोष इत्याभिसन्धायाह * परेत्यादिना ॥ १९९ ॥ अस्यादिशब्दस्य कस्तर्ह्यभिमतोऽर्थः ? तत्राह * चिद्रूपमिति ॥२००॥ अन्यवाचकशब्दस्य कथमन्यबोधकत्वं ? तत्राह * शब्देति। निःसामान्यविशेषे ब्रह्मणि शक्तिग्रहायोगात्सर्वपदार्थानां तत्र लक्षणावृत्तिरिष्टा ततः क्रियापदमपि लक्षणया सत्यत्वं बोधयतीत्यर्थः ॥ २०१॥ वृत्तानुवादपूर्वकं ज्ञाने विधिर्नास्तीत्यत्र दूषणान्तरमाह * उत्पत्तावित्यादिना। अत्र क-

उत्पत्त्याद्यधिकारे च यद्विधिद्वयमीरितम् ॥
कर्मदृष्टान्तसाम्येन न तद्युक्तमुदीरितुम् ॥ २०२ ॥
कर्मस्वरूपबोधे हि व्यापारो नेष्यते विधेः ॥
किं तु बुद्धमनुष्ठातुं पुरुषं प्रेरयेद्विधिः ॥ २०३ ॥
तथाऽऽत्मतत्त्वबोधेऽपि न काचिद्व्यापृतिर्विधेः ॥
कर्मस्थानीय आत्मा हि नानुष्ठेयः कदाचन ॥ २०४ ॥
व्रीह्यादिविषयं यद्यत्नेनापि निरूपितम् ॥
प्रत्यक्षज्ञानमीषच्च न विधिस्पर्शमर्हति ॥ २०५ ॥
नात्मबोधस्तथा वेदवाक्यजन्यो विधिं स्पृशेत् ॥
किन्त्वैन्द्रियकविज्ञानमिव सिद्धार्थनिष्ठतः ॥ २०६ ॥
एवं च सति वेदान्ता ब्रह्मतत्त्वमलौकिकम् ॥
प्रबोधयन्ति विध्वस्तनिखिलद्वैतमव्ययम् ॥ २०७ ॥
ऐकात्म्यवस्तुयाथात्म्यप्रकाशनपटीयसः ॥
वचसस्त्वतिरेकेण किं मानं तद्धुरं वहेत् ॥ २०८ ॥
शाब्दज्ञानविधावेवं वेदान्तेषु निराकृते ॥
अपरे पण्डितम्मन्या विध्यन्तरमिहोचिरे ॥ २०९ ॥
अन्योऽप्यनुभवोपायो मननध्यानलक्षणः ॥

लिपतो विधिः कृत्यसाध्ये स्वविषये पुरुषं प्रेरयितुमशक्तः सन्निष्फलो भवतीति समुदायार्थः ॥ २०२ ॥ २०३ ॥२०४॥ ॥ २०५ ॥ २०६ ॥ वेदान्तजन्यज्ञानस्य व्रीह्यादिविधिसंस्पर्शमन्तरेण सिद्धार्थनिष्ठत्वे फलितमाह * एवं चेति ॥ २०७ ॥ निर्धर्मब्रह्मणि मानान्तराप्रवृत्तेश्च तस्य वेदान्तैकवेद्यतेत्याह * ऐकात्म्येति ॥२०८॥ वृत्तानुवादपूर्वकं ज्ञाने विधिर्नास्तीत्यत्र चतुष्पान्मानवादमुत्थापयति * शाब्देति ॥ २०९ ॥ किं तद्विध्यन्तरं ? तत्राह * अन्य इति । अनुभवः साक्षात्कारः सो-

सोपायो विहितोऽस्त्येव प्रतिपत्तिविधिं विना॥२१०॥
अवान्तरमहावाक्यरूपात् सिद्धार्थबोधकात् ॥
शास्त्राद्ब्रह्मात्मतामादौ पुरुषः प्रतिपद्यते ॥ २११ ॥
तत्त्वे शास्त्रात्प्रपन्नेऽपि पारोक्ष्यानपहारतः ॥
तत्साक्षात्करणायैव प्रसङ्ख्यानं विधीयते ॥ २१२ ॥
आवृत्तिर्हि प्रसङ्ख्यानं शब्दयुक्त्योरिदं त्विह ॥
मननध्यानरूपत्वात्साक्षात्कारयितुं क्षमम् ॥ २१३ ॥
प्रमाता मापकः शब्दो युक्तिरावृत्तिरित्यमी ॥
चत्वारोऽपि प्रमाणस्य पादा ऐकात्म्यदर्शकाः॥२१४॥
प्रत्येकं प्रमितेर्वृद्धिः पादैरेतैः क्रमाद्भवेत् ॥
वृद्धेर्विश्रामभूमिर्या सा साक्षात्कृतिरीर्यते ॥ २१५ ॥
साक्षात्कृतात्मयाथात्म्यः प्रसङ्ख्यानं न वीक्षते ॥
नदीमुत्तीर्य नो कश्चिन्नावं कुत्राप्यपेक्षते ॥ २१६ ॥
सम्भूय पादाः सर्वेऽपि ह्यैकात्म्यं बोधयन्त्यमी ॥

पायः शमाद्यङ्गसहितः ॥ २१० ॥ वेदान्तानां विधिपरत्वे वस्तुसिद्धिः कथमित्याशङ्क्य तेषां ब्रह्मात्मैक्यपरत्वं तावदाह * अवान्तरेति ॥ २११ ॥ शास्त्रात्तत्प्रतिपत्तौ पुनः किं विधिनेति तत्राह * तत्त्व इति ॥ २१२ ॥ किं तत्प्रसङ्ख्यानमिति वीक्षायां तदर्थं वदन् तस्य साक्षात्कारहेतुत्वमाह * आवृत्तिरिति । विदिततत्त्वस्याहं ब्रह्मेति शब्दवृत्तिरेव ध्यानमिति भावः ॥ २१३ ॥ मानहेतुकतत्त्वसाक्षात्कारस्य कथं ध्यानादिजन्यतेत्याशङ्क्य मानस्य चतुष्पात्त्वं दर्शयन्ध्यानादेरपि तत्पादत्वमाह * प्रमातेति । मापकः प्रमापकः । आवृत्तिर्ध्यानम् ॥ २१४ ॥ पादचतुष्टयस्यापि दर्शनहेतुत्वं व्यतिरेकेणाह

तैलवर्त्यग्नयो यद्वद्दीपं सम्भूय कुर्वते ॥ २१७ ॥
प्रमातारं विना शास्त्रं कस्य स्वार्थावबोधकृत् ॥
प्रमाताऽपि विना शास्त्रं केनार्थमवबुध्यते ॥ २१८ ॥
संसर्गकल्पनाशून्यमप्यैकात्म्यं प्रबोधयेत् ॥
अतद्व्यावृत्तितः शास्त्रं संसृष्टार्थाभिधाय्यपि ॥२१९॥
यतो वाचो निवर्तन्ते इति श्रुत्यैव दर्शितम् ॥
व्यपास्ताशेषसंसर्गकल्पनं ब्रह्म निर्भयम् ॥ २२० ॥
बोधयित्वाऽपि चैकात्म्यं नान्तरा पर्यवस्यति ॥
आपुमर्थावधेः शास्त्रमप्रामाण्यभयात्स्फुटम् ॥२२१॥
परोक्षवृत्त्या शब्दो हि वदन् स्वार्थं स्वभावतः ॥
सम्भावयन्प्रमाणत्वं युक्तिं स्वीकृत्य वर्तते ॥ २२२ ॥
न वस्तुदर्शने शक्ता धूमवद्वह्निवीक्षणे ॥

---

* प्रमातारमिति ॥ २१५ ॥ २१६ ॥ २१७ ॥ २१८ ॥ संसृष्टार्थवाचिनः शास्त्रस्य कथं निर्विशेषवस्तुबोधकत्वं? तत्राह *संसर्गेति । अतद्व्यावृत्तित इत्युपलक्षणम् । लक्षणया विधिमुखेन चेति द्रष्टव्यम् ॥ २१९ ॥ संसर्गकल्पनाशून्यमैकात्म्यमित्यत्र मानमाह * यत इति ॥ २२० ॥ शास्त्रान्निष्प्रपञ्चात्मबोधे किं युक्त्या तत्राह *बोधयित्वेति द्वाभ्याम् ॥ परोक्षज्ञानजनकः शब्दस्तन्मात्रस्यापुमर्थत्वादपुमर्थे च स्वस्य प्रामाण्यायोगादसम्भावितदोषतया स्वप्रामाण्यं सम्भावयन् साक्षात्कारफलाय युक्तिं स्वीकरोतीत्यर्थः ॥२२१॥२२२॥ तर्हि युक्त्यैवालं किं प्रसङ्ख्यानेनेत्यत्राह *नेति । सा युक्तिः शास्त्रसहिताऽपि साक्षात्कारे न क्षमते, द्वयोरपि परोक्षवृत्तित्वाविशेषात्, यथा धूमो वाक्यसहायोऽपि साक्षाद्वह्निं न बोधयति एवमेषा युक्तिर्ध्यानमपि सहकारि-

आपरोक्ष्याय सा युक्तिः प्रसङ्ख्यानमपेक्षते ॥ २२३ ॥
लोके दर्शनसम्बद्धं प्रसङ्ख्यानं समीक्षितम् ॥
वेदेऽपि किं तथा तत्स्यान्न वेत्येतद्विधीयते ॥ २२४ ॥
सामान्येनौषधं यद्वज्ज्वरनाशोपलक्षितम् ॥
दृष्टं कष्टतरेऽप्येतद्विशेषेणोपदिश्यते ॥ २२५ ॥
यद्यप्यात्मेक्षणाख्यं तत्फलं क्वापि न वीक्षितम् ॥
अथापि विध्यवष्टम्भात्प्रसङ्ख्यानात्फलं भवेत् ॥ २२६ ॥
चित्रया पशुकामोऽयं यजेतेति विधेर्बलात् ॥
फलं निश्चिनुते यद्वत्तद्वदत्रावगम्यताम् ॥ २२७ ॥
विधिं विना श्रुतैकात्म्यस्तदर्थानुभवादृते ॥

त्वेनादाय वस्तु बोधयतीत्यर्थः ॥ २२३ ॥ ननु प्रसङ्ख्यानस्य साक्षात्कारहेतुत्वे सिद्धे तस्य सहकारित्वं कल्प्येत तदेवासिद्धमत आह * लोक इति । लोके गांधर्वशास्त्रादौ दर्शनफलेन साधनतया सम्बद्धं प्रसङ्ख्यानं दृष्टं तद्वद्वेदेऽपि दर्शनसाधनं न वेति विशये लोकवदेव दर्शनहेतुत्वेन प्रसङ्ख्यानं विधीयते इत्यर्थः ॥ २२४ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति * सामान्येनेति । यथौषधं कषायपानादि साधारण्येन ज्वरनिवर्तकं लोके दृष्टमेव विषमज्वरनिवर्तकत्वेन सम्भावनयाऽप्युपदिश्यते तद्वदित्यर्थः ॥ २२५ ॥ नन्वेवमप्यात्मसाक्षात्कारहेतुत्वेन अनिश्चिते प्रसङ्ख्याने तदर्थिनां कथं निष्कम्पप्रवृत्तिरत आह *यद्यपीति ॥ २२६ ॥ विधेः फलनिश्चायकत्वं दृष्टान्तेन स्पष्टयति * चित्रयेति ॥ २२७ ॥ उक्तविध्यनङ्गीकारे बाधकमाह * विधिमिति ॥ प्रसङ्ख्यानाख्यानुभवोपायानभ्युपगमे तदितरोपायस्याज्ञातत्वाच्छास्त्रमात्रात्तदर्थानुभवाभावात्त-

उपायाङ्गतया कुर्यात् तच्छास्त्रस्यार्थवादताम् ॥२२८॥
विध्येकनिष्ठे शास्त्रेऽपि वस्त्वसिद्धेः प्रमाणतः ॥
देवताध्यानवद्ब्रह्मविजन्मन्येतत्फलं भवेत् ॥ २२९ ॥
मानेन विषयासिद्धौ तद्दिदृक्षावियोगतः ॥
प्रसङ्ख्यानविधावस्मिन्नाधिकार्यपि को भवेत् ॥२३०॥
श्रुतात्मतत्त्ववृत्तस्याननुभूतमपि स्वकम् ॥
स्थानकं वाञ्छतः शास्त्रात्प्रसङ्ख्यानं विधीयते॥२३१॥
एवं चैकात्म्यतत्त्वेऽस्मिन्प्रसङ्ख्यानविधावपि ॥
तात्पर्यं स्याद्विशिष्टत्वाद्वाक्यभेदोऽपि नापतेत् ॥२३२॥
श्रवणं शाब्दविज्ञाने यथोपायस्तथा द्वयम् ॥
अनुभूतौ च मनननिदिध्यासनरूपकम् ॥ २३३ ॥

स्यामानतामापादयतीत्यर्थः ॥ २२८ ॥ तर्हि विधिनिष्ठमेवास्तु शास्त्रं तत्राह * विधीति ॥ शास्त्रस्यैक्यपरत्वाभावे तस्य मानान्तरविरोधेनासिद्धेस्तद्ध्यानस्य प्रतीकदृष्ट्यादेरिव पुण्यलोकादिफलता स्यादित्यर्थः ॥ २२९ ॥ किञ्च शास्त्रेण विषयासिद्धौ तत्साक्षात्कारेच्छाऽयोगात्तद्वतः प्रसङ्ख्यानविधिरेव न स्यादित्याह * मानेनेति ॥ २३० ॥ विषयासिद्धौ न विधिरिति व्यतिरेकमुक्त्वा ऽन्वयमाह * श्रुतेति । अननुभूतम् अप्रत्यक्षीकृतम् । स्थानकं स्वरूपम् । वाञ्छतः साक्षात्कर्त्तुमिच्छतः॥२३१॥ नन्वेवमुभयपरत्वे वाक्यभेदः स्यादित्याशङ्क्य प्रसङ्ख्यानरूपव्यापारेऽवान्तरतात्पर्यद्वारा शास्त्रस्य स्वार्थबोधित्वान्न वाक्यभेद इत्याह *एवमिति ॥२३२॥ दृष्टान्तपूर्वकं विधिद्वयस्यावश्यकतामुपसंहरति * श्रवणमित्यादिना । द्वितीयस्यानुभवोपायत्वात्तमेवेत्यादिवाक्यस्य प्रसङ्ख्यानपरत्वमङ्गीकार्यमित्यर्थः ॥ २३३ ॥

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २
(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २
(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३
(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३
(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३
(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं असम्पूर्णम् (वेदान्तः) २
(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४
(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १
(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८
(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता (वेदान्तः) ... २
(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... २
(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २
(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १
(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १
(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३
(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११
(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६
(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४
(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । ३
(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २
(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १
(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २
(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४
(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २
(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । २
(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४
(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३
(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १
(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः १०
(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रव-

र्तिकृता । श्रीगङ्गेशोपाध्यायविरचित-तत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता। ३

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता। रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्ययातथासोमनाथकृतया मयुखमालिकया च व्याख्यया समलङ्कृता । ३

(४६) वैयाकरणसिद्धान्तमञ्जूषा । श्रीमदुपाध्यायोपनामक श्रीनागेशभट्टविरचिता। श्रीमद् दुर्बलाचार्यविरचितकुञ्जिकाटीका-श्रीमद्बालम्भट्टविरचितकलाटीका-इति टीकाद्वयसंवलिता। ... १

(४७) व्याकरणासिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविराचितः । १

(४८) वीरमीत्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ४

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकयासमलंकृतः । १

पत्राविप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी ।

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत तत्त्ववित् ॥
इत्यादिना प्रसङ्ख्यानं विधेयमनुभूयते ॥ २३४ ॥
एवमैकात्म्यतात्पर्ये शास्त्रस्येष्टेऽपि युक्तिभिः ॥
केचित्कार्यमपीच्छन्ति तदेतन्नैव युज्यते ॥ २३५ ॥
किमात्मभासनायासावापरोक्ष्याय वाऽथवा ॥
व्यवधानापनुत्त्यर्थं मानजन्यफलाय वा ॥ २३६ ॥
भानलोपस्य शङ्कापनुत्त्यर्थं वोत मुक्तये ॥
सर्वथापि प्रयासस्ते विध्यर्थोऽत्यन्तानिष्फलः ॥२३७॥
प्रमात्रादित्रयं यस्मात्संविन्मात्रवपुर्भृतः ॥
भाति पूर्वमभातं सत्तद्भाने किमपेक्ष्यते ॥ २३८ ॥
अहङ्कारः प्रमाता स्याद्धीवृत्तिर्मानमुच्यते ॥
घटादिकं प्रमेयं स्याच्चिद्भासा भाति तत्त्रयम् ॥२३९॥
परोक्षमपि देहादि यस्य भासा ऽऽपरोक्ष्यभाक् ॥
विभात्यात्मैव तस्य स्यादापरोक्ष्यमहेतुकम् ॥२४०॥
अज्ञानमपि निःशेषप्रमेयव्यवधानकृत् ॥

॥ २३४ ॥ २३५ ॥ अयुक्तत्वं दर्शयितुं विकल्पयति * किमिति । यद्यपि साक्षात्काराय विधिरित्युक्तं तथापि शाखाचङ्क्रमणव्यावृत्त्यर्थो विकल्प इति बोध्यम् ॥ २३६ ॥ २३७ ॥ आद्यं प्रत्याह *प्रमात्रेति *संविदिति । चिदेकरसस्येत्यर्थः । पूर्वमभातं जडम् ॥ २३८ ॥ उक्तार्थं स्पष्टयति *अहमिति ॥२३९॥ द्वितीयं प्रत्याह * परोक्षमिति ॥ अतीन्द्रियमप्यहङ्कारादिर्यत्सम्बन्धात्साक्षादिवात्मेव च स्फुरति, स स्वतोऽपरोक्ष इत्यर्थः ॥ २४० ॥ तृतीयं निरस्यति । * अज्ञानमिति । चतुर्थेऽपि फलशब्देनात्मप्रकाशनमज्ञाननिवृत्तिरन्यद्वा विवक्षितमिति विक-

येनाव्यवहितं भाति तत्केन व्यवधीयते ॥ २४१ ॥
स्वमाहिम्नैव यः सिद्धस्तत्तमो हन्ति शास्त्रधीः ॥
किं ततोऽन्यत्फलं मानजन्यं यद्विधितो भवेत् ॥२४२॥
मात्रादित्रयलोपेऽपि लोपसाक्षितयेष्यते ॥
यो ऽसावलुप्तचैतन्यस्तल्लोपः शङ्क्यते कथम् ॥२४३॥
ऐकात्म्यस्य स्वतो मुक्तेरज्ञानात्तस्य बाध्यता ॥
ज्ञानादज्ञानहानौ स्यात्किमपेक्ष्यं विमुक्तये ॥ २४४ ॥
तमोमात्रान्तरायत्वादैकात्म्याख्यस्य वस्तुनः ॥
असाध्यसाधने तस्मिन्का ऽपेक्षा भावनां प्रति॥२४५॥
यदाऽनुभवकामस्य कार्यत्वेन प्रतीयते ॥
प्रसङ्ख्यानं तदैकात्म्यतात्पर्यं कथमुच्यते ॥ २४६ ॥
युक्तं नैकस्य शास्त्रस्य तात्पर्यं कार्यसिद्ध्योः ॥
द्वयस्यापि प्रधानत्वाद्वैशिष्ट्यं नैव सम्भवेत् ॥२४७॥

ल्प्य क्रमेण दूषयति * स्वेति ॥ २४२ ॥ पञ्चममपवदति *मात्रादीति ॥ २४३॥ षष्ठं दूषयति * ऐकात्म्यस्येति । मुक्तेः स्वतःसिद्धत्वे ज्ञानवैयर्थ्यं तत्राह * अज्ञानादिति ॥ २४४ ॥ उक्तमेवार्थं स्पष्टयति * तम इति ॥ २४५ ॥ एवं विधेः प्रयोजनवत्त्वं निरस्य तदङ्गीकारे बाधकमप्याह * यदेति । साक्षात्कारमाकाङ्क्षतो यदा प्रसङ्ख्याने विधिर्निश्चितस्तदा न वेदान्तानामैकात्म्ये तात्पर्यं तेषामुक्तविधिपरत्वादित्यर्थः ॥ २४६ ॥ उभयपरत्वमुक्तं धुनीते * युक्तमिति । न चास्य प्रसङ्ख्यानद्वारा वस्तुबोधकत्वं भूतभव्यन्यायेन साध्यस्यैव प्राधान्यादैक्यसिद्ध्यै तत्परत्वाङ्गीकाराच्चेत्याह * द्वयस्यापीति ॥ २४७ ॥ ज्ञातेऽपि तत्त्वे पारोक्ष्यानपहारात्तत्साक्षात्काराय

ब्रह्मात्मत्वं यदि ज्ञातं कुतस्तर्हि परोक्षता ॥
न ह्यात्मनः परोक्षत्वं मूढोऽपि प्रतिपद्यते ॥ २४८ ॥
मितेर्वृद्धिर्मेयवृद्धौ तद्वृद्धिर्मितिवृद्धितः ॥
इत्यन्योन्याश्रयत्वेन मितिवृद्धिः कथं तव ॥ २४९ ॥
पादानामपि सम्भूय न युक्ता दर्शनार्थता ॥
सम्भूयकारितोत्पत्तौ दृष्टा न त्ववभासने ॥ २५० ॥
तैलवर्त्यग्नयोऽप्येते प्रदीपोत्पत्तिकारणम् ॥
जातात्मलाभो दीपोऽर्थं स्वयमेव प्रकाशयेत् ॥२५१॥
अतः सम्भूयकारित्वं यदि वाञ्छि तदोच्यताम् ॥
मानस्वरूपलाभाय, न तु मेयोपलब्धये ॥ २५२ ॥
मानपादत्वमप्येषां मात्रादीनामसङ्गतम् ॥
प्रमातुर्मानपादत्वे मानं स्यादप्रमातृकम् ॥ २५३ ॥
प्रमाणादतिरिक्तो यो मेयं मानेन बुध्यते ॥

विधिरित्युक्तं दूषयति * ब्रह्मेति ॥ २४८ ॥ यदुक्तं प्रमितेर्वृद्धिरित्यादि तत्प्रत्याह * मितेरिति । विषयगतातिशयमन्तरेण स्वतो ज्ञाने ऽतिशयायोगात्तस्य च ज्ञानातिशयपूर्वकत्वात्किमपि न सिध्यतीत्यर्थः ॥ २४९ ॥ यदुक्तं तैलवर्त्यग्निदृष्टान्तेन पादचतुष्टयस्य मिलित्वा बोधकत्वमिति, तत्र पादानां सम्भूय ज्ञानोत्पादकत्वेऽपि नाविद्यानिवर्तकत्वमित्याह * पादानामित्यादिना । मानस्वरूपलाभाय ज्ञानोत्पत्तये । तच्च शब्दमात्रादेव भवतीति भावः ॥२५०॥२५१॥२५२॥ मात्रादीनां मानपादत्वमङ्गीकृत्य दूषणमुक्तम्, अङ्गीकारं परित्यजति *मानेति । मातुः करणकोटिनिवेशे कर्त्रभावात्कार्याभावः तद्भिन्नत्वे मानपादत्वव्याघात इति दूषयति *प्रमातुरिति ॥ २५३ ॥

स प्रमाता कथं तस्य मानपादत्वमुच्यते ॥ २५४ ॥
द्वितीयपादः शब्दाख्य ऐकात्म्यं बोधयेन्न वा ॥
अबोधे मानपादत्वं केन द्वारेण गच्छति ॥ २५५ ॥
बोधे तु तावतैवात्र पुमर्थस्य समाप्तितः ॥
अप्रामाण्यभयं कस्माद्येन युक्तिमपेक्षते ॥ २५६ ॥
परोक्षत्वेन शास्त्रेण बुद्धं नत्वनुभूयते ॥
अप्रामाण्यभयं तस्मादिति चेदुच्यते न तत् ॥२५७॥
मेयस्वभावात्पारोक्ष्यं किं वा शब्दस्वभावतः ॥
आद्ये किं ब्रह्मता तत्र परोक्षा स्यादुतात्मता ॥२५८॥
यत्साक्षादपरोक्षं तद् ब्रह्मेति ब्रह्मणः श्रुतौ ॥
मुख्यापरोक्ष्यमुदितं पारोक्ष्यं शङ्क्यते कुतः ॥२५९॥
आत्मनस्तत्र पारोक्ष्यं पूर्वमेव निराकृतम् ॥
शब्दः स्वयमुदासीनः परोक्षत्वापरोक्ष्ययोः ॥ २६० ॥
देशादिभिर्व्यवहितं पारोक्ष्येणावबोधयेत् ॥
इतरत्त्वापरोक्ष्येण दशमस्त्वमसीतिवत् ॥ २६१ ॥
देशात्कालाद्वस्तुतो वा व्यवधानं मनागपि ॥

॥ २५४ ॥२५५॥२५६॥यदुक्तं परोक्षवृत्त्या शब्दो हीत्यादिना तदनुभाष्य दूषयति * परोक्षत्वेनेत्यादिना । परोक्षत्वेन बुद्धमित्यन्वयः ॥ २५७॥ २५८ ॥ २५९ ॥ तत्त्वमस्यादिवाक्यं परोक्षजनकं वाक्यत्वाज्ज्योतिष्टोमादिवाक्यवदित्याशङ्क्य देशादिव्यवहितबोधित्वमुपाधिः दशमस्त्वमसीत्यादिवाक्ये व्यभिचारश्चेति अभिप्रेत्याह*देशादिभिरिति ॥ २६० ॥ २६१ ॥ तस्य साधनाव्यापकतामाह * देशादिति ॥ २६२ ॥ शब्दस्य नियमेन परोक्षबोधित्वे बाधकमाह * नियतमिति । अपरोक्षं

ऐकात्म्यवस्तुनो नास्ति तत्र पारोक्ष्यधीः कुतः ॥२६२॥
नियतं यदि शास्त्रस्य पारोक्ष्येणैव बोधनम् ॥
न तर्हि तत्त्वधीः शास्त्राद्याथात्म्यानवबोधकात् ॥२६३॥
परोक्षे बुद्ध ऐकात्म्ये वस्तुसिद्धिर्न तावता ॥
अनश्वरूपे बुद्धेऽपि गव्यश्वो न हि सिद्ध्यति ॥२६४॥
ततः शास्त्रात्तत्त्वधीश्चेन्न परोक्षतयैव धीः ॥
उदेति तेन युक्त्यादिपादद्वयमनर्थकम् ॥ २६५ ॥
व्यपास्तानर्थसंदर्भमात्मानमवगच्छतः ॥
किमाप्यमधिकं तत्र येन युक्त्याद्यपेक्षते ॥ २६६ ॥
का वा युक्तिः प्रदीपस्य सर्पादिभयनाशकम् ॥
रज्ज्वादितत्त्वविज्ञानं कुर्वतः सहकारिणी ॥ २६७ ॥
शब्देन ज्ञाप्यते यद्वत्तथैव यदि युक्तिभिः ॥

वस्तु परोक्षत्वेन बोधयतः शब्दस्याप्रमाणत्वं स्यादिति भावः॥२६३॥ ननु शास्त्रम् अपरोक्षविलक्षणं वस्तु बोधयत्प्रतियोगित्वेनापरोक्षमपि बोधयिष्यति अतस्तत्प्रामाण्यमित्याशङ्क्याह * परोक्ष इति । तत्र दृष्टान्तमाह * अनश्वेति । अश्वविलक्षणे गवि प्रत्यक्षसिद्धेऽपि न ततोऽश्वमितिः तथा परोक्षेऽर्थे शाब्देऽपि न प्रतियोगिनः शाब्दत्वमतः शब्दाद्वस्त्वसिद्धेस्तदप्रामाण्यमेवेत्यर्थः ॥२६४॥ शब्दस्य परोक्षवृत्तित्वानियमे फलितमाह *तत इति ॥२६५॥ किञ्च शास्त्रं वस्तु ज्ञापयित्वा फलसिद्ध्यर्थमन्यदपेक्षते स्वार्थबोधने वा ? नाद्यः, वस्तुज्ञानादधिकफलाभावादित्याह* व्यपास्तेति ॥ २६६ ॥ द्वितीयं दृष्टान्तेन निराह * केति ॥ २६७ ॥ अपिच यावानर्थः शब्देन भास्यते तावानेव युक्त्यादिभिरन्यो वा ? नाद्य इत्याह * शब्देनेति । शाब्देऽर्थे

व्यर्थताऽथ विशेषश्चेत्सम्प्राप्ता भिन्नमानता ॥ २६८ ॥
स्वप्नादियुक्तिभिश्चेत्तल्लौकिकीभिः प्रसाध्यते ॥
अवैदिकं भवेद्वस्तु स्याच्च शास्त्रानुवादता ॥ २६९ ॥
वैदिकत्वेऽपि युक्तीनामागमार्थप्रधानतः ।
अनुवादत्वमेव स्यात्स्याच्च शास्त्रादभिन्नता ॥ २७० ॥
चतुर्थपादआवृत्तिः कुर्यात्साऽतिशयं कथम् ॥
न ह्यावृत्तौ प्रमाणस्य प्रमेयेऽतिशयो मतः ॥ २७१ ॥
यत्रापि चान्धकारादिदोषात्क्रमविनिश्चयः ।
तत्रापि भिन्नमेयत्वान्नैव सम्भूय मानता ॥ २७२ ॥

युक्त्यादीनामकिञ्चित्करतेत्यर्थः । द्वितीयं प्रत्याह * अथेति। मेयभेदात्तेषां सम्भूय मानताऽसिद्धिरित्यर्थः ॥२६८॥ प्रत्येकं तेषां मानत्वेऽपि लोकसिद्धाभिः स्वप्नादिसम्बद्धाभिरन्वयव्यतिरेकाख्ययुक्तिभिर्ब्रह्म भास्यते वैदिकगम्याभिर्वा ? नाद्य इत्याह * स्वप्नादीति । अवस्थात्रयं व्यभिचारान्मिथ्या, आत्माऽव्यभिचारादमिथ्येत्येवमादिलौकिकयुक्तिभिर्ब्रह्म भास्यते चेदवैदिकत्वं, तत्सिद्धब्रह्मानुवादित्वे च तत्त्वमादेरनपेक्षप्रामाण्यासिद्धिरित्यर्थः ॥ २६९ ॥ द्वितीयं प्रत्याह * वैदिकत्वेऽपीति । वस्तुप्रकाशकत्वेनेष्टयुक्तीनां वेदैकगम्यत्वेऽपि तासामागमिकार्थविषयत्वेनानुवादकत्वान्न मानांशतेत्यर्थः । युक्तीनां वैदिकत्वेऽनुवादकत्वेऽपि दोषमाह * स्याच्चेति । इत्थं च चतुष्पान्मानत्वहानिरिति भावः ॥ २७० ॥ युक्तेः शब्दसहायत्वमपोह्य प्रसङ्ख्यानस्यापि तन्निरस्यति * चतुर्थेति । शब्दावृत्तिः शाब्देऽर्थे नातिशयहेतुरित्यत्र हेतुमाह * न हीति। घटादिष्वदृष्टेरिति शेषः ॥२७१॥ मन्दान्धकारे दूरदेशे चावस्थितार्थेषु तदावृत्त्या क्रमेण निश्चयादावृत्तिरर्थवादित्याशङ्क्याह *यत्रेति॥२७२॥

पूर्वं वस्तिवति विज्ञातं प्राण्ययं मानुषस्तथा ॥
पुरुषोऽयमथ श्यामो डित्थ इत्यर्थभिन्नता ॥ २७३ ॥
अतः प्रमेयएकस्मिन्नावृत्तिः किं करिष्यति ॥
मितिवृद्धिर्दूषिताऽतः प्रसङ्ख्यानमनर्थकम् ॥ २७४ ॥
अनुभूतिस्तत्फलं चेत्सकृदेव कृतेर्भवेत् ॥
ऐकात्म्यानुभवोऽवश्यं शास्त्रार्थस्य कृतत्वतः॥२७५॥
अथासकृदनुष्ठानं प्रसङ्ख्यानं न चेतरत् ॥
तथापि निश्चयो न स्यादवधेरनिरूपणात् ॥ २७६ ॥
न चात्र चोदितः कालः सङ्ख्या वा येन निश्चयः ॥
तद्द्वारेण भवेन्नापि संदिग्धे स्यात्प्रवर्त्तनम् ॥२७७॥
शब्दयुक्त्योः परोक्षत्वस्वभावस्यानपायतः ॥
ताभ्यामावृत्तियुक्ताभ्यामपि नानुभवो भवेत्॥२७८॥
इत्येवं विपरीतार्थनिश्चयस्यात्र सम्भवात् ॥

भिन्नमेयत्वमुदाहरति * पूर्वमिति ॥२७३॥२७४॥ प्रसङ्ख्यानस्य मेयेऽतिशयाजनकत्वेऽपि साक्षात्कारहेतुत्वेनार्थवत्त्वं शङ्कते। * अनुभूतिरिति । किं प्रसङ्ख्यानशब्देन ध्यानमात्रं विवक्षितम् उत नैरन्तर्येण दीर्घकालध्यानं ? तत्राद्यं प्रत्याह *सकृदिति । इत्थं च फलादर्शनादावृत्तिविधायकशास्त्रमप्रमाणं स्यादित्यर्थः ॥ २७५ ॥ द्वितीयमनुवदति *अथेति । अस्मिन्नपि पक्षे "सहस्रं लक्षमासंवत्सरं वा वर्त्तयेत्" इति सङ्ख्याकालयोरवध्यनिरूपणे तद्द्वारा फलसन्देहात्तत्र प्रवृत्तिर्न स्यादित्याह *तथापीति ॥२७६॥२७७॥ फले संशयबीजमुक्त्वा विपर्ययहेतुमप्याह * शब्देति ॥२७८॥ *प्रवृत्त इति । असकृत्प्रसङ्ख्यानमनुष्ठायापि तत्त्वादर्शनरूपविसंवादेन ततो विमुखीकृतो मध्ये नि-

प्रवृत्तोऽपि निवर्तेत विसंवादपराङ्मुखः ॥ २७९ ॥
यदुक्तं विध्यवष्टम्भात्फलं भावीति तत्र ते ॥
अदृष्टफलता वैधी कल्प्याऽग्निष्टोमवद्भवेत् ॥ २८० ॥
नातो मानेन विषयं बोधितेऽन्वेषणं पुनः ॥
कार्ययुक्त्योः क्वचिद् दृष्टं स्वतःप्रामाण्यवादिनः २८१॥
प्रत्यक्षेण घटे बुद्धे का युक्तिः कार्यमेव वा ॥
नापेक्ष्येत तथैवात्र किमर्थाऽन्यव्यपेक्षिता ॥ २८२ ॥
अदुष्टकारणत्वं तु सिद्धं वेदे नृवर्जनात् ॥
प्रत्यक्षादिविरोधश्च पश्चात्परिहरिष्यते ॥ २८३ ॥
ऐकात्म्यानुभवोऽतः स्याच्छास्त्रादेवाविरोधतः ॥
अज्ञातज्ञापनादन्यत्कार्यं नात्रास्ति किञ्चन ॥ २८४ ॥

वर्तेतेत्यर्थः ॥ २७९ ॥ * अदृष्टफलतेति । अस्य ज्योतिष्टोमविधिवददृष्टार्थत्वे तस्य शेषित्वात्तत्परशास्त्रस्य अध्यक्षादिविरोधवस्तुनि न मानता स्यान्मोक्षहेतुत्वसाक्षात्कारमिच्छतां ज्योतिष्टोमादाविव तत्र न प्रवृत्तिश्चेति भावः ॥२८०॥ प्रसङ्ख्यानाद्यपेक्षत्वे शास्त्रस्य स्वतःप्रामाण्यं हीयेतेत्याह * नेति ॥ २८१ ॥ ॥२८२॥ ननु प्रत्यक्षदृष्टेऽपि घटादौ किमिदं ज्ञानं दुष्टहेतुजं नवेति तन्निर्णयाय निकटोपसर्पणाद्यपेक्षावच्छास्त्रदृष्टेऽपि युक्त्याद्यपेक्षा युक्तेत्याशङ्क्यापौरुषेये वेदे पुरुषद्वारकदोषाभावात्तज्जन्ये ज्ञाने तद्राहित्यस्य सहजत्वान्नान्यापेक्षेत्याह * अदुष्टेति । नन्वेवमपि तत्त्वमादेर्नैवानुभवहेतुत्वमक्षादिविरोधात् नियोगाङ्गीकारे तु न तद्विरोधस्तस्य सर्वप्रमाणाद् बलवत्त्वादित्याशङ्क्याह *प्रत्यक्षेति ॥ २८३ ॥ स्वस्यानपेक्षत्वमुक्तमुपसंहरति * ऐकात्म्येति ॥ २८४ ॥ शास्त्रस्य युक्त्यनपेक्षत्वे ऽभ्युपगमविरोधः

ननु युक्तिस्त्वयाऽपीष्टा मननाय तथा विधिम् ॥
चतुर्थाद्याधिकरणे आवृत्तेः सूत्रकृज्जगौ ॥ २८५ ॥
बाढमिष्टाऽपि सा युक्तिर्न मानांशतयेष्यते ॥
मानांशत्वे तु वेदस्य निरपेक्षत्वहानितः ॥ २८६ ॥
इतिकर्त्तव्यरूपेण वेदस्य सहकारिणीम् ॥
युक्तिमाहुर्वेदविदो न मानेऽन्तर्भवेत्ततः ॥ २८७ ॥
धर्मे प्रमीयमाणे हि वेदेन करणात्मना ॥
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ॥ २८८ ॥
एवं ब्रह्मणि वेदेन मीयमानेऽत्र युक्तिभिः ॥
मेयासम्भावनाख्योऽयं पुंधीदोषो निरस्यते ॥ २८९ ॥
नैतावतोपयोगेन युक्तेर्मानत्वसम्भवः ॥
उपयुक्तोऽप्यर्थवादो विध्यर्थं न प्रमापयेत् ॥ २९० ॥
न वायोः क्षिप्रकारित्वाच्छ्वेतालम्भो विभूतये ॥

सूत्रविरोधश्चेति शङ्कते * नन्विति । चतुर्थाध्यायप्रथमाधिकरणे आवृत्तिविधिं जगौ "आवृत्तिरसकृदुपदेशात्" इति तां विहितवानित्यर्थः ॥२८५॥२८६॥२८७॥ प्रमाणानन्तरगतयुक्तीनां तत्सहकारित्वं दृष्टान्तपूर्वकम् उपपादयति * धर्म इत्यादिना । यथाऽग्निहोत्रादिवाक्यानां विचारेणान्यपरत्वे निरस्ते वाक्यादेव तत्प्रतीतिरेवं मृल्लोहादिदृष्टान्तैर्लौकिकतर्कैश्चासम्भावनादिपुंदोषनिवृत्तौ वाक्यादेव तत्त्वधीरुदेतीत्यर्थः । प्रतिबन्धकध्वस्त्युपयोगियुक्तीनां न मानान्तर्भावः इत्यत्र दृष्टान्तमाह । उपयुक्त इति ॥ २८८ ॥ २८९ ॥ २९० ॥ तदेव दर्शयति * नेति । "वायुर्वै क्षेपिष्ठा" इत्यादिना श्रुताद्वायोः क्षिप्रकारित्वान्न श्वेतालम्भस्य भूतिहेतुत्वं ज्ञाप्यते,

विध्युद्देशात्तु तत्सिद्धेः शैघ्र्यं तूक्तं प्रवर्तयेत् ॥२९१॥
जाग्रत्स्वप्नसुषुप्तिभ्यो व्यतिरेकेण युक्तितः ।
दृश्यतां गोत्ववद्व्यक्तेर्ब्रह्मत्वेऽस्य किमागतम् ॥२९२॥
ब्रह्मत्वं प्रतिपाद्यापि स्वत एव श्रुतिः पुनः ।
सम्भावयति युक्त्या तत्पुंधीदोषं निरस्यति ॥२९३॥
महावाक्यात्पुरा युक्तिस्त्वम्पदार्थं विशोधयेत् ।
पश्चात्तु तत्पदार्थत्वं सम्भावयति तस्य हि ॥ २९४ ॥

"वायव्यं श्वेतमालभेत भूतिकामः" इत्यस्मादेव तस्य तद्धेतुत्वसिद्धेरार्थवादिकं तु वायोः शैघ्र्यं भूतिकामस्य तत्र प्रवृत्तिहेतुः क्षिप्रकारिदेवताकपश्वालम्भे शीघ्रमेव फलमित्येवमिहापि वाक्याज्ज्ञानोत्पत्तये न युक्त्यपेक्षा, किन्तु तत्प्रतिबन्धध्वंसार्थमित्यर्थः ॥ २९१ ॥ इतश्च युक्तीनां न तत्त्वनिश्चायकतेत्याह * जाग्रदिति । यथा व्यक्तिभ्यो गोत्वमतिरिच्यते, व्यावृत्तादनुवृत्तभेदस्य कुसुमसूत्रयोर्दृष्टत्वात्, तथाऽवस्थात्रयान्मिथो व्यभिचारिणः अव्यभिचार्यात्मवस्तुयुक्तिभिर्दृश्यतां नाम, अस्य त्वमर्थस्य तदर्थत्वे वाक्यं विना युक्तिभ्यो न किञ्चिद्भवतीत्यर्थः ॥ २९२ ॥ एवं लोकसिद्धान्वयव्यतिरेकाख्ययुक्तीनामसम्भावनानिवृत्तावुपयोगमुक्त्वा दुन्दुभ्यादिदृष्टान्तैरैक्यप्रकाशकवैदिकयुक्तीनामपि तत्रैवोपयोगमाह * ब्रह्मत्वमिति ॥ २९३ ॥ उक्तार्थं स्पष्टयति * महावाक्यादित्यादिना । देहादिविलक्षणमवस्थात्रयसाक्षिणं प्रत्यञ्चमजानतः तत्त्वमादिवाक्यादैक्यधीरेव नोदेति उक्तात्मज्ञानवत उदितमप्यैक्यज्ञानमनादिप्रवृत्तभेदवासनया प्रतिबद्धं सन्नाविद्यानिवर्तकमिति यावत् । अप्रतिबद्धापरोक्षबोधे युक्त्याख्यविचारः सफल

वाक्ये पुंसोऽधिकारः स्याद्युक्त्या पूर्वप्रवृत्तया ।
पश्चात्प्रवृत्तया स्थैर्यं वाक्यार्थे वाक्यबोधिते ॥२९५॥
उक्तप्रयोजनं युक्त्या यया स्यात्सैव गृह्यताम् ।
वेदार्थस्यानुकूलत्वे स्याल्लौकिक्यपि वैदिकी ॥२९६॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ २९७ ॥
इत्यङ्गीकुरुते तर्कं मनुर्वेदोपयोगिनम् ।
युक्तेर्मानात्पृथक्त्वेन त्वदुक्तदोषोऽस्ति नो मम ॥ २९८ ॥
मानानुग्राहकस्तर्क इति नैयायिकोऽब्रवीत् ।
पक्षे विपक्षजिज्ञासाविच्छेदस्तदनुग्रहः ॥ २९९ ॥
आवृत्तिः सूत्रकृत्प्रोक्तेत्युक्तं यत्तत्तथैव हि ।
न वारयाम आवृत्तिं प्रकारस्तु विभिद्यते ॥ ३०० ॥
वाक्यार्थावगतेः पूर्वं पदार्थद्वयशुद्धये ।
आवृत्तिं सूत्रकृत्प्राह तच्छुद्धिरवधिर्मतः ॥ ३०१ ॥
भ्रान्तांशानां निवर्त्यानां बाहुल्येन पदार्थयोः ।

इति भावः ॥२९४॥२९५॥ तत्रापि वेदाविरुद्धा एव युक्तयो ग्राह्या इत्याह *उक्तेति ॥२९६॥ वेदाविरुद्धयुक्तीनामादेयत्वं मनुनाऽप्युक्तमित्याह * आर्षमित्यादिना ॥ २९७ ॥ एवं सति न मतान्तरोक्तदोषोऽपीत्याह * युक्तेरिति ॥ २९८ ॥ युक्तेर्मानाङ्गत्वं गौतमादेरपि सम्मतमित्याह *मानेति । जिज्ञासा विचारः, संशय इति यावत् । अनुमानप्रयोगानन्तरं हेतोरप्रयोजकत्वे शङ्किते पक्षः साध्यवान्न वेति संशयस्तर्केण निवर्तते इति भावः॥२९९॥ सूत्रविरोधं परिहरति * आवृत्तिरिति ॥३००॥ प्रकारभेदमेव दर्शयन्नावृत्तेरवधिं च दर्शयति * वाक्येति ॥ ३०१ ॥ वाक्या-

क्रमेण तन्निवृत्त्यर्थमावृत्तिस्तत्र युज्यते ॥ ३०२ ॥
पदार्थयोः शोधितयोरेकतां नेत्रवद्वचः ।
सकृदेवावगमयेत्तत्रावृत्तिर्निरार्थिका ॥ ३०३ ॥
रत्नतत्त्वपरीक्षायामपि सूक्ष्मार्थलक्षणे ।
नेत्रस्य प्रसरायैव स्यादावृत्तिर्न दृष्टये ॥ ३०४ ॥
प्रसृते तु क्षणेनैव चक्षुस्तत्त्वं प्रपश्यति ।
एवं जीवस्य वाक्येन मीयते ब्रह्मता क्षणात् ॥३०५॥
नित्यापरोक्ष्यं जीवस्य तदेव ब्रह्मतां वचः ।
अनुभावयते तत्र नावृत्तिरनुभूयते ॥ ३०६ ॥
व्याधम्मन्यो राजपुत्रो राजतामाप्तवाक्यतः ।
स्वस्यानुभावितुं नैव वाक्यावृत्तिमपेक्षते ॥ ३०७ ॥

र्थज्ञानात्पूर्वमावृत्तेरावश्यकत्वे युक्तिमाह * भ्रान्तेति । कर्तृत्वादिधर्माणामारोपितानां बहुत्वेनैकेनावधानेनैकमंशमपोह्यान्येनान्यामिति क्रमेण शुद्धात्मज्ञानी भवतीत्यर्थः ॥ ३०२ ॥ पदार्थशुद्ध्यनन्तरमैक्यबोधः सकृद्वाक्यश्रवणादेव भवतीति सदृष्टान्तमाह * पदार्थयोरिति ॥ ३०३ ॥ ननु नेत्रस्यापि सन्निकृष्टवस्तुविशेषबोधने आवृत्त्यपेक्षादृष्टेर्न दृष्टान्ततेत्याशङ्क्याह *रत्नेति । रत्नगतासाधारणधर्मस्यातिसूक्ष्मतया तेन चक्षुःसन्निकर्षायैव तदावृत्तिर्न तज्ज्ञानायेत्यर्थः ॥३०४॥३०५॥ चक्षुषः सन्निकृष्टघटबोधकत्ववद्वाक्यस्यान्यानपेक्षतया आत्मनो ब्रह्मत्वबोधकत्वेऽपि तदनुभवायावृत्त्यपेक्षेत्याशङ्क्यापरोक्षवस्तुविषयनिश्चयव्यतिरेकेणानुभवो नेति पूर्वोक्तं स्मारयति * नित्यापरोक्ष्यमिति ॥ ३०६ ॥ उक्तमेवार्थमुदाहरणपूर्वकमुपपादयति * व्याधमित्यादिना । वस्तुतः परेशः सन्नविद्यया आत्मानं

जीवम्मन्यः परेशान ईशत्वं वेदवाक्यतः ।
स्वस्यानुभवितुं तद्वदावृत्तिं न ह्यपेक्षते ॥ ३०८ ॥
पुरा वाक्यार्थसम्बोधाच्छास्त्रावृत्तिर्मयेष्यते ।
ऊर्ध्वं तु भवताऽतस्ते यो दोषः स न मेऽस्ति हि ॥३०९॥
ननु विज्ञाय कुर्वीत प्रज्ञामित्यनुशासनात् ।
ऊर्ध्वं चावृत्तिरिति चेत्तत्सत्यं न हि संशयः॥३१०॥
नैतावताऽवकाशोऽस्ति त्वन्मतस्यात्र कश्चन ।
नैवानुभूतिसिद्ध्यर्थमिदं श्रौतानुशासनम् ॥ ३११ ॥
विज्ञायेत्यनुभूतिं तां वाक्यजन्यामुपेत्य तु ॥
विदधाति तदैकाग्र्यं बहिश्चित्तनिवृत्तये ॥ ३१२ ॥
विवक्षितोपयोगोऽत्र वाक्यशेषेण वर्णितः ॥
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ३१३॥
ननु मुक्तै प्रवृत्तायाः श्रुतेर्दृष्टार्थवर्णनम् ॥

जीवम्मन्यमान इत्यर्थः ॥ ३०७ ॥ ३०८ ॥ एवं सति नात्र परोक्तदोषोऽपीत्याह * पुरेति ॥ ३०९ ॥ ऐक्यबोधानन्तरमपि श्रुत्यैवावृत्तेर्विधानान्न तदपलापो युक्त इति शङ्कते * नन्विति । साक्षात्कृततत्त्वस्य विक्षिप्तचित्तस्य वाक्यार्थे चित्तस्थैर्यं विधीयते न ज्ञानाय ध्यानमिति परिहरति * तत्सत्यमित्यादिना ॥ ३१० ॥ ३११ ॥ ३१२ ॥ उक्तेऽर्थे वाक्यशेषमनुकूलयति * विवक्षितेति । चित्तस्यान्तर्मुखत्वाभावे इन्द्रियग्लानिः स्यादिति दुःखस्यैव तत्फलत्वश्रवणात्तन्निवृत्त्यर्थोऽयं विधिरिति निश्चीयते इत्यर्थः ॥ ३१३ ॥ दुःखाभावस्य पश्वादिवत्सुखशेषत्वेन श्रुतेर्मुख्यपुरुषार्थपरत्वे सम्भवति न दुःखाभावपरत्वं युक्तमिति शङ्कते * नन्विति ।

अयुक्तमिति चेन्मैवं जीवन्मुक्त्यर्थमीरणात् ॥ ३१४ ॥
अबुद्धब्रह्मतत्त्वेऽस्मिन्यद्वज्जन्म भविष्यति ॥
तद्वद्वहिर्मुखे चित्ते स्यादेव ग्लानिरिन्द्रियैः ॥ ३१५॥
अथासङ्गस्य न ग्लानिरिति चेदिदमेव हि ॥
पर्यालोचनमत्रोक्तं श्रुत्याऽक्षग्लानिवारकम् ॥३१६॥
बुद्धतत्त्वस्य यस्यैतत्स्वतःसिद्धं न तं प्रति ॥
विधत्ते ऽन्यं त्वनात्माभिमुखं प्रति विधीयते ॥३१७॥
सूत्रकारोऽत एवाह निदिध्यासनरूपिणि ॥

निरतिशयपरमानन्दोद्बोधनद्वारा दुःखनिवृत्त्यर्थत्वाच्चित्तस्थैर्यविधेस्तस्य च सत्त्वादिदृष्टसाध्यत्वान्नोक्तदोष इति परिहरति मैवमिति ॥३१४॥ आत्मनो वस्तुतो निर्दुःखत्वादारोपितदुःखस्य बोधेन निवृत्तत्वात्कथं पुनर्दुःखानुवृत्तिरित्याशङ्क्य वस्तुतो ब्रह्मीभूतस्यापि जीवस्य बोधाभावे पुनर्जननमवश्यम्भावि एवं बुद्धतत्त्वस्यापि चित्तविश्रान्त्यभावे दुःखानुवृत्तिः दुष्परिहरेत्याह *अबुद्धेति ॥ ३१५ ॥ तथाप्यसङ्गत्वादात्मनो न दुःखसम्बन्ध इति मत्वा तस्य बुद्धस्य किं विधिना इत्याशङ्क्य, उक्तमननस्यैव निरन्तरकरणाय विधिरित्याह * अथेति ॥ ३१६ ॥ प्रत्यक्तत्त्वबोधाय सम्पादितचित्तैकाग्र्यस्य पुंसः तद्बोधानन्तराच्चित्तस्थिरीकरणं स्वतःसिद्धत्वान्न विधेयमित्याशङ्क्य, तथापि चित्तैकाग्र्यमसम्पाद्य श्रवणादिभिः स्वरूपं निश्चितवतो बहिर्मुखस्यायं विधिरर्थवानित्याह * बुद्धेति ॥ ३१७ ॥ उक्तेऽर्थे सूत्रकारसम्मतिमाह * सूत्रेति । सहकार्यन्तरसूत्रेण पाण्डित्यबाल्यादिशब्दितश्रवणमननाभ्यां निश्चिततत्त्वस्यापि ब-

पाण्डित्यबाल्यवाक्यस्थे मौनेऽस्मिन्पाक्षिकं विधिम् ३१८

न विध्यर्हो बुद्धतत्त्व इति चेद्वासनाबलात् ॥
अबुद्ध इव संक्लिश्यन्विधिं ध्याने तदार्हति ॥३१९॥
अप्रमत्तो यदा योगी तदा मा भूदयं विधिः ॥
ज्योतिष्टोमो न विहितः स्वर्गस्थपुरुषं प्रति ॥ ३२० ॥
वासनाभिः क्लिश्यतोऽस्य ध्यानवन्नैव कर्मसु ॥
विधिः प्रसज्यते यस्मात्कर्म क्लेशं न वारयेत् ॥३२१॥
यदि सेवेत कर्माणि तृडार्त्तोऽग्निं च सेवते ॥
तृड्वृद्धिरग्निदाहाच्चेत् क्लेशवृद्धिश्च कर्मतः ॥ ३२२ ॥
ध्यानं तु सावधानत्वमात्रत्वान्न हि दुःखकृत् ॥
प्रत्युतानन्दमुद्बोध्य पूर्वदुःखं तु वारयेत् ॥ ३२३ ॥

हिर्मुखत्वनिवृत्तये निदिध्यासनपर्यायमौनविधिमाहेत्यर्थः॥३१८॥ विदुषो न विधिस्तस्य कृतकृत्यत्वादिति शङ्कते * नेति । किं विद्वच्छब्देन सवासनो विर्वासनो वा विवक्षितः ? । आद्ये वासनानिवृत्तेः सम्पाद्यत्वेन तस्याज्ञवद्विधियोग्यतेत्याह * वासनाबलादिति ॥ ३१९ ॥ निर्वासनस्य विध्ययोग्यत्वमङ्गीकरोति * अप्रमत्त इति । फले सिद्धे तत्साधने न विधिरत्र दृष्टान्तमाह * ज्योतिष्टोम इति ॥ ३२० ॥ विदुषो विध्यङ्गीकारेऽग्निहोत्राद्यपि प्रसज्येतेत्याशङ्क्य कर्मणां वासनावर्द्धकत्वान्न तन्निवृत्तिकामेन तान्यनुष्ठेयानीति सदृष्टान्तमाह * वासनाभिरिति ॥ ३२१ ॥ कर्मसूक्तं दोषं ध्याने निरस्यति * ध्यानमिति ॥३२२॥३२३॥ ध्यानस्यापि मानसक्रियात्वात्कथं न दुःखहेतुतेत्याशङ्क्य चित्तस्य वाक्यार्थाभिमुख्यमनात्मधीनिवृत्त्यात्मकमत्र प्रज्ञाशब्देन विवक्षितं न क्रियारूपमतो नोक्तदोष इत्याह

विज्ञाने सावधानत्वमत्र ध्यानं तु न क्रिया ॥
इत्यर्थस्य विवक्षार्थे प्रज्ञाशब्दः प्रयुज्यते ॥ ३२४ ॥
मैत्रेयीब्राह्मणेऽप्येवं निदिध्यासनशब्दतः ॥
उपक्रमोपसंहारे विज्ञानमिति वर्णितम् ॥ ३२५ ॥
निदिध्यासस्वेति गिरा यदुक्तं श्रवणाय तत् ॥
ऐकाग्र्यं याज्ञवल्क्येन विहितं साधनं तु तत् ॥३२६॥
साधनं फलरूपं च द्विविधं ध्यानमीरितम् ॥
प्रज्ञां कुर्वीत वाक्येन फलाभिमुखतोच्यते ॥ ३२७ ॥
बहुनाऽत्र किमुक्तेन प्रसङ्ख्यानं त्वदीहितम् ॥
नैवात्र विहितं तद्वन्नापि चान्यत्र कुत्रचित् ॥३२८॥

---

*विज्ञान इति। उक्तविवक्षायां हेतुः *प्रज्ञेति। अन्यथा तं विज्ञाय ध्यानं कुर्वीतेत्येवं वाक्यप्रयोगः स्यादिति भावः॥३२४॥ श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यत्र क्रियारूपध्यानविधानवदत्रापि तद्विधिरेवास्त्वित्याशङ्क्य तत्रापि श्रवणेन मत्या विज्ञानेनेत्युपसंहारवाक्ये निदिध्यासनस्थाने विज्ञानशब्दप्रयोगादैक्याभिमुख्यमेव विधीयते इत्याह * मैत्रेयीति ॥३२५॥ निदिध्यासनशब्दस्यैक्याभिमुख्यपरत्वे "व्याचक्षाणस्य तु मे निदिध्यासस्व" इत्यत्र मैत्रयीं प्रति याज्ञवल्क्यवचनमसङ्गतं स्यात्तया तदा वाक्यार्थस्याज्ञातत्वादित्याशङ्क्य साध्यसाधनरूपोभयविधध्यानवाचिनिदिध्यासनशब्दस्यौचित्यादर्थनिश्चय इत्याह * निदिध्यासस्वेति ॥३२६॥२२७॥ प्रसङ्ख्यानविधिनिराकरणमुपसंहरति * बहुनेति ॥ ३२८ ॥ उक्तमेवार्थं दृढीकर्तुं वृत्तानुद्रवणपुरःसरमाक्षेपमवतारयति * दूषितमित्यादिना । कार्यविशेषानेव दर्शयति * निरोध इति ॥ ३२९ ॥ आक्षेपप्रकारमा-

दूषितं कार्यसामान्यं तद्विशेषाश्च दूषिताः ॥
निरोधः प्रतिपत्तिश्च प्रसङ्ख्यानमिति त्रयः ॥३२९॥
अथ ते निखिलाः कार्यवादिनो ऽखण्डवस्तुनि ॥
वेदान्तानां प्रमाणत्वमाक्षिपन्त्यतिसम्भ्रमात् ॥३३०॥
अलौकिकत्वात्संसृष्टसंसर्गानियतत्वतः ॥
अपुमर्थेन वेदस्य मिथ्यात्वाच्च न मानता ॥ ३३१ ॥
अलौकिकार्थवादित्वादात्मब्रह्माभिधानयोः ॥
सम्बन्धाग्रहणादात्मा ब्रह्मेति कथमुच्यते ॥ ३३२ ॥
ज्ञातार्थसङ्गतिः शब्दो वाक्यार्थावगतिक्षमः ॥
न चात्र सङ्गतिर्ज्ञातुं शक्यतेऽर्थाप्रसिद्धितः ॥३३३॥
ब्रह्मात्मार्थौ प्रसिद्धौ चेल्लोकादेव तदा तयोः ॥
मान्तरानुप्रवेशेन वाक्यं स्यादनुवादकम् ॥ ३३४ ॥
वाक्यं संसर्गबोध्येवाभिहितान्वयवादिनः ॥
अन्विताथाभिधाने तु संसृष्टस्यैव मेयता ॥ ३३५ ॥
अखण्डैकरसार्थस्य मेयता न क्वचिन्मते ॥

द * अलौकिकत्वादिति ॥३३०॥३३१॥ आद्यहेतुं विवृणोति *अलौकिकेत्यादिना ॥३३२॥३३३॥ ब्रह्मात्मानौ मानान्तरादज्ञातौ ज्ञातौ वा, आद्ये तयोः शब्दशक्त्यग्रहादगृहीतशक्तिकशब्दस्याबोधकत्वादप्रामाण्यमित्युक्त्वा द्वितीयं निरस्यति *ब्रह्मेति॥३३४॥ पदाभिहितपदार्थानां संसर्गो वा संसृष्टपदार्थो वा वाक्यार्थ इतिमतद्वयस्यैव प्रसिद्धत्वादखण्डार्थस्य मेयत्वमप्रसिद्धमिति द्वितीयहेतुं विवृणोति * वाक्यमित्यादिना ॥३३५॥ अपुमर्थत्वादिति तृतीयहेतुं व्याचष्टे * पुमर्थ इति ॥ ३३६ ॥ चतुर्थं विभजते अखण्डत्वायेति । प्रतीचो ऽखण्डाद्वितीयत्वाय जगतो मिथ्या-

पुमर्थश्चास्ति नाखण्डे हानोपादानवर्जनात् ॥ ३३६ ॥
अखण्डत्वाय जगतो मिथ्यात्वे सति वैदिकम् ॥
वचोऽपि मिथ्याभूतं सत्कथं मानं भविष्यति ॥३३७॥
अतो वेदान्तमानेन यदखण्डार्थबोधनम् ॥
तन्मनोराज्यमेवेति जल्पतामिदमुत्तरम् ॥ ३३८ ॥
प्रसिद्धात्मन्यात्मशब्दप्रयोगात्स हि लौकिकः ॥
ब्रह्मार्थोऽपि महत्त्वेन प्रसिद्धो व्यवहारतः ॥ ३३९ ॥
एवं पदात्परिज्ञाते पदार्थे लोकमानतः ॥
वाक्यार्थोऽतीन्द्रियो वेदवाक्यात्केन निवार्यते॥३४०॥

त्वस्वीकारात्तदन्तःपातिवेदस्यापि तथात्वाद्वन्हिप्रमायां बाष्पस्येव न तस्य ब्रह्मप्रमाहेतुत्वमित्यर्थः ॥ ३३७ ॥ आत्मा तावन्नालौकिकः विषयोपलब्धृत्वेन प्रसिद्धेः तास्मिन्वृद्धैरात्मशब्दप्रयोगात् । नापि ब्रह्माप्रसिद्धम् । बृहतिधात्वर्थानुसरणस्य वृद्धव्यवहारतोऽनतिशयमहत्त्वेन प्रसिद्धत्वान्नात्मब्रह्मशब्दयोः शक्तिग्रहानुपपत्तिरिति परिहरति *इदमित्यादिना॥३३८॥३३९॥ तर्हि तत्त्वमादेरनुवादकत्वं तत्राह * एवमिति । पदद्वयादर्थद्वये लोकव्यवहाराद् दृष्टेऽपि वाक्यार्थो ऽखण्डैकरसरूपो मानान्तरागोचरो वाक्यादेव मीयमानो नानुवाद्यतां गन्तुमलमित्यर्थः ॥ ३४० ॥ उक्तेऽर्थे दृष्टान्तमाह * अपूर्वेति । यथा स्वर्गापूर्वादिषु लोकसिद्धेषु तत्तच्छब्दानां शक्तिं गृहीत्वा ज्ञातशक्तिपदसंहातिरूपवाक्याद्विशिष्टार्थं वेद भवानेवमात्माद्यर्थे लोकसिद्धेऽपि तदेकरसरूपो वाक्यार्थो वाक्यादेव मम सिद्ध्यतीत्यर्थः ॥ ३४१ ॥ स्वर्गादिपदार्था न वृद्धव्यवहारमात्रात्

अपूर्वदेवतास्वर्गपदार्थाँल्लोकमानतः ॥
व्युत्पाद्यालौकिकोऽप्यर्थो वाक्याद्बुद्धस्त्वया यथा॥३४१॥
अथार्थवादादिबलात्स्वर्गाद्यर्थोऽवगम्यते ॥
तर्ह्येवान्तरवाक्येन ब्रह्मार्थोऽप्यवगम्यते ॥ ३४२ ॥
अप्रसिद्धपदार्थोऽपि प्रसिद्धार्थपदैः सह ॥
समभिव्याहृतो बोद्धुं शक्यो मधुकरादिवत् ॥३४३॥
अतो लोकानुसारिण्या व्युत्पत्त्याऽर्थोऽप्यलौकिकः ॥
धर्मब्रह्मात्मकः सिद्ध्येत्तत्र कस्मादमानता ॥ ३४४ ॥
नृविवक्षाव्यवहिते लोके शङ्का भवेदपि ॥
वेदे त्वपौरुषेयत्वात् साक्षात् स्वार्थे प्रमाणता ॥३४५॥
अर्थावबोधकत्वेन दुष्टकारणवर्जनात् ।

सिद्ध्यन्ति किन्तु यन्न दुःखेनेत्याद्यर्थवादादेरतो न ते दृष्टान्ता इत्याशङ्कते * अथार्थवादादिबलादिति । प्रकृतेऽपि सदेव सोम्येत्युपक्रम्य तत्सत्यं स आत्मेत्यन्तेन ग्रन्थेन वाक्यार्थज्ञानात्पूर्वं ब्रह्मपदार्थोऽपि सुगम इत्याह * तर्हीत्यादिना ॥३४२॥ प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र प्रसिद्धकमलादिपदसमभिव्याहारादप्रसिद्धस्य मधुकरशब्दस्य भ्रमरे शक्तिग्रहणवद् ब्रह्मपदस्यापरिच्छिन्नवस्तुनि शक्तिः सुग्रहेत्यर्थः ॥३४३॥ व्युत्पत्तिग्रहणसमर्थनमुपसंहरति * अत इति । धर्मग्रहणं दृष्टान्तार्थम् ॥ ३४४॥ अपिच वक्त्रभिप्रायानुसारिलौकिकवाक्येऽप्रामाण्यशङ्कायामपि वेदे तच्छङ्कैव न कार्येत्याह * नृविवक्षेति ॥ ३४५ ॥ तस्मादबोधकत्वसांशयिकत्वविपर्ययहेतूनामभावाद्वेदान्तानां मानत्वं सुस्थमित्याह * अर्थेति ॥३४६॥ यदुक्तं संसृष्टसंसर्ग नियतत्वत इति तद् दूषयति * अन्यत्रेति ।

अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवच्छ्रुतेः ॥ ३४६ ॥
अन्यत्रैवात्र वाक्यार्थो नैव संसृष्टलक्षणः ॥
संसर्गलक्षणो वा स्यात्किंत्वखण्डार्थलक्षणः ॥३४७॥
ब्रह्मणो नात्मतारूपमब्रह्मत्वं तथाऽऽत्मनः ॥
अज्ञानजं द्वयं द्वाभ्यां पदाभ्यां विनिवार्यते ॥३४८॥
नेहान्यत्रात्मनो ब्रह्म न चात्मा ब्रह्मणोऽन्यतः ॥
तादात्म्यमनयोस्तस्मान्नीलोत्पलविलक्षणम् ॥ ३४९ ॥
नीलत्वमुत्पलत्वं च ह्यन्योन्यव्यभिचारिणी ॥
आत्मब्रह्मत्वयोर्नास्ति व्यभिचारो मनागपि ॥३५०॥
अब्रह्मानात्मते यद्वदत्राज्ञाननिबन्धने ॥

गामानयेत्यादिवाक्यस्य संसर्गाद्यर्थत्वेऽपि तत्त्वमादिवाक्यवदखण्डार्थत्वमित्यर्थः ॥ ३४७ ॥ तत्त्वमादेरखण्डव्यक्तिपरत्वे एकेन पदेन तद्बोधसम्भवात्पदान्तरवैयर्थ्यमित्याशङ्क्यात्मब्रह्मणोरारोपिताब्रह्मत्वानात्मत्वनिवृत्त्यर्थं पदद्वयमर्थवदित्याह * ब्रह्मण इति ॥ ३४८ ॥ यतो ब्रह्मात्मनोरखण्डैकव्यक्तिपरत्वं ततो नीलोत्पलयोर्भेदसहाभेदवत्तयोर्न तादात्म्यमित्याह * नेहेति । शास्त्रमिहेत्युच्यते ॥ ३४९ ॥ वैलक्षण्यं स्पष्टयति * नीलत्वमिति । अतो नात्मब्रह्मणोर्भेदाभेद इत्यर्थः । ॥ ३५० ॥ ब्रह्मणो ऽनात्मत्वमात्मनश्चाब्रह्मत्वमाविद्यमितिवदात्मत्वं ब्रह्मणो ब्रह्मत्वं चात्मनो ऽज्ञानकृतं किं न स्यादित्याशङ्क्याह * अब्रह्मेति । अत्रेत्यात्मनो निर्देशः । भेदस्यान्योन्याश्रयादिदुष्टत्वात्कल्पितत्वं नाभेदस्येत्यात्मनो ब्रह्मत्वं ब्रह्मणश्चात्मत्वं स्वाभाविकमित्यर्थः ॥ ३५१ ॥ यथा वस्त्रं मैत्र इत्यत्र समानाधिकृतपदद्वयप्रतिपाद्ययोरप्यन्योन्यसंबन्धो मैत्रस्य वस्त्र-

आत्मताब्रह्मते नैवं कल्पिते किन्तु ते स्वतः ॥३५१॥
न चात्र नाम्नोः सम्बन्धे षष्ठी प्राप्नोत्यभेदतः ॥
नरस्य वस्त्रमित्यर्थभेदे षष्ठी प्रयुज्यते ॥ ३५२ ॥
न चात्र भेदः सम्भाव्य एकव्यक्त्युपलक्षणात् ।
ब्रह्मात्मार्थपरीक्षायां व्यक्तिरेकोपलक्ष्यते ॥ ३५३ ॥
प्रत्यक्त्वमात्मता तद्वद्ब्रह्मत्वं चाद्वितीयता ॥
द्वौ प्रत्यश्चावसम्भाव्यौ तत्रैकस्य पराक्त्वतः ॥३५४॥
अतः प्रत्यक्त्वमेवैतदद्वयत्वं न चेतरत् ॥
तथाप्यविद्याविभ्रान्तिव्यावृत्त्यर्थं पदद्वयम् ॥ ३५५ ॥

मित्येवं तत्त्वंपदार्थयोरपि सम्बन्धो वाच्यः । तथाचाखण्डार्थत्वहानिरत आह * न चेति । तयोः सम्बन्धाभावे भेदाभावं हेतुमाह * अभेदत इति ॥ ३५२ ॥ तर्हि प्रवृत्तिनिमित्तरहिते एकरसे तस्मिन् कथं शब्दप्रवृत्तिरित्याशङ्क्य लक्षणयेत्याह *एकेति । एकव्यक्तावपि लक्षणया नामसम्बन्धसम्भवादित्यर्थः। तयोरेकव्यक्तित्वे हेत्वन्तरमाह * ब्रह्मेति । ब्रह्मात्मशब्दयोरपरिच्छिन्नवस्तुवाचित्वात्तद्वयोः सार्वात्म्यायोगात्तयोरेकव्यक्तितेत्यर्थः ॥ ३५३ ॥ एकव्यक्तित्वे फलितमाह * प्रत्यक्त्वमिति ॥ प्रतीच्यात्मत्ववद् ब्रह्मत्वमाद्वितीयत्वं च स्वतः सिद्धमित्यर्थः । किश्चाद्वितीयब्रह्मणः प्रत्यगभिन्नत्वाभावे पराक्त्वेन घटादिवदनित्यत्वप्रसङ्ग इत्याह * द्वाविति ॥ ३५४ ॥ तस्मादुक्तदोषपरिहाराय प्रत्यग्ब्रह्मणोरैक्यमङ्गीकार्यमित्याह * अत इति । तर्हि पदद्वयं व्यर्थमित्याशङ्क्य पूर्वोक्तं परिहारं स्मारयति * तथापीति ॥ ३५५ ॥ वेदान्तानामखण्डैकरसे ब्रह्मात्म-

आत्मापि सदिदं ब्रह्म मोहात्पारोक्ष्यदूषितम् ॥
ब्रह्मापि संस्तथैवात्मा सद्वितीयतयेक्ष्यते ॥ ३५६ ॥
आत्मा ब्रह्मेति पारोक्ष्यसद्वितीयत्वबाधनात् ॥
अखण्डे निष्ठितं शास्त्रं पुरुषार्थे समीहिते ॥ ३५७ ॥
दृष्टाऽखण्डार्थता वाक्ये प्रत्यभिज्ञापके यतः ॥
तदेतद्देशकालाभ्यां व्यक्तिरेकोपलक्ष्यते ॥ ३५८ ॥
दृष्टस्य देवदत्तस्य दृश्यमानस्य चैकता ॥
बुभुत्सिता सोऽयमितिवाक्येन प्रतिपाद्यते ॥ ३५९ ॥
प्रतिपाद्यौ देशकालौ न तयोरबुभुत्सनात् ॥
परस्परविरोधाच्च व्यक्त्यैकत्वं तु बोध्यते ॥ ३६० ॥
एवमत्रापरोक्षस्य प्रतीचोऽन्यनिवारणात् ॥
ब्रह्मत्वलक्षणोऽखण्डो वाक्येनार्थोऽवबुध्यते ॥३६१॥
हानोपादानराहित्येऽप्यपुमर्थो भवेन्न हि ॥

नि समन्वयमुपसंहरति * आत्मापीत्यादिना । ब्रह्मण्यात्मसम्बन्धात्पारोक्ष्यस्य आत्मनि च ब्रह्मसम्बन्धात्सद्वयत्वस्य निरासात्परानन्दतया परमपुरुषार्थे वाक्यमैक्यतात्पर्येण पर्यवसितमित्यर्थः ॥३५६॥३५७॥ तत्त्वमादिवाक्यस्य सोऽयमादिवाक्यवदखण्डार्थत्वमुक्तं, तत्र दृष्टान्ते विप्रातिपन्नं प्रति तस्याखण्डार्थत्वमाह * दृष्टेति ॥ देशकालाभ्यां, सम्बद्धेति शेषः ॥३५८॥ उक्तमेवार्थं स्पष्टयति * दृष्टस्येति । प्रतिपाद्यते, लक्षणयेति शेषः ॥३५९॥ लक्षणाबीजं दर्शयन् सोऽयमित्यादेरखण्डार्थत्वमुपसंहरति *प्रतिपाद्याविति ॥३६०॥ एवं सति तत्त्वमादिवाक्यस्य कल्पितभेदनिरासपूर्वकं प्रतीचोऽखण्डब्रह्मत्वबोधकत्वमुपपन्नमित्याह * एवमिति ॥ ३६१ ॥ अपुमर्थत्वादिति यदुक्तं तत्प-

इष्टप्राप्तेरनिष्टार्थनिवृत्तेश्चेह सम्भवात् ॥ ३६२ ॥
प्राप्तं चाप्राप्तमित्येवं द्विधेष्टं प्राप्तुमिष्यते ॥
अनिष्टं द्विविधं त्यक्तमत्यक्तं च जिहासितम् ॥३६३॥
ग्रामादि किञ्चिदप्राप्तं प्राप्तुमिष्टमिहेच्छति ॥
हेमादि विस्मृतं किञ्चित्करस्थमपि लिप्सते ॥३६४॥
अनिष्टं चापरित्यक्तं कण्टकादि जिहासति ॥
रज्ज्वां सर्पादिकं किञ्चित्त्यक्तमेव जिहासति ॥३६५॥
अप्राप्तं प्राप्तुमत्यक्तं त्यक्तुं कर्मैव साधनम् ॥
लोके वेदेऽप्यतः कर्मविधीनां स्यात्तदर्थता ॥ ३६६ ॥
अज्ञानारोपितत्वेन सम्प्राप्तत्यक्तयोः पुनः ॥
याथात्म्यज्ञानतो नान्यत्पुरुषार्थाय कल्प्यते ॥ ३६७ ॥
त्वं ब्रह्मेति श्रुते वाक्ये सिद्ध्यत्येवाप्रयत्नतः ॥
अशेषानर्थविच्छेदो ब्रह्मानन्दोऽप्यनुत्तमः ॥ ३६८ ॥

त्याह * हानेति ॥ ३६२ ॥ हानाद्यविषयस्यापि ब्रह्मणः पुमर्थत्वमुक्तं स्पष्टयितुं लोके इष्टानिष्टयोर्द्वैविध्यं दर्शयति * प्राप्तमित्यादिना ॥ ३६३ ॥ ३६४ ॥ ३६५ ॥ इष्टप्राप्तिमनिष्टपरिहारं च विभज्य तत्राप्राप्तस्यात्यक्तस्य च प्राप्तित्यागयोरुपायमाह * अप्राप्तमिति । तयोः शास्त्रान्वयव्यतिरेकसिद्धोपायसाध्यत्वाद्विधिनिषेधाभ्यामन्वयव्यतिरेकाभ्यां च साधनभेदं ज्ञात्वा तदनुष्ठानेन प्रेप्सिता प्राप्तं प्राप्नोति अपरिहृतं च परिजिहीर्षितं परिहरतीत्यर्थः ॥३६६॥ अवशिष्टयोः प्राप्तित्यागयोरुपायमाह * अज्ञानेति । अप्राप्तत्वादेरिति शेषः ॥ ३६७ ॥ एवं विभागे सिद्धे वेदान्तवेद्यस्यापि हानादिकं विना पुमर्थत्वं सिद्ध्यतीत्याह * त्वमिति ॥ ३६८ ॥ ऐक्यस्य पुमर्थत्वे फलितमाह

पुरुषार्थोपदेष्टृत्वाद्यद्वत्कार्ये प्रमाणता ॥
तथैकात्म्ये विशेषाद्वा पुमर्थातिशयत्वतः ॥ ३६९ ॥
न चैकात्म्याभ्युपायस्य मिथ्यात्वमिह चोद्यताम् ॥
कदा वेदस्य मिथ्यात्वं भवता ज्ञायते वद ॥ ३७० ॥
ऐकात्म्यप्रतिपत्तेः प्राङ्न मिथ्यात्वमबाधनात् ॥
पुमर्थस्य समाप्तत्वादूर्ध्वं वेदेन किं तव ॥ ३७१ ॥
अज्ञातमपि मिथ्यात्वं प्रागस्त्येवेति चेच्छृणु ॥
मानसत्यत्वमिथ्यात्वे न मात्वामात्वकारणे ॥३७२॥
सत्येनाप्यनुपायेन घटेनाग्निर्न मीयते ॥
असत्येनाप्युपायेन प्रतिबिम्बेन बिम्बधीः ॥ ३७३ ॥
धूमाभासात्तु बाष्पादेर्यदग्निर्नावगम्यते ॥
हेतुस्तत्रानुपायत्वमविनाभाववर्जनात् ॥ ३७४ ॥
वेदान्तानामुपायत्वाद् धूमवत्परमार्थता ॥

---

* पुरुषेति । वस्तुतस्त्वबाधितपुमर्थबोधित्वादैक्यश्रुतेरेव तत्त्वावेदनं प्रामाण्यमित्याह * विशेषादिति ॥ ३६९ ॥ मिथ्याभूतवेदनस्य न प्रमापकत्वं बाष्पवदिति यदुक्तं तन्निराचष्टे * न चेति । वेदस्य मिथ्यात्वं ज्ञातममानत्वे हेतुरुत स्वरूपेण । ज्ञातं च वस्तुधियः प्रागूर्ध्वं वेति विकल्प्य दूषयति * कदेति ॥ ३७० ॥ ३७१ ॥ ३७२ ॥ ३७३ ॥ असत्योपायस्यापि बोधकत्वे वाष्पादपि वन्हिप्रमा स्यादित्याशङ्क्य तस्य तदुपायत्वमेव नास्ति तेनाव्यभिचरितसम्बन्धाभावादित्याह * धूमेति । धूमाभासात् धूमविलक्षणादिति यावत् ॥ ३७४ ॥ वेदः सत्यः उपायत्वात् धूमादिवदित्याशङ्क्याद्वितीयश्रुतिबाधितमनु-

न शङ्कार्हा तदैकात्म्यश्रुतिबाधः स्फुटो भवेत् ॥३७५॥
बाष्पवन्नापि मिथ्यात्वादनुपायत्वमुच्यताम् ॥
ऐकात्म्याज्ञानबाधेन सिद्धैवोपायता भवेत् ॥३७६॥
उपेयबोधनं मुक्त्वा मितेर्नान्याऽस्ति सत्यता ॥
उपेयैकात्म्यबोधस्तु वेदान्तेषूपलभ्यते ॥ ३७७ ॥
अतः स्वरूपमिथ्यात्वेऽप्युपायत्वादसत्यता ॥
नास्तीत्युपायतो वेदादुपेयं ब्रह्म मीयताम् ॥ ३७८ ॥
सत्यामैकात्म्यसंवित्तौ चारितार्थत्वतः श्रुतेः ॥
वृथोपायपरीक्षा स्यादुत्तीर्णस्य प्लवे यथा ॥ ३७९ ॥
बाह्येष्वर्थेष्वनात्मत्वात्काचिच्छङ्का भवेदपि ॥
अत्रात्मत्वादुपेयस्य का शङ्का मानतां प्रति ॥३८०॥

मानमित्याह * वेदान्तानामिति ॥३७५॥ किञ्च वेदो नोपायः मिथ्यात्वाद्बाष्पवदित्यत्र किं मिथ्यात्वशब्देनाकार्यकरत्वं विवक्षितं बाधयोग्यत्वं वा ? आद्ये हेत्वसिद्धिः अज्ञाननिवृत्तिरूपकार्यकरत्वादित्याह * बाष्पेति ॥ ३७६ ॥ न द्वितीयः, धूमे व्यभिचारात् । तस्यापि नेह नानेति श्रुतिबाधितत्वादित्याह * उपेयेति । मितिशब्देन तज्जनकं मानं लक्ष्यते । उक्तानुवादपूर्वकं वेदस्य ब्रह्मबोधोपायत्वमुक्तमुपसंहरति * उपेयेत्यादिना ॥ ३७७॥ ३७८॥ ऐकात्म्यबोधित्वे सत्युपायस्य सत्यत्वं तस्मिन् सति तद्बोधित्वम् इति अन्योन्याश्रयमाशङ्क्य नेत्याह *सत्यामिति । प्रमितौ सत्यामुपायान्वेषणं वृथेत्यत्र दृष्टान्तमाह * उत्तीर्णस्येति ॥ ३७९ ॥ इतश्च श्रुत्यादेः सत्यत्वाभावेऽपि नाबोधकत्वमित्याह * बाह्येति। अबाधितवस्तुबोधिनो मानभावं प्रति शङ्कैव नोत्तिष्ठेदित्यर्थः ॥३८०॥ फलितं दर्शयन् शिष्याव-

बोधकत्वेन मानत्वमखण्डार्थेऽप्यवस्थितम् ॥
वेदान्तानामथैतेषां बाधः परिहरिष्यते ॥ ३८१ ॥
ननु भेदाश्रितैर्वाक्यैर्विधायकनिषेधकैः ॥
अक्षादिभिश्च नैकात्म्यं बाधितत्वात्प्रमाणवत् ॥३८२॥
न चास्यैकात्म्यशास्त्रस्य तैर्विकल्पसमुच्चयौ ॥
यत एतावसम्भाव्यौ क्रियायामिव वस्तुनि ॥ ३८३ ॥
व्रीहिभिर्वा यवैर्वेति यथा यागो विकल्प्यते ॥
नैवमेकमनेकं वेत्येतद्वस्तु विकल्प्यते ॥ ३८४ ॥
समुच्चित्यै यथादर्शपौर्णमासौ तथा न तु ॥
भिन्नाभिन्नात्मना वस्तु समुच्चेतुमिहार्हति ॥ ३८५ ॥
अत ऐकात्म्यमानस्य भेदमानस्य वा द्वयोः ॥
एकबाधस्य सम्प्राप्तावैक्यधीर्बाध्यतेऽन्यथा ॥ ३८६ ॥
नेह नानेति भेदानां निषेधो नान्यबाधकः ॥

धानायोत्तरग्रन्थप्रतिपाद्यमर्थमाह * बोधकत्वेनेति ॥ ३८१ ॥ अध्यक्षादिविरोधं परिहृत्याखण्डे वस्तुनि वेदान्तानां समन्वयं दृढीकर्तुं पूर्वपक्षमवतारयति * नन्विति । विधिनिषेधवाक्यान्यक्षादीनि च भेदविषयाणि तैरैक्यस्य बाधान्न तस्य वेदान्तगम्यतेत्यर्थः ॥३८२॥ वेदान्तानामप्यविशेषात्प्रामाण्ये तैर्विकल्पः समुच्चयो वा स्यादतो वेदान्तवेद्यं वाऽक्षादिगम्यं वा द्वयमपि वा सत्यमित्याशङ्क्य समाधिमाह * न चेति ॥३८३॥ विकल्पसमुच्चयावुदाहरन् वस्तुनि तदसम्भवमाह ॥ व्रीहिभिरित्यादिना ॥ ३८४ ॥ वस्तुनि विकल्पाद्यसिद्धौ फलितमाह * अत इति ॥ ३८५ ॥ ३८६ ॥ नन्वैक्यमानेन भेदमानं वा बाध्यतां नेत्याह * नेहेति । तत्र हेतुमाह * वर्णादीति । प्रत्य-

वर्णादिग्रहणोपायप्रत्यक्षाद्युपजीवनात् ॥ ३८७ ॥
वर्णान् ग्रहीतुमर्थस्य व्युत्पत्त्यैवोपजीवति ॥
श्रुतिरक्षानुमाने द्वे प्रबलत्वं तयोस्ततः ॥ ३८८ ॥
निषेधविध्योर्यच्छास्त्रं चित्तशुद्ध्युपकारि तत् ॥
ऐक्यशास्त्रेणोपजीव्यं प्रबलं तेन तन्मतम् ॥ ३८९ ॥
तत्तु भेदाश्रयेणैव विधत्ते च निषेधति ॥
तस्मादभेदशास्त्रस्य बाधो विध्यादिशास्त्रतः॥३९०॥
औपचारिकमैकात्म्यशास्त्रं कर्त्रात्मसम्भवात् ॥
सावकाशं भवेद्यद्वा जपार्थमुपयुज्यते ॥ ३९१ ॥
भेदसाधकमक्षादि भेदादन्यत्र कुत्र वा ॥
सावकाशं ततस्तस्य बाधो नैकात्म्यशास्त्रतः॥३९२॥
ऐकात्म्यबोधकत्वेऽपि वेदान्ता बाधितत्वतः ॥

क्षादिर्वर्णपदवाक्यादिग्रहोपायः, न च शास्त्रेण तद्बाधो युक्तस्तथा सति हेत्वभावाद्वस्तुनि ज्ञानासिद्धेर्मोक्षाभावप्रसङ्गादित्यर्थः ॥ ३८७ ॥ उक्तमेवार्थं स्पष्टयन्नादिशब्दगृहीतानुमानस्यापि श्रुत्युपजीव्यत्वमाह * वर्णानिति । मध्यमवृद्धप्रवृत्तेरिष्टज्ञानपूर्वकत्वादिकमनुमाय गृहीतसङ्गतिकस्यैव बोधकत्वाच्छ्रुतेरित्यर्थः ॥३८८॥ ऐक्यशास्त्रेण कर्मशास्त्रस्याबाधे हेत्वन्तरमाह* निषेधेत्यादिना ॥ ३८९ ॥ ३९० ॥ का तर्हि वेदान्तानां गतिस्तत्राह * औपचारिकमिति ॥ गत्यन्तरमाह * यद्वेति ॥३९१॥ "सावकाशनिरवकाशयोर्निरवकाशं बलवत्" इति न्यायात् द्वैतमानानां च द्वैतं विना ऽनवकाशानां दर्शितरीत्या सावकाशेनाद्वैतशास्त्रेणाबाध्यतेत्याह * भेदेति ॥ ३९२ ॥ द्वैतग्राहिमानविरोधान्न वेदान्तानामेकरसे ब्रह्मणि प्रामाण्यमिति प्राप्ते सिद्धान्तमाह

अप्रामाण्यं भजन्तीति पूर्वपक्षो व्यवस्थितः ॥३९३॥
उच्यते लोकतः सिद्धं भेदमाश्रित्य चोदना ॥
प्रवृत्ता पुरुषार्थाय न तु भेदविबुद्धये ॥ ३९४ ॥
भेदस्य चापुमर्थत्वात्तादर्थ्ये स्यादमानता ॥
पुमर्थत्वेन चास्येष्टं प्रामाण्यं वेदवादिभिः ॥ ३९५ ॥
भेदाप्रमापिका ऽप्येषा चोदना भेदमाश्रयेत् ॥
इति चेदल्पमेवोक्तमैक्यशास्त्रं च तादृशम् ॥ ३९६ ॥
गुरुशिष्यादिभेदेन विनैकात्म्यावबोधने ॥
प्रवर्त्तेत कथं शास्त्रं तस्माद्भेदाश्रितं हि तत् ॥३९७॥
एवं तर्ह्युपजीव्येन विरोध इति मा वद ॥

---

* उच्यते इति । तत्रादौ कर्मकाण्डविरोधं निराह * लोकत इति । कर्मकाण्डं लौकिकं कर्त्रादिभेदमादायाभ्युदयार्थं प्रवृत्तं न तं प्रतिपादयितुं तस्यापूर्वत्वाभावात्तत्रातात्पर्यादित्यर्थः ॥३९४॥ भेदशास्त्रस्य तत्रातात्पर्ये हेत्वन्तरमाह * भेदस्येति । "द्वितीयाद्वै भयं भवति"इतिश्रुतेरस्यानर्थत्वात्तन्निष्ठत्वे शास्त्रस्याप्रामाण्यं स्यात्तस्य पुमर्थापूर्वनिष्ठत्वे प्रामाण्यमित्यभ्युपगमविरोधश्चेति भावः ॥ ३९५ ॥ भेदस्य लोकसिद्धत्वेनापुमर्थत्वेन च विधिकाण्डं यद्यपि भेदाप्रमापकं तथापि क्रियाकारकादिभेदं विना तत्प्रवृत्त्ययोगादैक्यशास्त्रस्य परम्परया भेदहेतुकत्वं दुर्वारमिति शङ्कते * भेदेति । वेदान्तानामप्युक्तभेदोपजीवनान्न परम्परया तस्य हेतुत्वं शक्यमित्याह * अल्पमित्यादिना ॥ ३९६ ॥ भेदस्य साक्षादैक्यशास्त्रप्रवृत्तिहेतुत्वे कथं बाधकत्वमित्याशङ्क्य यो भेद उपजीव्यते ऐक्यश्रुत्या स न बाध्यते यस्तु बाध्यते स नोपजीव्यत इत्याह * एवमिति ॥

ऐक्यश्रुत्योपजीव्यस्य भेदस्यात्रानिराकृतेः ॥ ३९८ ॥
मायया कल्पितो भेद उपजीव्यो न वास्तवः ॥
नेह नानेति शास्त्रेण वास्तवः प्रतिषिद्ध्यते ॥ ३९९ ॥
दृश्यस्य मायिकत्वेन प्रसक्तिर्वास्तवे कुतः ॥
इति चेत्तव विभ्रान्त्या प्रसक्तिरिति तुष्यताम्॥४००॥
न भ्रमामीति चेत्तर्हि न त्वां प्रति निषिद्ध्यते ॥
यो भ्राम्यति विमूढोऽत्र तं प्रत्येव निषिद्ध्यते ॥४०१॥
अत्यन्तादृष्टविषयो भ्रमादपि न भासते ॥
इति चेद्रज्जुसर्पोऽयं क्व वा दृष्टस्त्वया पुरा ॥ ४०२ ॥
सत्यः सर्पः पुरा दृष्ट इति चेन्मायिकी भिदा ॥
किं न दृष्टा पुरा येन न भवेत्सत्यभेदधीः ॥ ४०३ ॥
सत्यं सर्पं पुरा दृष्ट्वा रज्जुसर्पं यथेक्षते ॥

---

३९८ ॥ ३९९ ॥ भेदस्य साक्षादैक्यशास्त्रप्रवृत्तिहेतुत्वे कथं तस्य तद्बाधकत्वमित्याशङ्कते * दृश्यस्येति । यस्य भेदभ्रमाद्वस्तुत्वं प्रसक्तं तं प्रति तन्निषिद्ध्यते इत्याह * तवेति ॥ ४०० ॥ ४०१ ॥ अन्यत्रानुभूतमन्यत्रारोप्यते इति नियमादननुभूतस्य भेदसत्यत्वस्य कथं भ्रमविषयत्वमिति शङ्कते * अत्यन्तेति । भ्रममात्रस्य अपूर्ववस्तुविषयत्वान्न दोष इति परिहरति * रज्जुसर्प इति ॥ ४०२ ॥ अथापि पूर्वदृष्टजातीयस्यैव भ्रमविषयत्वमित्याशङ्क्य प्रकृतेऽपि तदस्तीत्याह *सत्य इति ॥४०३॥ उक्तमेव स्पष्टयति *सत्यमिति । यद्यपि पूर्वं भेदो मिथ्यात्वेन नानुभूतस्तथापि वस्तुतस्तस्य मिथ्यात्वात् मिथ्याभेदं पुरेत्युक्तं, वस्तुतस्तु पूर्वपूर्वभ्रमादुत्तरो-

मिथ्याभेदं पुरा दृष्ट्वा सत्यं भेदं तथेक्षताम् ॥ ४०४ ॥
अत्यन्तादृष्टसत्त्वोऽपि सत्यो भेदो भ्रमान्नृणाम् ॥
विभातीति स्थितं तस्मात्प्रसक्तं सन्निषिद्ध्यते ॥४०५॥
आगमो मायिकं भेदं न निषेधति किन्त्विमम् ॥
मायिको भेद इत्येव प्रत्युत प्रतिपादयेत् ॥ ४०६ ॥
यद्वदज्ञातमद्वैतं ब्रह्म ज्ञापयते तथा ॥
भेदमायिकतां पुम्भिरज्ञातां ज्ञापयेच्छ्रुतिः ॥ ४०७ ॥
न चात्रापुरुषार्थत्वं ब्रह्मबोधाङ्गभावतः ॥
न मायिकत्वमज्ञात्वा ब्रह्माद्वैतं विबुद्ध्यते ॥ ४०८ ॥
अद्वैते द्वैतविभ्रान्तिं द्वैते सत्यत्वविभ्रमम् ॥
आपादयेदियं माया रज्जुसर्पौ यथा तथा ॥ ४०९ ॥
रज्जौ सर्पत्वमारोप्य सर्पेऽस्मिन् रज्जुसत्यताम् ॥

त्तरभ्रमः सम्भवतीति भावः ॥ ४०४ ॥ सत्यत्वेनाप्रमितोऽपि भेदो यस्मात्पूर्वानुभवसंस्कारात्सत्यतया भाति तस्माद्भेदसत्यत्वमात्रनिषेध उपपद्यत इत्याह *अत्यन्तेति ॥४०५॥ नेह नानेति श्रुत्या द्वैतमात्रनिषेधप्रतीतेः कथं भेदस्यानिषिद्ध्यमानत्वं ? तत्राह *आगम इत्यादिना ॥४०६॥४०७॥४०८॥ मायिकभेदस्य ब्रह्मवदज्ञातत्वफलवाभ्यां श्रुत्या प्रतिपिपादयिषितत्वाद्भेदसामान्यविषयत्वेन प्रतीयमानोऽपि निषेधोऽनुपपत्त्या सत्यभेदविषयत्वेन कल्प्यते इति भावः ॥ यदि भेदस्य कल्पितत्वं श्रुत्या प्रतिपाद्यते तर्हि तेनैव तत्सिद्धेर्भेदसत्यत्वनिषेधो मुधेत्याशङ्क्य तस्योपयोगं दर्शयितुम् एकस्मिन्नेव विषये मायायाः भ्रान्तिद्वयहेतुत्वमाह * अद्वैत इति ॥४०९॥ रज्जुसर्पदृष्टान्तं स-

सम्बन्धयति, तेनायं सत्यः सर्प इवेक्ष्यते ॥ ४१० ॥
तथैव ब्रह्मसत्यत्वं द्वैतसम्बद्धमीक्ष्यते ॥
अतो द्वैतमिदं सत्यमिति मूढैर्विनिश्चितम् ॥ ४११ ॥
ब्रह्मैव सत्यं द्वैतं तु मायामयमिति श्रुतिः ॥
प्रतिपादयितुं सत्यं द्वैतमत्र निषेधति ॥ ४१२ ॥
मायां तु प्रकृतिं विद्यादिति मायामयं जगत् ॥
अभ्युपेत्य वियन्मुख्यां सृष्टिं ब्रूते प्रयत्नतः ॥ ४१३ ॥
श्रुत्या मायामयो भेदो य एषोऽभ्युपगम्यते ॥
उपजीव्यः स एवातो नोपजीव्यविरोधिता ॥ ४१४ ॥
निषेधविधिशास्त्रं च कल्पितं भेदमाश्रयेत् ॥
तस्मान्न वास्तवाद्वैतशास्त्रं तेनात्र बाध्यते ॥ ४१५ ॥
अक्षादीनां च मध्ये किं मानं भेदावबोधकम् ॥
प्रत्यक्षमनुमानं वा मानाभावोऽथवेर्यताम् ॥ ४१६ ॥

दार्ष्टान्तिकमुपपादयति * रज्जावित्यादिना ॥ ४१० ॥४११॥ अधिष्ठानस्य सद्रूपत्वम् आरोपितस्य तत्सम्बन्धात्सत्यत्वं च प्रतीयतां मायया ततः किं ? तत्राह *ब्रह्मेति । द्वैतस्य प्रतीयमानसत्यत्वमनिषिद्ध्य तस्य मायामयत्वप्रतिपादनमशक्यमिति तन्निषेधोऽर्थवानित्यर्थः ॥४१२॥ केन वाक्येन जगतो मायिकत्वं ? तत्राह * मायामिति । मायोपादानजगतो मायिकत्वं सिद्धमिति कृत्वा वियदादिसृष्टिमाहेत्यर्थः।४१३।कल्पितभेदस्य श्रुतिगम्यत्वे फलितमाह * श्रुत्येति ॥४१४॥४१५॥ ऐक्यश्रुतेः कर्मकाण्डेन विरोधं परिहृत्याक्षादिविरोधं परिहर्तुं विकल्पयति * अक्षादीनामिति । अनुमानं चेत्येतदुपमानमर्थापत्तिर्वेति त्रिकल्पद्वयस्याप्युपलक्षणम् ॥४१६॥ आद्येऽपि तत्किं घटादिबोधनक्षणे तद्गतं

प्रत्यक्षं वस्तुबोध्येव न तु भेदावबोधकम् ॥
न च भेदस्य वस्तुत्वं वस्तुतत्त्वाश्रुतत्वतः ॥ ४१७ ॥
न सिद्ध्यति विना भेदो भिद्यमानेन वस्तुना ॥
अतो भेदाश्रयत्वेन वस्तु सिद्ध्यति मानतः ॥४१८॥
मितिर्वस्तु प्रसाध्याथ न क्षमा भेदसाधने ॥
विरम्य व्यापृतिर्नास्ति प्रमितेः क्षणिकत्वतः ॥४१९॥
वस्तुमात्र उपक्षीणात्प्रत्यक्षान्न तु भेदधीः ॥
यथा तथाऽनुमानाच्च परस्परसमाश्रयात् ॥ ४२० ॥
विरुद्धकर्मधर्मत्वे धार्मिभेदोऽनुमीयते ॥
एकस्मिन्ननवस्थानं विरोधो धर्मयोर्मतः ॥ ४२१ ॥
द्विधर्मिस्थत्वनियमाद्विरोधेऽनुमिते सति ॥

भेदं बोधयति क्षणान्तरे वा ? नाद्यः, प्रत्यक्षस्य वस्तुमात्रबोधकत्वदृष्टेरित्याह * प्रत्यक्षमिति । भेदस्यापि वस्तुत्वमाशङ्क्य निरस्यति * न चेति। वस्तुस्वरूपस्य निरपेक्षत्वाद्धर्म्यादिसापेक्षभेदस्य सर्पादिवत्कल्पितत्वान्न वस्तुतेत्यर्थः ॥ ४१७ ॥ आद्यपक्षनिरसनमुपसंहरति * अत इति ॥ ४१८ ॥ आद्यद्वितीयं प्रत्याह * मितिरिति ॥ ४१९ ॥ प्रत्यक्षवदनुमानस्यापि न भेदबोधित्वमित्याह * वस्त्विति ॥ ४२० ॥ कथं परस्पराश्रयत्वमित्याशङ्क्य किं विमतौ भिन्नौ विरुद्धधर्मवत्त्वात्सम्मतवदित्यनुमीयतेऽनेकधर्मवत्त्वादिति वा ? । तत्राद्यमनुवदति * विरुद्धेति । अस्मिन् कल्पे धर्मयोः सहानवस्थितत्वरूपविरोधज्ञानम् इमौ विरुद्धौ नियमेन धर्मिद्वयनिष्ठत्वादित्यनुमानाधीनं, धर्मिभेदज्ञानं च उक्तानुमानाधीनमित्यन्योन्याश्रयः

अनुमेयो धर्मिभेद इत्यन्योन्यसमाश्रयः ॥ ४२२ ॥
अथाविरुद्धधर्माभ्यामपि धर्मी विभिद्यते ॥
तर्हि दाहप्रकाशाभ्यामग्नेर्भेदः प्रसज्यते ॥ ४२३ ॥
अर्थापत्तिरनेनैव न्यायेनात्र निराकृता ॥
उपमानमनाशङ्क्यं तस्य सादृश्यसंक्षयात् ॥ ४२४ ॥
मानाभावोऽपि नैवात्र भेदं बोधयितुं क्षमः ॥
मेयाभावैकविषयो वादिभिः सोऽभ्युपेयते ॥ ४२५ ॥
नन्वन्योन्याभावमेव भेदमाहुर्विपश्चितः ॥
मानाभावेन मेयोऽतो भेद इत्यप्यसङ्गतम् ॥ ४२६ ॥
मानाभावस्य मानत्वं मेयाभावस्य मेयता ॥
न्यायं न सहते ऽतीव तल्लक्षणवियोगतः ॥ ४२७ ॥
अबुद्धबोधकं मानमिति मानस्य लक्षणम् ॥
न च पञ्चप्रमाणानामभावो बोधकः क्वचित् ॥ ४२८ ॥

स्पष्ट इत्याह * एकस्मिन्नित्यादिना ॥ ४२१ ॥ ४२२ ॥ द्वितीयमनूद्य अतिप्रसक्त्या दूषयति * अथेति ॥ ४२३ ॥ अर्थापत्त्याऽपि न तत्सिद्धिरित्याह * अर्थेति । अत्रानुमानोक्तदूषणं हेतूकरोति * अनेनेति । सादृश्यमात्रविषयस्योपमानस्य भेदबोधित्वशङ्कैव नास्तीत्याह * उपमानमिति ॥ ४२४ ॥ अनुपलब्धेरभावबोधिन्या न तद्विलक्षणभेदबोधित्वमित्यन्त्यपक्षं निराह * मानमिति ॥ ४२५ ॥ भेदस्याभाववैलक्षण्यासिद्धेरनुपलब्धिगम्यतेति शङ्कते * नन्विति । न्यायविरुद्धत्वान्नेदं चोद्यं शोभत इत्याह *इत्यपीत्यादिना ॥४२६॥४२७॥ मानाभावस्य मानलक्षणाभावान्मानत्वाभावं वक्तुं तल्लक्षणमाह *अबुद्धेति । मानाभावस्य तदनाक्रान्तत्वमाह*न चेति ॥४२८॥

निरस्तसर्वसामर्थ्याद्यद्यभावप्रमाणता ॥
वन्ध्यापुत्रः प्रमाता स्यात्समत्वान्मातृमानयोः ॥४२९॥
योग्यस्यानुपलब्धिर्या मेयाभावस्य बोधने ॥
तस्याः सामर्थ्यमिति चेन्न तत्सिद्धेरसम्भवात् ॥४३०॥
मेयाभावः प्रमाणानां यद्यभावेन गम्यते ॥
प्रमाणानामभावस्य गमकः को भविष्यति ॥ ४३१ ॥
किञ्चायं सर्वमानानामभावः कीदृगुच्यताम् ॥
स्तैमित्यमात्मनः स्याच्चेत्तद्ब्रह्मैवास्मदीहितम् ॥ ४३२ ॥

तत्र हेतुः *निरस्तेति ॥ सर्वसामर्थ्यहीनस्याप्यभावस्य प्रमापकत्वे दोषमाह*यदिति॥४२९॥निरस्तसर्वसामर्थ्यादिति हेतुरासिद्धःयोग्यानुपलब्धेरभावधीहेतुत्वस्यानुभवसिद्धत्वादिति शङ्कते *योग्यस्येति ।अनुभवसिद्धत्वमसिद्धम् अनुपलब्धिसाधकमानाभावेन तस्या एवासिद्धेरित्याह *नेति ॥४३०॥ एतदेव स्पष्टयति *मेयेति ।अनुपलब्धिग्राहकमक्षादिज्ञानपञ्चकमुपलब्ध्यभावो वा? नाद्यः, अनङ्गीकृतेः । नान्त्यः, मानमेयत्वस्य भेदापेक्षत्वादिति भावः ॥४३१॥ दुर्निरूपत्वाच्चाभावस्य न मानतेत्याह *किञ्चेति । आत्मनो निर्व्यापारावस्थानं वा भावान्तरं वा भावविलक्षणो वेति कीदृक् शब्दार्थः ? आद्यमनूद्य कूटस्थवस्त्वतिरेकेणोपलब्ध्यभावेनेति स्वपक्षप्राप्तिमभिप्रेत्याह *स्तैमित्यमिति ॥४२६॥ द्वितीयं प्रत्याह *विकल्पेति । अभावस्य भावान्तर्भावे भावाद्वैतापाताद्भावस्याभावान्तर्भावे तदद्वैतप्रसङ्गात्तस्य सत्यत्वायोग्यत्वे फलितमाह * अत इति ।तृतीयमनुभवविरोधेन दूषयति * नहीति । तस्माद् दुर्निरूपो भेद इति भावः ॥४३३॥ किञ्चानुपलब्धेः सत्त्वमङ्गीकुर्वाणस्य प्रतियोगिनोऽपि सत्त्वेनैकरूप्यात्तयोर्न

विकल्पमात्ररूपोऽयमभावोऽतो न वास्तवः ॥
न हि मायातिरेकेण भाववत्त्सिद्धिमश्नुते ॥ ४३३ ॥
विश्वं सदेव यस्येष्टं तस्याभावो मितः कुतः ॥
तेनाभावद्वारतोऽपि भेद आपाद्यते कथम् ॥ ४३४ ॥
यावत्किञ्चिज्जगत्यस्मिन्भेदकं वस्तु लक्ष्यते ॥
अनापन्नादिमध्यान्तं सदेव तदितीक्ष्यताम् ॥ ४३५ ॥
सदेवेदमिति स्पष्टं सन्मूला इति चापरम् ॥
श्रुत्योदाहारि नः साक्षात्सदैकात्म्यावबुद्धये ॥४३६॥
धर्मभेदावभासेऽपि धर्म्यभेदो यथेष्यते ॥
तथा गवादेर्भेदेऽपि सन्मात्रं न हि भिद्यते ॥ ४३७ ॥
न गवादिभिदा मेया गवादेर्व्यभिचारतः ॥
सदेव मेयं सर्वत्र सद्रूपस्यानपायतः ॥ ४३८ ॥
सद्रूपमपि सन्त्यज्य भ्रमाद्भेदनिबन्धनाः ॥

वैलक्षण्यं स्यादित्याह * विश्वमिति । भेदस्यान्योन्याभावान्तर्भावेऽपि मानतस्तदासिद्धिमुक्त्वोपसंहरति । *तेनेति ॥४३४॥ वस्तुतस्तु न घटादीनामपि मेयत्वं किं त्वखण्डसद्रूपस्यैवेति वक्तुं सर्वस्य सन्मात्रत्वमाह * यावदिति ॥ ४३५ ॥ तत्र मानमाह * सदेवेति ॥ ४३६ ॥ गोघटादीनामन्योन्यभेदेन तद्विशिष्टसतोऽपि भेदात्कथं तस्याखण्डतेत्याशङ्क्य दाहादिधर्मभेदेऽपि दहनभेदाभाववद्गवादिभेदेऽपि सतो न भेद इत्याह*धर्मेति॥४३७॥ एवं सतः सर्वानुस्यूतत्वे सिद्धे तस्यैव मेयत्वं, न भिद्यमानगवादेरित्याह * नेति ॥४३८॥ सद्रूपस्यानपायत इत्युक्तमेवार्थं प्रपञ्चयति * सद्रूपमित्यादिना ॥ द्रव्यगुणाद्यवान्तरनिमित्ता ये व्यवहारास्ते सद्रूपात्यागेनैव प्रतीयन्ते तेन द्रव्यादिषु सद्रूप-

व्यवहाराः प्रतीयन्ते सत्तत्त्वं तेष्ववस्थितम् ॥ ४३९ ॥
न सत्तत्त्वं परित्यज्य भ्रान्तिदृष्ट्यदयः क्वचित् ॥
एकाकारा हि संवित्तिः सद्द्रव्यं सद्गुणास्थितिः४४०॥
सत्तावगुण्ठितास्तेन सर्वे भावाः सदैव हि ॥
व्यवहाराय कल्पन्ते भेदो भ्रान्त्याऽवभासते ॥४४१॥
प्रमाणैरखिलैश्चात्र सद्वस्त्वेव प्रतीयते ॥
तस्माद्वस्त्वेकनिष्ठत्वान्न भेदोऽक्षादिगोचरः ॥४४२॥
घटोऽयमिति संवित्त्या घट एव प्रमीयते ॥
न व्यावृत्तिः पटादिभ्यस्त्वताद्रूप्येण संविदः ॥४४३॥
व्यावृत्तिरूपं चेद्भाति भासेत प्रतियोग्यपि ॥
प्रतियोगि जगत्सर्वं नासर्वज्ञेन गृह्यते ॥ ४४४ ॥
घटेतरत्वं सामान्यरुपेण यदि गृह्यते ॥

मवस्थितमास्थेयं, ततो निष्कृष्टानामसत्त्वेन दृष्टादृष्टव्यवहारहेतुत्वायोगात् तथा च सन्मात्रं तत्त्वं तस्मादुद्रिक्तं तस्मिन् कल्पितमिति सर्वकल्पनाधिष्ठानस्य तस्यैव मेयतेत्यर्थः। तस्मादित्यस्य व्याख्या *वस्त्वेकेति। मानानामिति शेषः। भेदपदमत्र प्रपञ्चपरम् ॥ ४३९ ॥ ४४० ॥ ४४१ ॥ ४४२ ॥ अस्तु वा घटादेरपि मेयता तथापि न तद्गतो भेदः प्रामाणिक इति प्रत्यक्षं वस्तुबोध्येवेति सङ्ग्रहेण पूर्वोक्तमर्थं प्रपञ्चयति*घट इति ॥४४३॥ घटज्ञानस्य पटादिव्यावृत्त्यप्रकारत्वमसिद्धमिति शङ्कते * व्यावृत्तिरूपमिति। तर्हि व्यावृत्तिप्रतियोगिनो भासेरन्नित्याह *भासेतेति। अस्तु को दोषः ? इति चेत्, किं ते विशिष्य भासन्ते सामान्यतो वा?। तत्राद्यं प्रत्याह *प्रतियोगीति ॥४४४॥ अन्त्य-

तर्ह्यन्योन्याश्रयो दोषो न दण्डेन निवार्यते ॥ ४४५ ॥
व्यावृत्तेः प्रथमं सिद्धावितरत्वं प्रसिद्ध्यति ॥
इतरत्वे च सिद्धेऽथ तद्व्यावृत्तिः प्रसिद्ध्यति ॥ ४४६ ॥
तस्माद् घटो निजाकारां जनयेद् बुद्धिसंविदम् ॥
घट एव तया ग्राह्यो व्यावृत्तिर्भ्रमकल्पिता ॥ ४४७ ॥
संवेद्यभेदाभावेऽपि वेदनं तु विभिद्यते ॥
इति चेत्, संविदो भेदः स्वतो वा परतोऽथवा॥४४८॥
घटज्ञानं पटज्ञानमिति ज्ञेयपुरःसरम् ॥
भेदभानादयं भेदः संविदो न स्वभावजः ॥ ४४९ ॥
घटादिभेदोपाधिश्चेत् सुतरां भ्रान्त एव सः ॥
न पारमार्थिकं क्वापि रज्जुसर्पविसर्पणम् ॥ ४५० ॥
सम्यक्संशयमिथ्याख्याः संविद्भेदाः स्वतो यदि ॥

मनूद्य निराह * घटेति ॥ ४४५ ॥ अन्योन्याश्रयमाह *व्यावृत्तेरिति ॥ ४४६ ॥ अतो मानजन्यघटाकारवृत्तेर्घटमात्रविषयत्वं, भेदस्तु साक्षिमात्रभास्य इत्याह * तस्मादिति ॥ ४४७ ॥ वेद्यभेदस्याप्रामाणिकत्वेऽपि वेदनभेदस्य प्रामाणिकत्वे बाधकाभावान्नाद्वैतसिद्धिरिति शङ्कते * संवेद्येति । बाधकाभावोऽसिद्ध इत्यभिसन्धाय विकल्पयति * संविद इति ॥ ४४८ ॥ आद्यं प्रत्याह * घटेति ॥ ४४९ ॥ द्वितीयं निराह * घटादीति । घटादिभेदस्य कल्पितत्वेन तदुपाधिकतद्धीभेदस्यापि कल्पितत्वं सिद्धमित्यत्रोदाहरणमाह *नेति॥४५०॥प्रकारान्तरेण संविद्भेदं शङ्कते * सम्यगिति । अन्तःकरणवृत्तीनां सम्यक्त्वादिना भिन्नत्वेऽपि चैतन्यस्याखण्डत्वे न क्वचित्क्षतिरित्याह *तन्नेति ॥ ४५१ ॥ चितः स्वतो भेदाभावे रज्जुसर्पस्फुरणस्यापि

तन्न, धीवृत्तिधर्मत्वात्सम्यक्त्वाद्या न चिद्गताः॥४५१॥
स्फुरणं रज्जुसर्पेति न मिथ्या बाधवर्जनात् ॥
तद्बाधे रज्जुतत्त्वस्य पश्चात्स्फूर्तिः कथं भवेत् ॥४५२॥
रज्जुस्फूर्तिः पृथक्सर्पस्फूर्त्तेरिति मतं यदि ॥
कथं तर्हि प्रयुज्येत स्फूर्तिरित्यर्थयोर्द्वयोः ॥ ४५३ ॥
स्फूर्त्तित्वजात्यनुगमादिति चेत् स्वस्ति ते यतः ॥
व्यावृत्तमनुवृत्तं च द्वयमङ्गीकृतं त्वया ॥ ४५४ ॥
भाषाभेदेऽप्यर्थभेदो नास्ति कश्चिदिहावयोः ॥
जातिव्याक्ती त्वदीयाख्ये चिद्बुध्दिर्मम भाषया॥४५५॥
गोत्वादिष्वप्ययं न्यायो योजनीयो विपश्चिता ॥
सर्वत्रानुगतं ब्रह्म व्यावृत्तिर्मायिकी खलु ॥ ४५६ ॥
सम्यक्संशयमिथ्याख्या भिन्नाकाराः स्वतो धियः ॥
मातृमानप्रमित्याद्या अपि तद्वत्समीरिताः ॥ ४५७ ॥

सत्यत्वं स्यादित्याशङ्क्य ओमित्याह *स्फुरणमिति ॥ आरोपितसर्पादिस्फुरणस्यापि स्वरूपेण बाधाभ्युपगमे बाधमाह । *तदिति ॥४५२॥ काऽत्र कथंता, अधिष्ठानारोप्यस्फुरणयोर्भिन्नत्वादिति शङ्कते * रज्ज्विति । तयोर्भिन्नत्वे स्फुरणं स्फुरणमित्येकाकारप्रतीतिर्न स्यादित्याह * कथमिति ॥ ४५३ ॥ अनुगतबुद्धेरन्यथासिद्धिं शङ्कते * स्फूर्त्तित्वेति । अनुगतबुद्धिविषयस्य कस्य चिदङ्गीकारे तस्य ब्रह्मभिन्नत्वे मानाभावादस्मदिष्टसिद्धिरित्याह *स्वस्तीत्यादिना ॥४५४॥४५५॥ उक्तन्यायमन्यत्राप्यतिदिशति *गोत्वेति । गवादिव्यक्तिष्वनुस्यूतमखण्डं सदेव परैर्गोत्वादिभाषया व्यवह्रियत इत्यर्थः ॥४५६॥४५७॥

सम्यक्त्वादौ प्रमात्रादावपि भेदो घटादिवत् ॥
कल्पितः,कल्पिताः सर्वे विशिंषन्ति स्वसंविदम्॥४५८॥
संविदेका स्वतःसिद्धा प्रत्यग्रूपैकलक्षणा ॥
भावाभावादिरूपाय व्यवहाराय कल्पते ॥ ४५९ ॥
संवित्तत्त्व उपक्षीणं सर्वं मानं न भेदगम् ॥
तत ऐकात्म्यशास्त्रस्य न बाध इति सुस्थितम्॥४६०॥
बोधकत्वादबाधाच्च प्रामाण्ये निश्चिते सति ॥
अनुवादत्वशङ्काऽथ वेदान्तानामपोह्यते ॥ ४६१ ॥
ननु वेदान्तसिद्धान्तमजानन्तोऽपि वादिनः ॥
लौकिकाश्च निजात्मानं जानन्त्येव स्वमानतः॥४६२॥
मानं प्रत्यक्षमन्यद्वा यद्योग्यं तद्भवेत्ततः ॥
ज्ञातात्मकथनादेते वेदान्ता अनुवादिनः ॥ ४६३ ॥

व्यावृत्तिशब्देन तद्विशिष्टपदार्था लक्ष्यन्ते, न केवलमन्तःकरणवृत्तीनामेव सम्यक्त्वादिना भेदः, प्रमात्रादिसर्वपदार्थानामपि भेदोऽस्त्येव, परन्तु स कल्पितः। तथा च भिद्यमानपदार्थोपाधिभिश्चैतन्यस्य भिन्नत्वेऽपि सर्वकल्पनाधिष्ठानस्य स्वतो ऽभेद इत्याह *सम्यगित्यादिना ॥४५८॥४५९॥ भेदस्य मानागम्यत्वे फलितमाह * तत इति ॥ ४६० ॥ उक्तानुवादपुरःसरमुत्तरग्रन्थप्रतिपाद्यमर्थमाह * बोधकत्वादिति ॥ ४६१ ॥ यद्यपि वेदान्तानाम् अनुवादकत्वं नेति पूर्वमुक्तं, तथापि प्रकारान्तरेणापि तत्परिहर्तुं पूर्वपक्षमुत्थापयति * नन्विति ॥ स्वमानतः आत्मबोधकमानात् ॥ ४६२ ॥ किं तन्मानमित्याशङ्क्य वादिभेदेन प्रत्यक्षमनुमानं वा यत्किञ्चिदस्तु श्रुतेरनुवादकत्वं तावत्सिद्धमित्याह *मानमिति ॥४६३॥ भोक्तुर्मानान्तरगम्यत्वेऽपि वेदान्तानामश-

नैवात्मनोऽन्यद्वस्त्वेतैर्वेदान्तैः प्रतिपाद्यते ॥
येनापूर्वार्थलाभेन तेषामननुवादता ॥ ४६४ ॥
उच्यते मान्तरात् सिद्धः किं देहात्माऽथवेतरः ॥
नाद्ये स्यादनुवादत्वं देहात्माप्रतिपादनात् ॥ ४६५ ॥
न वेदान्ताः क्वचिद्देह आत्मेति प्रत्यपादयन् ॥
यः कोशोऽन्नमयः प्रोक्तस्तत्रास्त्येवानुवादता ॥४६६॥
देहेतरोऽपि किं कर्त्ता ब्रह्म वोभयथाऽपिच ॥
तयोर्मानान्तराबोधादाशङ्क्या नानुवादता ॥ ४६७ ॥
वादिनो लौकिका वाऽत्र भविष्यदेहयोगिनम् ॥
कर्त्रात्मानं न जानन्ति वेदान्तवचसा विना ॥४६८॥
देहान्तराभिसम्बन्धो भावित्वान्नाक्षगोचरः ॥
लिङ्गसादृश्यविरहान्नानुमा नोपमा तथा ॥ ४६९ ॥
भावरूपात्मबोधाय नाभावोऽपि प्रवर्त्तते

नाद्यतीतवस्तुबोधिनां नानुवादकत्वमित्याशङ्क्याध्यक्षादिविरोधेन तेषामविवक्षितत्वान्नैवमित्याह * नेति ॥ ४६४ ॥ विकल्पासहत्वान्नेदं चोद्यमिति परिहरति * उच्यत इति । प्रतिज्ञातार्थं साधयितुम् आत्मपदार्थं विकल्पयति * मान्तरादिति । आद्यं प्रत्याह * नाद्य इति ॥ ४६५ ॥ "स वा एष पुरुषोऽन्नरसमयः" इतिवाक्यस्य तद्बोधकत्वमाशङ्क्य तस्यानुवादकत्वमिष्टमेवेत्याह * य इति ॥ ४६६ ॥ द्वितीयं विकल्प्य दूषयति * देहेति ॥ ४६७ ॥ तत्र कर्त्रात्मनस्तावन्मानान्तरगम्यत्वमुपपादयति * वादिन इति ॥ ४६८ ॥ आत्मनो वर्तमानदेहादि हित्वा देहान्तरादियोगे मानं वाच्यम्, अन्यथा तदसिद्धेः । तत्र च न प्रत्यक्षादि प्रभवतीत्याह *देहान्तरेति ॥४६९॥ अर्थापत्तिरपि भविष्यदेहयोगमात्मनो दृष्टा श्रुता वा बोधयति ?

अर्थापत्तिर्न सम्भाव्या दृष्टकल्पकवर्जनात् ॥ ४७० ॥
अन्यथाऽनुपपन्नोऽपि श्रुतस्वर्गो न कल्पकः ॥
श्रुतार्थापत्तितोऽप्यत्र श्रुतिरेव बलीयसी ॥ ४७१ ॥
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ॥
इति वेदान्तवचसा भविष्यद्देहयोगधीः ॥ ४७२ ॥
भविष्यद्देहसम्बन्धी वाक्यादात्मा न चेतनः ॥
चार्वाक इव नो कुर्याददृष्टार्थाः क्रियाः सुधीः ॥ ४७३ ॥
आगमेन विना साङ्ख्या आत्मानं स्वर्गमोक्षयोः ॥
अनुगन्तारमवदन्ननु मानान्न तत्तथा ॥ ४७४ ॥
नैव साङ्ख्यानुमासिद्धमसङ्गमवगच्छतः ॥
भाविदेहाद्यसम्बन्धे प्रवृत्तिः स्यात्क्रियास्विह ॥ ४७५ ॥
अहंबुद्ध्याऽनुमानाच्च कर्त्तारं तार्किका जगुः ॥

तत्राद्यं निराह * अर्थापत्तिरिति ॥ ४७० ॥ द्वितीयमनूद्य श्रुतेरेव तद्बोधितत्वान्न श्रुतार्थापत्तेस्तत्कल्प्यं गौरवादित्याह * अन्यथेति ॥ ४७१ ॥ तादृशश्रुतिं पठति * योनिमिति ॥ ४७२ ॥ ननु भविष्यद्देहसम्बन्धिभोक्तृज्ञानमेवास्तु विधित एव क्रियासु प्रवृत्तिसम्भवादिति, नेत्याह * भविष्यदिति ॥ ४७३ ॥ साङ्ख्यास्तु, अन्तःकरणे चित्प्रतिबिम्बः तथाविधबिम्बपुरःसरः प्रतिबिम्बत्वात्सम्मतवदित्यनुमानादात्मानं साधयन्तस्तस्मिन्वेदप्रामाण्यं न मृष्यन्ते, तन्मतमनूद्य प्रत्याह * आगमेनेत्यादि ॥ असम्बन्धे निश्चिते सतीति शेषः ॥ ४७४ ॥ ४७५ ॥ अन्ये त्वहङ्कर्तेत्यनुभवेन बुद्ध्यादयः साश्रयाः गुणत्वाद्रूपादिवदिति परिशेषसहितानुमानेन वा स्वाभाविककर्तृत्वविशिष्टात्मसिद्धिमिच्छन्ति । तन्मतमनूद्य दूषयति * अहमित्यादि । कारकाद्यप्रयो-

मीमांसका अपि तथा न युक्तमुभयोर्मतम् ॥ ४७६ ॥
नात्मनः कर्तृता युक्ता व्यापिनो निष्क्रियत्वतः ॥
न चाकर्त्तुः फलं युक्तमायासो वादिनां वृथा ॥४७७॥
पारलौकिकवृत्तान्तमागमादेव वादिनः ॥
ज्ञात्वा प्रच्छाद्य शास्त्रेषु स्वकीयेष्वन्यथा वदन् ॥४७८॥
योगिप्रत्यक्षतो यद्वा जानन्त्येव महर्षयः ॥
तथापि योगिता श्रौतानुष्ठानादेव नान्यथा ॥४७९॥
महर्षिव्यवधानाद्वा साक्षाद्वा श्रुतिरेव हि ॥
कर्त्रात्मनि प्रमाणं स्यात्स्वर्गादिफलभोक्तरि ॥४८०॥
ब्रह्मात्मन्यप्यहंबुद्धिर्न मानं स्यात्कथञ्चन ॥
बोधानुभवसंवित्तिशब्दैर्ब्रह्मात्मवर्णनात् ॥ ४८१ ॥

ज्यस्य तत्प्रयोक्तृत्वं कर्तृत्वं तदात्मनो नभोवद्विभुत्वादक्रियस्यायुक्तमित्यर्थः ॥ ४७६ ॥ अकर्तृत्वेऽपि तस्य भोक्तृत्वमाशङ्क्याह *न चेति । अकृताभ्यागमप्रसङ्गादिति भावः ॥४७७॥ वस्तुतस्तु वादिनोऽपि श्रुतेरेवात्मनो देहान्तरयोगं ज्ञात्वा स्वपाण्डित्याय तत्रानुमानादिकं वदन्तीत्याह * पारलौकिकमिति ॥ ४७८ ॥ तथाप्यात्मनः श्रुत्येकमेयत्वमसिद्धमिति शङ्कते * योगीति । अत्र योगशब्देन निरुद्धं चित्तं विवक्षितम् । एवं चात्मनो देहान्तरयोगमृषयो वशीकृतमनसः साक्षात्कुर्वन्तीत्यर्थः । चित्तवशीकारस्यापि श्रौतधर्मानुष्ठानहेतुकत्वान्न श्रुत्येकमेयत्वहानिरित्याह *तथापीति ॥ ४७९॥ उक्तमर्थम् उपसंहरति *महर्षीति ॥४८०॥ एवं कर्त्रात्मनः श्रुत्येकमेयत्वमुक्त्वा शुद्धात्मनोऽपि तदाह * ब्रह्मेति । तस्य स्वप्रकाशत्वादिति भावः । बोधः स्वप्रकाशो न तु ब्रह्मेत्याशङ्क्य तयोरैक्यमाह * बोधेति ॥ ४८१ ॥ किं

परस्याहंप्रत्ययस्यात्र सिद्धिः स्यादनुभूतितः ॥
ततोऽहंप्रत्ययात्सिद्धिमश्नुते ऽनुभवः कथम् ॥४८२॥
आत्मनोऽहंधियः सिद्धिरात्मसिद्धिरहम्मतेः ॥
अन्योन्याश्रयतैव स्यादहम्बुद्ध्यात्मनोर्ध्रुवम् ॥४८३॥
अथाहंधीः स्वप्रकाशा जड आत्मेति मन्यसे ॥
तर्ह्यत्र भाषाभेदोऽयमावयोः परिशिष्यते ॥ ४८४ ॥
स्वप्रकाशाज्जडं सिद्ध्येदित्येतदुभयोः समम् ॥
न जडं ब्रह्म तत्र स्यात्सत्यं ज्ञानमिति श्रुतेः ॥४८५॥
किञ्च संवित्प्रमेया चेत्संविदन्या फलं भवेत् ॥
न च संविद्द्वयं भाति नानुमेयं फलं क्वचित् ॥ ४८६ ॥
युगपद्व्यवसायानुव्यवसायवदात्मनि ॥

चाहमितिबुद्धिर्नात्मग्राहिका तद्ग्राह्यत्वात् घटवदित्याह * यस्येति ॥ ४८२ ॥ तस्याहंधीग्राह्यत्वे बाधकान्तरमप्याह * आत्मन इति ॥ ४८३ ॥ स्वप्रकाशेनाहङ्कारसमवेतज्ञानेन जडात्मसिद्धेर्नान्योन्याश्रयतेति शङ्कते * अथेति । "अत्रायं पुरुषः स्वयञ्ज्योतिः" इत्यादिश्रुतिविरोधान्नात्मनो जडत्वमिति गूढाभिसन्धिः परिहरति * तर्हीति ॥४८४॥ तथाप्यहंधियाऽऽत्मासिद्धौ कथं त्वदिष्टसिद्धिरित्याशङ्क्याशयमाविष्करोति * नेति । तत्र ब्रह्मात्माहंधियोर्मध्ये । तथाचात्मनैव सर्वव्यवहारसिद्धेर्नाहंधियः स्वप्रकाशत्वमिति भावः ॥ ४८५ ॥ संवित्स्वरूपस्याहंधीगम्यत्वे दूषणान्तरमाह * किं चेति । संविदात्मनि संविदन्तरस्याननुभवेऽपि व्यवहारलिङ्गेन तदनुमेयमित्याशङ्क्यानौपाधिके स्वप्रकाशे तस्मिन्नानुमानमित्याह * नेति ॥ ४८६ ॥ घटज्ञानवानहमित्यादिवन्मेयभूतप्रत्यगात्मसंविदोऽप्यन्या सं-

अस्तु संविद्द्वयामिति प्रतीत्यैतत्पराहतम् ॥ ४८७ ॥
घटादिस्थितसंविद्वच्छुद्धायामपि संविदि ॥
संविदन्या प्रतीयेत न चासावात्मनीक्ष्यते ॥ ४८८ ॥
द्रव्यबोधस्वरूपोऽयमात्मा यैरभ्युपेयते ॥
तेषामपि मते युक्ता नाहंधीगम्यताऽऽत्मनः ॥ ४८९ ॥
द्रव्यांशो यद्यहम्बुद्धिः स्यात्तदाऽन्योन्यसंश्रयः ॥
बोधाद् द्रव्यांशसंसिद्धौ द्रव्याद्बोधः प्रसिध्यति॥४९०॥
बोधांशश्चेदहम्बुद्धिः किं द्रव्यांशेन ते वद ॥
तत्त्यागे स्वप्रकाशोऽयं बोध आत्मेति शिष्यते॥४९१॥

वित्, फलमस्तु का हानिरिति शङ्कते * युगपदिति । अनुभवविरोधान्नैवमित्याह * प्रतीत्येति ॥ ४८७ ॥ उक्तमेवार्थं द्रढयति * घटेति ॥ ४८८ ॥ आत्मनो द्रव्यरूपेण मेयत्वं बोधरूपेण मातृत्वमित्येकस्यैव ग्राह्यग्राहकात्मकस्याहंधिया सिद्धिरिति केचित्, तान्प्रत्याह * द्रव्येति ॥ ४८९ ॥ आत्मसाधकमानत्वेनाभिमताऽहम्बुद्धिर्द्रव्यांशो बोधांशो वा ? । नाद्य इत्याह *द्रव्येति । अन्योन्याश्रयं स्पष्टयति ॥ बोधादिति ॥ अयमर्थः । न तावत् बुद्धेरबुद्धायाः साधकत्वं, प्रकाशो बुद्धिरिति न्यायात् दीपवज्ज्ञाने सत्येव तस्याः साधकत्वं, तज्ज्ञानं चानुमानात्साकारमेव, बुद्धिमनुमिमीमह इति स्थितेः । अहम्बुद्ध्यनुमानेचात्मज्ञातता लिङ्गं ततो लिङ्गज्ञाने तद्विशिष्टात्मनोऽपि तत्र ज्ञानादात्मनि ज्ञातेऽहंधीस्ततश्चात्मधीरिति ॥ ४९० ॥ द्वितीयमनूद्य प्रत्याह * बोधेति । प्रकाशात्मकबोधस्यैव किञ्चिदुपाध्यवच्छिन्नस्याहंबुद्धित्वे तेनैव सर्वव्यवहारसिद्धेर्द्रव्यांशाङ्गीकरणं मुधा, तदनङ्गीकारे च सिद्धान्तादविशेष इति भावः ॥ ४९१ ॥ आ-

यदि बोधः स्वप्रकाशो वेदान्तैः क्रियतेऽत्र किम् ॥
इति चेत्तमनूद्यास्य बोध्यते ब्रह्मरूपता ॥ ४९२ ॥
यतो मानानि सिद्ध्यन्ति जाग्रदादित्रयं तथा ॥
असन्त्यपि च सत्त्वेन तत्सद्ब्रह्मेति बोध्यते ॥ ४९३ ॥
अभातानि यतो भान्ति जडानि निखिलान्यपि ॥
याऽनन्यदृक् स्वप्रकाशा सा चिद्ब्रह्मेति बोध्यते ॥४९४॥
योऽनन्यार्थो यदर्थं च सर्वं जगदिदं प्रियम् ॥
सर्वं प्रियतमानन्दम् एष ब्रह्मेति बोध्यते ॥ ४९५ ॥
यमाश्रयति भेदोऽयं भावाभावात्मकोऽखिलः ॥
न भावो नाप्यभावोऽसावभिन्नश्च निराश्रयः ॥४९६॥
प्रमेयादित्रयं त्वेतत्परस्परविलक्षणम् ॥
यस्मिन् विजृम्भते सोऽयमविकार्यविलक्षणः ॥ ४९७ ॥
असङ्कुचितचित्पद्मः सुप्तेऽपि स्वप्नबोधवत् ॥

त्मनः स्वप्रकाशत्वेऽपि वेदान्तानामनुवादकत्वं तदवस्थमेवेत्यत आह * यदीति । त्वमर्थं शुद्धमनूद्य तस्य ब्रह्मत्वबोधनाद्वाक्यार्थस्य चाज्ञातत्वान्न उक्तदोष इत्यर्थः ॥ ४९२ ॥ वाक्यार्थमाह * यत इत्यादिपञ्चभिः । अध्यक्षादिमानानि जाग्रदाद्यवस्थाः सर्वाण्यपि जडानि स्वतःसत्तास्फूर्तिहीनानि यत्प्रसादात्ते[1] लभन्ते, यश्च सुखलक्षणाक्रान्ततया सुखत्वेन शास्त्रे कथ्यते, यत्र च भावाभावविलक्षणेऽद्वितीये स्वमहिमस्थे कूटस्थैकस्वभावे प्रमात्रादित्रयं कर्तृत्वादित्रयं भोक्तृत्वादित्रयं भावाभावात्मकः सर्वोऽपि प्रपञ्चो विवर्त्तते, तेन परमात्मना साक्ष्यैक्यं वाक्यबोध्यमित्यर्थः ॥४९३॥४९४॥४९५॥४९६॥४९७॥ अवस्थात्रयसाक्ष्येव नास्ति स्वापे नित्यानुभवस्याननुभवात् कथं तस्य

१ ते सत्तास्फूर्ती इत्यर्थः ।

प्रज्ञानघन एवायं सुप्तवत्स्वप्नबोधयोः ॥ ४९८ ॥
साक्ष्यसम्बन्धतः साक्षी न स्वतः साक्षिताऽऽत्मनः ॥
प्रत्यङ्मात्रैकदृष्टित्वाद्धियां वाचामगोचरः ॥ ४९९ ॥
अस्मत्पक्षे तु कर्तृत्वमविद्यामात्रकल्पितम् ॥
तदभावान्न संसारो भूतो भावी न वर्तते ॥ ५०० ॥
स्वाभाविक्यप्यविद्येयमनुभूत्या विभासिता ॥
तमः सूर्योदयेनेव ज्ञानेनोत्कृत्य नाश्यते ॥ ५०१ ॥

ब्रह्मत्वं बोद्ध्यते तत्राह * असङ्कुचितेति ॥ जागरादौ स्फुटानुभववत्सुषुप्तावपि स वक्तव्यः, न हि द्रष्टुरित्यादिश्रुतेः। आत्मनस्तत्र सवितृसन्निधौ सरोजवत्प्रकटितानुभवत्वासिद्धेरित्यर्थः। तर्हि जागरादाविव स्वापेऽपि सविशेषः स्यादित्याशङ्क्यावस्थाद्वये विषयेषु स्थितोऽपि स्वापवन्निर्विशेष एवात्मा, असङ्गो हीत्यादिश्रुतेः। अतस्तस्य सविशेषत्वापादनमयुक्तमित्याह * प्रज्ञानघन इति ॥ ४९८ ॥ साक्षित्वाद् बोधस्य सविशेषत्वमाशङ्क्याह * साक्ष्येति । न ह्यविद्यदृश्यसम्बन्धकृतं साक्षित्वं तस्य वास्तवाविशेषत्वं निहन्तीति भावः। तथापि वागादिविषयत्वाद् बोधस्य सविशेषत्वं घटादिवदित्याशङ्क्यासिद्धिमाह *प्रत्यगिति॥४९९॥ नन्वात्मा सविशेषः कर्तृत्वात् राजवत्तत्राह * अस्मत्पक्ष इति । कर्तृत्वादिसम्बन्धस्य कल्पितत्वे फलितमाह * तदभावादिति । सर्वकल्पनाहेतोरज्ञानस्य ज्ञानात् ध्वस्तेस्तद्धेतुको बन्धः सर्वथा ध्वस्तो भवतीत्यर्थः ॥ ५०० ॥ अनुभवसिद्धमज्ञानमनादित्वादात्मवन्न निवर्त्तते इत्याशङ्क्य हेतोरप्रयोजकत्वं घटज्ञाने व्यभिचारश्चेति मत्वाऽऽह * स्वाभाविकीति ॥ ५०१ ॥ उक्तव्यभिचारसिद्ध्यर्थं घटाज्ञानस्य

अनाद्यपि तदज्ञानं ज्ञानेनादिमता क्षणात् ॥
दृश्यते नाश्यमानं हि घटाद्यज्ञानबोधयोः ॥ ५०२ ॥
एवम्भूतः स्वयं प्रत्यक् सर्वाज्ञानादिसाक्ष्यपि ॥
व्युत्पत्तेः प्रागविज्ञातः संस्तथैवानुभूयते ॥ ५०३ ॥
तस्मात्तत्त्वमसीत्यादेरागमादेव नान्यतः ॥
ऐकात्म्यवस्तुनः साक्षाद् व्युत्पत्तिरविचालिनी॥५०४॥
कार्ये निरोधः प्रतिपत्प्रसङ्ख्यानमखण्डनम् ॥
अबाधाननुवादौ च प्रामाण्याय विचारिताः ॥५०५॥

इति वार्त्तिकसारे प्रामाण्यपरीक्षाख्यं तृतीय-
प्रकरणं समाप्तम् ॥

तज्ज्ञाननिवर्त्यत्वं स्पष्टयति * अनादीति ॥ ५०२ ॥ नन्वेवमपि स्वप्रकाशे तस्मिन्नज्ञानायोगात्प्रमाणाप्रवृत्तिरिति चेत्, नेत्याह * एवमिति । सर्वबुद्धितद्वृत्तिसाक्षित्वादात्मा स्वप्रकाशोऽपि प्राक् तत्त्वज्ञानोत्पत्तेः स्वानुभवादज्ञातः सिद्धोऽतस्तत्र मानप्रवृत्तिरपि युक्तेत्यर्थः ॥ ५०३ ॥ ऐक्यस्य वेदान्तैकवेद्यत्वमुक्तमुपसंहरति * तस्मादिति ॥ ५०४ ॥ इयता प्रबन्धेन प्रामाण्याय वेदान्तानामुक्तमर्थं संगृह्याह * कार्यमिति ॥ निरोधादिविधिपरत्वं निरस्याखण्डार्थत्वादि साधितमित्यर्थः॥५०५॥

इति वार्त्तिकसारटीकायां प्रामाण्यपरीक्षा समाप्ता ॥

प्रमाणं मेयसापेक्षं मेयता कस्य युज्यते ॥
इत्याकाङ्क्षानिवृत्त्यर्थं मेयमत्र निरूप्यते ॥ १ ॥
अविज्ञातः प्रमाणानां विषयो वादिनां मतः ॥
सोऽज्ञातोऽर्थः प्रमाणात्किं सिद्ध्येद्यद्वाऽनुभूतितः ॥२॥
न तावन्मानतः सिद्धिर्मानेन तदपेक्षणात् ॥
न ह्यज्ञातमनुद्दिश्य क्वचिन्मानं प्रवर्तते ॥ ३ ॥
मानसिद्धं समुद्दिश्य यदि मानं प्रवर्तते ॥
आत्माश्रयादिदोषः स्यान्नैष्फल्यं च मितेस्तथा ॥ ४ ॥
अज्ञातत्वक्षतिं कुर्वन्मानं मानत्वमश्नुते ॥

शुद्धब्रह्मणो वेदान्तवेद्यत्वं तस्यैवोपहितस्य सर्वमानवेद्यत्वमिति प्रमाणनिरूपणप्रस्तावेऽभिहितं, तदेवोत्तरग्रन्थेनोपपत्तिभिः प्रतिपाद्यत इत्याह * प्रमाणमिति ॥ १ ॥ अध्यक्षादिमानानां चिद्विषयत्वं साधयितुं सर्वसम्मतमर्थमाह * अविज्ञात इति । उक्तार्थसाधकं प्रमाणं वा साक्षी वेति विमृशति * स इति ॥ २ ॥ आद्यं प्रत्याह * नेति । अज्ञातत्वोपलक्षितविषयाभावे मानप्रवृत्तिरेव न स्यात्, तथा च मानप्रवृत्तिहेतुत्वेन पूर्वसिद्धस्याज्ञातार्थस्य न मानात् सिद्धिरित्यर्थः ॥ ३ ॥ अस्तु तर्हि ज्ञातार्थगोचरो मानमित्यापातशङ्कां निरस्यति * मानेति । मितेर्ज्ञातार्थविषयत्वे विषयविशेषणीभूतं ज्ञानं स्वस्मादभिन्नं भिन्नं वा ? । आद्ये आत्माश्रयः । अन्त्येऽन्योन्याश्रयादिः स्यादित्यर्थः । अज्ञातत्वस्य मानगम्यत्वे दूषणान्तरमाह * नैष्फल्यं चेति ॥ ४ ॥ तदेवोपपादयति * अज्ञातत्वेति । अज्ञातत्वं मानाज्ज्ञायते चेन्न तत्क्षतिर्मानफलं स्यात्, तद्गम्यस्य तदनिवर्त्यत्वात्, इत्यज्ञानानिवृत्तौ मानवैयर्थ्य-

सा चेदज्ञातता मानान्न कथं निष्फला मितिः ॥ ५ ॥
अथाज्ञातत्वसिद्ध्यर्थं तन्मितेः फलमिष्यते ॥
तर्ह्यज्ञातत्वमेतत्ते केनान्येन निवर्तते ॥ ६ ॥
न तन्निवर्त्तकं मेयं तस्य मेयैकसंश्रयात् ॥
अज्ञातो घट इत्येवमज्ञातत्वं प्रमेयगम् ॥ ७ ॥
अज्ञातं मानमित्युक्तेर्मानगं चेति चेन्न तत् ॥
मानेऽपि मेयताकार एवाज्ञातत्वसंश्रयः ॥ ८ ॥
यन्मानं पूर्वमज्ञातं तदन्येन प्रमित्सति ॥
मानेऽतो मेयताकारो घटादाविव विद्यते ॥ ९ ॥
अज्ञातत्वं मेयगतं मानेनातो निवर्त्यते ॥
नाज्ञातत्वमतो मानात्सिद्ध्यतीति विनिश्चयः ॥१०॥
अज्ञातत्वमिदं मानादसिद्धं केन सिद्ध्यति ॥

मित्यर्थः ॥ ५ ॥ अज्ञातत्वस्य मानगम्यत्वेऽपि न मितिवैयर्थ्यं तद्व्यवहारादेरेव प्रमाफलत्वादिति शङ्कते * अथेति । मानगम्यत्वे तस्य निवृत्तिरेव न स्यादित्याह * तर्हीति ॥ ६ ॥ ७ ॥ माननिष्ठत्वेनाप्यज्ञाततताया अनुभवान्न तेनापि तन्निवृत्तिरिति शङ्कते * अज्ञातमिति । माने चाज्ञातत्वाश्रयतावच्छेदकं न मानत्वं किन्तु तद्गतमेयत्वमेवेति परिहरति * न तदिति ॥ ८ ॥ उक्तेऽर्थे मानमाह * यन्मानमिति । अन्येन मानगोचरमानेन प्रमातुमिष्टत्वे फलितमाह * मानेऽत इति ॥ ९ ॥ तस्मादज्ञातत्वस्य निवर्तकान्तराभावात्तन्निवृत्तेरनुभवसिद्धत्वाच्च न मानात्तत्सिद्धिरित्याह * नेति ॥ १० ॥ अज्ञातार्थसिद्धिः साक्षिणेति द्वितीयं कल्पं प्रश्नपूर्वकं परिशिनष्टि * अज्ञातत्वमित्यादिना । ज्ञानोत्तरकालमज्ञा-

इति चेत्, नित्यचैतन्यानुभवेनानुभूयते ॥ ११ ॥
नाज्ञासिषमिदं पूर्वमित्येवं प्रमिते पटे ॥
पूर्वाज्ञातत्वविषयः परामर्शो ह्यतिस्फुटः ॥ १२ ॥
न तस्याननुभूतस्य परामर्शः कथञ्चन ॥
अनुभूतिर्न प्रमाणाच्चैतन्यं तेन शिष्यते ॥ १३ ॥
प्रवृत्तं विषये मानं बोधयेद्विषयाकृतिम् ॥
ज्ञातताज्ञातते भातो न तेनाविषयत्वतः ॥ १४ ॥
रूपार्थे सम्प्रवृत्तेन नेत्रेण रसगन्धयोः ॥
अगृहीतिर्यथा तद्वज्ज्ञाताज्ञातत्वयोर्भवेत् ॥ १५ ॥
नेत्रागृहीतयोरन्यद् ग्राहकं स्याद्यथा तथा ॥
ज्ञातताज्ञातते ग्राह्ये मानामेये च ते चिता ॥ १६ ॥
घटोऽपि तर्हि गृह्येत चितैव ज्ञाततादिवत् ॥
इति चेदिष्टमेवैतद् गृह्येत च घटश्चिता ॥ १७ ॥
ज्ञातत्वेन घटो भाति सोऽज्ञातत्वेन भासते ॥

तत्त्वपरामर्शोऽन्यथानुपपन्नः सन् तस्य साक्षिवेद्यत्वं कल्पयति इत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ घटादिबोधकमानस्यैव तद्गतज्ञातताबोधकत्ववत् प्राक्कालीनाज्ञातत्वबोधित्वसम्भवात् किं साक्षिवेद्यत्वकल्पनयेत्याशङ्क्य घटादौ प्रवृत्तं मानं तदनुभवमात्रावसानं नाधिकबोधकमित्याह * प्रवृत्तमिति ॥ १४ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति * रूपेत्यादि ॥ १५ ॥ तयोश्चिन्मात्रग्राह्यत्वे प्रमित्यगोचरत्वं हेतुमाह * मानामेय इति ॥ १६ ॥ उक्तविधया घटस्यापि चिद्भास्यत्वसम्भवात् मानवैयर्थ्यमित्याशङ्कते * घट इति । चिद्भास्यत्वमात्रमङ्गीकरोति * इष्टमिति ॥ १७ ॥ तत्रानुभवं प्रमाणयति * ज्ञातत्वेनेति

इत्युक्ते घट एवात्र चिता ह्येवाऽवभास्यते ॥ १८ ॥
न चैवं मानवैयर्थ्यं ज्ञातृत्वायोपयोगतः ॥
अज्ञातत्वायोपयुक्तं तत्राज्ञानं यथा तथा ॥ १९ ॥
मानाज्ञानविहीनस्य कालस्यासत्त्वतो घटः ॥
ज्ञाताज्ञातत्वनिर्मुक्तः केवलो भाति न क्वचित् ॥२०॥
सर्वथापि चिता भास्यमज्ञातत्वं घटादिषु ॥
प्रमाणनैरपेक्ष्येण तत्सिद्धेः सर्वसम्मतेः ॥ २१ ॥
स्वतोऽनुभवतः सिद्धां बालोऽप्यज्ञातताां हठात् ॥
न किञ्चिज्ज्ञातमित्येवं वक्ति पृष्टः प्रमां विना ॥ २२ ॥
अथानुभूतपूर्वत्वाद् घटादौ शङ्क्यते प्रमा ॥
अत्यन्ताननुभूतोऽर्थ उदाहार्यस्तथा सति ॥ २३ ॥
अत्यन्ताननुभूतेषु हिमवत्पृष्ठवस्तुषु ॥
अज्ञातत्वमशङ्कः सन् परामृशति मानवः ॥ २४ ॥

॥ १८ ॥ मानवैयर्थ्यमुक्तं निरस्यति * न चैवमिति । ज्ञानात्पूर्वमज्ञातत्वविशिष्टघटादेर्यथा चिद्भास्यत्वं तद्वत् ज्ञानकाले ज्ञातत्वविशिष्टस्य तस्य चिद्भास्यत्वमिति विशेषणीभूतज्ञातत्वसिद्ध्यर्थं मानमित्यर्थः ॥ १९ ॥ केवलो घटस्तर्हि केन गम्यत इत्याशङ्क्य न केनापीत्याह * मानेति ॥ २० ॥ अज्ञातत्वस्य नित्यानुभवसिद्धत्वमुक्तं निगमयति * सर्वथापीति । घटश्चिद्भास्यो मानभास्यो वा भवत्वित्यर्थः ॥ २१ ॥ सर्वसम्मतत्वमेवाह * स्वत इति ॥ २२ ॥ किञ्च प्रमितवस्तुषु प्राक्कालेनाज्ञातत्वं प्रमया सिध्यति साक्षिणा वेति स्यादपि शङ्का, अत्यन्तादृष्टवस्तुषु तत्सिद्धिः केवलानुभवाधीनेत्याह * अथेति ॥२३॥२४॥ ननु नानुभवसिद्धमज्ञातत्वम् अनुभवस्यैवाभावादिति तत्राह

न चात्रानुभवो लुप्तो न जानामीति तत्स्मृतेः ॥
अदृष्टमपि तद्दृष्ट्वा स्मरेन्नाज्ञासिषं त्विति ॥ २५ ॥
अथेन्द्रियाणां सत्त्वेन कथञ्चिच्छङ्क्यते प्रमा ॥
तर्हि लुप्तेन्द्रियावस्था स्यात्सुषुप्तिरुदाहृतिः ॥ २६ ॥
निःशेषकरणग्रामलयेऽप्यनुभवः स्वतः ॥
अलुप्तदृक् सुषुप्तेऽस्ति जाग्रद्बोधाविशेषतः ॥ २७ ॥
पुमान् सुप्तोत्थितोऽतीतमज्ञातत्वं स्मरत्ययम् ॥
अनुभूतमतः सुप्तौ लुप्यतेऽनुभवो न हि ॥ २८ ॥
नन्विदानीन्तनाद्बोधान्नाज्ञासिषमितीदृशात् ॥
लिङ्गजन्याद् बुद्ध्यभावः सौषुप्तोऽत्रानुमीयते ॥ २९ ॥
ततः किञ्चिद्भावरूपमज्ञातत्वं न विद्यते ॥

---

*न चेति । मेरुगतं वस्तु जानासीत्यन्येन पृष्टे मैत्रो न जानामीत्यज्ञातत्वं स्मरति, तस्य पूर्वाननुभूतत्वे तदयोगान्नानुभवाभाव इत्यर्थः । किञ्चादृष्टं वस्तु दृष्ट्वा नैतावन्तं कालमेतदवेदिषमिति स्वानुभूताज्ञानानुसन्धानान्नानुभवापलाप इत्याह * अदृष्टमिति ॥ २५ ॥ अपिच स्वापे प्रमाणसामग्रीविरहेऽपि नित्यसिद्धचिद्धातुरूपोऽज्ञातत्वानुभवः स्वतोऽस्त्येव, अन्यथोत्थितस्य नावेदिषमिति परामर्शायोगात् । अतो जागरितेऽप्यज्ञातताबोधस्य स्वापादविशेषात्तत्र तत्प्रमासामग्रीविरहेऽपि सम्भावनायामपि साक्षिसिद्धा सर्वत्र सेत्याह *अथेत्यादिना । उक्तपरामर्शान्यथानुपपत्त्या सुप्तावपि साक्षिसिद्धौ न नित्यानुभवाभावशङ्केत्याह * अतः सुप्ताविति ॥ २६ ॥ २७ ॥ २८ ॥ सुप्तोत्थितस्य नावेदिषमिति ज्ञानमनुमितिः स्मृतिर्वा ज्ञानाभावविषयं न भावरूपाज्ञानविषयमिति तार्किकशङ्कां परिहरति *न-

नानुभूतिस्ततः सुप्तावित्यूचुस्तार्किका न तत् ॥ ३० ॥
न हि सुप्त्यविनाभूतं लिङ्गमद्य निरीक्ष्यते ॥
येन सौषुप्तवृत्तान्त इदानीमनुमीयते ॥ ३१ ॥
सौषुप्तबुद्ध्यभावोऽद्य स्मार्यतेत्येतदप्यसत् ॥
सुप्तावननुभूतस्य नेदानीं युज्यते स्मृतिः ॥ ३२ ॥
गृहीत्वा धर्मिणं स्मृत्वा निषेध्यं प्रतियोगिनम् ॥
तदभावो ऽनुभूयेत सुप्तौ तन्न हि सम्भवेत् ॥ ३३ ॥
ग्रहणस्मरणे सुप्तौ स्यातां चेज्जागृयात् पुमान् ॥
अतोऽभावो नानुभूत इदानीं स्मार्यते कथम् ॥ ३४ ॥
तस्मात्साक्ष्यनुभूतं यदज्ञानं भावरूपकम् ॥
तत्प्रबुद्धः स्मरत्येष पुमानित्यभ्युपेयताम् ॥ ३५ ॥
बोधस्य लिङ्गजन्यत्वं यत्त्वयोक्तं तदप्यसत् ॥

न्वित्यादिना ॥२९॥३०॥ सुप्तिकालीनज्ञानाभावव्याप्तलिङ्गाभावान्न तस्यानुमेयत्वम् इत्याह * न हीति ॥ ३१ ॥ अस्तु तर्हि तस्य स्मर्यमाणत्वमिति शङ्कते * सौषुप्तेति । अननुभूते स्मरणायोगान्नैवमित्याह * एतदपीति ॥ ३२ ॥ ननु सुषुप्तौ ज्ञानाभावोऽप्यस्तीत्यत आह * गृहीत्वेति ॥ ३३ ॥ अभावानुभवहेतुत्वेन सुषुप्तावपि धर्मिग्रहणस्य प्रतियोगिस्मरणस्य च स्वीकारे सर्वज्ञानोपरमलक्षणसुप्तिरेव न स्यादित्याह *ग्रहणेति ॥ ३४ ॥ ज्ञानाभावस्यानुमितिस्मृत्यविषयत्वे फलितमाह * तस्मादिति ॥ ३५ ॥ यदुक्तम् इदानीन्तनबोधाल्लिङ्गजन्यात्सुप्तज्ञानाभावोऽनुमीयते इति तदुक्तिरेव न घटत इत्याह *बोधस्येत्यादि । घटज्ञानमुत्पन्नमित्यादिप्रतीतेरन्तःकरणवृत्तिविषयत्वान्नानुभवस्य जन्यत्वं, तथा देशकालादिभेदान्न त-

सर्वत्र जन्या धीवृत्तिर्नित्यो बोधो न जन्यते ॥ ३६ ॥
इदानीन्तनबोधोऽयं तदानीन्तन इत्यपि ॥
भेदो ऽयं नित्यबोधस्य कालेन क्रियते कथम् ॥ ३७॥
बोधादेव प्रसिद्ध्यन्ति कालावस्थादयोऽखिलाः ॥
मातृमानादयश्चैव कुतस्तैरस्य विक्रिया ॥ ३८ ॥
प्रमातृमानतन्मेयेष्वागमापायिषु त्रिषु ॥
अलुप्तानुदितो बोधः प्रथते प्रत्यगेकलः ॥ ३९ ॥
अभितोऽनुभवाक्रान्ता ज्ञाताज्ञातत्वभूमिषु ॥
घटादयोऽर्थाः सिद्ध्यन्ति लीयन्तेऽनुभवे पुनः ॥४०॥
सर्वं वस्तु ज्ञाततया ह्यज्ञातत्वेन वा सदा ॥

स्य भिन्नत्वम् अतस्त्वदुक्तमसङ्गतमित्यर्थः ॥३६॥३७॥ नन्वनुभवस्य क्षीरादिवत्कालादिवशात्परिणामोऽस्तीत्यत्राह * बोधादिति । बोधाधीनसत्तास्फूर्त्तिकात्कालादेरादावेव सिद्धानुभवस्य न तद्वशाद्विकारः, नहि निर्विकारः स्वरसतो विकारतां गच्छतीत्यर्थः ॥ ३८ ॥ आत्मानुभवस्यापरिणामित्वे हेत्वन्तरमाह * प्रमात्रिति ॥ आगमापायिमात्रादिसाधकत्वेनागमादिशून्यः प्रत्यगेकस्वभावोऽनुभवो भाति अतो हेत्वभावान्नास्य विक्रियेत्यर्थः ॥ ३९ ॥ मात्रादीनामाधारत्वं तेषु सप्तमीप्रयोगात् बोधस्याधेयत्वं तत्र प्रथमाप्रयोगात् तत्कथं तस्य प्रत्यगेकलत्वमित्याशङ्क्याह * अभित इति । ज्ञातत्वेनाज्ञातत्वेन चाक्रान्तार्थगोचरव्यवहारकाले सर्वतोऽनुभवव्याप्ता घटादयः सत्तां लभन्ते, न चानुभवादन्यत्र ते तिष्ठन्ति, नाप्यर्थान्तरे लीयन्ते अतो मात्राद्यर्थानामनुभवात्मन्येवोत्पत्तिस्थितिलयभावादतिरेकेणासत्त्वं, काल्पनिकभेदाच्चाधाराधेयतेत्यर्थः ॥४०॥ ज्ञातत्वाज्ञा-

साक्षिचैतन्याविषय एवेति ज्ञानडिण्डिमः ॥ ४१ ॥
एवमज्ञाततासिद्धावज्ञातो यः प्रमीयते ॥
सर्वैर्मानैरतश्चिन्त्यं कस्याज्ञातत्वमीदृशम् ॥ ४२ ॥
चेतनो ऽचेतनो वा ऽयमज्ञातो यद्यचेतनः ॥
तत्राज्ञातार्थकार्यस्य जडस्याज्ञातता कुतः ॥ ४३ ॥
अज्ञातरज्जुकार्यस्य सर्पस्य ज्ञातता न हि ॥
अज्ञातब्रह्मकार्यस्य जडस्य ज्ञातता कथम् ॥ ४४ ॥
रज्जुसर्पं न जानामि बोद्धुमिच्छामि मानतः ॥
इति व्यवहृतिं प्राज्ञा नाङ्गीकुर्वन्ति केऽपि च ॥४५॥
किञ्चाज्ञातत्वतो लभ्यं तिरोधानं न चेतरत् ॥
स्वयमेव तिरोभूते जडे काऽन्या तिरोहितिः ॥ ४६ ॥

तत्वाक्रान्तकाल इत्युक्तेः इतरकाले कथमिति शङ्का स्यात् तां निरस्यति * सर्वमिति ॥ ४१ ॥ ४२ ॥ एवं साक्षिसिद्धाज्ञातत्वविशिष्टस्यैव मानविषयत्वे सिद्धे तत्कस्य युज्यत इति विमृशति * चेतन इति । घटं न जानामीत्यनुभवाद्धटादेरेव तद्युक्तमित्याशङ्क्यानुभवस्यान्यथाप्युपपत्तेर्नैवमिति परिहरति * यदीत्यादिना ॥ ४३ ॥ ४४ ॥ रज्जुसर्पादिष्वज्ञातत्वाभावः कथमित्याशङ्क्य व्यवहाराभावादित्याह * रज्ज्विति ॥ यद्यपि घटादावुक्तव्यवहृतेरुपलम्भादज्ञातता शक्यशङ्का तथापि रज्जुसर्पदृष्टान्तेन कल्पितस्याज्ञातत्वाभावे निश्चिते तदवच्छिन्नचैतन्यनिष्ठाज्ञानविषयेणाप्युक्तव्यवहारोपपत्तिरिति भावः ॥४५॥ एवं जडेष्वज्ञातताकल्पकमानाभावान्न तेषां तदाश्रयत्वमित्युक्त्वा प्रयोजनाभावादपि न तदित्याह * किञ्चेति । स्वतोऽनभिव्यक्तात्मकजडस्याज्ञानकृतानभिव्यक्त्या न किञ्चित्प्रयोजनमित्यर्थः ॥ ४६ ॥ अभिव्यक्तचैतन्ये त्वनभिव्यक्तरूपविशेषाधा-

आविर्भूतस्वरूपे तु चेतनेऽन्येन निर्मितात् ॥
तिरोधानाद्विशेषोऽस्ति शुभ्रवस्त्रे मषी यथा ॥ ४७ ॥
चन्द्रं मलिनयेद्राहुर्नीलमेघं न तु क्वचित् ॥
एवं चेतनमज्ञानं जडं त्वज्ञानदेहकम् ॥ ४८ ॥
कार्यकारणरूपं यन्निखिलं जडमीक्ष्यते ॥
तेन सर्वेण चिद्रूपः स्वप्रकाशस्तिरोहितः ॥ ४९ ॥
तिरोहितेनोभयं यद्भासते चन्द्रराहुवत् ॥
लोपः प्रकाशनाशो वा नास्ति चन्द्रवदेव हि ॥५० ॥
राहुग्रस्तत्वमिन्दौ चेदस्मदृदृष्ट्यैव भासते ॥
अज्ञातत्वं चितस्तद्वन्मूढदृष्ट्यैव भासताम् ॥ ५१ ॥
अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः ॥
अक्षादीनां स्वतःसिद्धो यत्र तेषां प्रमाणता ॥ ५२ ॥

यकत्वादज्ञानं फलवदित्यत्र दृष्टान्तद्वयमुक्त्वा दार्ष्टान्तिकमाह *एवमिति॥ अज्ञानं मलिनयेदिति पूर्वेण सम्बन्धः। किञ्चाखिलजडस्याज्ञानकार्यत्वेन तदात्मकत्वादेव न तदाश्रयत्वमित्याह *जडन्त्विति ॥४८॥ तस्मात्सर्वप्रपञ्चात्मकेनाज्ञानेन चिन्मात्रमेव तिरोधीयत इत्याह * तेनेति ॥ ४९ ॥ चितस्तिरोहितत्वे जगदान्ध्यप्रसङ्गश्चित्प्रकाशस्य विपरिलोपादित्याशङ्क्याह * तिरोहितेनेति । लोप इत्यस्य व्याख्या प्रकाशनाश इति । वाशब्दो ऽवधारणार्थो नास्तीत्यनेन सम्बध्यते । चन्द्रे प्रकाशालोपप्रसिद्धिं हिशब्देन सूचयति ॥५०॥ अमलस्यैवेन्दोरस्मदृदृष्ट्या राहुग्रस्तत्वप्रतीतेः प्रकाशालोपेऽपि चिति कथं तदलोप इति शङ्कते । राहुग्रस्तेति । साम्येन समाधत्ते*अज्ञातत्वमिति ॥५१॥ अज्ञातत्वाच्चित एव सर्वमानमेयत्वमित्युपसंहरति*अत इति॥५२॥

अनुभूतिग्रहायैव प्रवृत्तान्यपि दुष्टया ॥
सामग्र्याऽखिलमानानि गृह्णते जडसंयुतम् ॥ ५३ ॥
शुक्तिकाग्रहणायैव प्रवृत्तमपि लोचनम् ॥
गृह्णाति रजतोपेतं शुक्त्यंशं दोषयोगतः ॥ ५४ ॥
वेदान्तेतरसामग्री दुष्टैषा चक्षुरादिका ॥
तज्जधीरत्र गृह्णाति स्फूर्त्तिं रूपादिसंयुताम् ॥ ५५ ॥
एवं च सति विभ्रान्तः कल्पिते रजते धियम् ॥
प्रमाणं मनुते यद्वद्रूपादौ मनुजास्तथा ॥ ५६ ॥
धर्मिण्यभ्रान्तमखिलं ज्ञानमिच्छन्ति वादिनः ॥
सर्वधर्मिणि सद्रूपे प्रमा धीवृत्तयो ऽखिलाः ॥ ५७ ॥
विपर्ययं प्रकारे तु वदन्ति रजतादिके ॥
तथा रूपादिके बुद्धिः स्याद्विपर्ययरूपिणी ॥ ५८ ॥
एवं न्यायेन संसिद्धा प्रमाणानां प्रमाणता ॥
ब्रह्मण्येव तथाऽप्यज्ञा रूपादावेव तां विदुः ॥ ५९ ॥

ननु तर्हि सर्वमानानि चिन्मात्रमेव किमिति न गृह्णन्ति तत्राह *अनुभूतीति ॥५३॥ अन्यार्थं प्रवृत्तमानस्य दोषवशादन्यस्यापि-ग्रहणे दृष्टान्तमाह * शुक्तिकेति ॥ ५४ ॥ तत्र चक्षुषि काचा-दिवद्रूपादिग्राहकमानेषु दोषाभावात्कथं विपरीतग्राहकत्वमित्या-शङ्क्य नेहनानेतिश्रुत्या बाधितार्थबोधकत्वेन वेदान्तातिरिक्त-ज्ञानसामग्रीमात्रस्य दुष्टत्वाद्विपरीतधीरुपपद्यते इत्याह * वे-दान्तेति ॥ ५५ ॥ नन्वेवंसति रूपादिज्ञाने प्रमात्वप्रसिद्धिः कथमिति तत्राह * एवं च सतीति ॥ ५६ ॥ भ्रान्तिज्ञानगोच-रचितिरपि तर्हि मिथ्या स्यादित्याशङ्क्याह * धर्मिणीति ॥ उ-क्तमेवार्थं दृष्टान्तमुखेन स्पष्टयति * सर्वधर्मिणीति ॥ ५७ ॥ चा-क्षुषज्ञानस्य न रूपाद्यंशे भ्रमत्वं श्रुतिविरोधादिति शङ्कते * प-

धर्मिण्येव प्रमाणं सदपि ज्ञानविमूढधीः ॥
रजतग्राहकं मानमिति विद्याद्यथा तथा ॥ ६० ॥
ब्रह्मण्यक्षादिमानत्वमिति न्यायविदां मतम् ॥
रूपादावेव तन्मात्वमिति मूढधियो जगुः ॥ ६१ ॥
पराञ्चि खानि व्यतृणदिति श्रुत्यैव दर्शितम् ॥
रूपादौ मात्वमक्षादेरिति चेत्तदसङ्गतम् ॥ ६२ ॥
बुद्धिवृत्तिं विहायान्यन्न किञ्चिन्मानमिष्यते ॥
नेत्रादीनि तु सामग्री दुष्टा तस्य इतीरितम् ॥ ६३ ॥
श्रुतिश्च दुष्टसामग्रीं लोकसिद्धामनूद्य ताम् ॥
निषेधति न नेत्रादेर्मानत्वाय प्रवर्तते ॥ ६४ ॥
मृत्योः स मृत्युमाप्नोति योऽत्र नानेव पश्यति ॥
इति नेत्रादिजन्यं यद् दर्शनं तन्निषेधति ॥ ६५ ॥
अतो मूढप्रसिद्ध्यैव नेत्रादीनां प्रमाणता ॥
तत्प्रसिद्ध्यैव रूपादेर्ज्ञातताज्ञातते अपि ॥ ६६ ॥
ननु पूर्वं चितोऽप्येतन्मूढदृष्ट्यैव वर्णितम् ॥

राञ्चीति । श्रुत्यर्थानभिज्ञो भवानित्याह ॥ तदिति ॥६२॥ रूपाद्यंशेऽपि प्रमात्वेनाभिमतं ज्ञानमन्तःकरणवृत्तिरन्यद्वा ? नान्त्यः अनुपलम्भादित्याह * बुद्धीति ॥ आद्ये तस्याः उक्तविधया दुष्टसामग्रीजन्यत्वान्न मात्वशङ्केत्याह * नेत्रेति ॥ ६३ ॥ कस्तर्हि श्रुतेरर्थ इत्याशङ्क्य चक्षुरादीनां रूपादिग्राहकत्वं लोकसिद्धमनूद्य ज्ञानस्यानर्थहेतुत्वं वदन्ती अर्थात्तस्य यथार्थविषयत्वं निषेधतीत्याह * श्रुतिरिति ॥ ६४ ॥ निषेधकवाक्यमर्थतः पठति * मृत्योरिति ॥ ६५ ॥ ६६ ॥ चैतन्ये रूपादौ चाज्ञातत्वादेर्मूढबुद्धिकल्पितत्वे चैतन्यमेवाज्ञातं नरूपादीति व्यवस्था कथमिति शङ्कते * नन्विति ॥ मूढद्वैविध्या-

अज्ञातत्वं सत्यमेवमस्ति भेदोऽत्र मूढयोः ॥ ६७ ॥
अप्रबुद्धो बुध्यमानः प्रबुद्धश्च त्रयो नराः ॥
प्रबुद्धं प्रति मूढौ द्वावाद्यो मूढस्तयोर्मतः ॥ ६८ ॥
अज्ञातत्वं प्रबुद्धस्य न कदाचिच्चिदात्मनि ॥
ज्ञातताज्ञातते तस्मिन्ध्यायमानो ऽभिमन्यते ॥६९॥
न्यायेन बुद्ध्यमानोऽसावप्रबुद्धस्य विभ्रमम् ॥
परीक्षमाणो मूढत्वमापादयति तं प्रति ॥ ७० ॥
अज्ञाते ब्रह्मचैतन्ये रूपमज्ञातमित्ययम् ॥
भ्रान्त्या रूपविबोधाय नेत्रं मानमपेक्षते ॥ ७१ ॥
दोषस्थानीयनेत्रेण जन्या धीर्ब्रह्मवस्तुनि ॥
आरोप्यरूपं ब्रह्मैव गृह्णात्यर्थात्तु रूपधीः ॥ ७२ ॥

न्न दोष इति परिहरति * सत्यमिति ॥ ६७ ॥ मूढस्वरूपं वक्तुं लोके मनुष्यत्रैविध्यं दर्शयति * अप्रबुद्ध इति । अज्ञातब्रह्मतत्त्वाः, केवलं श्रुतब्रह्मतत्त्वाः, साक्षात्कृतब्रह्मतत्त्वा इति लोके त्रिविधा नरा इत्यर्थः । तत्राद्यमध्ययोरन्त्यापेक्षया मूढत्वम् आद्यस्य तु मध्यमापेक्षयापि मूढत्वमित्याह * प्रबुद्धं प्रतीति ॥ ६८ ॥ एवंसति बुद्धतत्त्वदृष्ट्या चिति अज्ञातत्वादि कालत्रयेऽपि नास्तीत्याह * अज्ञातत्वमिति । श्रुतब्रह्मतत्त्वस्तु न्यायपूर्वं विचारयँश्चैतन्ये ऽज्ञातत्वादि कल्पयित्वा रूपादौ तत्कल्पयतोऽबुद्धतत्त्वस्य मूढतामापादयतीत्याह*ज्ञाततेत्यादिना ॥६९ ॥ तस्य मूढत्वापादनप्रकारव्याजेन ब्रह्मविचारसर्वस्वं दर्शयति *अज्ञात इति । अज्ञातत्वं रूपादौ परिकल्प्य तज्ज्ञानाय मानव्यापारं कुर्वन् ब्रह्मग्राहकमानेनारोपितरूपादिष्वपि दोषवशाज्ज्ञातेषु ज्ञातत्वमपि तत्र कल्पयतीत्यर्थः॥७२॥ क्लृप्तः कल्पितः अ-

ज्ञाते ब्रह्मणि तद्रूपं ज्ञातमित्यभिमन्यते ॥
धिया भाते ब्रह्मतत्त्वे घटः क्लृप्तोऽवतिष्ठते ॥ ७३ ॥
यथा लोके लोचनेन भासिते शुक्तिखण्डकम् ॥
दोषेणापादितं तत्र रजतं केवलं स्थितम् ॥ ७४ ॥
नाज्ञातं रजतं पूर्वं क्लृप्तेः प्राक्तदसत्त्वतः ॥
ज्ञाताज्ञातत्वचिन्तेयं न ह्यस्ति नरशृङ्गके ॥ ७५ ॥
अज्ञातत्वं विना चक्षुर्न तद्बोधं प्रवर्तते ॥
किन्त्वज्ञानं शुक्तिखण्डमेव ज्ञापयति स्वतः ॥७६॥
चक्षुर्दृष्टे शुक्तिखण्डे दोषाद्रूप्येवकल्पिते ॥
नान्तरीयकभानत्वाद्रूप्यं ज्ञातमिति भ्रमः ॥ ७७ ॥
अश्वारूढे राजपुत्रे तन्मूर्धस्थितमक्षिकाम् ॥
दृष्ट्वा मूढो वदत्येषा यात्यारुह्य तुरङ्गमम् ॥ ७८ ॥
अतो न रूप्यमज्ञातं नापि ज्ञातं यथा तथा ॥
न ज्ञातो नाप्यविज्ञातः केवलं कल्पितो घटः ॥७९॥

वतिष्ठते केवलं न तत्र ज्ञाततेत्यर्थः ॥ ७३ ॥ कल्पितस्य ज्ञातत्वाद्यनाश्रयत्वे दृष्टान्तमाह * यथेति । केवलं ज्ञातत्वविधुरम् ॥ ७४ ॥ तत्र हेतुमाह *नाज्ञातमिति । ज्ञातत्वाज्ञातत्वयोरेकाधिकरणत्वादित्यर्थः । अज्ञातत्वं तस्य कुतो न तत्राह * क्लृप्तेरिति ॥ असतो निर्धर्मकत्वादिति भावः ॥ ७५ ॥ अज्ञातत्वाभावेऽपि रजतादौ ज्ञातत्वमस्तु तस्य मानजन्यज्ञानविषयत्वादित्याशङ्क्यासिद्धिमाह * अज्ञातत्वमिति ॥ ७६ ॥ कथं तर्हि रजतं पश्यामीत्यनुभवस्तत्राह * चक्षुरिति ॥ ७७ ॥ नान्तरीयकस्यापि मुख्यव्यवहारविषयत्वं भ्रमात्सम्भवतीत्यत्र दृष्टान्तमाह * अश्वेति ॥ ७८ ॥ उपपादितं दृष्टान्तमनुवदन् दार्ष्टान्तिकमाह * अत इति ॥ ७९ ॥ एवमनात्मन्यज्ञातत्वे निर-

ज्ञानाज्ञाने भावरूपे धीमाये ब्रह्म तद्युतम् ॥
ज्ञाताज्ञातत्वरूपस्य व्यवहारस्य गोचरः ॥ ८० ॥
ब्रह्मैव विषयो मायाधियोरिति सुनिश्चितम् ॥
धीवृत्तिरूपमानानां सर्वेषां ब्रह्म गोचरः ॥ ८१ ॥
सामग्रीभेदतस्तत्र बन्धमोक्षौ व्यवस्थितौ ॥
नेत्राद्युपनिषद्रूपे धीसामग्र्यौ धियो जने ॥ ८२ ॥
स्वत एवाज्ञानहान्यै प्रवृत्तामपि तां धियम् ॥
नेत्राद्याः प्रतिबन्ध्याशु रूपाद्यारोपयन्ति हि ॥ ८३ ॥
रूपाद्याकुलिता बुद्धिरज्ञानं हन्तुमक्षमा ॥
अभिभूयैतदज्ञानं क्षणं पश्चान्निवर्तते ॥ ८४ ॥
स्वत एवाप्रमाणत्वाद्रूपाद्याकुलनादपि ॥
व्यावहारिकमानत्वं भजते बुद्धिरीदृशी ॥ ८५ ॥

स्ते आत्मन्येव तदिति फलितं दर्शयन् प्रसङ्गान्मायाऽविद्ययोर्भेदभ्रमं निरस्यति * ज्ञानेति । ज्ञानग्रहणं दृष्टान्तार्थम् ॥ ८० ॥ उक्तार्थमेव विवृणोति * ब्रह्मेति । विषयपदेन तद्योग्यत्वं विवक्षितमतो न पुनरुक्तिः ॥ ८१ ॥ ननु सर्वमानानां ब्रह्मविषयत्वे नेत्रादिज्ञानेनापि मोक्षः स्यात्, अन्यथा वेदान्तज्ञानेनापि स न स्यादत आह * सामग्रीति । सामग्रीभेदमाह * नेत्रेति ॥ ८२ ॥ तत्राद्याया बन्धहेतुत्वमाह * स्वत एवेति द्वाभ्याम् । स्वतोऽज्ञाननिवर्तनसमर्थमपि ज्ञानं नेत्रादिदोषजत्वादारोपितविषयं सदज्ञानं क्षणमभिभूय स्वयं नश्यतीत्यर्थः ॥ ८३ ॥ ८४ ॥ नेत्रादिजन्यधियो वेदान्तधीवत्स्वतोऽप्रमात्वादुक्तविधया विपरीतग्रहाच्चाज्ञानानिवर्तकत्वेऽपि व्यवहारहेतुत्वमस्तीत्याह * स्वत इति ॥ ८५ ॥ श्रुतब्रह्मतत्त्वेनाप्रबुद्धे मूढत्वापादनप्रकारमु-

२१

अतो मूढा एवमाहुरज्ञातत्वविघाततः ॥
मात्वमक्षादयो यान्तीत्येवं तीर्थकरा अपि ॥ ८६ ॥
नेत्रादिमात्ववादेऽस्मिन् घटादेरेव मेयता ॥
घटादयः प्रमासिद्धा मुञ्चन्त्यज्ञाततां ततः ॥ ८७ ॥
ननु मानमपेक्ष्यैते मुञ्चन्त्वज्ञाततां जडाः ॥
चिदात्मा न विना मानं त्यजेदज्ञाततां कुतः ॥ ८७ ॥
उच्यते साधकत्वेन नाज्ञानं हन्ति सा चितिः ॥
यत्साधकं न तल्लोके बाधकं क्वचिदिष्यते ॥ ८९ ॥
मानयोगात्पुरा सिद्धिर्लौकिकस्यापि वस्तुनः ॥
संवित्तत्त्वबलादेव तत्तमोऽव्यवधानतः ॥ ९० ॥
किमु वक्तव्यमासन्नं तमः सिद्ध्यति चिद्बलात् ॥
तस्मात्प्रमाणमेवास्य तमसो घातकं न चित् ॥ ९१॥

क्तमुपसंहरति * अत इति। नेत्रादिमानानां व्यवहारहेतुत्वादित्यर्थः * अज्ञातत्वेति। रूपादीनामिति शेषः ॥ न केवलं लौकिका एव भ्रमन्ति अपितु वादिनोऽपीत्याह *एवमिति ॥८६॥ एवं मूढद्वैविध्ये सिद्धे भ्रान्तत्वादिकं प्रथममूढदृष्ट्या घटादिनिष्ठमिति न पूर्वोत्तरविरोध इत्याह * नेत्रेति ॥ ८७ ॥ अज्ञातत्वं जडनिष्ठमिति पक्षे मानानां तन्निवर्तकत्वेन फलवत्त्वेऽपि चैतन्यनिष्ठं तदिति पक्षे तेनैव तन्निवृत्तिसम्भवान्मानवैयर्थ्यमिति शङ्कते *नन्विति ॥८८॥ अज्ञानसाधकचैतन्यस्य तदनिवर्तकत्वात्तन्निवृत्तये मानमर्थ्यत इत्याह *उच्यत इति ॥८९॥ चितेरज्ञानसाधकत्वं कैमुतिकन्यायेन दर्शयति * मानेति। अज्ञानव्यवहितघटादेरपि साक्षिभास्यत्वमुक्तं किमुताज्ञानस्येत्यर्थः ॥ ९० ॥ चैतन्याज्ञानयोरविरोधे फलितमाह * तस्मादिति ॥ ९१ ॥ नेत्रादिजन्यज्ञानमपि तर्हि निवर्तकं स्यादित्याश-

मानं च नेत्राद्युत्थं चेदभिभावकमीरितम् ॥
न दोषदुष्टबुद्ध्या हि तमस्तत्कार्यनिन्हुतिः ॥ ९२ ॥
कृत्स्नमात्राद्युपादानतमोबाधस्तु बोधतः ॥
तत्त्वमस्यादिवाक्योत्थात्पूर्णैकात्म्यस्वलक्षणात्॥९३॥
ननु वाक्यजबुद्ध्याऽपि युज्यते न तमोन्हुतिः ॥
नेत्रादिदोषजातस्य तदवस्थत्वदर्शनात् ॥ ९४ ॥
नैष दोषो यतो भिन्ना सामग्री वैदिकं वचः ॥
न ह्यन्धत्वापराधेन शब्दं न शृणुयात्पुमान् ॥ ९५ ॥
अथैकविषये भिन्नसामग्र्यप्येकदा कथम् ॥
विरुद्धबुद्धिमेकस्य जनयेदिति चेच्छृणु ॥ ९६ ॥
किं भिन्नविषयेऽप्यस्ति त्वेकदा धीद्वयं तव ॥
नेति चेदेकशब्देन विशेषयासि किं वृथा ॥ ९७ ॥

ब्र तस्य नेहनानेति श्रुत्या बाधितरूपादिविषयत्वेन दोषजन्यत्वस्योक्तत्वान्नाज्ञानतत्कार्यनिवर्तकत्वमित्याह * मानमिति ॥ ९२ ॥ अतः पारिशेष्यात्तत्त्वमादिजन्यज्ञानस्यैवाज्ञानतत्कार्यनिवर्तकत्वमित्याह * कृत्स्नेति । मीयन्त इति मात्रा गगनादयः ॥ ९३ ॥ दोषत्वेनाभिमतद्वैतग्राहकमानानां तदवस्थत्वात्कथमद्वैतज्ञानेनाज्ञाननिवृत्तिरिति शङ्कते * नन्विति ॥ ९४॥ तथापि वेदवाक्यस्य निर्दुष्टत्वात्तमोनिवर्तकधीजनकत्वमविरुद्धमिति समाधत्ते * नैष दोष इति ॥ ९५ ॥ सामग्रीभेदेऽप्येकस्मिन् ब्रह्मणि सविशेषनिर्विशेषत्वधीरेकदैकस्य कथमिति शङ्कते *अथेति ॥ ९६ ॥ एकस्मिन्विषये युगपद्धीद्वयं न घटत इति वदतो भिन्नविषये तदनुमतं न वा ?। नाद्यः, एकं करणमेकदैकामेव क्रियां जनयतीति न्यायविरोधादित्यभिप्रेत्याह * किमिति । द्वितीयमनूद्य प्रत्याह * नेति ॥ ९७ ॥ एवमेकस्मिन्निति

क्रमेण विषये भिन्नएकस्मिन्नपि धीद्वयम् ॥
स्वसामग्र्यनुसारेण भवन्न हि विरुद्ध्यते ॥ ९८ ॥
ततः सत्येव नेत्रादावद्वैतं बोधयेद्वचः ॥
अविज्ञातत्वमद्वैते तद्बोधेन निवर्त्यते ॥ ९९ ॥
तदैव ज्ञातमित्येव व्यवहारस्ततो भवेत् ॥
अज्ञातत्ववदद्वैते ज्ञातत्वं न विरुद्ध्यते ॥ १०० ॥
अज्ञातत्वं मायिकं चेज्ज्ञातत्वमपि तत्तथा ॥
विद्यया को विशेषश्चेज्ज्ञाततैवेति निश्चिनु ॥ १०१ ॥
पुरुषार्थः क इति चेन्मोक्ष एव न चेतरः ॥
श्रुतिं प्रतिभुवं विद्धि ज्ञानमात्रेण मुक्तये ॥ १०२ ॥
आगामिजन्माभावेऽपि साम्प्रतं लभ्यतेऽत्र किम् ॥
इति चेत्कृतकृत्यत्वधिया विश्रान्तिरुत्तमा ॥ १०३ ॥

विशेषणवैयर्थ्यं एकदैकस्य पुंसो बुद्धिद्वयानङ्गीकारान्नोक्तशङ्कावकाश इत्याह * क्रमेणेति । दृष्टान्तार्थं भिन्नविषय इत्युक्तम् ॥९८॥ तस्मान्नेत्रादौ सत्यपि वाक्यजन्याद्वयज्ञानादज्ञाननिवृत्तिरुपपद्यत इत्याह * तत इति ॥९९॥ अज्ञाननिवृत्तौ लिङ्गमाह * तदेति । ननु निर्धर्मके ब्रह्मणि ज्ञातत्वं कथं ? तत्राह *अज्ञातत्ववदिति । न च मायायाः नष्टत्वात् कथं मायिकं ज्ञातत्वमिति शङ्क्यम् । प्रारब्धप्रतिबद्धतल्लेशस्य विद्यमानत्वादिति भावः ॥१००॥ मायाकार्यस्य यथापूर्वमवस्थाने आत्मनि विद्याकृतविशेषाभावात्तद्वैफल्यमित्याशङ्क्यासिद्ध्या दूषयति *विद्ययेति ॥१०१॥ तथापि ज्ञाततायाः अपुमर्थत्वान्न विद्याफलत्वमित्याशङ्क्य ज्ञानेनाज्ञाननिवृत्तेरप्यङ्गीकारान्न दोष इत्याह *पुरुषेति । * प्रतिभुवमिति । घटकप्रमाणमिति यावत् ॥१०२॥ १०३ ॥

आस्तां फलविचारोऽयं रूपशब्दादिकल्पकम् ॥
नेत्रादिकं स्याद्विद्यायां लब्धायामिति चेच्छृणु ॥१०४॥
कल्पयत्येव रूपादि यथापूर्वं न संशयः ॥
ऋजुत्वं कः श्वपुच्छस्य कामयेतेह बुद्धिमान् ॥१०५॥
रूपाद्यकल्पनान्मोक्षः श्रूयते न क्वचिच्छ्रुतौ ॥
कल्प्यतामत्र रूपादि का ते हानिः प्रकल्पने ॥१०६॥
मृत्योः स मृत्युमित्येव द्वैतदृष्टिरपोद्यते ॥
यदि तर्हि न पश्यामि द्वैतं तस्य प्रमापणात् ॥१०७॥
निषेधति श्रुतिर्द्वैतदृष्टिमेव न कल्पनम् ॥
प्रत्युतैतस्य यत्नेन कल्पितत्वं वदत्यसौ ॥ १०८ ॥
कल्पितत्वावबोधेन कल्पितं न निवर्तते ॥
मनुष्यत्वावबोधेन मनुष्यस्यानिवर्तनात् ॥ १०९ ॥
कल्पितं न निवृत्तं चेद्वाचैवाद्वैतमर्थ्यते ॥
इति चेत्ते किमद्वैतं कर्त्तव्यं पाणिना वद ॥ ११० ॥
न कर्त्तव्यं किंतु बुद्ध्या बोद्धव्यमिति चेत्प्रभो ॥
बुध्यस्वाखिलवेदान्तैः किमुपालम्भसे वृथा ॥ १११ ॥

विद्याफलं यत्किञ्चिदस्तु, आत्मन्यतदारोपो नेत्रादिप्रयुक्तोऽस्ति नवेति पृच्छति *आस्तामिति ॥१०४॥ अस्तीत्युत्तरमाह *कल्पयतीति॥ स्वभावस्यानिवृत्तौ दृष्टान्तमाह*ऋजुत्वमिति॥१०५॥ कथं तर्हि मुक्तिरित्याशङ्क्य कल्पितप्रपञ्चस्य मोक्षप्रतिबन्धकत्वे मानाभावान्मुक्तिर्युक्तेत्याह * रूपेति ॥१०६॥ श्रुत्यैव द्वैतद्दृष्टेरपोदितत्वात् द्वैतस्य कथं प्रतीतिरित्याशङ्क्य द्वैतसत्यत्वमेव श्रुत्याऽपोद्यते न स्वरूपमित्याह * मृत्योरिति । द्वैतम्, अबाधितमिति शेषः ॥१०७॥ य इह नानेत्यादिसामान्यश्रुतेः क

परोक्षमेव वेदान्ता बोधयन्तीति चेन्न तत् ॥
बोद्धुरात्मानमुल्लिख्य त्वं ब्रह्मेत्यवबोधनात् ॥११२॥
स्वयं स्वस्य परोक्षश्चेत्कोऽपराधोऽन्य ईर्यताम् ॥
ब्रह्मत्वं च स्वतो नान्यत्कस्यात्र स्यात् परोक्षता॥११३॥
अद्वैतत्वं परोक्षं चेन्नास्य ब्रह्मत्वमात्रतः ॥
नहि ब्रह्मातिरेकेण किंचिदद्वैतमिष्यते ॥ ११४ ॥
एवमप्यापरोक्ष्यं ते मनो नाङ्गीकरोति चेत् ॥
तर्हि वैश्यपिशाच्या त्वं गृहीतस्त्वद्बिभेम्यहम् ॥११५॥
भूयो भूयो बलिं वैश्याः पिशाच्यै ददतेऽनिशम् ॥
अथापि सा पिशाची तान् बाधतेऽनपराधिनः॥११६॥
एवं बहुश्रुतिन्यायबोधितं सन्मनः पुनः ॥
विसंवदत एवेति का तत्र स्यात्प्रतिक्रिया ॥ ११७ ॥
कल्पितं चेत्समुच्छिन्द्यास्तुष्याम्येतावतेति चेत् ॥
उच्छेत्स्यामि यदा रज्जुसर्पं मारयसे तदा ॥ ११८ ॥
मा भूत्तर्हि समुच्छेदः कल्पनं विनिवारय ॥
इति चेदिन्द्रियाणि त्वं त्यज यास्यति कल्पनम्॥११९॥
जीवनायेन्द्रियापेक्षा यदि तर्हि क्षमस्व तत् ॥
कल्पनं तावता हानिः का तेऽसङ्गचिदात्मनः॥१२०॥
जातायां रज्जुविद्यायां सर्पक्लृप्तिर्न दृश्यते ॥

थं द्वैतसत्यत्वनिषेधपरत्वमपीत्याशङ्क्याह *मत्युतेति ॥ कल्पितस्य श्रुतितात्पर्यविषयत्वं प्रतिपादितमधस्तात्, अतो न तन्निषिद्ध्यत इत्यर्थः ॥१०८॥१०९॥११०॥१११॥ बोद्धुरिति ॥ दशस्त्वमसीतिवाक्यवदपरोक्षं वस्तु बोधयतो न परोक्षार्थत्वमित्यर्थः ॥११२॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७

इति चेत् दृश्यतेऽस्माभिर्मन्दे तमसि पूर्ववत् ॥१२१॥
न तत्र मृत्युभीतिश्चेन्नात्र जन्मभयं पुनः
यदि तत्र तमोदोषः कर्मदोषोऽत्र तत्समः ॥ १२२ ॥
किंचानुसृत्य तद्बुद्धिसाम्यमेवमुदीर्यते ॥
सर्वसाम्यं न दृष्टान्ते प्रार्थ्यते केनचित् क्वचित्॥१२३॥
विवक्षितं तु सादृश्यमधिष्ठानं न कल्पितम् ॥
अवस्त्वारोप्यमित्येतत्कण्ठं शोषय मा वृथा ॥१२४॥
कल्पितस्यानुवृत्त्यर्थं दृष्टान्ताश्चेदपेक्षिताः ॥
प्रतिबिम्बादिदृष्टान्ताः शतशोऽथ सहस्रशः ॥१२५॥
स्वानुभूत्यैकसंवेद्या विद्या सर्वेषु वस्तुषु ॥
यदि तेऽनुभवो नास्ति तर्हि जन्मास्ति ते ध्रुवम्॥१२६॥
किं बहूक्त्या प्रमेयः स्यादज्ञातत्वेन चेतनः ॥
सर्वेषामपि मानानामज्ञातत्वाभिभाविनाम् ॥१२७॥
वेदान्तानां विशेषेण निःशेषाज्ञानघातिनाम् ॥
अज्ञातश्चेतनो मेयो नाज्ञातोऽन्योऽस्ति कश्चन॥१२८॥
किं चानन्दासिरूपस्य पुरुषार्थस्य हेतवः ॥
वेदान्तास्तेन तन्मेय आनन्दात्मा परः पुमान्॥१२९॥
ननु दुर्वारसंसारदुःखसन्दर्भदानतः ॥

॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥ १२२ ॥ १२३ ॥१२४॥ ॥ १२५ ॥ १२६ ॥ एवं प्रसङ्गागतं समाप्य ब्रह्मणः सर्वमानमेयत्वमुक्तमुपसंहरति * किमिति ॥ १२७ ॥ चितः सर्वमानमेयत्वे वेदान्तमेयत्वं कैमुत्येनाह *वेदान्तानामिति ॥१२८॥ ब्रह्मात्मन एव वेदान्तमेयत्वे हेत्वन्तरं *किञ्चेति॥१२९॥ परमात्मा नानन्दात्मकः दुःखनिवृत्तीतरसुखाभावात् भावाभावयोरै-

किमन्यत्सुखमिष्टं स्याद्यस्याप्तेः पुरुषार्थता ॥ १३० ॥
नहि भावः सुखं किन्तु स्यात् दुःखाभाव एव तत् ॥
लोके हि व्याधिसन्तापविच्छित्तौ सुखतेष्यते॥१३१॥
यदि भावः सुखं तर्हि न प्रवृत्तिर्विरागिणाम् ॥
तदासक्त्या प्रवृत्तिश्चेद्भवेत्संसार एव सः ॥ १३२ ॥
स्वरूपं चेत्सुखं तच्च नावेद्यं पुम्भिरर्थ्यते ॥
वेद्यत्वे कर्मकर्तृत्वमेकस्यैव प्रसज्यते ॥ १३३ ॥
तस्मान्न भाव आनन्दो मोक्षे यः प्राप्यते नृभिः ॥
अतो वेदान्तमेयत्वे आनन्दत्वमसाधकम् ॥ १३४ ॥
उच्यते सुखदुःखे द्वे भावरूपे गवाश्ववत् ॥
स्पष्टमेवानुभूयेते सुखस्याभावता कुतः ॥ १३५ ॥
नदीमग्नार्द्धकायस्य युगपत्सुखदुःखयोः ॥
शैत्यौष्ण्यजन्ययोर्ग्रीष्मेऽनुभूतिः केन वार्यते ॥१३६॥
मनसः क्रमबोधित्वात् यौगपद्यं न यद्यपि ॥
नैतावता ऽपराधेन दुःखाभावत्वमापतेत् ॥ १३७ ॥

क्यायोगादिति जरत्तार्किकः शङ्कते *नन्विति ॥१३०॥१३१॥ विरक्तानां भावसुखे प्रवृत्तौ दोषमाह * तदेति ॥ इच्छामात्रस्य बन्धहेतुत्वादित्यर्थः ॥ १३२ ॥ किञ्च भावरूपं सुखमसंवेद्यं संवेद्यं वा?। आद्ये ऽज्ञातनिधिवदपुमर्थतेत्याह *स्वरूपमिति। द्वितीयं निराह * वेद्यत्व इति॥१३३॥१३४॥सर्वानुभवविरुद्धत्वान्नेदं मतमादेयमित्याह * उच्यत इत्यादिना ॥१३५॥१३६॥ एकदा सुखदुःखानुभवो भ्रमः एकस्मात्कारणाद्युगपत्क्रियाद्वयायोगादित्याशङ्क्य, तथापि न त्वदिष्टसिद्धिरित्याह * मनस इति ॥ १३७ ॥ दुःखोत्तरक्षणे जायमानस्य सुखस्य तदभावत्वशङ्का-

कालभेदेन शङ्का चेद्वैपरीत्यं कुतो न ते ॥
आनन्दाभाव एवेदं दुःखमित्यपि शङ्कताम् ॥१३८॥
अश्रुपातादिहेतुत्वात् दुःखं भावो यदा तदा ॥
दृग्विकासादिहेतुत्वात्सुखं भावः कुतो न ते ॥१३९॥
आहारादिज आनन्दो बुभुक्षादिपुरःसरः ॥
नियतस्तेन दुःखस्य ध्वंस आनन्द इत्यसत् ॥१४०॥
तृप्ता अपि च दाक्षिण्याद् भुञ्जानाः सुखमाप्नुयुः ॥
अनातुरोऽपि चाभ्यङ्गे मर्द्दनात् सुखमश्नुते ॥ १४१ ॥
सुखोपायविहीनानां क्वाप्यानन्दमपश्यताम् ॥
मर्द्दनादेः पुरा दुःखं कल्प्यमित्येतदप्यसत् ॥ १४२ ॥
चन्दनादिसुखोपायसम्पन्नाः सुखिनोऽप्यलम् ॥
पुत्रजन्मादिवार्ताभिः प्राप्नुवन्ति सुखान्तरम्॥१४३॥
पुत्राद्यप्राप्तिरूपं च दुःखं तत्र न कल्प्यते ॥
अप्रतीतेरवेद्यं तु न दुःखं वैरिदुःखवत ॥ १४४ ॥

यां वैपरीत्यं प्रसञ्जयति *कालेति॥१३८॥१३९॥सुखस्य नियमेन दुःखानन्तरभावित्वात्तदभावत्वमित्याशङ्क्य नियमासिद्धिमाह *आहारेत्यादिना ॥१४०॥१४१॥ तत्रापि मर्द्दनाद्यभावप्रयुक्तं दुःखमस्तीति न नियमभङ्ग इत्याशङ्क्य निर्दुःखसुखिनामपि सुखान्तरदर्शनात् नैवमित्याह *सुखेत्यादिना॥१४२॥१४३॥ ननु यत्र पुंसि पुत्रजन्मादिश्रवणकृतं सुखं जायते तत्रापि पुत्राप्तिनिमित्तदुःखध्वंस एव सुखमिति चेत् , नेत्याह * पुत्रादीति । तत्र हेतुः * अप्रतीतेरिति । अननुभूयमानस्यादुःखत्वे दृष्टान्तः * वैरिदुःखेति ॥ १४४ ॥ अप्रतीतेरिति हेतुरसिद्धः

अपुत्रा दुःखिनः केचित् दृश्यन्ते मनुजा यदि ॥
तथाप्यज्ञानतो दुःखं तिरश्चां नैव विद्यते ॥ १४५ ॥
तिर्यञ्चोऽपि स्ववत्सानां लाभे प्रीतिं व्रजन्ति हि ॥
प्रीताः पृथग्जिहासन्ति वेदनां ताडनादिजाम् ॥१४६॥
दुःखाभावो यदि प्रीतिर्जिहासाप्रेप्सयोर्भिदा ॥
लुप्येतातः प्रेप्सितैषा प्रीतिर्दुःखं जिहासिता॥१४७॥
लौकिकस्य सुखस्यैवं भावत्वे सुस्थिते सति ॥
वैदिकस्यापि भावत्वमैकार्थ्याल्लोकवेदयोः ॥ १४८ ॥
वेदोऽपि शुद्धमात्मानं सुखं मुख्यं प्रदर्शयन् ॥

पुत्रहीननरेषु तत्प्रयुक्तदुःखोपलम्भान्नोक्तव्याप्तिभङ्ग इत्याशङ्क्य पशुशकुन्तादिषु व्यभिचारमाह । * अपुत्रा इति ॥ तेषां पुत्राद्यभावप्रयुक्तं दुःखं नेत्यत्र हेतुः * अज्ञानत इति । अवेद्यं तु न दुःखमित्यनुपदमेवोक्तत्वादिति भावः ॥ १४५ ॥ ननु दुःखवत्तेषां तत्प्रयुक्तप्रीतिरपि नास्ति तत्राह * तिर्यञ्च इति । तेषामपि स्ववत्सेषु प्रीतिरस्ति तल्लिङ्गानामुपलम्भादिति भावः । अपिच सुखाप्तिव्यतिरेकेण दुःखध्वस्तेरिष्टत्वाच्च न दुःखाभावः सुखमित्याह * प्रीता इति ॥ १४६ ॥ यस्मात्सुखदुःखयोः प्रेप्साजिहासे पृथगुपलभ्येते तस्माद् दुःखाभावस्य पश्वादिवत्सुखशेषत्वान्न सुखात्मकत्वमित्याह *अत इति ॥१४७॥
लोके सुखपदार्थस्य भावत्वेऽपि वेदे कथं तत्सिद्धिरित्याशङ्क्य "य एव लौकिकास्त एव वैदिकाः"इति न्यायेन वेदेऽपि तस्य भावत्वं सिद्ध्यतीत्याह * लौकिकस्येति ॥ १४८॥ आत्मसुखस्य भावत्वं न केवलं न्यायसिद्धं किन्त्वशनायाद्यतीतमात्मानं सुखात्मकं, दुःखं चात्माऽस्पृष्टं ब्रुवन् वेदोऽप्येवमेवमाह-

अनात्मानं तथा दुःखं तयोर्भावत्रमिच्छति ॥१४९॥
तदेतत्प्रेय इत्यादिवाक्येभ्योऽनेकधा श्रुतम् ॥
तथाऽऽत्मनस्तु कामायेत्यतो भावः सुखं भवेत्॥१५०॥
यदुक्तं भावरूपत्वे रागात्तत्र प्रवृत्तितः ॥
मोक्षः संसार एवेति त्वत्पक्षेऽपि समं हि तत्॥१५१॥
संसारदुःखद्वेषेण दुःखोच्छेदाख्यमोक्षके ॥
प्रवृत्तेः संसृतित्वं ते मुक्तेः केन निवार्यते ॥ १५२ ॥
पुरुषार्थाभिसम्बन्धात् द्वेषस्यापि विरागिता ॥
यदि तर्ह्येष रागोऽपि सिद्ध्यै चात्रेति तुष्यताम् ॥१५३॥
दुःखद्वेषो द्वयोस्तुल्यो रागिता तेऽधिकेति चेत् ॥
तवापि गुरुशास्त्रादाविच्छायां किं न रागिता॥१५४॥
तस्मादानन्दभावत्वे मोक्षे किंचिन्न दुष्यति ॥

त्याह *वेद इति ॥१४९॥ कोऽसौ वेदः ? इत्याशङ्कायामात्मनः सुखत्वे वेदवाक्यान्युदाहरति * तदिति ॥ श्रुतम्, आत्मनः सुखत्वमिति शेषः ॥१५०॥ आत्मसुखरागिणां न मुक्तिः रागमात्रस्य बन्धहेतुत्वादिति पूर्वपक्षोक्तं दोषमनूद्य प्रतिबन्द्या परिहरति *यदिति ॥१५१॥१५२॥ नास्मत्पक्षे मिथ्याज्ञाननिमित्तात् द्वेषात् मोक्षे प्रवृत्तिः किन्तु विवेकपूर्वकात्, तस्य च पुमर्थहेतुत्वान्न बन्धहेतुत्वमित्याशङ्कते * पुरुषार्थेति । विरागिता बन्धहेतुता । साम्येन समाधत्ते * यदीति ॥ अत्र चेति सम्बन्धः । अस्मत्पक्षेऽपीत्यर्थः ॥ १५३ ॥ १५४ ॥ एवं मोक्षस्य भावरूपसुखत्वे न कश्चित् दोष इत्युपसंहरति * तस्मादिति । तथापि कथं तस्य परमपुरुषार्थत्वं ? तत्राह * तस्येत्यादिना । आनन्दवल्ल्यां मानुषानन्दमारभ्योत्तरोत्तरं शतगुणत्वेन

तस्यानतिशयत्वेन पुरुषार्थः परो मतः ॥ १५५ ॥
अथ ये शतमित्यादिवाक्याच्छतगुणोत्तरः ॥
उत्कर्षोऽवासितो यत्र मोक्षानन्दः स उच्यते ॥१५६॥
एष ह्येवानन्दयाति जीवान्सर्वानिति श्रुतिः ॥
लौकिलानन्दलिङ्गेन ब्रह्मानन्दं व्यनक्ति हि ॥१५७॥
न चात्यन्तपरोक्षोऽयमानन्दः प्राणिनां यतः ॥
स्वकीयः परमानन्दः सुषुप्तावनुभूयते ॥ १५८ ॥
स्वानन्दाभिमुखः स्वापे बोध्यमानोऽत एव च ॥
पीड्यते स्त्र्यादिसम्पर्कसुखविच्छेदतो यथा ॥१५९ ॥
यदुक्तं कर्मकर्तृत्वं वेद्यत्वे ऽथापुमर्थता ॥
अवेद्यत्व इतीदं तु नात्र दोषद्वयं भवेत् ॥ १६० ॥
आनन्दस्य स्वरूपत्वाद्वेद्यता तत्र नार्थ्यते ॥
निःसम्बोधेऽर्थ्यते सा हि न तु बोधैकलक्षणे ॥१६१॥

वर्णितस्यानन्दस्य यत्र परा काष्ठा स स्वरूपानन्दः तस्य च निरतिशयत्वात्परमपुरुषार्थत्वमित्यर्थः॥१५५॥१५६॥ ब्रह्मणः सुखत्वे हेत्वन्तरमाह * एष इति ॥ स्वप्रतिबिम्बभूतान् जीवानप्यानन्दिनः कुर्वाणस्य प्रचुरानन्दत्वं व्यक्तमित्यर्थः ॥१५७॥ प्रत्यक्षसिद्धत्वाच्च नात्मसुखे विवदितव्यमित्याह*न चेति ॥१५८॥१५९॥ आत्मनः सुखत्वे बाधकमुक्तमनूद्य प्रत्याह * यदिति ॥१६०॥ प्रतिज्ञातमर्थं साधयति * आनन्दस्येति । *निःसम्बोध इति । अयमर्थः-प्रकाशमानत्वेन सुखस्य पुरुषार्थत्वं न तु प्रकाशविषयत्वेन गौरवात्, तच्च प्रकाशाभिन्नस्यापि सम्भवति, तथाच विषयेन्द्रियसम्पर्काद् वृत्तिविशिष्टत्वेन जायमानसुखस्य बोधविलक्षणत्वेनातिरिक्तप्रकाशापेक्षायामपि न शुद्धे बोधस्वरूपे तदपेक्षेति ॥१६१॥

अतः प्रकाशमानत्वात्पुमर्थत्वमपि स्थितम् ॥
पुमर्थत्वेन वेदान्तैस्तात्पर्येण प्रमीयते ॥ १६२ ॥
सुखस्य लौकिकत्वेन कथं वेदान्तमेयता ॥
इत्यचोद्यं यतोऽखण्डरूपं लोकान्न सिद्ध्यति ॥ १६३ ॥
नेति नेत्यादिवाक्येभ्यो योऽर्थोऽनन्यानुभूतिगः ॥
लौकिकत्वं कथं तस्य सर्वमेयातिलङ्घिनः ॥ १६४ ॥
यद्यप्यलौकिकानन्दः स्वर्गो जायेत कर्मभिः ॥
तथापि तदनित्यत्वात्पुरुषार्थो न तावता ॥ १६५ ॥
निःशेषाल्हादसम्प्राप्तिः सर्वानर्थन्हुतिस्तथा ॥
सर्वेषां प्राणिनामेतत्स्वत इष्टं प्रयोजनम् ॥ १६६ ॥
यथोक्तपुरुषार्थस्य यद्यप्यात्मस्वरूपता ॥

उक्तमर्थमुपसंहरन्नात्मनः पुरुषार्थत्वे फलितमाह * अत इति ॥ १६२ ॥ अहं सुखीति सर्वानुभवसिद्धसुखस्य कथं वेदान्तवेद्यतेत्यापातशङ्कामनूद्य प्रत्यक्षाद्यसिद्धनिरतिशयानन्दस्यैव तन्मेयत्वाङ्गीकारान्न दोष इत्याह * सुखस्येति ॥ १६३ ॥ उक्तमर्थं स्पष्टयति * नेति । सर्वप्रपञ्चनिषेधावधिभूतस्य स्वप्रकाशस्य लोकमानमेयत्वशङ्कैव नास्तीत्यर्थः ॥ १६४ ॥ अलौकिकानन्दस्य पुमर्थत्वेन वेदान्तमेयत्वे स्वर्गादेरपि तन्मेयत्वं स्यादित्याशङ्क्य नित्यपुमर्थत्वस्य हेतुत्वेनानभिमतत्वान्नैवमित्याह * यदीति ॥ १६५ ॥ सर्वाभिलषितत्वाच्च मुक्तेरेव मुख्यपुमर्थत्वमित्याह * निःशेषेति । अत एव भूतात्मन एव वेदान्तमेयतेत्यर्थः ॥ १६६ ॥ आत्मनः पुमर्थत्वे तस्य नित्याप्तत्वेन हेत्वनपेक्षत्वात्कृतं वेदान्तारम्भेणेत्याशङ्क्याह * य-

तथाप्यज्ञानमूढेन तदप्राप्तमिवेक्ष्यते ॥ १६७ ॥
अतः सुखेच्छा दुःखस्य जिहासा चानिवर्तिता ॥
तन्मूलस्यानिषिद्धत्वात्तन्निषेधाय तत्त्वधीः ॥ १६८ ॥
अविद्याव्यवधानस्य नात्मज्ञानातिरेकतः ॥
प्रध्वस्तिः कर्मभिः कर्तुं शक्या तेषाममानतः ॥१६९॥
व्यञ्जकं विरहय्यान्यत्साधनं कारकात्मकम् ॥
आत्माभिव्यक्तये नालं तन्मोहस्याप्रदाहतः ॥१७०॥
यावच्च सम्यग्विज्ञानवन्हिनाऽसौ न दह्यते ॥
न तावत्किञ्चिदप्यासं सुखं दुःखेन वर्जितम् ॥१७१॥
दक्षिणोदगधोगत्या प्रत्यगज्ञानमूढधीः ॥
बम्भ्रमीत्यनिशं दुःखी पुमान्कर्मपुरःसरः ॥ १७२ ॥
काम्यैर्दक्षिणमन्वेति ज्ञानयुक्तैस्तथोत्तरम् ॥

थेति ॥ १६७ ॥ अविद्यावृतत्वादेव नित्याप्तयोः सुखदुःखाप्तिपरिहारयोरिच्छाऽपि घटते इत्याह * अत इति । * तदिति इच्छाहेत्वज्ञानस्यानिवृत्तत्वादित्यर्थः ॥ १६८ ॥ अस्तु तर्हि कर्मभिरेवाविद्यानिवृत्तिरिति, नेत्याह * अविद्येति ॥ १६९ ॥ तत्रैव हेत्वन्तरमाह * व्यञ्जकमिति । कारकात्मकं कर्म तस्य मानवदनभिव्यञ्जकत्वान्न तमोनिवर्तकत्वमित्यर्थः ॥ १७० ॥ तर्हि मा ज्ञानं निवर्तिष्ट, सत्येव तस्मिन् कर्मणा मोक्षः स्यादित्याशङ्क्याह *यावदिति । मुक्तेः कर्मजन्यत्वेऽनित्यत्वं स्यादित्यर्थः ॥१७१॥ कर्मफलस्यानित्यत्वं प्रपञ्चयति *दक्षिणेति त्रिभिः । ज्ञानयुक्तैः उपास्तिसहितैः । कर्मसम्भारसम्भृत इत्यस्य सर्वत्र सम्ब-

निषिद्धैश्चाप्यधो जन्म कर्मसम्भारसम्भृतः ॥ १७३ ॥
धर्माधर्मांशसाम्ये च मनुष्यत्वं प्रपद्यते ॥
धर्मादिसाधना पुंसामज्ञानां नश्वरी गतिः ॥ १७४ ॥
ब्रह्माद्या स्थावरान्तैषा प्रत्यगज्ञानहेतुजा ॥
नामरूपादिचित्राढ्या स्वप्नमायेन्द्रजालवत् ॥१७५॥
अविद्यातिमिरोच्छित्तौ नानानिष्कृतमण्वपि ॥
कार्यकारणवद्वस्तु नानपास्तं तमोऽप्यतः ॥ १७६ ॥
यत एवमतः प्रत्यग्याथात्म्यप्रतिपत्तये ॥
प्रारब्धेयं प्रयत्नेन वेदान्तोपनिषत्परा ॥ १७७ ॥
अधिकारश्च सम्बन्धः प्रामाण्यं मेयनिर्णयः ॥
चातुर्विध्यं विचार्येदं वेदान्तोऽत्रावतारितः ॥१७८॥

इति वार्तिकसारे मेयपरीक्षा समाप्ता ।
इत्युपोद्धातः समाप्तः ।

न्धः॥ १७२ ॥ १७३ ॥ १७४ ॥ न केवलमनित्यं कर्मफलम्, अविद्याकृतत्वात् अनर्थरूपमपि, अतस्तस्माद्विरज्येतेत्यभिसन्धायाह * ब्रह्मेति । एषा कर्मगतिः ॥ १७५ ॥ किञ्चात्मन्यभिव्यक्ते सर्वमाभिव्यक्तं भवतीत्यात्मज्ञानस्यैव पुमर्थत्वमित्याह * अविद्येति ॥ १७६ ॥ आत्मज्ञानात्तदज्ञानध्वस्तावपि न कार्यकारणात्मकसमस्तवस्तुव्यक्तिः तदावरणस्य सत्त्वादित्याशङ्क्याज्ञानध्वस्तावावरणस्यापि नाशान्मैवमित्याह * नानपास्तमिति । यस्मादात्मनि ज्ञाते सर्वपुरुषार्थसमाप्तिः अज्ञाते च सर्वानर्थाप्तिस्तस्मादात्मज्ञानार्थत्वेन साधनचतुष्ट-

यसम्पन्नमधिकृत्यायं वेदान्तारम्भः सम्भवतीत्याह * यत-इति ॥ १७७ ॥ १७८ ॥

परं सहस्रा भुवि सन्ति मर्त्या-
स्त्वदर्थिनो राम तथापि मादृक् ॥
न लभ्यते दीनतमोऽतिदुःखी
पात्रं दयाया इह आत्मदाने ॥ १ ॥

इति बृहद्वार्तिकसारटीकायां मेयपरीक्षा
समाप्ता ॥ ४ ॥

इत्युपोद्घातः समाप्तः ।

प्रकरणचतुष्टयात्मकसम्बन्धवार्तिकसारस्थश्लोकसङ्ख्या १०४५॥

श्रुतिः॥उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्द्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मा-ँ्सान्यूवध्यँ्सिकताः सिन्धवो गुदा यकृच्च क्लोमा-

---

विद्यारण्यश्रीचरणैस्तात्पर्येणोपवर्णितः ॥
श्रुत्यर्थो यादृशः पूर्वाचार्यवाक्यैर्विभज्यते ॥ १ ॥

*उषा वा इति॥वैशब्दः स्मारणार्थः प्रसिद्धं ब्राह्ममुहूर्तं स्मारयति *मेध्यस्य–मेधार्हस्य। व्यात्तं–विवृतं मुखम्। क्रव्यादाग्निव्यावृत्त्यर्थमग्निं विशिनष्टि * वैश्वानर इति। शुद्धोऽग्निर्विवृतं मुखमित्यर्थः। आत्मा–शरीरम्।अश्वस्य मेध्यस्येति सर्वत्रानुषङ्गार्थं पुनर्वचनम्। *पाजस्यमिति। वर्णव्यत्ययेन(१) पादा अस्यन्ते यस्मिन्निति व्युत्पत्त्याऽश्वखुर उच्यते। दिशश्चतस्रोऽपि पार्श्वे। यद्यपि द्वे दिशौ द्वाभ्यां पार्श्वाभ्यां सम्बध्येते,तथाप्यश्वस्य चरिष्णुत्वेन चतुर्दिग्भिरपि सम्बन्धसम्भवात्तत्र दृष्टिरविरुद्धेति भावः। पर्शवः–पार्श्वास्थीनि। अङ्गानि–अनुक्तावयवाः। पर्वाणि–सन्धयः। अहोरात्राणि–ब्राह्मदैवपित्र्यमानुषाणि। प्रतिष्ठाः प्रतितिष्ठत्येतैरिति पादाः।नभो–नभस्था मेघाः,अन्तरिक्षस्योदरत्वोक्तेः। ऊवध्यम्–अश्वोदरस्थमपक्वमशनम्। सिन्धवो–नद्यः गुदस्थनाड्यः,बहुवचनात्। यकृच्च क्लोमानश्च हृदयाधस्थौ दक्षिणोत्तरमांसखण्डौ। क्लोमान इति दारशब्दवन्नित्यबहुवचनम्। उद्यन्नादित्यः पूर्वार्द्धः। मध्यान्हात् प्राक्तना दृष्टिरश्वस्य नाभेरूर्ध्वभागे

---

(१) पाजस्यमित्यत्रार्थकाले जकारस्थाने दकारकरणेन

नश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्द्धो निम्लोचन् जघनार्द्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥

अहर्वा अश्वं पुरस्तान्महिमाऽन्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमाऽन्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः सम्बभूवतुर्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वा

कर्तव्येत्यर्थः। निम्लोचन्—अस्तमयन्सूर्यः जघनार्द्धः अश्वस्य नाभेरपरार्द्धे मध्याह्नादनन्तरभाव्यादित्यदृष्टिः कार्या । विजृम्भते इत्यादौ प्रत्ययो न विवक्षितः । जृम्भणं—मुखविदारणम् । विद्योतनं विद्युत्, तत्र तद्दृष्टिः कार्येत्यर्थः । विधूननं—गात्रकम्पः । स्तनितं मेघगर्जनम् । मेहनं—मूत्रकरणं वृष्टिः । अश्वस्य हेषितशब्दे आरोपो नास्तीत्याह *वागेवेति ॥ १ ॥

अश्वं पुरस्तात्संज्ञपनात्पूर्वम् अहर्महिमा अश्वमन्वजायत,अहर्दृष्ट्या संस्कृतो महिमाख्यः सुवर्णग्रहो हवनीयद्रव्याधारपात्रविशेषो ऽश्वस्य प्रजापतिरूपत्वात्तं लक्षयित्वा प्रावर्तत इत्यर्थः । तस्य ग्रहस्य पूर्वे समुद्रे योनिरासादनस्थानं यत्र ग्रहः स्थाप्यते तत्पूर्वसमुद्रत्वेन ध्येयमित्यर्थः । सप्तम्यौ प्रथमार्थे । पूर्वः समुद्र इति । एनमश्वं पश्चादेतत्संज्ञपनानन्तरं रात्रिदृष्टिसंस्कृतो महिमाख्यराजतग्रहः प्रकृतमश्वं लक्षयित्वा प्रवृत्त इत्यर्थः । * तस्यापर इति ॥ तदासादनस्थाने पश्चिमसमुद्रदृष्टिः कार्येत्यर्थः । "एतौ वा" इत्याद्युक्तस्य पुनर्वचनमश्वस्तुत्यर्थम् । एवं हयो भूत्वेत्यादिरपि स्तुत्यर्थमेव । हय इत्यादयो जातिविशेषाः । देवानवहत्—देवानां देवत्वं प्रापितवान् प्रजापतित्वा-

ऽसुरानश्वो मनुष्यान् समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥

इत्युपनिषदि प्रथममश्वब्राह्मणं समाप्तम् ।

ॐनमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो
वंशऋषिभ्यो नमो गुरुभ्यः ॥
बृहदारण्यकव्याख्यां कर्तुमादावुदीरितः ॥
उपोद्धातोऽथ तात्पर्यात्तद्व्याख्याऽऽरभ्यते स्फुटा ॥ १ ॥
अरण्याध्ययनादेतदारण्यकमुदीर्यते ॥
बृहत्त्वाद् ग्रन्थतोऽर्थाच्च बृहदारण्यकं मतम् ॥ २ ॥
बृहदारण्यके काण्डत्रयमाद्यं मधु स्मृतम् ॥
द्वितीयं याज्ञवल्क्याख्यं तृतीयं खिलसंज्ञकम् ॥ ३ ॥
उपदेशोपपत्ती द्वे उपास्तिश्चेति ते त्रयः ॥
अर्थाः क्रमेण काण्डानां प्राधान्येन निरूपिताः ॥ ४ ॥
मधुकाण्डे तु चत्वारोऽध्यायास्तत्राद्ययोर्द्वयोः ॥
प्रवर्ग्यसंज्ञकं कर्म प्रोक्तं नोपनिषत्ततः ॥ ५ ॥

त् । वाजी गन्धर्वानवहादित्यनुषज्यते * समुद्र इति । समुत्पद्य द्रवन्ति लीयन्ते भूतान्यस्मिन्निति समुद्रः परमात्मा । बन्धुः स्थितिहेतुत्वात्, एतत्सर्वमभिप्रेत्याह * समुद्र इति ॥ २ ॥ इति टीकायां प्रथममश्वब्राह्मणं समाप्तम् ॥ १ ॥

उक्तानुवादपूर्वकं प्रतिज्ञातमर्थं शिष्यावधानाय स्मारयति । * बृहदिति ॥ १ ॥ * अरण्येति । बृहदारण्यकशब्दनिर्वचनेनारण्ये नियमेनोपनिषदमधीत्य तदुक्तान्तरङ्गबहिरङ्गसर्वसाधनानुष्ठायिनामेव विद्या फलवतीत्युक्तं भवति ॥ २ ॥ इदानीं शिष्यबुद्धिसौकर्यायोपानिषदि काण्डादिसङ्ख्यां तत्प्रति-

विद्यासान्निधिपाठेऽपि विद्यांशत्वं न कर्मणः ॥
अरण्याध्ययनायैव विद्यासन्निधिरिष्यते ॥ ६ ॥
गुणोपसंहृतावेतत्सूत्रकारेण वर्णितम् ॥
अतस्तृतीयमारभ्य व्याख्यानं न तु पूर्वयोः ॥ ७ ॥
अध्यारोपापवादाभ्यां मधुकाण्डं प्रवर्तते ॥
अध्यारोप्य तृतीयेन चतुर्थेन त्वपोद्यते ॥ ८ ॥
षड् ब्राह्मणानि ज्ञेयानि तृतीये ब्राह्मणत्रयम् ॥
आद्यं संसारसीमान्तसाधनप्रतिपादकम् ॥ ९ ॥
चतुर्थे तत्फलं प्रोच्य विद्याविद्ये च सूत्रिते ॥
विस्तरात्संग्रहाद्वृत्तिराविद्याया अथोभयोः ॥ १० ॥
विद्यासूत्रादधस्ताद्यत्साधनं सफलं श्रुतम् ॥
प्रतियोगितया सर्वं तद्विद्यास्तुतये भवेत् ॥ ११ ॥
हिरण्यगर्भप्राप्तिर्या कर्मोपासनसाधिता ॥
साऽपि संसार एवातो विद्यैवैका विमुक्तिदा ॥ १२ ॥
प्रथमब्राह्मणे ह्यश्वे विराड्दृष्टिर्विधीयते ॥
संसाराभिमुखीभूतब्रह्मलोकार्थिनं प्रति ॥ १३ ॥
सत्स्वप्यन्यप्रतीकेषु हय एवेह गृह्यते ॥

पाद्यार्थं च विभज्य दर्शयति * बृहदित्यादिना ॥३॥४॥५॥६॥ * गुणेति । "वेधाद्यर्थभेदात्" [व्या. ३-३-२५] इत्याधिकरणे "सर्वं प्रविध्य" इत्यादिमन्त्राणां विद्यासन्निधिपाठात्तदङ्गत्वमाशङ्क्य लिङ्गादिना प्रथममेव तेषां कर्मभिरन्वितत्वात्सान्निधिमात्रेऽपि न विद्यया सम्बन्ध इत्युक्तमित्यर्थः ॥७॥८॥९॥१०॥११॥१२॥ *प्रथमेति ॥ अश्वे विराड्दृष्टिरित्युपलक्षणम् । अहङ्ग्रहाविषयं दर्शनं विधीयते इति द्रष्टव्यम् ॥१३॥ नन्वश्वमेधस्याङ्गबाहुल्ये कस्माद-

प्राधान्यादश्वमेधस्य हयनामाङ्कितत्वतः ॥ १४ ॥
क्रतुराडश्वमेधोऽयं तत्र मुख्यतमो हयः ॥
एतस्मादधिकं किंवा प्रतीकमधिकं भवेत् ॥ १५ ॥
कर्माङ्गमश्वसम्बन्धादुपास्तिरिति चेन्न तत् ॥
कर्मोपास्त्योरेकफले विकल्पस्य श्रुतत्वतः ॥ १६ ॥
यजते योऽश्वमेधेन यश्चैवं वेद तं क्रतुम् ॥
सर्वपापविनाशादि तयोस्तुल्यमिति श्रुतिः ॥ १७ ॥
उपासनस्य स्वातन्त्र्यात्कर्मानधिकृतोऽपि च ॥
मनसा कल्पयित्वाऽश्वं विराड्रूपेण चिन्तयेत् ॥१८॥
अश्वस्याङ्गेषु संयोज्या उषःकालादिदृष्टयः ॥
उत्कृष्टदृष्टिर्हीने स्यादिति सूत्रकृदब्रवीत् ॥ १९ ॥
अश्वसंज्ञपनात्पूर्वं पश्चादपि च यौ ग्रहौ ॥

श्वाख्याङ्गविषयमेवोपासनमुच्यते? तत्राह *सत्स्विति॥१४॥१५॥ अङ्गोपासनस्य कर्मसमृद्धिहेतुत्वाद् ब्रह्मलोकार्थित्वं कथमुक्तम्? इति शङ्कते * कर्माङ्गमिति । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद"इति श्रुतौ "पापं तितीर्षुरश्वमेधं तदुपास्तिं वा कुर्यात्" इत्युपास्तेः स्वतन्त्रफलत्वश्रवणान्न कर्माङ्गतेत्याह * न तदिति ॥ १६ ॥ १७ ॥ एवं सति अश्वमेधानधिकृतब्राह्मणानामपि उक्तोपास्तावधिकारः सिद्ध्यतीत्याह *उपासनस्येति ॥ १८ ॥ उषा वा अश्वस्येत्याद्यर्थमाह * अश्वस्येति । आश्वमेधिकाश्वशिरस्युषसो मुहूर्त्तविशेषस्य दृष्टिः कार्या, आदिना तस्यैव चक्षुराद्यङ्गेषु सूर्यादिदृष्टयः कार्या इत्यर्थः । उक्तेऽर्थे "आदित्यादिमतयश्चाङ्ग उपपत्तेः"[४-१-६]इति सूत्रं प्रमाणयति * उत्कृष्टदृष्टिरिति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

महिमाख्यावहोरात्रदृष्टी कुर्यात्तयोः क्रमात् ॥ २० ॥
समुद्रे वडवा यद्वदुत्पद्याश्रित्य वर्तते ॥
परात्मनि विराडश्वस्तथैवेति विचिन्तयेत् ॥ २१ ॥
अश्वोपास्तिरियं ज्ञेया प्रथमब्राह्मणोदिता ॥
द्वितीयब्राह्मणे सम्यक् फलमस्याः प्रवक्ष्यते ॥ २२ ॥
पृथक् फलस्याकथनाद्ब्राह्मणद्वयवर्णितम् ॥
एकोपासनमेवेति विज्ञातव्यमुपासकैः ॥ २३ ॥
प्रतीकयोरश्ववह्न्योर्विभेदाद्ब्राह्मणद्वयम् ॥
अश्वप्रतीके वैराजरूपोपास्तिरिहोदिता ॥ २४ ॥

इति बृहदारण्यकवार्त्तिकसारे प्रथमाध्याये
प्रथममश्वब्राह्मणं समाप्तम्

द्वितीयब्राह्मणे वन्हेरश्वमेधोपयोगिनः ॥
उपासनं विराड्बुद्ध्या कार्यत्वेन विधीयते ॥ १ ॥
अश्वमूर्द्धादिषु यथा ह्युषःकालादिदृष्टयः ॥
अग्निमूर्द्धादिषु तथा ज्ञेयाः प्राच्यादिदृष्टयः ॥ २ ॥
पक्ष्याकाराश्रितो योऽग्निः प्राग्दिगाद्यखिलात्मकः ॥

"अहर्वा" इत्यादेरर्थं तात्पर्यतः संगृह्णाति * अश्वेति ॥ २४ ॥

इति वार्तिकसारटीकायां प्रथममश्वब्राह्मणं समाप्तम् ।

उत्तरब्राह्मणसमुदायार्थं संगृह्णाति * द्वितीयेति । ॥ १ ॥ २ ॥ नन्वश्ववदग्नेः शिरआद्यभावात्कथं प्रागादिदृष्टिस्तत्राह * पक्षीति । इदानीं ब्राह्मणद्वयप्र-

सोऽप्सु प्रतिष्ठित इति ध्याताऽपि प्रतितिष्ठति ॥ ३ ॥
प्रतिष्ठागुणविज्ञानस्यैवैतत्फलमीरितम् ॥
प्रधानोपासनफलं विराट्प्राप्तिः प्रवक्ष्यते ॥ ४ ॥
गुणस्य यस्य सम्प्रोक्तं प्रधानादपरं फलम् ॥
तद्गुणोपासनं पुंस इच्छयैव विकल्प्यते ॥ ५ ॥
तद्विशेषफलानिच्छोर्विनाऽप्येतं गुणान्तरैः ॥
प्रधानोपास्तिसम्पूर्णा मुख्योपास्तिफलं भवेत् ॥ ६ ॥
उषःकालादिवपुषमश्वं प्राच्यादिदेहकम् ॥
अग्निं चोपासकः स्वात्मस्वरूपत्वेन चिन्तयेत् ॥ ७ ॥
ननु प्रतीकमेवात्र विराड्बुद्ध्या विचिन्त्यते ॥
न प्रतीकेऽहंग्रहोऽस्ति सूत्रकारेण वारणात् ॥ ८ ॥
मैवं फलं विराड्भावः श्रुतः सोऽहंग्रहं विना ॥
न सिध्येत्सूत्रकारेण तत्क्रतुन्यायवर्णनात् ॥ ९ ॥

तिपाद्योपास्तिक्रमं दर्शयिष्यन् प्रधानफलकाङ्क्षिणां फलान्तरसाधनगुणोपासनमैच्छिकमिति दर्शयितुं तत्प्रतिपादिकाम् "एषोऽप्सु प्रतिष्ठितः" इत्यादिवक्ष्यमाणश्रुतिमर्थतः पठति * सोऽप्सु प्रतिष्ठित इति। प्रतिष्ठालक्षणमेतत्फलं सर्वात्मकोऽग्निरप्सु प्रतिष्ठित इति यद् गुणोपासनं तस्यैवेत्यर्थः ॥ ३ ॥ ४ ॥ उक्तन्यायमन्यत्राप्यतिदिशति * गुणस्येति ॥ ५ ॥ ६ ॥ प्रधानोपास्तिप्रकारमाह * उष इति ॥ ७ ॥ अश्वाग्न्योः स्वात्मरूपत्वेन चिन्तनमनुपपन्नं "न प्रतीकेन हि सः"[४-१-४]इति सूत्रविरोधादिति शङ्कते * नन्विति ॥ ८ ॥ फलश्रुत्यन्यथानुपपत्त्याऽहङ्ग्रहोपास्तिरेवेयमिति परिहरति *मैवमिति। तत्र हेतुमाह

यादृक्संकल्पयुक्तः सन्नुपास्ते तादृगाप्नुयात् ॥
फलमित्येष एवात्र तत्क्रतुन्याय ईरितः ॥ १० ॥
विराड्भावमसंकल्प्य न विराड् भवति स्वयम् ॥
अतः श्रुतफलावाप्तौ भवत्येव ह्यहङ्ग्रहः ॥ ११ ॥
सर्वात्मत्वोपासनेषु कुतोऽहङ्ग्रहवर्जनम् ॥
अनन्तर्भाव्य चात्मानं कथं सर्वात्मता भवेत् ॥ १२ ॥
अतद्भावफलेष्वेव प्रतीकं समुपास्यते ॥
तद्भावापादकेष्वात्मा गुणैस्तैस्तैरुपास्यते ॥ १३ ॥
आत्मोपासनबुद्ध्यैवमश्वाग्नी अत्र वर्णितौ ॥
वाचं धेनुमितीवात्र न प्रतीकप्रधानता ॥ १४ ॥
प्रतीकस्य प्रधानत्वे निषिद्धोऽहङ्ग्रहोऽन्यथा ॥

---

*सूत्रेति ॥ ९ ॥ "तत्क्रतुश्च"[४-३-१५]इति सूत्रावयवस्यार्थमाह * यादृगिति ॥ १० ॥ ११ ॥ न केवलमनयोरेव प्रतीकयोरहङ्ग्रहत्वं, प्रज्ञेत्येवमुपासीतेत्यादिनाऽपि तद्वक्ष्यत इत्यभिप्रायेणाह * सर्वेति ॥ १२ ॥ यत्रोपास्यप्राप्तिर्न फलं तत्र नाहङ्ग्रहता, यत्र तत्प्राप्तिः फलत्वेन श्रूयते तत्राहङ्ग्रहताऽऽवश्यकेति नियममाह * अत इति ॥ १३ ॥ तस्मादश्वाग्न्योरात्मत्वेन चिन्तनम् उपपन्नमित्याह * आत्मेति । तर्हि "न प्रतीक" इत्यादिसूत्रविरोधः ? इत्याशङ्क्य, यत्र "वाचं धेनुम्"इत्यादौ प्रतीकस्यैव प्राधान्यं तस्य चात्मत्वेन चिन्तनं निषिध्यते, प्रकृते तदभावान्न तन्निषेध इति न सूत्रविरोध इत्याह * वाचमिति ॥ १४ ॥ उक्तव्यवस्थानङ्गीकारे बाधकमाह * अन्यथेति । तस्याहङ्ग्रहत्वं सर्वसम्मतमिति

---

(१) अप्रतीकालम्बनान्नयतीति बादरायण उभयथा ऽदोषात्तत्क्रतुश्च इति सूत्रम् ।

प्रणवे ब्रह्मचिन्तायां लुप्येताहङ्गहो ध्रुवम् ॥ १५ ॥
आत्मानमश्वमग्निं च चिन्तयित्वाऽथ तं हयम् ॥
काललोकादिधर्माणं समालब्धुं समुत्सृजेत् ॥ १६ ॥
अब्दमात्रं मयोत्सृष्टो विमुक्तप्रग्रहो हयः ॥
अब्दादूर्ध्वं मदात्मानं मदर्थं हयमालभे ॥ १७ ॥
मदात्मभ्योऽन्यदेवेभ्यो ददाम्यन्यपशूनहम् ॥
अश्वेनान्यैश्च पशुभिरालब्धैरस्मि तर्पितः ॥ १८ ॥
इति ध्यात्वाऽश्वमेधस्य फलत्वेनोदितं रविम् ॥
संवत्सरात्मकं ध्यात्वा पुनरग्निं विचिन्तयेत् ॥ १९ ॥
क्रत्वात्मसाधकत्वेन वन्हिरेषोऽर्कनामकः ॥
सर्वलोकात्मकस्तौ द्वावश्वमेधार्कनामकौ ॥ २० ॥
तन्नामानौ भास्कराग्नी फलसाधनरूपिणौ ॥

भावः ॥ १५ ॥ एवं प्रसङ्गागतं परिसमाप्य प्रकृतमुपास्तिक्रममाह *आत्मानमित्यादिना ॥ १६ ॥ *विमुक्तप्रग्रहो हयः इति । स्वच्छन्द इत्यर्थः ॥१७॥१८॥ * फलत्वेनोदितमिति । "य एषः" इत्यादिवक्ष्यमाणश्रुतेरित्यर्थः * संवत्सरेति । आदित्योदयास्तमयाभ्यामहोरात्रादिद्वारा हि संवत्सरव्यवस्था ततस्तन्निर्मातुस्तस्य युक्तं तदात्मकत्वमिति भावः ॥ १९ ॥ अग्निचिन्ताप्रकारमाह * क्रत्वात्मेति । यः क्रतुस्वरूपसाधकत्वेन स्थितः प्रागादिदिगात्मत्वेन दृष्टः सर्वलोकात्मकः सोऽर्कनामेति चिन्तयेदित्यर्थः । अग्न्यादित्यौ पुनरश्वमेधत्वेन चिन्तयेदित्याह * तौ द्वाविति ॥ २० ॥ अक्रियात्मनोस्तयोः कथमश्वमेधत्वमित्याशङ्क्य साध्यसाधनयोरभेदाविवक्षयेत्याह

निवार्त्तिते स्वाधिकारे पश्चादेकत्वमश्नुतः ॥ २१ ॥
एकत्वरूपः प्राणात्मा मृत्युशब्दोक्त ईश्वरः ॥
सोऽहमस्मीत्यभिध्यायेदातादात्म्याभिमानतः ॥२२॥
इहैव देवो भूत्वाऽसौ शरीरे पतिते ततः ॥
पुनर्देहं न गृह्णाति मृत्युर्भूत्वाऽवतिष्ठते ॥ २३ ॥
सर्वदेवसमष्ट्यात्मा द्वैतैकत्वात्मकः प्रभुः ॥
भवत्युपासकः सोऽत्र मृत्युः संहारहेतुतः ॥ २४ ॥
उपास्तितत्फले प्रोक्ते निष्कृष्यात्रार्थवादतः ॥
अर्थवादस्य तात्पर्यमतः परमुदीर्यते ॥ २५ ॥
अवान्तरं महच्चेति द्विधा तात्पर्यमेतयोः ॥
महातात्पर्यमत्र स्यादुपास्याग्निप्रशंसनम् ॥ २६ ॥
अवान्तरं तु तात्पर्यमग्न्युत्पत्तावतो जनिम् ॥
वन्हेर्वक्तुमियं सृष्टेः प्रागवस्थाऽत्र वर्ण्यते ॥ २७ ॥

* तन्नामानाविति । अश्वमेधस्तच्छब्दार्थः ॥ २१ ॥ २२ ॥ एवम्भूताग्न्यादित्यौ येन सूत्रात्मना स्वाधिकारान्ते ऐक्यमाप्नुतः सोऽहमस्मीति स्वस्य हिरण्यगर्भत्वाभिमानपर्यन्तं चिन्तयतः फलमाह * इहैवेति ॥ २३ ॥ मृत्युशब्दस्यात्र विवक्षितमर्थमाह * सर्वदेवेति । * द्वैतैकत्वात्मक इति । नानारस इत्यर्थः । मृत्युर्भवतीति सम्बन्धः । हिरण्यगर्भसायुज्यं प्राप्नोतीत्यर्थः । तस्य मृत्युशब्दार्थत्वे हेतुमाह * संहारेति । वाय्वात्मके तस्मिन्नग्न्यादीनां संवरणादित्यर्थः ॥२४॥ वृत्तानुवादपुरःसरमुत्तरग्रन्थप्रतिपाद्यार्थमाह *उपास्तीति । अत्र–प्रकृतब्राह्मणे एवम् अर्थवादस्योभयपरत्वे सत्यग्न्युपास्तिप्रकरणे किं "नैवेह किञ्चन"इत्यादिकथनेनेति न शङ्क्यमित्याह * अत इत्यादिना ॥२५॥२६॥२७॥ प्रागवस्थाप्रतिपादकवाक्यमर्थतः

नैवेह किञ्चनाग्रेऽभून्मृत्युनैवेदमावृतम् ॥
इति श्रुतौ प्रागवस्था तत्रैतत्प्रविचार्यते ॥ २८ ॥
प्रागवस्था शून्यरूपा सद्रूपा वेति संशये ॥
नैवेह किञ्चनेत्युक्तेः शून्यं स्यादिति केचन ॥ २९ ॥
मैवं यतः श्रुतिः साक्षात्सत्त्वमेवावदत्स्वयम् ॥
कार्यकारणयोः स्पष्टं मृत्युनैवेति सादरा ॥ ३० ॥
मृत्युना कारणेनेदं कार्यं सर्वं समावृतम् ॥
आवृतौ कारकाभावे श्रुतिर्नावक्ष्यदीदृशम् ॥ ३१ ॥
सत्तामात्रस्वरूपं यद् ब्रह्माज्ञातसतत्त्वकम् ॥
मृत्युर्जनिमतः साक्षात्तत्राशेषजगल्लयात् ॥ ३२ ॥
लयो नामात्र नाभावस्तस्य वस्त्वविभेदतः ॥
भिन्नत्वेन परैरिष्टो नाभावो वस्तुनः पृथक् ॥ ३३ ॥

पठति * नैवेति । प्रागवस्थास्वरूपं निर्णेतुं विमृश्य पूर्वपक्षयति * तत्रेत्यादिना ॥ २८ ॥ २९ ॥ "मृत्युनैवेदमावृतम्" इत्यादिवाक्यशेषविरोधान्न प्रागवस्थायाः शून्यतेति सिद्धान्तयति । * मैवमिति ॥ ३० ॥ उक्तार्थं विवृणोति * मृत्युनेति ॥ ३१ ॥ प्रसिद्धमृत्योर्जगद्धेतुत्वाभावात्तेन कथं कार्यस्यावृतिरित्याशङ्क्य अज्ञानोपहितं जगत्कारणं ब्रह्मैव मृत्युशब्देनोच्यत इत्याह * सत्तेति । जनिमतः, कारणमिति शेषः । जगत्कारणस्य मृत्युत्वे युक्तिमाह * तत्रेति ॥ ३२ ॥ ननु ब्रह्मणि जगल्लयाङ्गीकारे ध्वंसवत्तत्र तत्प्रागभावस्यापि सम्भवात् कथं सृष्टेः प्राक् कार्यसत्त्वमिति तत्राह * लय इति । तत्र हेतुमाह * तस्येति । ध्वंसादेर्भावत्वं च युक्तितो वक्ष्यति । तर्हि ध्वंसो न भावाद्भिन्न इति निषेधानुपपत्तिरप्रसक्तत्वात्तत्राह *भिन्नत्वेनेति ॥ ३३ ॥ तर्हीदानीं घटो नेति व्यवहारो न स्या-

सूक्ष्मं वस्त्वनभिव्यक्तमपश्यन् मन्ददृक् पुमान् ॥
नास्तीत्यभावतां वक्ति शून्यता नास्ति तावता॥३४॥
अभिव्यक्त्यनभिव्यक्ती भावाभावौ तथासति ॥
नैवेहेत्यनभिव्यक्तिमपेक्ष्य श्रुतिरब्रवीत् ॥ ३५ ॥
नाभिव्यक्ते नामरूपे सृष्टेः पूर्वं तथापि च ॥
विद्येते इत्यभिप्रेत्य श्रुतिरावृततां जगौ ॥ ३६ ॥
सन्मूलाः सदवस्थानाः सल्लया अखिलाः प्रजाः ॥
इति कालत्रयेऽप्यस्य जगतः सत्त्वमब्रवीत् ॥ ३७ ॥
मृदं घटं कपालं च पश्यामस्तत्र वादिनः ॥
प्रागभावं मृदि प्राहुः कपाले ध्वंसमूचिरे ॥ ३८ ॥
एवं च वाद्यभिमतावभावावनुभूतितः ॥
मृत्कपालात्मकौ भावौ सदद्वैतं ततो भवेत् ॥ ३९ ॥

दत आह * सूक्ष्ममिति ॥ न हि मूढव्यवहाराद्वस्तुसिद्धिर्देहात्मव्यवहारेष्वदृष्टेरिति भावः ॥ ३४ ॥ स्वमते भावाभावयोः स्वरूपं वदन् फलितमाह * अभिव्यक्तीति ॥ ३५ ॥ उक्तार्थं स्पष्टयति * नाभिव्यक्त इति । अनभिव्यक्ते इत्यर्थः ॥ यद्यपीति शेषः ॥ ३६ ॥ सृष्टेः प्राक्कार्यसत्त्वे "सदेव सोम्येदम्" इत्यादिसदद्वैतश्रुतिविरोध इत्याशङ्क्य सतामपि कार्याणां कारणाधीनसत्ताकत्वान्नोक्तविरोध इत्यभिप्रेत्य सतो जगदुपादानत्वप्रतिपादिकां "सन्मूलाः सोम्येमाः" इत्यादिश्रुतिमर्थतः पठति । *सदिति । *जगतः सत्त्वमिति ।कारणसत्तयेति शेषः ॥३७ ॥ नन्वेवमपि कार्यध्वंसादेरनुभवसिद्धत्वान्नाद्वयत्वं तत्राह । *मृदमित्यादिना । मृदादिव्यतिरेकेण घटप्रागभावादेरनुपलम्भाद्वादिवाक्यस्य तदनुभवस्य चाप्रमाणत्वाज्जगद्ध्वंसादि सन्मात्रमेवेत्यर्थः ॥ ३८ ॥ ३९ ॥ श्रुतिप्रत्यक्षाभ्यां कार्यकारणयोः

सदेवागमतः सिद्धं प्रत्यक्षाच्च सदीक्ष्यते ॥
अनुमानाच्च सत्सर्वं यथा तदधुनोच्यते ॥ ४० ॥
अनुमेयं जगत्सृष्टेः पूर्वं सत्कारणं तथा ॥
सत्कार्यमुभयं चैतत्प्रयोगेण प्रदश्यते ॥ ४१ ॥
स्रक्ष्यमाणं जगत्सर्वं सत्कारणकमिष्यताम् ॥
कार्यत्वाद्धटवद्वेदासिद्धा ऽऽकाशादिकार्यता ॥ ४२ ॥
अङ्कुरो मृदिते बीजे बीजाभावात्प्रजायते ॥
इत्ययुक्तं बीजदाहादङ्कुरोत्पत्त्यदर्शनात् ॥ ४३ ॥
बीजस्यावयवा एव जनयेयुरिहाङ्कुरम् ॥
बीजं त्ववान्तरावस्था ज्ञेया पिण्डो यथा मृदः ॥४४॥
मृत्तिका घटहेतुः स्यान्मृदस्तत्रानुवर्तनात् ॥
मृदस्त्ववान्तरावस्थापिण्डस्याननुवर्त्तनात् ॥ ४५ ॥
पिण्डे घटे कपालादौ याऽनुवृत्ता विभाति सा ॥
मृदेव सर्वहेतुः स्यात्कार्याः पिण्डादयोऽखिलाः॥४६॥
विरुद्धानेककार्याणां युगपज्जन्म नेष्यते ॥

सत्त्वमुक्तमनुवदन्ननुमानेनापि तत्साधयति * सदेवेत्यादिना ॥ जगन्मात्रस्य पक्षत्वे आकाशादौ भागासिद्धिमाशङ्क्य "आत्मन आकाशः सम्भूतः" इत्यादिश्रुत्या तस्यापि कार्यत्वं सिद्धमित्याह * वेदेति ॥ ४० ॥ ४१ ॥ ४२ ॥ बीजादिनाशादङ्कुराद्युत्पत्तिदृष्टेरुक्तानुमानं बाधितमित्यभिप्रायेणाशङ्कते * अङ्कुर इति । बीजनाशान्न कार्योत्पत्तिरतिप्रसङ्गादिति दूषयति * इत्ययुक्तमिति ॥ ४३ ॥ केन तर्ह्यङ्कुरजनिस्तत्राह * बीजस्येति ॥ ४४ ॥ मृत्पिण्डदृष्टान्तं व्यनक्ति * मृत्तिकेत्यादिना ॥ ४५ ॥ ४६ ॥ पिण्डादिनाशस्याहेतुत्वे पिण्डादौ सत्यपि घटाद्युत्पत्तिमा-

एकस्मात्कारणात्तेन पिण्डादेः क्रमभाविता ॥ ४७ ॥
पिण्डाद्यखिलकार्येण विना मृत्कापि नेष्यते ॥
अतोऽसती मृदिति चेन्न मानेनोपलम्भनात् ॥ ४८ ॥
असाधारणरूपेषु व्यावृत्तेष्वितरेतरम् ॥
बहुष्वेकं यदा भाति प्रत्यक्षं कारणं तु तत् ॥ ४९ ॥
कारणस्यास्तिता तस्मात्सिद्धा कार्योदयात्पुरा ॥
कार्यस्याप्युदयात्पूर्वं यथा ऽस्तित्वं तथोच्यते ॥ ५० ॥
सत्त्वपूर्वं जगत्कार्यं तमोऽन्तस्थघटादिवत् ॥
अभिव्यक्तत्वधर्मित्वादन्यथा स्यान्नृशृङ्गवत् ॥ ५१ ॥
सत्यामपि हि सामग्र्यां वन्ध्यापुत्रो ह्यसत्त्वतः ॥
अभिव्यक्त्यालम्बनत्वं न कदाचित्प्रपद्यते ॥ ५२ ॥
सदेव चेत् सदा कार्यं घटः पिण्डकपालयोः ॥

शङ्क्य नेत्याह * विरुद्धेति ॥ ४७ ॥ पिण्डस्यापि कार्यत्वे कार्यावस्थानापन्नमृदोऽनुपलम्भात्सत्कारणवादो न स्यादित्याशङ्क्यासिद्ध्या दूषयति * पिण्डेति * मानेनेति ॥ अन्वयव्यतिरेकानुसन्धानप्रत्ययेन ॥ ४८ ॥ तमेव व्यनक्ति * असाधारणेत्यादिना ॥ ४९ ॥ ५० ॥ कार्यसत्त्वेऽप्यनुमानं रचयति *सत्त्वेति * अभिव्यक्तत्वेति ॥ अभिव्यज्यमानत्वादिति यावत्। हेतोरप्रयोजकत्वशङ्कां निरस्यति * अन्यथेति ॥ ५१ ॥ ननु नृशृङ्गस्यापि अनभिव्यक्तिर्नासत्त्वात् किन्तु सामग्र्यसत्त्वादिति, नेत्याह * सत्यामिति ॥ ५२ ॥ प्रकृतानुमाने सदोपलब्धिप्रसङ्गं बाधकमाशङ्क्य निराह* सदेवेत्यादिना ॥ पिण्डकपालयोः काल इति सम्बन्धः। पिण्डावस्थायां कपालावस्थायां चेत्यर्थः।

कालेऽपि चोपलभ्येतेत्येतच्चोद्यं न युज्यते ॥ ५३ ॥
विद्यमानत्वमात्रेण नाभिव्यक्तिर्भवेद्यतः ॥
सद्वस्त्वेवानभिव्यक्तं तत्सामग्र्यां च लक्ष्यते ॥५४॥
अविज्ञातो ज्ञातुमिष्टो ज्ञायमानोऽथ विस्मृतः ॥
स्मर्यते स्मृत इत्येवं सन्नेवं बहुधोच्यते ॥ ५५ ॥
लोके सामग्र्यभावाद्वा कुड्याद्यावृतितोऽथ वा ॥
सन्घटोऽपि न दृश्येत पिण्डस्थो नेक्ष्यते कुतः ॥५६॥
आवृतत्वादिति ब्रूमः पिण्डेनैव तदावृतिः ॥
न पिण्डस्थो घटः किन्तु मृन्निष्ठः पिण्डसंवृतः ॥५७॥
कुम्भदेशाद्भिन्नदेशं कुड्याद्यावरणं भवेत् ॥
अभिन्नदेशपिण्डेन कुम्भ आव्रियते कथम् ॥ ५८ ॥
एकस्मिन्नेव वियति चान्द्रं तेजोऽभिभूयते ॥
सौरेण तेजसा तद्वत्पिण्डेनाव्रियतां घटः ॥ ५९ ॥

उक्तेऽर्थे हेतुमाह * यत इति ॥ ५३ ॥ ५४ ॥ अभिव्यक्तिसामग्र्यभावे सतो घटादेरपि नाभिव्यक्तिरित्यत्रानुभवं प्रदर्श्य व्यवहारमपि दर्शयति * अविज्ञात इति ॥ ५५ ॥ सतोऽप्यनभिव्यक्तिमुपेत्य प्रकृते पिण्डसन्निकर्षानन्तरम् अप्रतिबद्धसामग्रीसत्त्वाद्घटोपलब्धिः स्यादिति शङ्कते * लोक इति ॥ ५६ ॥ असिद्ध्या दूषयति* आवृतत्वादिति ॥ घटोपादानं पिण्डस्तेन स कथमाव्रियेतेति तत्राह *नेति ॥ ५७ ॥ पिण्डादि न घटाद्यावरणं तेन समानदेशत्वान्न यदेवं न तदेवं यथा कुड्यादि इति शङ्कते * कुम्भेति ॥ ५८ ॥ उक्तानुमानं दूषयति * एकस्मिन्निति ॥ सामान्यव्याप्तौ सौरालोके व्यभिचार इत्यर्थः । विशेषव्याप्तौ तमसि व्यभिचार ऊह्यः ॥ ५९ ॥ पिण्डादेः कार्यत्वे घटाव-

एकस्यां मृदि पिण्डाद्याः कार्याः सन्ति सहस्रशः ॥
यस्याभिव्यक्तिसामग्री स्यात्तेनान्येऽत्र संवृताः ॥६०॥
पिण्डेनाव्रियते कुम्भः कुम्भेनापि कपालकम् ॥
कपालेनावृतः कुम्भ एवमन्योन्यसंवृतिः ॥ ६१ ॥
कुम्भेनैव कपालाख्याः कुम्भांशा भान्त्यतो घटः ॥
न कपालैरावृतश्चेन्न विभक्तैस्तदावृतेः ॥ ६२ ॥
यदि पिण्डावृतिः कुम्भः कुलालस्तर्हि साधनैः ॥
भङ्गायैवावृतेर्यत्नं कुर्यान्न घटनिर्मितौ ॥ ६३ ॥
एवं चोदयतस्तेऽत्र कोऽभिप्रायस्तमीरय ॥
किमुत्पत्तिं वारयसे किंवा दण्डादिसाधनम् ॥ ६४ ॥
आद्य इष्टो द्वितीये तु मा दण्डादि निवार्यताम् ॥
घटाभिव्यक्तिहेतुत्वाद् ग्राह्यं दण्डादिसाधनम्॥६५॥
अनेकसाधना यस्मादभिव्यक्तिर्जगत्यसौ ॥
वस्तुभेदादतो लोकसिद्धं साधनमिष्यताम् ६६ ॥
दीपेन व्यज्यते रूपं नवनीतं तथा घटः ॥
दण्डादिना ततः सर्वं सदेव व्यक्तितः पुरा ॥ ६७ ॥

स्थायामपि प्रतीतिः स्यादित्याशङ्क्य घटादिनैवावृतत्वान्नैवमित्याह * एकस्यामिति ॥ ६० ॥ ६१ ॥ कपालो न घटावरकः तद्भानेऽपि घटभानादित्याशङ्क्य कपालशब्देन भिन्नकपालो विवक्षित इत्याह *कुम्भेनेति ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ सत एव घटादेरभिव्यक्त्यङ्गीकारे दीपेनाप्यभिव्यज्येतेत्याशङ्क्यान्वयव्यतिरेकाभ्यां दण्डादेरेव तद्धेतुत्वान्नैवमित्याह * अनेकेति ॥ ६६ ॥ साधनभेदमुदाहरति * दीपेनेति ॥ फलितमाह * तत इति ॥ ६७ ॥ दीपेन तमसि नष्टे चक्षुरादि-

तमोविनाशनायैव दीपश्चेदस्तु तावता ॥
सदेव व्यज्यते सर्वमिति नैवापनुद्यते ॥ ६८ ॥
भावाभावोत्पन्ननष्टशब्दप्रत्ययभेदधीः ॥
अभिव्यक्तितिरोभावद्वैविध्यादुपपद्यते ॥ ६९ ॥
व्यक्तो दीपेन भावः स्याज्जातो व्यक्तस्तु दण्डतः ॥
पिण्डावृतस्त्वभावः स्यान्नष्टश्छन्नः कपालकैः ॥७० ॥
एवं व्यक्त्यावरणयोर्बहुत्वादेक एव सन् ॥
उच्यते बहुभिः शब्दैस्तदुदाह्रियते पुनः ॥ ७१ ॥
कुड्यावृतस्त्वसंस्पृष्टः स्पृष्टो व्यक्तस्तु पाणिना ॥
मोहावृतस्त्वविज्ञातो ज्ञातो व्यक्तः प्रमाणतः ॥ ७२॥
ननूदाहरणेष्वेषु तत्तदावृतिभङ्गतः ॥
अन्या का स्यादभिव्यक्तिर्यया कार्यं नियम्यते॥७३॥
अभिव्यक्तेरनन्यत्वे शिलया पिण्डभङ्गतः ॥

नैव रूपं व्यज्यते तत्कथं दीपेन रूपव्यक्तिरुक्तेत्याशङ्क्य एवमपि सदेवोपलभ्यत इत्यत्र न विवाद इत्याह * तम इति ॥ ६८ ॥ सत एवाभिव्यक्त्याद्यङ्गीकारे घटो विद्यते उत्पन्नस्तिरोहितो नष्टः इति ज्ञानभेदानुभवः कथमित्याशङ्क्य व्यञ्जकभेदेन व्यक्तितिरोभावभेदाङ्गीकारान्न दोष इत्याह * भावेत्यादिना ॥ ६९ ॥ ७० ॥ एकस्मिन्नेव घटे आवरणाभिव्यक्तिभेदाज्ज्ञानभेदो व्यवहारभेदोऽप्यस्तीत्याह * एवमित्यादिना ॥ ७१ ॥ ७२ ॥ नन्वेवमप्युक्ताभिव्यक्तेर्दुर्निरूपत्वान्न सत्कार्यसिद्धिरिति शङ्कते * नन्विति ॥७३॥ कथं दुर्निरूपत्वमिति चेत्, किम् अभिव्यक्तिरावरणभङ्गादन्याऽनन्या वा ? नाद्यः,अनुपलम्भादित्युक्त्वा अन्त्यं दूषयति *अभीति॥७४॥घटज्ञानेन तद्व्यक्त्यावरणनिवृत्त्योः पृथगुप-

अभिव्यज्येत कुम्भोऽयं विना दण्डादिसाधनैः॥७४॥
उच्यते तावदज्ञातज्ञातोदाहरणेऽन्तिमे ॥
भेदो विशद एवाभिव्यक्त्यावरणभङ्गयोः ॥ ७५ ॥
अज्ञातत्वावमृष्ट्यर्थमादित्सन्ते हि मानिनः ॥
मानानि, मानसम्बन्धादज्ञातत्वं च नश्यति ॥ ७६ ॥
मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् ॥
मेयाभिसङ्गतं तच्च मेयाभत्वं प्रपद्यते ॥ ७७ ॥
मेयाभत्वमभिव्यक्तिर्नश्येदज्ञातता तया ॥
घटोऽवगत इत्येतत्ततः सम्पद्यते फलम् ॥ ७८ ॥
एवं दीपप्रकाशेन सप्रकाशो घटो भवेत् ॥
घटनिष्ठप्रकाशोऽयं घटनिष्ठं तमो नुदेत् ॥ ७९ ॥
एवं दण्डादिना मृत्स्थो घटाकारः स्फुटो भवेत् ॥
पिण्डाकारस्तिरोधत्ते ततो दण्डाद्यपेक्ष्यते ॥ ८० ॥
शिलया पिण्डभागे तु व्यज्येतान्यत्तदा मृदि ॥
कार्यं विदलचूर्णादि तेनाप्यावृतता घटे ॥ ८१ ॥

लम्भादनुपलब्धिरसिद्धेति परिहरति *उच्यतइति ॥७५॥ उक्तं भेदवैशद्यम् उपपादयति * अज्ञातत्वेति ॥ मानिनः—प्रामाणिकाः ॥ ७६ ॥ उक्तमर्थं स्पष्टयति *मातुरित्यादिना। साभासबुद्ध्याश्रयं ज्ञानमादावुत्पद्यते, ततश्च विषयं स्पृष्ट्वा तदाकारं भजते, तदाकारभजनरूपाभिव्यक्त्या तदज्ञाननाश इत्यर्थः॥७७॥किञ्चावरणनाशो यथा ज्ञाततालक्षणफलाद्भिद्यते एवमभिव्यक्तेरपि, इत्यभिप्रेत्याह *घट इति ॥७८॥७९॥ उक्तन्यायमन्यत्राप्यतिदिशति * एवमित्यादिना ॥ ८० ॥ दण्डाद्यभावे तु पिण्डनाशे सत्यपि न घटव्यक्तिरित्याह *शिलयेति ॥ ८१॥८२॥दण्डाद्यु-

अतो नियतमेवात्र कार्याभिव्यक्तिसाधनम् ॥
सदेव व्यज्यते कार्यं नापूर्वं जायते ततः ॥ ८२ ॥
भाषामात्रविभेदोऽयमिति चेत्तर्ह्यवैदिकीम् ॥
त्यक्त्वा भाषां कार्यसत्तां वद वैदिकभाषया ॥८३॥
भूतभाविघटौ न स्तस्तव सन्तौ मते मम ॥
तयोर्ज्ञानं सद्विषयं वर्तमानस्य धीरिव ॥ ८४ ॥
अतीतानागतोऽर्थो ऽसन्निति यद्युच्यते तदा ॥
अतीतानागतज्ञानं भ्रान्तमेवैश्वरं भवेत् ॥ ८५ ॥
प्रागभावस्तथा ध्वंस इत्याद्या वाद्युदीरिताः ॥
अभावाः ब्रह्मकार्यत्वात्सद्रूपाः स्युर्घटादिवत् ॥ ८६॥
भावत्वस्याविशेषेऽपि यथा जलभुवोर्भिदा ॥
भावावान्तरभेदाः स्युः प्रागभावादयस्तथा ॥ ८७ ॥
लोकप्रसिद्धिमुल्लङ्घ्य किं भावत्वदुराग्रहात् ॥

पादाननैयत्ये व्यक्तिशब्देन घटाद्युत्पत्तिरेवोक्ता स्यान्नार्थभेद इति शङ्कते *भाषेति। अर्थभेदाभावमुपगम्य परिहरति *तर्हीति॥८३॥ अभ्युपगमं त्यजति * भूतेति । मम मते सन्ताविति सम्बन्धः । वैलक्षण्यान्तरमाह * तयोरिति । त्वन्मते, असद्विषयत्वमिति शेषः ॥ ८४ ॥ कार्यस्य सत्त्वे सर्वदोषं परिहृत्य तदसत्त्वे दोष-माह *अतीतेति ॥८५॥ ध्वंसादेर्भावत्वं तर्केण प्रसाध्य तदनु-ग्राह्यमनुमानमाह*प्रागिति ॥८६॥८७॥ ध्वंसादेर्जलादिवद्भावावि-शेषत्वकल्पनं व्यर्थं व्यावहारिकाभावत्वाङ्गीकारेऽपि तत्राद्वैतासि-द्धेरिति शङ्कते *लोकेति । *कार्यमिति । कार्यशब्दः फलवच-नः किंशब्देन सम्बध्यते। श्रुत्युक्तं सदद्वैतमुल्लङ्घ्यातिरिक्ताभा-वकल्पनवैयर्थ्यं तत्रापि तुल्यम् अभावव्यवहारस्यान्यथाप्युपप-

कार्यं तवेति चेत्ते वा किं कार्यं वेदलङ्घने ॥ ८८ ॥
अभावव्यवहारस्तु भावत्वेऽप्युपपद्यते ॥
भावान्तरमभावो हि कयाचित्तु व्यपेक्षया ॥ ८९ ॥
सदेव सर्वमित्युक्त्वा व्यावर्त्यं किं भवेदिद ॥
अभाव इति चेत्तर्हि सोऽभ्युपेयो बलात्त्वया ॥ ९० ॥
बाढमभ्युपगच्छामि शून्यत्वं भ्रान्तिकल्पितम् ॥
तन्निवर्त्याथ भावत्वं युक्तियुक्तमिहोच्यते ॥ ९१ ॥
किं प्रागभावः प्रध्वंसाद्भिद्यतेऽथ न भिद्यते ॥
अभेदे तेऽपसिद्धान्तो भेदे भेदकमुच्यताम् ॥ ९२ ॥
विलक्षणस्वरूपत्वं न तयोः शून्यमात्रयोः ॥
न चौपाधिकभेदः स्याच्छून्यस्योपाध्यसम्भवात् ॥९३॥
घटस्य प्रागभावो यः स पिण्डोपाधिको यदि ॥

त्तोरित्याह *तवेत्यादिना । तथाच लोकप्रसिद्धेर्निर्मूलत्वादुक्तमेवोपादेयमिति भावः ॥ ८८ ॥ ८९ ॥ अतिरिक्ताभावानङ्गीकारे सदेवेत्येवकारविरोधः व्यावर्त्याप्रसिद्धेरित्याशङ्क्य परिहरति । * सदेवेत्यादिना । परभ्रमकल्पितं यच्छून्यत्वं तत् सदेवेत्येवकारेण व्यावृत्यानन्तरमेकमेवाद्वितीयमित्यादिना भावत्वमेव युक्तिपूर्वमुच्यते इत्यर्थः । इह—सदेवेत्यादिवाक्ये ॥ ९० ॥ ९१ ॥ किञ्च युक्तिविरुद्धत्वादपि ध्वंसादिर्नाभ्युपेय इत्यभिप्रेत्य विकल्पयति * किमिति। भेदपक्षेऽपि स्वाभाविकविलक्षणधर्मवत्त्वात्तयोर्भेदः, औपाधिकधर्मवत्त्वाद्वा? इति पृच्छति * भेदे भेदकमिति ॥ ९२ ॥ आद्यं प्रत्याह * विलक्षणेति । द्वितीयं निराह * न चेति ॥९३॥ औपाधिकभेदाभावोऽसिद्धः, पिण्डस्थोऽभावः प्रागभावः कपालस्थो ध्वंस इति पिण्डकपालादिलक्षणोपाधिभेदेन

तर्ह्यत्र मानं वक्तव्यं प्रत्यक्षं तु न युज्यते ॥ ९४ ॥
नीरूपप्रागभावस्य चाक्षुषत्वमसङ्गतम् ॥
पिण्डे दृष्टे प्रागभावो दृष्ट इत्येष ते भ्रमः ॥ ९५ ॥
प्रागभावव्यवहृतिर्यदि पिण्डदृशस्तदा ॥
स एव प्रागभावोऽस्तु किमुपाधितया तव ॥ ९६ ॥
पिण्डत्वप्रागभावत्वे एकस्याप्यविरोधिनी ॥
स्वतः पिण्डोऽप्यपेक्ष्यान्यं प्रागभावत्वमश्नुते ॥ ९७ ॥
प्रागभावोऽस्ति दृष्टश्चेत्येवं तत्सत्त्वदर्शने ॥
भावस्यैवोपपद्येते न शून्यस्य निरात्मनः ॥ ९८ ॥
युक्तियुक्तं वैदिकं च मतं त्यक्त्वा दुराग्रहात् ॥
कुतर्कसमये मग्नः किं मुधा परिमुह्यसि ॥ ९९ ॥
अभावस्यापि भावत्वे कुतः कार्यमसद्भवेत् ॥

तयोर्भेदादित्याशङ्क्य निराकरोति * घटस्येति ॥ ९४ ॥ नीरूपस्याप्यभावस्यानुभवबलाच्चाक्षुषत्वमाशङ्क्य लोकानां तदनुभवाभावाद्वादिभ्रमस्य चार्थासाधकत्वान्नैवमित्याह * पिण्ड इति ॥ ९५ ॥ अस्तु वा पिण्डाक्षसन्निकर्षानन्तरं प्रागभावानुभवस्तथापि तस्य पिण्डविषयत्वेनाप्युपपत्तेर्नातिरिक्ताभावसिद्धिरित्याह * प्रागिति ॥ ९६ ॥ अभावगोचरधियः कथं भावविषयत्वम् इत्याशङ्क्य भावात्मकस्य पिण्डादेर्घटादिकमपेक्ष्याभावत्वमप्यविरुद्धमित्याह * पिण्डत्वेति । किञ्चाभावोऽस्तीत्यादिना सत्त्वादिधर्मितया प्रतीतस्य भावरूपत्वमेव वक्तुमुचितं न निःस्वरूपत्वमित्याह * प्रागिति ॥९८॥ ९९ ॥ अस्तु ध्वंसादेः कपालाद्यात्मकत्वं प्रकृते किमायातमित्याशङ्क्य कार्याभावाभावे ऽस्मदिष्टं कार्यसत्त्वं सिद्ध्यतीत्याह * अभावस्येति । कार-

कारणस्य तु भावत्वमविवादं मतेऽपि ते ॥ १०० ॥
नन्वत्रैकं स्वतःसिद्धं प्रत्यग्रूपमनन्यदृक् ॥
वस्त्विष्टं वेदसिद्धान्ते किमर्थे कार्यकारणे ॥ १०१ ॥
एवम्भूतात्मबोधार्थं कारणादि प्रसाध्यते ॥
उपायः सोऽवतारायेत्याचार्यैरेतदीरणात् ॥ १०२ ॥
सत्तत्त्वकमिदं सर्वमिति संसाध्य यत्नतः ॥
तस्यापि संविन्मात्रेण पूर्णतैवोच्यते स्वतः ॥१०३॥
कारणादिनिषेधेन नन्वद्वैतमभीप्सितम् ॥
तथाच नेतिनेतीति बोधस्योक्तमता मता ॥ १०४ ॥
बाढं किन्तु निषेधोऽयं नोपादेयतयोच्यते ॥
ऐकात्म्यमात्रबोधेन निषेधस्याप्यपह्नवात् ॥ १०५॥

णसत्त्वं तु निर्विवादमित्याह* कारणस्येति॥ १०० ॥एवमपि तव सिद्धान्तहानिरिति चोदयति*नन्विति । किमित्याक्षेपे । साध्येते इति शेषः।अद्वयत्वविरोधादिति भावः ॥ १०१ ॥ कार्यकारणतदभावविलक्षणाद्वितीयब्रह्मासिद्धये कारणादेरतुच्छत्वं साधयतो न सिद्धान्तहानिरिति परिहरति * एवमिति । तत्त्वज्ञानसिद्धौ कारणादि हेतुरित्यत्र मृल्लोहविस्फुलिङ्गेत्यादिवृद्धवाक्यमुदाहरति * उपाय इति ॥ १०२ ॥ नन्वेवमपि कारणादिसत्त्वे कथमद्वैतसिद्धिस्तत्राह * सदिति ॥ १०३ ॥ यदि कारणादिकं ब्रह्माधीनसत्ताकम् इति संसाध्य नेतिनेत्यादिना तदपि निषिध्य संविन्मात्रतया पूर्णत्वमुच्यते तर्हि मुक्तावन्तरङ्गत्वान्निषेधज्ञानमेवोपादेयं स्यादिति शङ्कते * कारणेति । एवं च कारणादिसत्त्वचिन्ता मुधेत्यर्थः ॥ १०४ ॥ निषेधबोधस्यान्तरङ्गत्वमङ्गीकरोति * बाढमिति । तस्योपादेयत्वमुक्तं धुनीते * किन्त्विति ॥ १०५ ॥ तर्हि कार्यादिसत्त्वनिषेधबोधयोः किमुपा-

निषेधबोधसद्बोधौ तयोः काऽत्र व्यवस्थितिः ॥
उच्यते नैतयोरंशभेदेनात्र व्यवस्थितिः ॥ १०६ ॥
यथा चूतफले बीजं त्याज्यं ग्राह्यस्तु तद्रसः ॥
नैवं जगति बोधाय त्याज्यं ग्राह्यं च भिद्यते ॥ १०७॥
किं तर्हि सर्वं सन्त्याज्यमुपादेयं तथाऽखिलम् ॥
रज्जुसर्पेऽखिलं त्याज्यं ग्राह्यं चाखिलमेव तत्॥१०८॥
न शिरोभागमुत्सृज्य पुच्छभागं प्रगृह्णते ॥
निखिलां सर्पतां त्यक्त्वा निखिलां रज्जुतां विदुः॥१०९॥
जगद्भावभ्रमं त्यक्त्वा ब्रह्मत्वेनैति पूर्णताम् ॥
ततः पुरुषचित्तस्य भेदाद्बोधौ व्यवस्थितौ ॥ ११० ॥
दृश्याभिमुखमेवैतच्चित्तं चेत्तन्निवृत्तितः ॥
दृङ्मात्रत्वावशेषाय निषेधोऽयं प्रशस्यते ॥ १११ ॥
नानात्वाख्यग्रहग्रस्तं चित्तमद्वैतवस्तुनि ॥
प्रवेशयति चिन्तेयं कार्यकारणसत्त्वगा ॥ ११२ ॥

देयमिति पृच्छति * निषेधेति । प्रपञ्चान्तःपातित्वादुभयमपि हेयमेवेत्याह * उच्यत इति ॥ १०६ ॥ तत्र व्यतिरेकदृष्टान्तमाह * बोधायेति । साक्षान्मोक्षसाधनायेति शेषः ॥ १०७ ॥ तर्ह्युपादेयज्ञानं किमिति पृच्छति * किमिति । प्रपञ्चान्तःपातिसर्ववस्तुत्यागावधिभूतपूर्णात्मज्ञानमेवेत्याह * सर्वमिति । उक्तमर्थं दृष्टान्तेनाह * रज्ज्वित्यादिना । निषेधज्ञानमपि हेयं चेत् कथं तस्य मुख्यत्वमङ्गीकृतमित्याशङ्क्य पुरुषमतिभेदेनेत्याह * तत इति । व्यवस्थितौ, गौणमुख्यत्वेनेति शेषः ॥ ११० ॥ उक्तव्यवस्थां स्फुटयति * दृश्येति ॥ १११ ॥ द्वैताभिनिविष्टचित्तस्याद्वैतावतारणार्थत्वान्न कार्यादिसत्त्वचिन्ताऽपि वृथेत्याह *नानात्वेति ॥ ११२ ॥ ननु पुरुषमतिभेदेन श्रुतिः कारणादि-

त्वम्पदार्थमुखेनायं तत्पदार्थमुखेन वा ॥
पूर्णोऽवशिष्यतां विद्वानित्येतच्छ्रुतिहृद्गतम् ॥ ११३ ॥
तस्मात्सत्कार्यमखिलं कारणेन सताऽऽवृतम् ॥
जगतः प्रागवस्थायां नामरूपे न हि स्फुटे ॥ ११४ ॥
प्रागवस्थामुपक्रम्य वह्न्युत्पत्त्यवसानया ॥
सृष्ट्या स्तोतुमिमं वह्निं सा सृष्टिरिह वर्ण्यते ॥११५॥
यत्सद्रूपं परं ब्रह्म संविन्मात्रसतत्त्वकम् ॥
अविज्ञातात्मयाथात्म्यं जगतः कारणं हि तत्॥११६॥
स्वाज्ञानादेव सद्ब्रह्म ग्रसिष्णु प्रभविष्णु च ॥
विनाऽज्ञानमसङ्गस्य कुतः स्यात्सर्वशक्तिता॥११७॥
अकारणं सदज्ञानात्कारणत्वं यथा भजेत् ॥
बह्वाकारत्वमित्येवं निराकारमपि स्वतः ॥ ११८ ॥

सत्त्वं तन्निषेधं च ब्रवीति चेत् तस्याः कुत्र मुख्यतात्पर्यं तत्राह । *त्वमिति।११३॥नैवेह किञ्चनेत्यादिवाक्यार्थमुपसंहरति *तस्मादिति ॥ १४ ॥ "तेजोरसो निरवर्तताग्निः" इत्यन्तग्रन्थतात्पर्यं सङ्क्षिप्य दर्शयति * प्रागवस्थामिति ॥ ११५ ॥ एवं प्रसङ्गप्राप्तं चोद्यमपोह्य प्रकृतं मृत्युशब्दार्थमेव पूर्वोक्तमनुवदति * यदिति । यदेवम्भूतं जगत्कारणं प्रसिद्धं तन्मृत्युशब्दवाच्यमित्यर्थः ॥ ११६॥ "अविज्ञातात्मयाथात्म्यम्"इत्यनेन स्वाश्रयविषयाविद्यासहितस्यैव ब्रह्मणः कारणत्वमुक्तमुपपन्नम् । सर्वशक्तियुक्तब्रह्मणो विनाऽपि मायां तत्सम्भवादित्याशङ्क्याह *स्वाज्ञानादिति ॥ ११७ ॥ आत्मनोऽसङ्गत्वे जगदात्मत्वं न स्यात् तथाच "सच्च त्यच्चाभवत्" इति श्रुतिः कुप्येतेत्याशङ्क्यासङ्गत्वेऽपि निष्प्रपञ्चस्य ब्रह्मणो वस्तुतो जगदाकारत्वाभावेऽपि मायया तदपि कारणत्ववत्सम्भवतीत्याह * अकारणमिति ॥११८॥

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२०७

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवक एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्–मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम्। श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता। तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २
(८) ब्रह्मसूत्रभाष्यम्–बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्ण । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणानिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्–विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)१
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविराचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृताविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

स्वचिदाभासमार्गेण स्वात्माज्ञानजवर्ष्मसु ॥
प्रविष्ट एको बहुधा वियद्यद्वद्घटादिषु ॥ ११९ ॥
घटेषु ये घटाकाशा वास्तवं वियदेव ते ॥
घटस्थेषु जलेष्वन्ये स्वाभासाः प्रतिबिम्बिताः॥१२०॥
तथैव बुद्धिद्रष्टारो जीवा ब्रह्मैव वास्तवम् ॥
जलौष्ण्यवच्चिदाभासाः प्राप्ता बुद्धिस्वरूपताम्॥१२१॥
अङ्गारतापसान्निध्याद्यथा कुम्भजलादिषु ॥
तापाभासा उदेत्येवं चिदाभासोऽपि बुद्धिषु॥१२२ ॥
चिदाभासेषु नानात्वं दुःखित्वाद्यवभासनात् ॥
बुद्धिद्रष्टृषु दुःखादेरारोपो मुह्यतां नृणाम् ॥ १२३ ॥
अज्ञानानुपमर्देन यत्सृष्टौ द्वैतभासनम् ॥

नन्वेवं चेतनाचेतनप्रपञ्चस्य सर्वस्य मायिकत्वे जीवानां मुक्तिफलभागित्वं न स्यादत आह * स्वेति । स्वचितः ब्रह्मचैतन्यस्य यस्मिन्नाभासस्तदज्ञानं, तथा च तदनुसारेणेत्यर्थः । वर्ष्मसु—अन्तःकरणादिषु ॥ ११९ ॥ आकाशदृष्टान्तं विकासयति * घटेष्विति ॥ १२० ॥ दार्ष्टान्तिकमाह * तथेति । एवं च घटस्थजलप्रतिबिम्बिताकाशवद् बुद्धिस्थाभासस्य कल्पितत्वेऽपि तदधिष्ठानसाक्षिणो घटाकाशवत्सत्यत्वान्नामुक्तिभाक्त्वमित्यर्थः । जीवस्य वस्तुतो ब्रह्मत्वे तस्मिन्कर्तृत्वादिबुद्धिः कथमित्याशङ्क्य चिदाभासद्वारा साक्षिणि तदारोपादिति वक्तुं बुद्धौ चितः प्रतिबिम्बं तावदाह *जलेति । बुद्धिस्वरूपतां बुद्धितादात्म्यम्॥१२१॥उक्तमर्थं विशदयति । *अङ्गारेति॥१२२॥ एवं सति बुद्धिनिष्ठकर्तृत्वादीनां तन्निष्ठाभासद्वारा तद्द्रष्टर्यारोपादविवेकिनां तत्प्रतीतिरुपपद्यत इत्याह *चिदिति ॥ १२३ ॥

स्वप्नविज्ञानवन्नेदं वस्तुतत्त्वावभासकम् ॥ १२४ ॥
अथापि तत्त्वविज्ञानहेतुत्वं द्वैतमृच्छति ॥
निद्रां हित्वा यथा स्वापान्निमित्तादपि बुद्ध्यते॥१२५॥
साध्यसाधनतां तस्मादज्ञानैकव्यपाश्रयाम् ॥
उच्चैरनूद्य तत्तत्त्वं वेदान्ताः प्रत्यपादयन् ॥ १२६ ॥
अकारणमकार्यं सत् कार्यकारणतामगात् ॥
मोहादेव, ततः शास्त्रं मोहोच्छित्त्यै प्रवर्तते ॥ १२७ ॥
नामरूपादिना येयमसत्येवावभासते ॥

ननु दुःखादिप्रपञ्चस्य सत्यत्वमेवास्तु नाहं दुःखात्यादिबाधकज्ञानानुपलम्भादित्यत्राह * अज्ञानेति । प्रत्यगज्ञाने स्थिते जगति यद्यज्ज्ञानमस्ति तत्सर्वं न वस्तुविषयं, न हि सत्यामेव निद्रायां प्रवृत्तं स्वप्नज्ञानं तत्कालेऽबाधितमिति कृत्वा वस्तु गोचरयति, एवमज्ञानकालेऽध्यक्षेणाबाधितमपि द्वैतं वस्तु न भवतीत्यर्थः ॥ १२४ ॥ स्वप्नवज्जाग्रतोऽपि मिथ्यात्वे श्रुत्यादेरपि मिथ्यात्वात्कथं ततो ब्रह्मधीरित्याशङ्क्याह * अथेति ॥ द्वैतं—वेदान्तादिकम् । स्वापादसत्यव्याघ्रादिदर्शनात् ॥ १२५ ॥ ननु सृष्ट्यादिश्रुतिप्रतिपाद्यत्वात्कार्यकारणभावस्य वस्तुत्वमिति तत्राह *साध्येति । उक्तन्यायेनानाद्यज्ञाननिमित्तकार्यकारणतां सृष्ट्यादिवाक्यैरनूद्य कल्पितकार्यादेः स्वरूपं प्रत्यग्ब्रह्ममात्रमिति तत्त्वमसीत्यादयो वेदान्ताः प्रतिपादयितुं प्रवृत्ताः न सृष्ट्यादिस्तत्र विवक्षितः, अपूर्वत्वाभावादफलत्वाच्चेति भावः ॥१२६॥ उक्तार्थं संक्षिप्याह *अकारणमिति । सत् ब्रह्म॥१२७॥ मोहादेवेत्युक्तः कोऽसौ मोहस्तत्राह * नामेति । अनिर्वचनीया या माया नामरूपात्मनाऽध्यक्षं भासते तत्कारणीभूतापञ्चीकृतमहाभू-

माया तस्याः परं सौक्ष्म्यं मोहशब्देन भण्यते॥१२८॥
निगीर्णाशेषसंसारं शुद्धं संस्कारसंश्रयम् ॥
अव्याकृतमिति ब्रह्म मोहयोगेन भण्यते ॥ १२९ ॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ॥
खं वायुर्ज्योतिरापश्च भूमिर्विश्वस्य धारिणी ॥१३०॥

श्रुतिः। नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत् अशनायया अशनाया हि मृत्युस्तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्त ॥

तावस्थातिरिक्ततदुपादानं मोह इत्यर्थः ॥ १२८ ॥ ननु तद्धेदमित्यत्राव्याकृतस्य जगद्धेतुत्वं श्रूयते तत्कथं मोहयुक्तं ब्रह्म तत्कारणमिति तत्राह * निगीर्णेति ॥ शुद्धं ब्रह्म व्यावर्त्तयति *संस्कारेति ॥ संसारिब्रह्म व्यावर्त्तयति *शुद्धमिति॥१२९॥मूलकारणादेव सर्वसृष्टिरित्यत्राथर्वणश्रुतिं संवादयति * एतस्मादिति ॥ १३० ॥

नैवेहेत्यादिश्रुतेरक्षरार्थस्तु—इह संसारमण्डले सृष्टेः प्रागभिव्यक्तनामरूपं किञ्चिदपि नासीत् । नामरूपयोस्तदा कुतो नाभिव्यक्तिस्तत्राह * मृत्युनेति । मृत्युना कारणेनावृतमासीत् । मूलकारणे मृत्युशब्दप्रवृत्तौ हेतुः *अशनाययेति । अशनायावत्प्राणहेतुत्वादित्यर्थः । प्राणस्य च मृत्युत्वं प्रसिद्धमित्याह *अशनाया हि मृत्युरिति । अयं भावः—अशनायाशब्देन तद्वान्प्राणो लक्ष्यते । प्राणस्य चाध्यात्मवागादीनामधिदैवाग्न्यादीनां च संवरणान्मृत्युत्वमुक्तं, तत् प्राणकारणे परमात्मन्यप्युपचर्यत इति । तथाच मृत्युशब्दलक्ष्ये जगत्कारणे सर्वं जगत् सूक्ष्मरूपेण स्थितमित्यर्थः ॥

तत्रादौ सृज्यवस्तूनां प्राणादीनां विचारणे ॥
दक्षं मनोऽसृजत्तेन वेदे सृज्यं व्यचारयत् ॥ १३१ ॥
न चास्य मनसः सृष्ट्यै प्रसज्येत मनोऽन्तरम् ॥
न हीदमतिगम्भीरं शक्यं तर्कयितुं नृभिः ॥ १३२ ॥
स तेन मनसा स्वास्मिन्लीनान्वेदाननुस्मरन् ॥
समन्वालोचयद्देवो वेदोक्तां सृष्टिपद्धतिम् ॥ १३३ ॥
सृष्टिः सर्वा मनस्यस्य प्रादुरासीद्यथायथम् ॥
हिरण्यगर्भ एषोऽभूदीशो मानससृष्टितः ॥ १३४ ॥
श्रुतिः॥अर्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं क०

तन्मनोऽकुरुतेत्यादेरर्थमाह वार्तिककारः *तत्रेति । तदिति मनसो निर्देशः । प्रकृतो मृत्युर्मनःशब्दवाच्यं वक्ष्यमाणसंकल्पं कृतवानित्यर्थः ॥ १३१ ॥ संकल्पस्यापि कार्यत्वात्तद्गोचरं संकल्पान्तरं स्यादित्यनवस्थामाशङ्क्य श्रुतितात्पर्यविषयेऽर्थे न कुतर्कावतार इत्याह * न चेति । संकल्पव्यतिरिक्तकार्याणि संकल्पपूर्वकाणीति श्रुतिवशादङ्गीकार्यमिति भावः ॥ १३२ ॥

संकल्पं कृतवानित्युक्तं, तमेव संकल्पं दर्शयति श्रुतिः * आत्मन्वी स्यामिति ॥ लिङ्गव्यत्ययश्छान्दसः । आत्मवान् वियदादिप्रपञ्चैः शरीरी स्यामिति । सोऽर्चन् सृष्टिपद्धतिमालोचयन् अचरत् आलोचनं कृतवान् इति यावत् । तस्यार्चतः आलोचयतः सम्बधिन्यः आपो ऽजायन्त, आप इति सर्वभूतोपलक्षणम् । मूलकारणादपञ्चीकृतभूतोत्पत्त्या तदुपाधिकहिरण्यगर्भो जातः ॥

एतदभिप्रेत्याह * स तेनेत्यादिना ॥ १३३ ॥ १३४ ॥

ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥
आपो वा अर्कस्तद्यदपाᳪंशर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य तप्तस्य तेजोरसो निरवर्त्तताग्निः ॥ २ ॥

अश्वमेधाङ्गभूताग्नेरर्कनामत्वेनाप्युपासनां वक्तुं तन्नाम्नस्तत्र प्रवृत्तौ बीजमाह श्रुतिः * अर्चत इति । षष्ठ्यर्थे चतुर्थी । सूत्रसृष्ट्यनन्तरमीशः एवममन्यत अर्चतो मे मत्सम्बन्धि कं जलं भूतान्तरसहितं सूत्ररूपमभूदिति तत्तस्मादेवमीश्वरस्य मननादेव अर्चतिपदावयवेन अर् इत्यनेन कशब्दसंयोगात्सूत्रात्मा अर्कनामा जातस्तस्यार्कस्य सूत्रात्मनोऽर्कत्वमेव तत्सृष्टपार्थिवाग्नेरप्यर्कनामत्वे हेतुरिति शेषः ॥ य एवं यथोक्तमर्कस्याग्नेरर्कत्वं वेदोपास्ते कं सुखं ह वा इत्यवधारणे, भवत्येवेति ॥ १ ॥ इदानीं श्रुत्यन्तरसिद्धपञ्चीकृतभूतेभ्यः सूत्रकर्तृकां विराडुत्पत्तिं वक्तुम् उक्तं सूत्रमनुवदति * आपो वा अर्कः । भूतान्तरसहितानामपां सूत्ररूपाणामर्कत्वोक्तेः । तत्तत्र सूत्रस्य विराट्सिसृक्षायां सत्यामपां पञ्चीकृतभूतान्तरसहितानां यः शरः उच्छूनत्वावस्थाऽऽसीत्स शरः समहन्यत कार्याभिमुखं कारणं परस्परं सङ्घातमापद्यतेत्यर्थः । लिङ्गव्यत्ययश्छान्दसः । स सङ्घातो येयं पृथिवी सा ऽभवत् । पृथिवीशब्दोऽण्डपरः, पञ्चभूतेभ्योऽण्डं जातमित्यर्थः । तस्यां पृथिव्यां सृष्टायां सत्यां प्रजापतिरश्राम्यत् श्रान्तो जातः महत्कार्यकरणात् । तस्य श्रान्तस्य तप्तस्य खिन्नस्य तेजोरसस्य ज्ञानक्रियात्मकस्य विभक्तिव्यत्ययश्छान्दसः। अग्निस्त्रैलोक्यात्मा प्रथमशरीरी निरवर्तत सूत्रात्मा विराड्देहावच्छिन्नस्तदभिमानविशिष्टो निर्वृत्त

स त्रेधाऽऽत्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधा विहितः तस्य प्राची दिक् शिरोऽसौ चासौ चेमौ अथास्य प्रतीची दिक् पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीचीच पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥
सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवत् अशनाया मृत्युः तद्यद्रेत आसीत्स संवत्सरोऽभवत् ॥

इत्यर्थः॥२॥स सूत्रात्माऽऽत्मानं कार्यकरणसङ्घातमुपासनार्थं त्रेधा व्यभजत् । अत्र अग्निं तृतीयमित्यपि द्रष्टव्यम् । इत्थमसौ शुद्धजन्माऽग्निरश्वमेधाङ्गभूतः पक्ष्याकारेण चितः सर्वात्मत्वेनोपास्य इत्याह * तस्याग्नेः प्राची दिक् शिरः असौ चासौ च ऐशान्याग्नेय्यौ ईर्मौ बाहू । अथ–शिरसि बाह्वोश्च प्राच्यादिदृष्टिकरणानन्तरं पुच्छं जघन्यभागो ऽसौ चासौ वायव्यनैर्ऋत्यौ सक्थ्यौ पृष्ठनिष्ठोन्नतास्थिद्वयं सक्थिशब्दार्थः । इयं पृथिवी । स एष लोकात्मकोऽग्निरप्सु भूतान्तरसहितासु प्रतिष्ठितस्तासां सर्वलोककारणत्वात् ॥ अग्नेरप्सु प्रतिष्ठितत्वगुणविज्ञानफलमाह । *यत्र क्व च यस्मिन्कस्मिंश्चिद्देशे एति गच्छति तत्रैव प्रतिष्ठां लभत इत्यर्थः ॥ ३ ॥ एवं सङ्ग्रहेण सूत्रकर्तृकां विराट्सृष्टिमुक्त्वा तामेव सप्रकारां दर्शयति श्रुतिः । *स सूत्रात्मा एवं कामयित्वा मनसा ज्ञानेन वाचं वेदलक्षणां मिथुनं द्वन्द्वभावं समभवत् सम्भवनं कृतवान्, त्रयीविहितं सृष्टिक्रमं ज्ञानेनालोचयदित्यर्थः। उक्तालोचनकर्तृत्वं विराजो व्यावर्त्तयति ॥ *अ-

क्रियाविज्ञानशक्त्यात्मा सूक्ष्मादृष्टशरीरभृत् ॥
स्थूलभूतानि सृष्ट्वाऽत्र रेतो विन्यदधात्स्वकम्॥१३५॥
द्वैतैकत्वात्मकज्ञानकर्मणी पूर्वसाश्रिते ॥
भावना च तयोरेतत् त्रयं रेतोऽभिधीयते ॥ १३६ ॥
भूतानां सार एकत्र सङ्घीभूयाथ रेतसा ॥
यतोऽण्डमभवत्तेन विधाता गर्भवानभूत् ॥ १३७ ॥
हिरण्यगर्भगर्भो यः स संवत्सरतामगात् ॥

श्रुतिः ॥ न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभर्यावान् संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणमकरोत्सैव वागभवत् ॥ ४ ॥

शनायेति ॥ अशनायापदलक्षितो मृत्युरित्यर्थः ॥ तत्तत्र मिथुने यद्रेत आसीत्तद् भूतेषु विसृष्टवानिति शेषः ॥

एतत् सर्वमभिप्रेत्याह *क्रियाविज्ञानेति। *स्थूलभूतानीति ॥ अदृष्टद्वारेति शेषः ॥ १३५ ॥ प्रकृते विवक्षितं रेतःशब्दार्थमाह *द्वैतैकत्वेति । उपास्यस्य नानारसत्वात्तदुपास्तेरपि नानात्वम् उपचर्यते। प्रजापतेर्जगत्सृष्टिबीजं जन्मान्तरार्जितं यज्ज्ञानादित्रयं रेतःशब्दितं त्रय्यालोचनेन प्रादुरभूत्तेन भूतेष्वण्डजननशक्तिमुत्पादयामासेत्यर्थः ॥ १३६ ॥ एवं रेतःसेकानन्तरं यद्वृत्तं तदाह * भूतानामिति ॥ १३७ ॥ स संवत्सरोऽभवदित्यस्यार्थमाह * हिरण्यगर्भेति ।

ननु गर्भस्य कथं कालात्मत्वं तत्राह श्रुतिः * न ह पुरेति। ततः–विराडुत्पत्तेः पूर्वं हिरण्यगर्भकाले स संवत्सरो नाम नासीत् विराडन्तर्भूतस्य संवत्सरनिर्मातुः सूर्यस्याभावात् । तं गर्भं

हिरण्यगर्भः कालेन हीनोऽण्डं कालसंयुतम् ॥१३८॥
अण्डं भित्त्वान्तरसृजद्विराजं पुरुषं प्रभुः ॥
क्रियाविज्ञानशक्त्यात्मा विराजोपाहितो ह्यभूत् ॥१३९॥
नामरूपादिमद्देहसम्बन्धात्तद्विलक्षणम् ॥
अरूपोऽपि हि सूत्रात्मा लक्ष्यते रूपवानिव ॥ १४०॥
सूक्ष्मस्थूलशरीराभ्यां चिदाभाभ्यामविद्यया ॥
युतः कूटस्थ ईशोऽपि सशरीरो बभूव ह ॥ १४१ ॥
स वै शरीरी प्रथमः स वै पुरुष उच्यते ॥
आदिकर्त्ता स भूतानां ब्रह्मोपास्य इहेरितः ॥१४२ ॥
अशनायादिमत्त्वात्स स्वभावबलचोदितः ॥
हिरण्यगर्भस्तं पुत्रमत्तुं दारितवान्मुखम् ॥ १४३ ॥

यावानिह संवत्सर इति प्रसिद्धस्तावन्तं कालमबिभः भृतवान् । तथाच संवत्सरोऽभवदिति संवत्सरमात्रं गर्भे स्थित इत्यर्थः ॥

एतदेवाभिप्रेत्याह ॥ * हिरण्यगर्भ इति ॥ १३८ ॥ तमेतावत इत्यादेरर्थमाह * अण्डमिति ॥ उक्तमर्थं विशदयति * क्रियेति ॥ १३९ ॥ सूत्रस्य स्थूलदेहावच्छेदफलमाह * नामेति ॥ १४० ॥ एतावता किं फलमुक्तमित्याशङ्क्य श्रेयस्कामानामनायासेनोपास्तिः सिद्ध्यतीत्यभिप्रेत्य ईश्वरस्य विशेषणाभिव्यक्तत्वाद्देहद्वयावच्छिन्न ईश्वर एवेत्याह * सूक्ष्मस्थूलेति* चिदाभाभ्यामिति ॥ चित आभाऽभिव्यक्तिर्ययोस्ते तथोक्ते। अपिः अवधारणे ॥ १४१ ॥ फलितमाह * स वा इति ॥ १४२ ॥ तं जातमभिव्याददादित्यस्यार्थमाह *अशनायेति ॥ स्वभावबलचोदितः अनादिवासनाप्रेरितः॥१४३॥

भिनत्ति सर्वमर्यादां नान्वयाद्यप्यपेक्षते ॥
अस्य दग्धोदरस्यार्थे को न कुर्यादसाम्प्रतम् ॥१४४॥
स्थूलदेहविहीनस्य कथं मुखविदारणम् ॥
इत्यचोद्यं यतः स्वप्न इव स्यात्प्रतिभासतः ॥ १४५ ॥
जन्मान्तरसमभ्यस्तविद्याकर्मादिहेतुतः ॥
जन्यकर्मप्रयुक्तः सन् शिशुर्भीतस्तदाऽरुदत् ॥१४६ ॥
स्वभावप्रेरितो ह्येष प्राण्यदृष्टवशानुगः ॥
रोदनोत्थरवत्रस्तः स्वभावं चिच्छिदे भयात् ॥१४७॥
अत्यन्तमपि शूराणां स्वस्वभावैकहेतुतः ॥
तित्तिरादिसमुत्पाते वेपथुर्जायते भयात् । १४८ ॥
इत्थं विचारयामास विरतः पुत्रभक्षणात् ॥
अन्नबीजं विराड्देहस्तन्न भक्ष्यं फलार्थिना ॥ १४९ ॥

क्षुधितः प्रजापतिरपि पुत्रं भक्षयति, अन्यः किं पुनरन्यन्न करोतीत्याक्रोशति * भिनत्तीति । * यत इति । सङ्कल्पादेवेति शेषः ॥१४४॥१४५॥ स भाणमकरोदित्यस्य सहेतुकमर्थमाह * जन्मेति । जनिष्यमाणप्राणिकर्मणश्च तत्र हेतुत्वमाह * जन्येति । भाणित्यसंस्कृतशब्दकरणे हेतुमाह * शिशुरिति ॥ १४६ ॥ किमिति मृत्युस्तं न भक्षितवान् ? तत्राह *स्वभावेति । स्वभावो हिंस्रत्वम् ॥ १४७ ॥ सर्वसंहर्तुरतिशूरस्य प्रजापतेः शिशुशब्दश्रुतिमात्रात्कथं त्रासः स्यात् ? तत्राह *अत्यन्तमिति । श्रुतौ सैव वागभवत्–स्रक्ष्यमाणशब्दप्रपञ्चहेतुरभूदित्यर्थः ॥ १४८ ॥ स ऐक्षतेत्यादेरर्थमाह * इत्थमिति । विचारप्रकारमाह * अन्नबीजमिति । फलार्थिना—बह्वन्नकामिना तद्बीजं न भक्ष्यमित्यर्थः ॥ १४९ ॥ स तयेत्यादेस्तात्पर्यमाह

विचार्य तेन बीजेन भोक्तृभोज्ये ससर्ज सः
अग्न्याद्या इह भोक्तारो वेदयज्ञादि भोग्यकम्॥१५०॥
स्वरूपानुपमर्द्देन स विराट् देवतात्मभिः॥
आत्मानं व्यभजत्स्थूलैस्त्रिधा वाय्वग्निभानुभिः॥१५१॥

श्रुतिः॥ स ऐक्षत यदि वा इममभिमꣳस्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किञ्चर्चो यजूꣳषि सामानि च्छदाꣳसि यज्ञान्प्रजाः पशून् स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वꣳसर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतदादितेरादितित्वं वेद ॥५॥

---

* विचार्येति ॥ १५० ॥ सिंहावलोकनन्यायेन स त्रेधाऽऽत्मानमित्यादेरर्थमाह * स्वरूपेति ॥ १५१ ॥

स ऐक्षतेत्यादिश्रुतेरेषोऽक्षरार्थः—स कुमाररवभीतः प्रजापतिरालोचयत् यदि वै इममभिमंस्ये, अभिपूर्वो मन्यतिः हिंसार्थः हिंसिष्य इत्यर्थः, कनीयोऽल्पमन्नं करिष्ये। एतद्द्वारा बहु भोग्यजातं सम्पाद्यमिति तद्भक्षणादुपररामेत्यर्थः। स तया—कुमारवक्त्रोद्गतया शब्दप्रपञ्चहेतुभूतया। तेनात्मना—कुमारेणार्थप्रपञ्चनिमित्तेन। ननु विराजः सृष्ट्या स्थावरजङ्गमात्मनो जगतः सृष्टत्वात्किं पुनः सृष्ट्येत्याशङ्क्य सर्वशब्दस्य सङ्कोचमाह *ऋच इति। गायत्र्यादीनि। प्रजाः यज्ञकर्त्रीः। पशून् यज्ञाङ्गभूतान्। स प्रजापतिः स्वसृष्टं सर्वमत्तुं भक्षयितुम् अध्रियत मनो धृतवान् सर्वं भोग्यं वै इति यस्मादत्ति तस्माददितेः प्रजापतेरादितित्वं प्रसिद्धम्। तथाच मन्त्रः—अदितिर्द्यौरदितिरन्तारिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्चजना

इत्थं महाभाग एष वह्निस्तेन बिराड्धिया ॥
उपास्य इति संस्तौति ध्येयोऽश्वः स्तूयते तथा॥१५२॥
स विराडश्वमेधेन यजेयेति व्यचारयत् ॥
विराजः प्राण उत्क्रान्तो विचारश्रमकर्शितात् ॥ १५३ ॥
प्राणोत्क्रान्तौ विराजोऽस्य देह उच्छूनतां गतः ॥

श्रुतिः ॥ सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशोवीर्यमुदक्रामत् प्राणा वै यशोवीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीर एव मन आसीत्॥६॥सोऽकामयत मेध्यं म इदꣳस्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूत् इति तदेवाश्वमेधस्याश्वमेधत्वम् ।

अदितिर्जातमदितिर्जनित्वमिति । प्रजापतेरदितिनामत्वगुणध्यानफलमाह * सर्वस्येत्यादिना ॥ ५ ॥

वृत्तानुवादपूर्वकमुत्तरकण्डिकातात्पर्यमाह *इत्थमिति॥१५२॥ सोऽकामयतेत्यादेरर्थमाह * स विराडित्यादिना । भूयसेत्यस्य व्याख्या अश्वमेधेनेति । तस्य भूयोदक्षिणाकत्वाद् भूयस्त्वम् । जन्मान्तरकारणापेक्षया श्रुतौ भूयःशब्दप्रयोगः । स तपोऽतप्यत श्रमात् खेदमापद्यत इत्यर्थः । यशोवीर्यमित्यादेरर्थमाह * विराज इति । प्राणानां यशोवीर्यत्वं तद्धेतुत्वादिति द्रष्टव्यम् ॥ १५३ ॥ तत्प्राणेष्वित्यादेरर्थमाह * प्राणेति ।

तस्येत्यादिश्रुतेरयमर्थः–तस्य शरीरान्निर्गतस्यापि प्रजापतेस्तस्मिन्नेव मन आसीत्स इदं शरीरं मेध्यं यज्ञियं स्यादनेन श-

यतोऽश्वयत्ततोऽश्वाख्यां वैराजो देह आप्तवान् ॥१५४॥
सोऽकामयत मेध्यं मे शरीरं स्यादिति प्रभुः ॥
कामयित्वा विवेशास्मादमेध्यं मेध्यतामगात् ॥१५५॥
अश्वयन्मेध्यमभवदश्वमेधस्ततो विराट् ॥
अश्वाश्वमेधौ स्तूयेते ज्ञानकर्मप्रवृत्तये ॥ १५६ ॥
अश्वाश्वमेधवह्नीनामर्थवादेन संस्तवात् ॥
ज्ञानकर्मविधानेन तस्य स्यादेकवाक्यता ॥ १५७ ॥

इति वार्तिकसारे प्रथमाध्याये द्वितीयमग्नि-
ब्राह्मणं समाप्तम् ॥

रीरेणात्मन्वी स्यां शरीरी स्यामिति कामितवान् ।

ततोऽश्वः समभवदित्यत्र तच्छब्दापेक्षितमुत्तरवाक्यमनुषञ्जयंस्तदर्थमाह * यत इति ॥ १५४ ॥ १५५ ॥ * अश्वयदिति । यस्माद्यशोवीर्यहीनमश्वत् अश्वयत् उच्छूनतामापद्यत प्रजापतिप्रवेशाच्च मेध्यमभूत् अभवत्तदेव तस्मादेवाश्वमेधस्य प्रजापतेरश्वमेधत्वं निष्पन्नमित्यक्षरार्थः । शरीरस्याश्वाश्वमेधत्वानिर्वचनेन तत्तादात्म्यापन्नप्रजापतेस्तन्निर्देशफलमाह * अश्वेति । एतेन प्रजापतेः कर्मानधिकारिणः कथं यजेयेत्याशंसनमित्यादिविरोधशङ्का न कार्येत्युक्तं भवति॥१५६॥ एवमश्वादिस्तवनादेकफलोद्देशेन ज्ञानकर्मविधायिब्राह्मणद्वयस्यैकवाक्यत्वं पूर्वमुक्तं युक्तमित्याह * अश्वाश्वमेधेति । तस्येति बुद्धिस्थं ब्राह्मणद्वयं परामृश्यते ॥ १५७ ॥

एतदेवाभिप्रेत्य एष ह वेत्याद्युत्तरश्रुतिः प्रवृत्ता । अस्या अयमर्थः—यः कश्चिदेनं प्रजापतित्वेनोक्तमश्वमग्निं च एवं वक्ष्यमाणप्रकारेण विस्पष्टं वेद स एषो ऽश्वमेधं वेद तस्मादेवं

श्रुतिः ॥ एष ह वा अश्वमेधं वेद य एनमेवं वेद तमनवरुध्येवामन्यत तꣳ संवत्सरस्य परस्तादात्मन आलभत पशून् देवताभ्यः प्रत्यौहत् तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्ते ॥

एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्मा अयमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवति एतासां देवतानामेको भवति॥ ७॥ इत्युपनिषदि द्वितीयमग्निब्राह्मणं समाप्तम् ॥

वेदितव्यमित्यर्थः । तत्राश्वविषयं दर्शनमाह । प्रजापतिरात्मानमेवाश्वं कल्पयित्वा तमश्वमनवरुध्यैवामन्यत, मया मुक्तोऽश्वः स्वच्छन्दोऽब्दमात्रं विचरति इत्यचिन्तयत् । तमश्वं संवत्सरस्य परस्तादात्मार्थमालम्भनं कृतवान् पशून् ग्राम्यारण्यान् स्वावयवभूताभ्यो देवताभ्यः प्रत्यौहत् प्रतिगमितवान् एवमन्योप्युपासीतेत्यर्थः । तत्प्रकारश्चाधस्तादुक्तः । यस्मादेवमुक्तवान् प्रजापतिस्तस्मात्तत्कार्यभूतयाज्ञिकाश्च प्रोक्षितं मन्त्रसंस्कृतं तुरगं सर्वदेवत्यं प्राजापत्यमालभन्ते । सर्वदैवतत्वे हेतुः *प्राजापत्यमिति। तस्य सर्वात्मत्वात्। एवमुपास्तिमुक्त्वा तत्फलमाह *एष इति। उ हैतावदश्वमेधक्रिया मानसी कायिकी च, द्विविधक्रियाऽपि फलरूपेण स्थिता सावितैवेत्यर्थः । स संवत्सरत्वेन चिन्त्य इत्याह * तस्येति । तस्य रवेः संवत्सरः शरीरं तन्निर्वर्त्यत्वात् । एवं क्रतोरर्कत्वमुक्त्वा तदङ्गस्याग्नेरपि तदाह * अयमग्निरर्क इति । अयं पूर्वोक्तचित्योऽग्निरर्क एवेति चिन्तयेदित्य-

र्थः । कथं क्रत्वङ्गस्याग्नेः क्रतुफलादित्यनामत्वमित्याशङ्क्य तस्य प्राची दिगित्यादिना सर्वात्मत्वोक्तेरर्कनामत्वं युक्तमित्याह * तस्येमे लोका आत्मान इति । तस्य चित्याग्नेरित्यर्थः । तावेतौ यथा विशेषितौ अर्कार्कौ अग्न्यादित्यावश्वमेधौ भवतस्तयोरश्वमेधत्वम् अग्नेस्तत्साधनत्वाद्रवेस्तत्फलत्वादुपचर्यत इत्युक्तम् । तावग्न्यादित्यौ । * सो पुनरिति । सा उ इतिच्छेदः । पुनर्भूयः स्वाधिकारान्ते एकैव देवता भवति । तच्छब्दस्य विधेयदेवतापेक्षया स्त्रीत्वम् । का सा देवता यया ऐक्यं प्राप्नुतः ? तत्राह * मृत्युरेवेति । हिरण्यगर्भ इत्यर्थः । पूर्वोक्तक्रमेणोपासनस्य फलमाह * अपपुनरिति । तस्यैव व्याख्या नैनमिति । तत्र हेतुः * अस्येति । अग्न्यादिदेवताप्रेष्यत्वं वारयति * एतासामिति । वर्त्तमानदेहपातानन्तरमग्न्यादिभेदभिन्नानां देवतानामात्मनाऽभिन्नो भवतीत्यर्थः ॥ ७ ॥

इति वार्त्तिकसारटीकायां प्रथमाध्याये द्वितीयमग्निब्राह्मणं समाप्तम् ॥ २ ॥

तृतीयब्राह्मणे प्राणः शुद्ध्यादिगुणसंयुतः ॥
हिरण्यगर्भप्राप्त्यर्थमुपास्यः प्रतिपाद्यते ॥ १ ॥
आध्यात्मिकपरिच्छेदं परित्यज्याधिदैविके ॥
रूपे स्वरूपबुद्धिर्या सा तत्प्राप्तिरितीर्यते ॥ २ ॥
अश्वाग्न्युपासनस्यापि फलमेतन्न चेतरत् ॥
तथाप्युपास्यभेदेन भिन्नैवोपास्तिरिष्यते ॥ ३ ॥
एकत्वेऽपीश्वरस्यास्य गुणभेदेन भिन्नता ॥
स्थूलसूक्ष्मशरीराख्यौ विराट्प्राणौ हि तौ गुणौ ॥४॥
पूर्वस्य स्थूलमुख्यत्वमिह सूक्ष्मस्य मुख्यता ॥
तथाच सूक्ष्मदेहोत्थाद्भवेत्स्थूलाद्विवेचितः ॥ ५ ॥
आत्मविद्याधिकारेऽस्मिन्नुपास्त्यादि यदुच्यते ॥
तद्विवेकोपयोग्येव तस्मात्प्राणो विविच्यते ॥ ६ ॥
स्थूलस्य सुविवेचत्वादादौ मन्दं प्रतीरितम् ॥

उद्गीथब्राह्मणार्थं संगृह्णाति * तृतीयेति ॥ १ ॥ प्राप्त्यर्थमित्यत्र प्राप्तिशब्दार्थमाह * आध्यात्मिकेति ॥ २ ॥ ३ ॥ फलैक्ये कथमुपास्यभेदस्तत्राह * एकत्वेऽपीति । यथा सायुज्यरूपफलाभेदेऽपि परमेश्वरोपास्तिर्मनोमयत्वादिगुणभेदाद्भिद्यते, एवं सूत्रोपास्तिरपि समष्टिस्थूलसूक्ष्मशरीराख्यगुणभेदाद्भिन्नेत्यर्थः ॥ ४ ॥ सर्वात्मकोऽहमित्येवंरूपोपास्तेः कथमेकशरीरालम्बनत्वं ? तत्राह * पूर्वस्येति । एवंसति फलान्तरमपि सिद्ध्यतीत्याह *तथा चेति ॥ ५ ॥ सूक्ष्मदेहस्य स्थूलाद्विवेचनं चार्थादुक्तमित्यत्र कल्पकाभावादुपास्तिमात्रपरमेवास्तु वाक्यमित्याशङ्क्य प्रकरणविरोधान्मैवमित्याह * आत्मेति ॥ ६ ॥ तथासति पूर्वोत्तरब्राह्मणयोः क्रमोऽप्यनुगुणः स्यादित्याह

उक्तमं प्रत्यसौ प्राणो दुर्विवेचो विविच्यते ॥ ७ ॥
पौर्वापर्यमतो युक्तं विराट्प्राणाख्यविद्ययोः ॥
मुख्यं प्राणमुपासीत शुद्ध्यादिगुणसंयुतम् ॥ ८ ॥
वागादयो न शुद्धाः स्युर्विषयासङ्गदूषिताः ॥
मुख्यप्राणस्तु शुद्धः स्याद्विषयासङ्गवर्जनात् ॥ ९ ॥
मुख्यप्राणोऽहमस्म्येष आसुरैरप्रधर्षितः ॥
हिरण्यगर्भदेवस्य त्रीणि रूपाणि सन्ति मे ॥ १० ॥
अयास्य इति नामैकं तथाऽऽङ्गिरस इत्यपि ॥
दूरित्येतानि नामानि तेषामर्थो मयि स्थितः ॥ ११ ॥
अयमास्येऽन्तरस्तीति देवा मां प्राणमूचिरे ॥
तेनायास्योऽभवं सर्वप्राणिवक्त्रस्थितत्वतः ॥ १२ ॥
अङ्गानां सारभूतत्वादहमाङ्गिरसो ऽभवम् ॥
पाप्मनो दूरभूतत्वात् दूर्नाम प्राप्तवानहम् ॥ १३ ॥
वागादिदेवताभ्योऽहं पाप्मानमपहत्य ताः ॥

---

*स्थूलस्येत्यादिना । एवमुपास्तिभेदं प्रदर्श्य प्राणोपास्तिक्रमं वक्तुमुपक्रमते * मुख्यमित्यादिना । वागादेर्विषयासङ्गादशुद्धिः मुख्यप्राणस्य शुद्ध्यादिगुणाश्चाक्षरव्याख्यानावसरे स्पष्टं वक्ष्यन्ते ॥७॥८॥९॥१०॥११॥ नामत्रयवाच्यत्वेन रूपत्रयमुपपाद्य स्वस्मिन्नयास्यादिनाम्नां प्रवृत्तौ श्रुत्युक्तं निमित्तमाह * अयमित्यादिना । इदं च स्पष्टं वक्ष्यते । अग्न्यादिदेवैरन्विष्टः सर्वेषां मुखबिलवर्ती प्राणस्तैरयमास्येऽन्तरित्युक्तत्वेनायास्यनामत्वम्, अङ्गानां रसत्वादाङ्गिरसत्वं, पापलक्षणमृत्योर्दूरीकरणाद् दूर्नामत्वमित्यर्थः ॥ १२ ॥ १३ ॥ सा वा एषा देवता एतासां देवतानां पाप्मानं मृत्युमपहत्येत्यादिश्रुत्यर्थमाह * वागादी-

अग्न्यादिभावमनयं ते यथायथमासते ॥ १४ ॥
मदर्थमन्नं सम्पाद्य तद् भुङ्क्ते तेन देवताः ॥
वागाद्यो मदात्मानस्तृप्यन्त्वहमिवेतराः ॥ १५ ॥
भर्ता श्रेष्ठः पुरो गन्ता ह्यन्नादोऽस्मि तथाऽधिपः ॥
ऋग्यजुःसामरूपोऽहं सा चामश्चेति साम तत् ॥१६॥
सेति वाचोऽभिधानं स्यादमः प्राणाभिधा तथा ॥
सामेत्युभयमत्रोक्तं समत्वाद्वाऽथ साम तत् ॥ १७ ॥
पुत्तिका मशको नागो विराट् सूत्रामितीरिताः ॥
ये देहास्तैः समोऽहं स्यां लिङ्गेनैषां प्रपूरणात् ॥ १८ ॥
उद्गीथोऽहं प्राण उत् स्याद्वाग्गीथाऽहं द्वयात्मकः ॥
प्राणप्रधानया वाचा करोम्यौद्गात्रमध्वरे ॥ १९ ॥
साम्नो मम धनं कण्ठमाधुर्यं वर्णसौष्ठवम् ॥

ति ॥ १४ ॥ आत्मनेऽन्नाद्यमागायदित्यादेरर्थमाह*मदर्थमिति ॥ १५ ॥ भर्ता स्वानां श्रेष्ठ इत्यादेरर्थमाह *भर्त्तेति । एष उ एव बृहस्पतिरित्याद्यर्थमाह *ऋगिति । एष उ एव सामेति सामपदं व्याचष्टे *सा चेति । सेत्येतस्य वागभिधायकत्वे अमशब्दस्य प्राणवाचकत्वे कथं प्राणस्य समस्तसामशब्दवाच्यत्वमित्याशङ्क्य वागुपसर्जनः प्राणः सामशब्दित इत्याह*सामेत्युभयमिति । सर्वशरीरेषु समत्वेन वर्त्तमानत्वाद्वा सामत्वं प्राणस्येत्याह *समत्वादिति ॥१६॥१७॥१८॥ उद्गीथशब्दार्थमाह *उद्गीथ इति । प्राणस्योच्छब्दमात्रवाच्यत्वेऽपि गीथाशब्दार्थस्य वाचस्तस्मिन्नुपसर्जनतया सम्बन्धाद्वागुपसर्जनप्राण उद्गीथशब्दित इत्याह *प्राणेति ॥ १९ ॥ तस्य स्वर एव स्वमित्यादिश्रुत्यर्थमाह *साम्न इति ॥ तस्य वागेव प्रतिष्ठेत्यादेरर्थमाह

सुवर्णं मे, प्रतिष्ठा तु वाग्देहो वा भवेदिह ॥ २० ॥
अभ्यारोहजपस्याहं देवता प्राणविग्रहः ॥
इत्युपासीन एवेममभ्यारोहं जपेत्पुनः ॥ २१ ॥
इत्युपास्तिप्रकारोऽयं यथावदिह वर्णितः ॥
प्रधानगुणभेदेन फलमत्र विभज्यते ॥ २२ ॥
ऐहिकामुष्मिकत्वाभ्यां प्रधानस्य फलं द्विधा ॥
तदभ्यारोहमन्त्रेषु द्वाभ्यामादौ प्रदर्शितम् ॥ २३ ॥
प्राणात्मत्वाभिमानेन साक्षात्कारोऽयमैहिकः ॥
स आसुरासङ्गपापनाशे भवति नान्यथा ॥ २४ ॥
लोष्टः पाषाणभेदाय क्षिप्तश्चूर्णीभवेद्यथा ॥
नश्येदासुरपाप्मैवं प्राणोपासनशालिनः ॥ २५ ॥
उपासनविरोधिन्यो रागाद्याश्चित्तवृत्तयः ॥
आसुर्यो दूरतो यान्ति दूर्नामप्राणचिन्तनात् ॥ २६ ॥

---

*प्रतिष्ठा त्विति ॥ २० ॥ असतो मा सद् गमयेत्यादिमन्त्रप्रकाश्या प्राणदेवतेत्याह *अभ्यारोहेति । प्राणोपास्त्युक्तमन्त्रजपं समुच्चिनोति *अभ्यारोहमिति ॥ २१ ॥ २२ ॥ प्रथमं प्रधानफलं तावद्विभजते *ऐहिकेति । फलद्वैविध्ये मानमाह *तदभ्यारोहेति । असतो मा सदित्यादिवक्ष्यमाणमन्त्रत्रयेष्वाद्यद्वितीयाभ्यां क्रमेण फलद्वयं दर्शितमित्यर्थः ॥ २३ ॥ किं तदैहिकं फलं ? तदाह * प्राणेति । उक्तफले प्रयोजकं दर्शयन् न केवलं साक्षात्कारः फलं किन्तु तत्प्रयोजकः प्रतिबन्धविरहोऽपीत्याह * स इत्यादिना ॥ २४ ॥ २५ ॥ कोऽसावसुरपाप्मेति तत्राह * उपासनेति । एवं च प्राणस्य दूर्नामचिन्तनं प्रधानफले हेतुत्वान्न गुणोपासनमित्युक्तं भवति ॥२६॥ननु स्वाभिमतवस्तुध्यानेनापि इतरनिवृत्तिसम्भवान्न

नैरन्तर्यप्रवृत्तेषु ध्यानेष्वन्येष्वपि क्षयः ॥
कामादेरस्त्वथाऽप्यत्र त्वरा स्यात्प्राणवीर्यतः ॥२७॥
आध्यात्मिकपरिच्छेदं मृत्युं वागादिदेवताः ॥
तीर्त्वा वह्न्यादिभावेन ध्याननिष्ठस्य भान्त्यमूः॥२८॥
अहं मनुष्य इत्येतद्भावं त्यक्त्वाऽथ चिन्तकः ॥
हिरण्यगर्भ एवास्मीत्यात्मानमभिमन्यते ॥ २९ ॥
आध्यात्मिकपरिच्छेदः प्राकृतज्ञानहेतुकः ॥
युक्तोऽस्य बाधः शास्त्रीयाद्देवतात्माभिमानतः ॥३०॥
जीवाविष्ट उपास्योऽत्र देवताविग्रहः सदा ॥
प्राणो हिरण्यगर्भात्मा यावत्तदभिमानता ॥ ३१ ॥
भावनोपचयाज्जह्यात्परिच्छेदं स्वमासुरम् ॥
न सकृत्प्राणविज्ञानमात्रेण ब्रह्मबोधवत् ॥ ३२ ॥

तस्य प्राणचिन्तनमात्रफलत्वमित्याशङ्क्य श्रुतिप्रामाण्यात्प्राणाचिन्तकस्य कामादिक्षयस्तूर्णमेव भवतीति विशेषमाह *नैरन्तर्येति ॥२७॥ऐहिकफलं साक्षात्कार इत्युक्तं, तस्य लक्षणमाह* आध्यात्मिकेति द्वाभ्याम् ॥ २८॥ २९ ॥ नन्वहं मनुष्य इति परिच्छिन्नत्वाभिमानस्य कथमपरिच्छिन्नत्वभावनया बाधः वैपरीत्यसम्भवादिति तत्राह *आध्यात्मिकेति । प्राकृतज्ञानं प्रकृतिशब्दवाच्यमायाजन्यमिथ्याज्ञानम् ॥ ३० ॥ प्राणस्योपास्यत्वमुक्तं तस्य कथं हिरण्यगर्भतादात्म्याभिमानः फलत्वेनोच्यते तत्क्रतुन्यायविरोधादित्याशङ्क्य प्रकृते प्राणशब्दस्य विवक्षितार्थमाह * जीवेति । उपास्तेरवधिं पूर्वोक्तं स्मारयति * यावदिति ॥ ३१ ॥ शास्त्रीयज्ञानस्य बलवत्त्वे हिरण्यगर्भोऽहमिति सकृत्प्रत्ययेनापि परिच्छिन्नभ्रमो निवर्त्तेतेत्याशङ्क्य नेत्याह * भावनेति । तत्र व्यतिरेकदृष्टान्तमाह * ब्रह्मेति ॥ ३२ ॥

भावनातोऽन्यदेवात्मसाक्षात्कारादयं पुमान् ॥
देवो भूत्वेह तच्चित्तो मृत्वा देवोऽभिजायते ॥ ३३ ॥
ब्रह्मैव सन् वस्तुतः स्यादब्रह्माज्ञानमात्रतः ॥
ज्ञानादज्ञानमुच्छिन्द्याद्भावना तत्र नार्थ्यते ॥ ३४ ॥
हिरण्यगर्भता पूर्वमसती भावनाबलात् ॥
लब्धव्या तेन तद्भावाभिमानो ध्यानजो मतः ॥ ३५ ॥
देवात्मत्वाभिमानो यः स साक्षात्कार ऐहिकः ॥
आद्याभ्यारोहमन्त्रेण प्रार्थ्यते फलरूपतः ॥ ३६ ॥
हिरण्यगर्भरूपत्वं स्वस्यैवामुष्मिकं फलम् ॥
प्रार्थ्यं द्वितीयमन्त्रेण तृतीयेनोभयं पुनः ॥ ३७ ॥
सायुज्यमपि सालोक्यं स्याद् द्विधाऽऽमुष्मिकं फलम् ॥
भावनाया विचित्रत्वाद् द्वयं पुरुषभेदतः ॥ ३८ ॥
मनुष्यत्वव्यवहृतेर्यावत्स्यात् दृढविस्मृतिः ॥
तावच्चेद्भावनां कुर्यात्तदा सायुज्यमाप्नुयात् ॥ ३९ ॥

उक्तेऽर्थे हेतुमाह * भावनात इति । अन्यात्मनोऽन्यं प्रत्यतीन्द्रियत्वात्तत्तादात्म्याभिमानलक्षणसाक्षात्कारस्य दीर्घकालभावनां विना दुःसम्पादत्वात् तयैव तत्सम्पाद्य तथैव आमृति धारयन्नन्ते तत्सायुज्यं गच्छतीत्यर्थः ॥३३॥ ब्रह्मबोधवदित्युक्तदृष्टान्तं स्पष्टयति *ब्रह्मेति ॥३४॥ दार्ष्टान्तिके तद्वैषम्यमाह *हिरण्येति ॥३५॥ ऐहिकफलमुक्तमुपसंहरति *देवेति । साक्षात्कारस्य सुखदुःखाभावविलक्षणस्य कथं फलत्वमित्याशङ्क्य सुखसाधनस्यापि पुम्भिरर्थ्यमानत्वात्फलत्वमस्तीत्याह *आद्येति ॥ ३६ ॥ हिरण्यगर्भप्राप्तिरामुष्मिकफलमित्याह *हिरण्येति ॥ ३७ ॥ अभ्यारोहमन्त्रप्रार्थ्यं फलमुक्त्वा पुनरप्यामुष्मिकफलतत्साधनभेदानाह * सायुज्यमित्यादिना ॥ ३८ ॥ ३९ ॥

देवात्मतायाः प्राचुर्यं मर्त्यत्वं च कदाचन ॥
भाति चेत्तर्हि सालोक्यं तदप्येवमनेकधा ॥ ४० ॥
हिरण्यगर्भो यः पूर्वः सायुज्यं तत्प्रवेशनम् ॥
सत्यलोकप्रवेशस्तु सालोक्यमिति कथ्यते ॥ ४१ ॥
सारूप्यसार्ष्टिसामीप्यभेदा अन्तर्भवन्ति हि ॥
सालोक्य एव तत्रापि यथाध्यानं फलं मतम् ॥४२॥
हिरण्यगर्भो भूयासं भाविसृष्टौ जगत्सृजन् ॥
इति सङ्कल्पयुक्तश्चेत्तथैव भवति ध्रुवम् ॥ ४३ ॥
इत्थमुक्तं मुख्यफलं गुणानां फलमुच्यते ॥
न दूर्गुणफलं पापदूरत्वं तस्य मुख्यतः ॥ ४४ ॥
वागादिपोषकत्वं यत्प्राणस्य तदुपासनात् ॥
ज्ञातीनां पोषको भूत्वा श्रैष्ठ्यादिगुणवान्भवेत् ॥४५॥
अस्य वैरी स्वपोष्याणां पोषणाय न शक्नुयात् ॥
अस्य शिष्यश्च भक्तश्च शक्नुतां ज्ञातिपोषणे ॥४६॥
स्वसुवर्णप्रतिष्ठानध्यानात्स्वादिफलं भवेत् ॥

॥ ४० ॥ सायुज्यादिलक्षणमाह *हिरण्यगर्भ इत्यादिना । सार्ष्टिः—समानैश्वर्यम् ॥ ४१ ॥ ४२॥ उक्तोपासनस्यैव सङ्कल्पानुरोधात्साक्षाद्धिरण्यगर्भत्वमपि फलमित्याह *हिरण्येति । *न दूरिति । साक्षात्कारहेतुत्वात्पापनिवृत्तेस्तत्फलकं दूर्नामध्यानं न गुणोपासनमित्यर्थः ॥ ४३ ॥ ४४ ॥ प्राणस्य वागिन्द्रियपोषकत्वं नाम कश्चिद् गुणः तच्चिन्तनफलमाह *वागित्यादिना ॥ ४५ ॥ ४६ ॥ साम्नो मम धनमित्यादिपूर्वोक्तगुणत्रयध्यानफलमाह *स्वसुवर्णेति । यद्यपि गुणोपास्तिं विनापि प्रधानफलं सिध्यति तथापि प्रधानोपास्तौ तीव्रश्रद्धोत्पादकत्वादेतदपि कर्तव्यमेवेत्याह *एतैरित्यादि-

एतैर्गुणफलैर्मुख्ये फले विश्वास उद्भवेत् ॥ ४७ ॥
मुख्यात्फलं चिरेण स्यादचिरेण गुणात्फलम् ॥
अतो गुणफले दृष्टे पुंसः श्रद्धा विवर्द्धते ॥ ४८ ॥
गुणमुख्यफले उक्ते फलभागथ चिन्त्यते ॥
कर्म्यैव फलभागत्र कर्मकाले विधानतः ॥ ४९ ॥
प्रस्तोता प्रस्तुयात्साम यस्मिन्काले तदा जपः ॥
कार्योऽभ्यारोह उद्गात्रा स च प्राणविदीरितः ॥५०॥
एष एवंविदुद्गाता यं कामं कामयेत तम् ॥
स्वार्थे वा यजमानार्थे सम्पादयति सर्वथा ॥ ५१ ॥
इति श्रुतेरन्यतरो यजमानर्त्विजोः फलम् ॥
परकर्मप्रवेशे ऽपि वचनादृत्विजः फलम् १ ॥ ५२ ॥
तस्मात्स्यादेवभावाप्तिर्ज्ञानकर्मसमुच्चयात् ॥
कर्महीने तु विदुषि स्यान्न वेत्यत्र शङ्क्यते ॥ ५३ ॥

ना ॥४७॥४८॥ *फलभागिति । उपासनादेरुद्गातृकर्तृकत्वात् कर्मणो याजमानत्वादेवभावः कस्येति विचार्यते इत्यर्थः ॥ उद्गातुर्यजमानेन क्रीतत्वात्तज्ज्ञानेन ज्ञानी यजमानः अतस्तस्य समुच्चयादेवभावावाप्तिरित्याह *कर्मीति ॥ ४९ ॥ कर्मकाले विहितत्वमेव दर्शयति *प्रस्तोतेति । एष एवंविदुद्गाता आत्मने वा यजमानाय वा यं कामं कामयते तदागायतीति श्रुत्या प्राणविद एवोद्गातृत्वमुक्त्वा तस्य स्वार्थमप्यागानविधानादृत्विजो यजमानस्य वा गुणफलमित्याह *स चेत्यादिना ॥ ५० ॥ यजमानेन क्रीतस्यापि ऋत्विजो वचनात्फलभाक्त्वं युक्तमित्याह *परेति ॥ ५१ ॥ ५२ ॥ *शङ्क्यत इति । फलस्य समुच्चयहेतुकत्वश्रवणादिति भावः ॥५३॥ तदे-

१ प्राप्नुयादिति शेषः ।

तदेतत्प्राणविज्ञानं कर्महीनमपि ध्रुवम् ॥
स्वफलप्रदमेवेति श्रुत्या शङ्का निवार्यते ॥ ५४ ॥
इहैवासुरभावस्य प्राणोऽस्मीत्यभिमानतः ॥
प्रध्वस्तत्वात्कुतः शङ्का भवेद्धेतुविवर्जनात् ॥ ५५ ॥
मनुष्योऽस्मीति धीर्यस्य भवेदासुरपाप्मतः ॥
तन्मूलात्तस्य शङ्का स्यात्सत्यप्यस्मिन्समुच्चये ॥५६॥
न च धीजन्ममात्रेण परमात्मप्रबोधवत् ॥
सम्भाव्यो देवभावोऽस्य देवो भूत्वेति संश्रयात्॥५७॥
इहैव देवो भूत्वाऽसौ भावनोपचयादथ ॥
मृत्वा देवानवाप्नोतीत्याह न्यायेन वेदवाक् ॥ ५८ ॥
न्याय आसुरनाशाख्यः स च साक्षात्कृतेर्भवेत् ॥
साक्षात्कृतिः स्यात्सन्तत्या सन्ततिश्च न कर्मिणः॥५९॥
समुच्चयाद्देवभाव आगमादेव निश्चितः ॥

तदित्यस्य श्रुत्येत्यनेन सम्बन्धः । तद्धैतल्लोकजिदेवेतिश्रुतेरित्यर्थः ॥ ५४ ॥ न्यायतोऽपि केवलप्राणविज्ञानस्य फलप्रदत्वशङ्का न भवतीत्याह *इहैवेति ॥५५॥ प्रत्युत समुच्चयात्फलमिति मतमेवोक्तन्यायविरोधाच्छङ्कास्पदमित्याह । *मनुष्य इति । प्राणदर्शनस्याभ्यारोहजपेन समुच्चयेऽङ्गीकृते सति ज्ञानसन्तत्ययोगादासुरस्य परिच्छेदाभिमानस्यानिवृत्तत्वाद्देवभावशङ्का स्यादिति भावः ॥ ५६ ॥ ननु सकृत्प्रत्ययादेव ब्रह्मभाववद्देवभावोऽप्यस्त्विति नेत्याह *न चेत्यादिना ॥ ५७ ॥ ॥ ५८ ॥ ५९ ॥ तर्हि समुच्चयान्न देवभावः स्यादित्याशङ्क्य वचनेन न्यायबाध इत्याह *समुच्चयादिति । फलितमाह *अत इति । अस्य समुच्चयानुष्ठायिनः शङ्क्यमानो देवभाव

अतोऽस्य शङ्क्यमानोऽपि न शङ्क्यः प्राणदर्शिनः॥६०॥
यस्तु कर्मजविक्षेपं सोढ्वा प्राणात्मभावदृक् ॥
तस्याप्यशङ्कितोपास्तिबलादेव न कर्मणः ॥ ६१ ॥
कर्मकाले चिन्तयतो देवावाप्तिः समुच्चयात् ॥
निरन्तरं चिन्तयत इहैव प्राणरूपता ॥ ६२ ॥
उपासकप्रयोज्यत्वादभ्यारोहजपो न तु ॥
सूत्रितः कल्पसूत्रेषु विद्याप्रकरणोक्तितः ॥ ६३ ॥
ज्ञानकर्मसमुच्चेतुर्जप आवश्यको मतः ॥
प्राणात्मदर्शनेनैव नियम्येतोर्ध्वरेतसः ॥ ६४ ॥
ध्यानं फलं फली चेति त्रय इत्थं निरूपिताः ॥
सुस्थितं विधितात्पर्यमर्थवादो निरूप्यते ॥ ६५ ॥

इत्यनुषङ्गः ॥ ६० ॥ केवलप्राणदर्शिनः फलशङ्का नेत्युक्तं तदेव दर्शयति *य इति । तस्यापि ज्ञानकर्मसमुच्चेतुरपि देवभावाप्तिरुपास्तिबलादेवाशङ्कितेत्यर्थः । अयमाशयः—समुच्चयपक्षे जायमानाऽपि शङ्का उपास्त्या देवभावाप्तिरास्ति उत कर्मविक्षेपाज्ज्ञानासन्तत्या न वेत्येव जायते । एवञ्च निरन्तरप्राणचिन्तकस्य फलशङ्कालेशोऽपि नास्ति शङ्कैककोटिप्रविष्टदेवभावाप्तेर्ज्ञानफलवत्त्वस्योभयवादिसिद्धत्वादिति ॥ ६१ ॥ तस्मादागमप्रामाण्यात्पक्षद्वयमप्यादेयमित्याह *कर्मेति ॥ ६२ ॥ ननु मन्त्रजपस्य न फलहेतुत्वं तत्सूत्रयाद्भिरापस्तम्बादिभिरसूत्रितत्वात् तत्राह *उपासकेति ॥ ६३ ॥ विद्याप्रकरणपठितस्य मन्त्रस्य प्राणवित्प्रयोज्यत्वेन नित्यकर्मवदसूत्रितत्वेऽपि गृहस्थेन स जप्तव्य इत्याह * ज्ञानेति । इतराश्रमाणां प्राणदर्शनमेव फलहेतुरित्याह *प्राणेति ॥ ६४ ॥ ६५ ॥ अर्थवादसमुदायार्थमाह *देवेति ।

देवासुराख्यायिकया प्राणशुद्धिः परीक्ष्यते ॥

श्रुतिः ॥ द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्द्धन्त ते ह देवा ऊचुः हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १

सात्त्विक्यो वृत्तयो देवास्तामस्योऽसुरसंज्ञकाः ॥६६॥
प्रजापतित्वप्राप्त्यर्थमुपासीनस्य वृत्तयः ॥
वागादिजन्या द्विविधास्तत्राल्पा एव देवताः॥ ६७॥
दैवं वृत्तं यत्नसाध्यमासुरं सहजं ततः ॥
देवाः कियन्त एव स्युरनन्ता असुरा नृणाम् ॥६८॥
ब्रह्मादिस्तम्बपर्यन्तलोकेष्वेनमुपासकम् ॥
यथायथं नयामेति तेऽस्पर्द्धन्त परस्परम् ॥ ६९ ॥
अधोलोकफलेष्वेव प्राकृतासङ्गकर्मसु ॥

द्वयाः द्विप्रकाराः। वर्त्तमानप्रजापतेः पूर्वजन्मनि यद्वृत्तं तद्वद्योतको हशब्दः। प्रजापतेर्यजमानावस्थस्यापत्यानि प्राजापत्या इत्यक्षरार्थः।

देवासुरशब्दयोरत्र विवक्षितमर्थमाह *सात्त्विक्य इत्यादिना ॥ ६६ ॥ ततः कानीयसा इत्यादेरर्थमाह *तत्रेति। तत इत्यस्य व्याख्या *तत्रेति ॥ तयोर्मध्ये इत्यर्थः ॥ ६७॥ देवानामल्पत्वेऽसुराणां बहुत्वे च हेतुमाह *दैवमिति। देवताध्यानादिसात्त्विकवृत्तीनामल्पत्वं कामादीनां बाहुल्यं च सर्वप्राणिषु दृष्टमित्यर्थः ॥ ६८ ॥ एतेषु लोकेष्वस्पर्द्धन्तेत्यस्यापेक्षितं पूरयन्नर्थमाह *ब्रह्मादीति ॥ ६९ ॥ यथायथमित्येतत्स्पष्टयन्नसुराणां देवैः स्पर्द्धां कुर्वतामाशयमाह *अधोलोकेति *प्राकृतेति। स्वाभाविकेषु दृष्टप्रयोजन-

यन्नादासञ्जनीयोऽयं पितेत्यासुरनिश्चयः ॥ ७० ॥
प्राकृतासङ्गहानेन पिताऽयं देवसाधनैः ॥
उत्कृष्टव्यो यथाशक्तीत्येवं देवचिकीर्षितम् ॥ ७१ ॥
यद्यप्यचेतनत्वेन न स्पर्द्धेन्द्रियवृत्तिषु ॥
अथापि तासां साकल्याद्देवानां वाऽभिमानिनाम् ॥७२॥
यदोद्भवति शास्त्रोत्था दैवी वृत्तिरथासुरम् ॥
बलं नश्यत्यशेषेण स देवानां जयो भवेत् ॥ ७३ ॥
आसुरी तु यदा सेना कामक्रोधपुरःसरा ॥
जृम्भतेऽथ जयं प्रापुरसुरा देवनाशतः ॥ ७४ ॥
स्वाभाविकत्वादासुर्या भूयस्या सेनयाऽर्दिताः ॥
देवा असुरविध्वंसहेतुं बुद्ध्या व्यचारयन् ॥ ७५ ॥
उपास्योद्गानकर्त्तारं जेष्यामो निखिलासुरान् ॥

कर्मस्वित्यर्थः । पिता यजमानः ॥ ७० ॥ सुराणामाशयमाह *प्राकृतेति । देवसाधनैः शास्त्रीयज्ञानकर्मभिः ॥ ७१ ॥ अचेतनवृत्तीनां कथं स्पर्द्धेत्याशङ्क्य स्पर्द्धाशब्दार्थमाह *यद्यपीति *साकल्यादिति । उद्भवाभिभवात्स्पर्द्धेत्युपचर्यत इत्यर्थः । पक्षान्तरमाह *देवानामिति । वागादिजन्यवृत्तिशब्देन वागाद्यभिमानिन्यो देवता लक्ष्यन्त इत्यर्थः ॥ ७२ ॥ श्रेयस्कामैर्देवानां जये पराजये चासुराणां यतितव्यमित्यभिप्रेत्य तयोर्जयपराजयस्वरूपमाह *यदेत्यादिना ॥ ७३ ॥ ७४ ॥ अस्पर्द्धन्तेत्येतदन्तवाक्यार्थमनूद्य ते देवा इत्यादेरर्थमाह *स्वाभाविकत्वादिति ॥ ७५ ॥

ते देवा दैतेयैरभिभूयमाना ह किल ऊचुः परस्परं समालोचयन्नित्यर्थः ।

इन्तेत्यादेरर्थमाह * उपास्येति ।

हन्त इदानीमस्मिन्यज्ञे ज्योतिष्टोमे उद्गीथेनौद्गात्र-

श्रुतिः-ते ह वाचमूचुस्त्वन्न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्यो आगायद्यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥

इति मत्वा वाचमादौ कर्तृत्वेनात्र वव्रिरे ॥ ७६ ॥
यत्तु लोकेऽत्र कर्त्तृत्वं वागादिद्वारमात्मनः ॥
ईक्ष्यते तदविद्योत्थं निरविद्ये निषेधतः ॥ ७७ ॥
जीवस्य तमसैवेह देहाद्यनुविधानतः ॥

कर्मणा उद्गातुः सकाशात्खलु यजमानः स्वाभिलषितं प्राप्नोति, आत्मने यजमानाय वा यं कामं कामयते तमागायतीति श्रुतेः । एवं यजमानस्थानीयाः करणदेवता उद्गातारमाश्रित्यात्ययाम परिच्छेदाभिमानं हित्वा स्वं स्वं देवभावं प्रतिपद्येमहीत्यालोचयन्निति पूर्वेण सम्बन्धः ॥ १ ॥

ते ह वाचमित्यादेरर्थमाह *इति मत्वेति । वाचं वागभिमानिनीं देवतां नोऽस्मभ्यम् उदगाय औद्गात्रं कर्म कुर्वित्युद्गातृत्वेन वरयामासुरित्यर्थः ॥७६॥ ते ह वाचमित्याद्यर्थवादस्य वागादिगतत्वेन सर्वव्यवहारं वदतस्तात्पर्यमाह *यत्त्विति । प्रतीयमानं कर्तृत्वादि जाग्रत्सुप्त्योरन्वयव्यतिरेकाभ्यां वागाद्युपाधिकं, स्वतस्तस्य नित्यमुक्ते परस्मिन्नयोगादित्यर्थः ॥७७॥ तत्र तदभावेऽपि जीवे दृष्टत्वात्तद्देष्टव्यमित्याशङ्क्येष्टापत्तिरित्याह *जीवस्येति । अविद्यया बुद्ध्यादिचेष्टाऽनुसारित्वाद्युक्ता तत्र कर्तृत्वादिधीरित्यर्थः । तर्हि कर्तृत्वादिमानेकः तद्राहितोऽन्य इति द्वैतमाशङ्क्याह *कूटस्थेति । परस्मिन्नेव प्रतीचि विशिष्टद्वारा

कूटस्थात्मातिरेकेण रूपमन्यन्न लभ्यते ॥ ७८ ॥
वाक्कर्तृत्वमतः सिद्धमुदगायदियं च वाक् ॥
कल्याणोच्चारणं कीर्त्तिर्द्वयमुद्गानतो भवेत् ॥ ७९ ॥
कीर्त्तिं निखिलदेवेभ्यो दत्त्वा कल्याणभाषणम् ॥
स्वार्थं जग्राह तत्सर्वमविदन्नसुरास्तदा ॥ ८० ॥
उद्गातारमुपास्यैनं देवाः कल्याणवादिनम् ॥
जेष्यन्त्यस्मानिति भयादाविध्यन्नसुरा अमुम् ॥८१॥
आसङ्गशस्त्रविद्धेयं वाक्कल्याणाभिमानभाक् ॥

स्वाविद्यारोपितं कर्तृत्वादिकमित्युक्तमिति भावः ॥ ७८ ॥

अर्थवादरूपाख्यायिकातात्पर्यमुक्त्वा तेभ्यो वागुदगायदित्यस्यार्थमाह *उदगायदिति । यो वाचि भोग इत्यादेरर्थमाह * कल्याणेत्यादिना । कल्याणवदनं नाम व्याकरणादिशास्त्रोक्तप्रकारेणोच्चारणसामर्थ्यम् । उच्चारणक्रियया यः सर्वकरणानामुपकारः स वाचि भोगः स एव कीर्त्तिरित्युच्यते ॥ ७९ ॥ ज्योतिष्टोमे द्वादश स्तोत्राणि । तत्र पवमानाख्येषु त्रिषु याजमानमुद्गानं, कर्मफलस्योत्सर्गतो यजमानगामित्वात् । परिशिष्टेषु नवसु स्तोत्रेष्वार्त्विज्यमुद्गानम्, उद्गातुः फलसम्बन्धस्यात्मनेऽन्नाद्यमागायदिति वाचनिकत्वात् । वाग्देवता चोद्गात्री यजमानस्थानीयेभ्य इतरदेवेभ्यः कीर्तिं दत्त्वा कल्याणवदनं स्वस्य गृहीतवतीत्यर्थः । ते ह विदुरित्यादेरर्थमाह *तत्सर्वमित्यादिना । उद्गातारमागम्य स्वेनासङ्गलक्षणपाप्मना संयोजितवन्त इत्यर्थः ॥ ८० ॥ ८१ ॥ असुरासङ्गग्रस्तानां वैदिकज्ञानकर्मभ्यो वैमुख्यं स्यादित्यभिप्रेत्य स यः स पाप्मेत्यस्यार्थमाह * आसङ्गेति । आसङ्गशस्त्रवेधोऽपि वाचः कल्याणवदनस्य स्वीयत्वेन

असभ्यानृतबीभत्सायुक्तं वक्तृवशा सती ॥ ८२ ॥
पूर्वजन्मन्यभूदेतद्वर्त्तमानप्रजापतेः ॥
अतस्तत्सृष्टजीवानां वाचि दोषोऽयमीक्ष्यते ॥ ८३ ॥

श्रुतिः-अथ ह प्राणमूचुस्त्वं न उद्गायेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मना ऽविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ ३ ॥ अथ ह चक्षुरूचुस्त्वन्न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायद्यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मना ऽविध्यन् स यः स पाप्मा यदेवमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥ अथ ह श्रो-

---

स्वीकृतत्वादित्याह *कल्याणेति ॥८२॥*पूर्वेति । पूर्वकल्पे यजमानावस्थस्य तत्सम्भवादिति भावः ॥ ८३ ॥ श्रुतौ स एव पाप्मेति । यः प्रजास्वसभ्यादिना पाप्मा दृष्टः यश्च तासां हेतुभूतसूत्रवाङ्निष्ठः स एव सः। तथा चाद्यसकाराभ्यां कारणस्थं पाप्मानमनूद्य तस्यैव कार्यत्वमुक्तम् । उत्तराभ्यां तु कार्यस्थं पाप्मानमनूद्य तस्यैव कारणस्थत्वमुच्यत इति ततो भेदः ॥२॥३॥ ॥ ४ ॥ ५ ॥ अथ ह प्राणमित्यादिपर्यायचतुष्टयस्य तात्पर्यमाह *क्रमेणेति । अत्र प्राणशब्दो घ्राणवचनः, जिघ्रतीति लिङ्गात् । *एवमु खल्विति । एवं वागादिदेवता अनुक्ता अपि त्वगादिदेवताः कल्याणाकल्याणस्पर्शनादिकार्यदर्शनात्पाप्मभिरुपासृजन् पापसंसर्गं कृतवन्तः इत्यर्थः ।

त्रमूचुः त्वन्न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ शृणोति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति स एव स पाप्मा ॥ ५ ॥ अथ ह मन ऊचुस्त्वन्न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ सङ्कल्पयति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मना ऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ सङ्कल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मनाऽविध्यन् ॥ ६ ॥

क्रमेणान्येन्द्रियाण्येवं विध्वा प्राणं मुखस्थितम् ॥
विव्यत्सन्तोऽसुरा नष्टाः पाषाणक्षिप्तलोष्टवत् ॥८४॥

मुख्यं प्राणं पृथगेव वक्तुम् असुरविद्धप्राणप्रकरणमुपसंहरति श्रुतिः *एवमेनाः पाप्मना ऽविध्यन्निति ॥६॥ एवं वागादिदेवताः क्रमेण परीक्ष्य कल्याणवदनाद्यासङ्गहेतोरासुरपाप्मसंसर्गेणोद्गीथादिनिर्वर्तनादनुपास्यत्वं निश्चित्य अथानन्तरं ह इममित्यभिनयदर्शनार्थम् । आसन्यम् आस्यमध्यगतं प्राणमुचुः त्वन्न इत्यादि पूर्ववत् ।

तमभिद्रुत्य पाप्मना विव्यत्सन्नित्यादेरर्थमाह वार्त्तिककारः *प्राणं मुखस्थितमित्यादिना । विव्यत्सन्तो व्यधनं कर्तुमिष्टवन्तः । दोषासंसर्गिणं मुख्यप्राणं स्वेनासङ्गदोषेण संयोक्तुमिच्छन्तो ऽसुराः स्वयमेव विनष्टाः ॥ ८४ ॥

श्रुतिः—अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत् ते विदुरनेनैवोद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविव्यत्सन् स यथाऽश्मानमृत्वा लोष्टो विध्वꣳसेतैवꣳहैव विध्वꣳसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन् पराऽसुरा, भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

यदप्यन्नादनं देहधारणं चेति तद्द्वयम् ॥

तत्र दृष्टान्तमाह श्रुतिः *स यथेति । स दृष्टान्तो यथा स्पष्टं भवति तथोच्यत इत्यर्थः । अश्मानमृत्वा प्राप्य। विष्वञ्चो नानागतयः। तत आसुरविनाशाद्देवा वागादयोऽभवन् परिच्छेदाभिमाननिवृत्तौ शास्त्रोक्तं स्वंस्वमग्न्यादिभावमभजन्नित्यर्थः। किञ्च प्रतिपक्षभूता असुराः परा,अभवन्नित्यनुवर्त्तते। पराभूता नष्टाः । एवंविधप्राणचिन्तकस्य फलमाह *भवतीति । यथा पूर्वकल्पे कश्चिद्यजमानः सूत्रपदप्रेप्सुस्तामसवृत्तिभिरभिहन्यमानस्तन्निवृत्तये वागादिदेवताः परीक्ष्यासङ्गपाप्मदोषवत्त्वेन तासां जपमन्त्राप्रकाश्यत्वं प्राधान्येनानुपास्यत्वं च निश्चित्यादोषास्पदं मुख्यं प्राणमात्मत्वेनोपास्याध्यात्मिकपिण्डपरिछिन्नात्माभिमानं हित्वा वैराजं पदं प्राप्तः, एवमन्योऽपि यः कश्चिद्वेद पूर्वयजमानवच्छुद्धं प्राणमुपास्ते स विराडात्मना भवति विराट्स्वरूपो भवतीत्यर्थः । किञ्च प्रजापतित्वप्रतिपक्षभूतासङ्गलक्षणपाप्मा भ्रातृव्यः पराभवति, लोके ऽद्वेष्टापि कश्चिच्छत्रुकुले जातो भ्रातृव्यो भवति, अयं तु पाप्मा सकलपुमर्थविघातकत्वाद्द्वेष्टा शत्रुरित्याह *द्विषन्निति । एवम्भूतपाप्मा नश्यतीत्यर्थः ॥७॥

मुख्यप्राणस्य शुद्धत्वेन जपमन्त्रप्रकाश्यत्वमुपास्यत्वं चासिद्धम्

मुख्यप्राणेन कर्तव्यं सर्वार्थं स्यात्तथापि तत ॥८५॥
स्वार्थे आसङ्गविषयो नास्ति कश्चिदतोऽसुरैः ॥
अप्रधृष्या विशुद्धेयमभ्यारोहस्य देवता ॥ ८६ ॥
श्रुतिः-ते होचुः क नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानाꣳहि रसः ॥८॥
सा वा एषा देवता दूर्नाम दूरꣳह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ ९ ॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयाञ्चकार तदासां पाप्मनो विन्यदधात् तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥
उपास्यमाना सा देवैस्तत्पापं ध्यानवर्जिते ॥
जने तदीये देशे च न्याक्षिपत्तौ विवर्जयेत् ॥ ८७ ॥
श्रुतिः—सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युममपहत्याथैना मृत्युमत्यवहत् ॥ ११ ॥
स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत्त सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥

आत्मनेऽन्नाद्यमागायादित्यादिना ऽऽत्मार्थमागानेन वागादिवत्पाप्मवेधसम्भवादित्याशङ्क्याह *यद्यपीति द्वाभ्याम् ॥८५॥८६॥

उक्तस्यैव प्राणस्यायास्यत्वादिगुणान्विधातुमुपक्रमते श्रुतिः *ते होचुरित्यादिना । ते प्राप्ताग्न्यादिभावा वागादयो मुख्यं प्राणमूचुः । किमित्यत्राह *क न्विति । न इत्थम् असक्त आसञ्जितवान् देवभावं प्रापितवान् क नु कुत्राभूदिति । स्मरन्ति हि

अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सो ऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥

लोके कृतोपकारिणं, तद्वत्स्मरन्तो वागादयः देह एव तं पश्यन्तः उचुः *अयमास्येऽन्तरिति। मुखाकाशमध्ये ऽयं प्रत्यक्षो वर्त्तत इति यावत्। यस्मादेवं देवैरुक्तस्तस्मात्प्राणः अयास्यनामा बभूवेत्यर्थः॥ नामान्तरमाह *आङ्गिरस इति। तत्र हेतुः *अङ्गानामिति। प्राणस्याङ्गरसत्वं श्रुतिरेवोपपादयिष्यति ॥८॥ नामान्तरमाह *सेति। या प्रजापतिशरीरस्थाऽयमास्येन्तरिति देवैर्निर्धारिता सैवैषा देवता, देवतात्वं चास्या उपासनक्रियायाः कर्मभावेन गुणभूतत्वात्। अस्या दूरिति नामप्राप्तौ हेतुः *दूर ह्यस्या इति। अस्याः प्राणदेवतायाः मृत्युरासङ्गलक्षणपाप्मा दूरम् असंश्लेषाद् दूरभूत इत्यर्थः। एवं विदुषः फलमाह *दूरं ह वा इति ॥९॥ सा वा एषेत्युक्तार्थः। एतासां वागादीनाम्। मृत्युशब्दव्याख्या *पाप्मानमिति। अपहत्य यत्रासां प्राच्यादीनामन्तस्तत्र गमयाञ्चकार, तत्र गमयित्वा, आसां पाप्मन इति द्वितीयाबहुवचनम्। विन्यदधाद्विविधं स्थापितवती ॥

एतत्सर्वमभिप्रेत्याह। उपास्यमानेति। न जनमित्यादेरर्थमाह* तौ विवर्जयेदिति। श्रुतिस्मृत्याचाररहितं जनं नेयान्न गच्छेत्सम्भाषणादिभिर्न संसृज्येत तादृशजनाश्रितदेशं च न गच्छेदित्यर्थः ॥८७॥

अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवꣳस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः॥१५॥

अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवं ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १६ ॥

एवं प्राणः स्वयं शुद्धः शुद्धं कुर्यादुपासकम् ॥
अतो वागादिकं त्यक्त्वा प्राणं ध्यायेत्प्रतर्पकम्॥ ८८॥

तद्गमने दोषमाह श्रुतिः *नेदिति। निपातः परिभवार्थे। तादृशजनसंसर्गेऽवश एव पाप्मानमन्ववायानि अनुगच्छेयमित्येवम्भीतो जनमन्तं च नेयादिति पूर्वेणान्वयः ॥१०॥ सा वा एषेत्यादि पूर्ववत्। अथोपासनानन्तरम् उपासकप्राणः एना वागादिदेवताः मृत्युमत्यवहत् भावनासामर्थ्यादुपासकोपाधिभूतवागादीनां परिच्छेदाभिमानलक्षणप्रतिबन्धं निरस्याग्न्यादिभावं नीतवानित्यर्थः॥११॥सामान्येनोक्तमर्थं विशिष्याह *स वै वाचमित्यादिना। स प्राणः प्रथमामुद्गाने प्रधानामित्यर्थः। सा वाग्यदा मृत्युमत्यमुच्यत मोचिता तदा स्वरूपभूतमग्निभावं प्राप्तः सोऽयमतिक्रान्तोऽग्निः परेण मृत्युं मृत्योः परस्ताद्दीप्यते। प्राणो वायुरभवत्स तु पवते। चक्षुरादित्योऽभवत्स तु तपति । श्रोत्रं दिशोऽभवन् दिशः प्राच्यादिविभागेन स्थिताः । मनश्चन्द्रमा भाति ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ एवं ह वा इत्यादेरर्थमाह *एवं प्राण इति ॥ ८८ ॥

य एवमुक्तवक्ष्यमाणगुणविशिष्टं प्राणं प्राधान्येन वेद आसाक्षात्कारमुपास्ते एनमुपासकम् एषा प्राणदेवता मृत्युमतिवहति, परिच्छेदाभिमानं निरस्य सर्वात्मत्वं प्रापयतीत्यक्षरार्थः ॥ १६ ॥ *अथेति । वागाद्युपाधिकस्य यज-

श्रुतिः॥अथात्मनेऽन्नाद्यमागायद्यद्धि किञ्चान्नमद्यतेऽने-नैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥

ते देवा अब्रुवन्नेतावद्वा इदꣳसर्वं यदन्नं तदात्मन आगासी-रनु नोऽस्मिन्नन्न आभजस्वेति ते वै माऽभिसंविशतेति तथेति तꣳसमन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति॥

तर्पयत्येष वागादीन् स्वभुक्तान्नेन सर्वशः ॥

मानस्याभ्युदयार्थमागानं त्रिषु पवमानेषु कृत्वाऽप्यनन्तरमवशिष्टेषु नवस्तोत्रेष्वात्मनेऽन्नाद्यम् अन्नं चाद्यं च, अन्नशब्देन भोज्यसामान्यमुच्यते, आद्यशब्दः संस्कृतान्नपरः। आगानफलमार्त्विज्यं च वचनादित्युक्तम्। आत्मार्थमन्नाद्यं गीतमित्यत्र हेतुमाह*यद्धीति। हिः हेतौ। यस्माल्लोके प्राणिभिर्यत्किञ्चिदन्नसामान्यमद्यते तदनेन प्राणेन, अनशब्दः प्राणपर्यायः, प्राणेनैव तदद्यत इत्यर्थः। किञ्चेह शरीराकारपरिणतेऽन्ने प्रतितिष्ठति प्राणः तस्मात्प्राणेनात्मार्थमन्नाद्यं गीतमित्यर्थः ॥ १७ ॥ ननु प्राणेनैव तदद्यत इत्यवधारणमयुक्तं, वागादीनामप्यन्ननिमित्तोपकारदर्शनादित्याशङ्क्य तदुपकारस्यापि प्राणद्वारत्वं दर्शयति* ते देवा इत्यादिना। ते वागादयो देवा मुख्यप्राणमब्रुवन् यदिदं शरीरद्वयस्थितिकरमद्यते एतावदेवान्नं नान्यदस्ति तत्सर्वमात्मार्थमागासीरागीतवानासि गानेनात्मसात्कृतमित्यर्थः। वयं चान्नं विना स्थातुमशक्ताः, अतोऽनु पश्चादस्मानस्मिन् त्वदीयेऽन्ने आभजस्वास्मांश्चान्नभागिनः कुरु। आभाजयस्वेति वक्तव्ये णिचो लोपश्छान्दसः। प्राण आह ते यूयम् अन्नार्थिनो मामेवाभितः संविशतेति। एवमुक्तवति प्राणे तथेति तं प्राणं परि समन्तात् न्यविशन्त प्राणं परिवेष्ट्य निवि-

इत्यर्थस्य कुतः सिद्धिरिति चेदुच्यते शृणु ॥ ८९ ॥
भुक्तं त्रिधा भवत्यन्नं स्थूलमध्यमसूक्ष्मकैः ॥
भागैः स्थूलो बहिर्याति मध्यमाद्देहपोषणम् ॥ ९० ॥
अणीयान्सूक्ष्मनाडीस्थो देवताः पोषयत्ययम् ॥
पुष्टेन्द्रियैः सुखोत्पत्तिर्या जीवात्मन एव सा ॥ ९१॥
ता एता देवताः सप्तदश ज्ञानक्रियात्मकाः ॥
सोऽयं सप्तदशग्रामो भोक्तुः करणलक्षणः ॥ ९२ ॥
बुद्धीन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाण्यपि ॥
वायवः पञ्च बुद्धिश्च मनः सप्तदशं विदुः ॥ ९३ ॥
त्यक्तेऽपि स्थूलदेहेऽस्मिन्भूतपञ्चकमाश्रयः ॥

ष्टवन्त इत्यर्थः । त्यक्तप्राणस्यान्नेन वागादिस्थित्यनुपलब्धेः प्राणद्वारैव वागादेस्तृप्तिरित्युपसंहरति * तस्मादिति । अनेनानशब्दितप्राणेन यदन्नमत्ति लोकस्तेनान्नेन प्राणद्वारैता वागादयस्तृप्यन्ति ।

एतत्सर्वमभिप्रेत्याह * तर्पयतीति । नन्विदमयुक्तं, न हि चैत्रे भुक्तवति मैत्रस्तृप्यतीत्याशङ्क्य परिहरतीति । *अर्थस्येति ॥ ८९ ॥ भुक्तान्नभागानां प्रकृतोपयोगिविनियोगविशेषमाह *स्थूलो बहिर्यातीति । पुरीषत्वेनेति शेषः । *मध्यमादिति । त्वगादिक्रमेण स्थूलदेहपुष्टिर्भवतीत्यर्थः ॥ ९० ॥ देवताः वागादीन् । पुष्टिवत्तज्जन्यसुखस्यापीन्द्रियधर्मत्वशङ्कां निरस्यति *पुष्टेति ॥ ९१ ॥ अणिष्ठो रसो या देवताः पोषयति तासां स्वरूपमाह *ता इति । तासां स्वातन्त्र्यं वारयति * सोऽयमिति ॥ ९२ ॥ तमेव करणग्रामं परिगणयति *बुद्धीति ॥ ९३ ॥ अस्य लिङ्गदेहस्य स्थूलदेहस्थत्वात्तन्नाशे निराश्रयस्यानवस्थानात् मुक्तिरित्याशङ्क्य सूक्ष्मावस्थस्य पञ्चीकृत-

लिङ्गं सप्तदशग्रामं प्राहुः पञ्चकसंयुतम् ॥ ९४ ॥
पयोम्भोवदिदं लिङ्गं नानारूपैः समन्वितम् ॥
आविर्भावतिरोभावैः कारणात्मनि वर्त्तते ॥ ९५ ॥
एकीभूते क्षीरनीरे यथा ज्ञानक्रिये तथा ॥
एकीभूते स्थिते लिङ्गे रूपेणानेकशक्तिके ॥ ९६ ॥
यथा वा धेनुभिः पीतं नीरं क्षीरीभवेत्तथा ॥
साभासमोहश्चिन्निष्ठो लिङ्गीभूयावभासते ॥ ९७ ॥
आविर्भावतिरोभावौ बहुशः पटचित्रवत् ॥
पटे विकाससङ्कोचाविव बोधसुषुप्तके ॥ ९८ ॥
कूटस्थबोधतन्मोहचिदाभासत्रयात्मना ॥
सङ्कोच्य जागरस्वप्नौ लिङ्गं सुप्तौ तिरोभवेत् ॥ ९९ ॥

भूतस्यैव तदाश्रयत्वान्नैवमित्याह *त्यक्त इति । " तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः " (३-१-१) इति सूत्रे भाष्यकारैरेवमेवोक्तमित्याह * लिङ्गमिति ॥ ९४ ॥ लिङ्गदेहस्य मूलकारणमाश्रय इति पक्षान्तरमाह *पयोम्भोवदिति । यथा पयसोऽम्भसश्च दध्यादिना हिमादिना च नानारूपत्वमेवं समष्टिव्यष्ट्यात्मकनानाविधाकारोपेतं लिङ्गमपि मूलकारणे तिष्ठतीत्यर्थः ॥ ९५ ॥ आविर्भावतिरोभावैरित्युक्तं, तत्र तिरोभावं दृष्टान्तेन स्पष्टयति *एकीभूत इति । लिङ्गात्मके ज्ञानक्रिये क्षीरनीरवदेकीभूयानेकशक्तिके मूलकारणे स्वरूपेण कारणात्मना स्थिते यदा तदा तिरोभाव इति शेषः ॥ ९६ ॥ आविर्भावमाह *यथेति ॥ ९७ ॥ सत एवाविर्भावादित्यत्र दृष्टान्तान्तरमाह *आविर्भावेति ॥ बोधो जाग्रत्स्वप्नः ॥ ९८ ॥ लिङ्गस्य सुप्तौ सङ्कोचमाह *कूटस्थेति ॥ ९९ ॥ लिङ्गस्य विस्तृ-

अपास्ताशेषबाह्यार्थं तज्जवासनयाऽन्वितम् ॥
लिङ्गमाविर्भवेत्स्वप्ने प्रसार्याखिलवासनाः ॥ १०० ॥
जाग्रत्काले विशेषेण स्थित्वा हृदयसद्मनि ॥
द्वासप्ततिसहस्राणि नाडीर्व्याप्यावतिष्ठते ॥ १०१ ॥
स एष परमात्मैव स्वात्ममोहसहायवान् ॥
ज्ञानशक्त्या क्रियाशक्त्या जानन्कुर्वन्वपुःस्थितः ॥१०२॥
आपादमस्तकं व्याप्तं लिङ्गेनास्मद्वपुर्यथा ॥
तथा देवादिदेहाश्च लिङ्गं सर्वात्मकं ततः ॥ १०३ ॥
एकमेव यथा गोत्वं प्रतिव्यक्ति समापितम् ॥
प्रतिदेहं समाप्यास्ते तथैका लिङ्गदेवता ॥ १०४ ॥
लिङ्गं क्षुद्रशरीरेण पुत्तिकाख्येन तत्समम् ॥
मशकेन गजेनापि विराट्पिण्डेन तत्समम् ॥ १०५ ॥
वायुर्गौतम तत्सूत्रमित्युक्तेर्वायुदेहभृत् ॥

तपटवत्स्वप्नजाग्रतोर्विकासमाह *अपास्तेति ॥१००॥१०१॥ एवमवस्थात्रये लिङ्गस्थितिमुक्त्वा तदवच्छिन्नजीवस्य परेण वास्तवभेदशङ्कां धुनीते *स एष इति ॥ ज्ञानशक्त्या जानन् क्रियाशक्त्या कुर्वन् वपुषि स्थित इत्यर्थः ॥१०२॥ ननु लिङ्गदेहः परिच्छिन्नोऽपरिच्छिन्नो वा। नाद्यः, पुत्तिकादिशरीरपरिमितस्य गजशरीरग्रहणे तद्व्यापित्वं न स्यात् । नान्त्यः, देहाद्बहिरपि सुखाद्युपलब्धिप्रसङ्गादित्याशङ्क्य हिरण्यगर्भलिङ्गं विना इतरेषां परिच्छिन्नं, तेषामपि क्वचिदपरिच्छिन्नोक्तिरुपासनार्था, परिच्छन्नानामपि तेषां सङ्कोचविकासाद्गजादिशरीरव्याप्तिरुपपन्नेत्याह *आपादेति॥ गोत्वदृष्टान्तोक्तिर्व्यष्टिसमष्ट्योः कार्यकारणलिङ्गदेहयोरभेदविवक्षयेति ध्येयम्॥१०३॥१०४॥१०५॥ हिरण्यगर्भलिङ्गं तच्छरीरस·

हिरण्यगर्भस्तेनापि लिङ्गमेतत्समम्मतम् ॥ १०६ ॥
समस्तव्यस्तदेहेषु समष्टिव्यष्टितामगात् ॥
लिङ्गं समस्तदेहोऽयं वायुर्व्यस्ता गजादयः ॥ १०७ ॥
धेन्वां गर्भस्थवत्से च यथा गोत्वं समं तथा ॥
सूत्रात्मन्यस्मदादौ च लिङ्गसाम्यं श्रुतीरितम्॥१०८॥
समायामपि जिह्वायां नरो वक्ति पशुर्न तु ॥
सत्यसङ्कल्पता तद्वत्सूत्रादौ नास्मदादिषु ॥१०९॥
अभ्यासेन वचःपानाद्यथा वक्ति शुकस्तथा ॥
योगाभ्यासेन धर्मात्मा सत्यसङ्कल्पवान्नरः ॥ ११० ॥
प्रबोधसुप्तिवत्सृष्टिसंहृत्योः सूत्रविग्रहे ॥
आविर्भावतिरोभावौ लिङ्गमाप्नोति मोहजम् ॥१११॥
चिदात्मव्यवहारार्थमुपाधिर्लिङ्गमीरितम् ॥
लिङ्गोपहित आत्मैष बहुधा व्यवतिष्ठते ॥ ११२ ॥
प्रतिप्राणि परिच्छेदो ज्ञानकर्मानुरोधतः ॥

मामिति वक्तुं तस्यापि लिङ्गातिरिक्तं वाय्वात्मकं शरीरमस्तीत्याह *वायुरिति॥१०६॥१०७॥लिङ्गसाम्यं तच्छीरव्यापित्वम्॥१०८॥ १०९॥ वचः वेखण्ड इति भाषायाम् ओषधी तस्याः वचनस्य वा पानात् राम रामेति शिक्षणात्॥११०॥जाग्रत्सुप्त्योरुक्तन्यायं सृष्टिप्रलययोरितिदिशति *प्रबोधेति ॥ सूत्रविग्रहेऽपञ्चीकृतभूते तस्य लयेऽपि सूक्ष्मरूपेणावस्थानादिति भावः ॥ १११ ॥ जीवव्यवहारहेतुं लिङ्गदेहं निरूप्य तत्प्रसङ्गात्तदुपहितात्मस्वरूपं निरूपयति *लिङ्गोपहितेति ॥ बहुधा ब्रह्मादिपुत्तिकान्तशरीरेषु तत्तद्रूपेणेत्यर्थः ॥ ११२ ॥ एकस्यैवात्मनः सर्वशरीरवर्त्तित्वे प्राणिनां व्यवहारवैचित्र्यं कथमित्याशङ्क्याह *प्रति-

धर्माधर्मानपेक्षः सन्नानन्त्येनावतिष्ठते ॥ ११३ ॥
एवं च सति सूत्रात्मा वर्त्तमानः पुरातनात् ॥
अनुष्ठितज्ञानकर्मसाधनात्स्रष्टृतामगात् ॥ ११४ ॥
एकापूर्वप्रयुक्तत्वात्समस्तव्यस्तरूपिणाम् ॥
प्राणिनां व्यवहारोऽयं स्रष्टृभिप्रायतो भवेत् ॥ ११५ ॥
प्रातिस्विकान्यपूर्वाणि प्राणिनां यानि तान्यपि ॥
तत्रैवान्तर्भवन्त्यस्य तादृक्सङ्कल्पयोगतः ॥ ११६ ॥
सर्वात्मप्राणरूपोऽस्मीत्येवं सङ्कल्प्य तत्फलम् ॥
प्राप सूत्रादिदेहेषु पुत्तिकान्तेष्ववस्थितः ॥ ११७ ॥
एकमेव जगद्बीजमीशाभिप्रायहेतुतः ॥
भूरिनानाप्रदेशेन प्रत्यात्मं व्यवतिष्ठते ॥ ११८ ॥
कुर्यान्मेरावणुधियमणौ मेरुधियं तथा ॥

माणि परिच्छेद इति । परिच्छेदो व्यवहारः । उपाधिविनिर्मुक्तस्य तस्य स्वरूपमाह *धर्माधर्मेति॥११३॥जीवव्यवहारस्य कर्माधीनत्वे हिरण्यगर्भस्रष्ट्र्यादिव्यवहारोऽपि तथा स्यादित्याशङ्क्याङ्गीकरोति *एवं च सतीति ॥ ११४ ॥ नन्वेवं तस्यानीश्वरत्वात्तदभिप्रायानुसारेण जीवानां व्यवहारो न स्यात्तत्राह *एकेति ॥ ११५ ॥ जीवव्यवहारस्यैकापूर्वप्रयुक्तत्वमसिद्धं प्रतिजीवमपूर्वभेदादित्याशङ्क्याह *प्रातिस्विकानीति द्वाभ्याम् । सर्वात्मभावनया वैराजं पदं प्राप्तस्य सत्यसङ्कल्पत्वादीशतुल्यतेति भावः ॥ ११६ ॥ ११७ ॥ आत्मस्वरूपनिरूपणमुपसंहरति *एकमिति ॥ यद्यपि जगत्कारणमनाद्यनिर्वाच्यमेकं तथापि तत् ईशस्य तस्मिन्नभिप्रायश्चिदाभासस्तदनुसारेण बहुविधहेतुभेदेन फलभेदेन प्रतिजीवं भातीत्यर्थः ॥ ११८ ॥ प्रत्यगज्ञानं साभास-

सर्वत्राप्रतिघात्येव प्रत्यगज्ञो महेश्वरः ॥ ११९ ॥
अतत्त्वज्ञस्य तमसो रज्ज्वज्ञानोरगादिवत् ॥
अष्टावस्थाप्रभेदेन मिथ्याऽज्ञानं प्रजायते ॥ १२० ॥
देहेन्द्रियमनःप्राणविराट्सूत्रेशशक्तयः ॥
अष्टावस्था इमाः प्रोक्ताश्चिदेकरसवस्तुनः ॥ १२१ ॥
प्रत्यगज्ञानविध्वस्तौ रज्ज्वज्ञानहताविव ॥
तत्कल्पितनिवृत्तिः स्याच्छिष्यते केवलः परः ॥१२२॥
समस्तव्यस्ततैषेह प्रत्यगज्ञानभूमिगा ॥
न त्वपास्तसमस्तान्ध्ये नेतिनेति परात्मनि ॥१२३॥
इत्थं प्राणस्य सर्वाक्षतर्पकत्वप्रसङ्गतः ॥

मपि कथमविद्यमानं भेदमावेदयेदित्याशङ्क्याह *कुर्यादिति । अघटितघटनापटीयस्त्वेन प्रसिद्धाज्ञानस्य साभासस्य न किञ्चिदपि प्रतिहतिरित्यर्थः । चिदात्मनः प्राधान्येन निर्देशोऽज्ञानस्यास्वातन्त्र्यज्ञापनायेति द्रष्टव्यम् ॥ ११९ ॥ केचित् द्वैतस्य नाज्ञानजत्वम्, अष्टावस्थस्य तस्य वस्तुत्वादित्याहुस्तान्प्रत्याह *अतत्त्वेति द्वाभ्याम् ॥ १२० ॥ ॥ १२१ ॥ अवस्थानां कल्पितत्वे मानमाह *प्रत्यगिति । यत्र त्वस्य सर्वमित्यादिश्रुत्या मुक्तौ द्वैताभावात्, अज्ञाने सति द्वैतं तदभावे नेत्यन्वयव्यतिरेकाभ्यां जगत् अज्ञानजम् । विमतम् अज्ञानजं तदन्वयव्यतिरेकाद्रज्जुसर्पवदित्यनुमानादित्यर्थः ॥ १२२ ॥ समस्तव्यस्तात्मकं ब्रह्मस्वभाव इति केचित्, तन्मतं श्रुतिविरोधादनादेयमित्याह*समस्तेति । न तु वास्तवीति शेषः ॥ तत्र हेतुः *अपास्तेति । नेति नेतीति निरस्तसमस्तजडे परस्मिन्नानारसताया अयोगादिति भावः ॥ १२३ ॥ परमप्रकृ-

उक्ता तत्त्वस्थितिः प्राणस्तर्पको ध्येय इष्यताम् ॥१२४॥
शुद्धिं ब्रुवन्नर्थवादस्तत्त्वस्थितिमसूसुचत् ॥
अतः प्रतीयमानेऽर्थे प्रमाणमविरोधतः ॥ १२५ ॥
ननूपास्तिविधिं नैव पश्यामो ब्राह्मणे क्वचित् ॥
अभ्यारोहजपस्यैव विधिरत्रावलोक्यते ॥ १२६ ॥
मैवमासुरपापस्य नाशोक्तौ तद्विधिश्रुतेः ॥
य एवं वेद स प्राणो भवेत्पाप्मा तु नश्यति ॥१२७॥
वागादिनिन्दया मुख्यप्राणोपासा न चेदिह ॥
विधित्सिताऽथ तन्निन्दा व्यर्था प्राणस्तुतिस्तथा॥१२८॥
ऐहिकामुष्मिकफले पूर्वोक्ते जपमात्रतः ॥
न सिध्यतस्ततो नास्य जपशेषार्थवादता ॥ १२९ ॥

समुपसंहरति । *इत्थमिति ॥ १२४ ॥ प्रसङ्गात्तत्त्वावस्थितिरुक्तेत्युक्तम् । प्रसङ्गमेव व्यनक्ति *शुद्धिमिति ॥ वागादिनिष्ठत्वेनोद्गानादिकर्तृत्वं वदताऽर्थवादेनात्मनो वस्तुतः कर्तृत्वादिकं नेति सूचितमित्युक्तमिति भावः । विधिशेषस्यार्थवादस्य कथं शुद्ध्यादिप्रमापकत्वं तत्राह*अत इति । अबाधिताज्ञातार्थबोधित्वेन तस्यापि प्रामाण्यमविरुद्धमिति भावः ॥१२५॥ एवं शुद्ध्यादिगुणविशिष्टप्राणस्योपास्यत्वमुक्तं, तदेव स्थूणानिखननन्यायेन द्रढयितुमाक्षिपति *नन्विति ॥ १२६ ॥ उपास्तिविधेः श्रवणात्तत्परं वाक्यमिति परिहरति * मैवमिति ॥ १२७ ॥ वेदेत्यस्य विधित्वाभावे बाधकमाह * वागिति ॥ "यत्स्तूयते तद्विधीयते " इति न्यायादत्र विधिः कल्प्यत इति भावः ॥ १२८ ॥ जपविधिशेषत्वेनार्थवादत्वमुक्तं प्रत्याह *ऐहिकेति । जपस्य साक्षात्कारहेतुत्वं च न्यायविरुद्धमित्युक्तमिति भावः ॥१२९॥

उपास्त्या तु फलं सिद्ध्येदन्तरेणापि तं जपम् ॥
इत्यर्थो गम्यते लोकजिदेवेति श्रुतत्वतः ॥ १३० ॥
शुद्ध्यादिप्राणमाहात्म्यं विधिशेषार्थवादतः ॥
न सिध्यतीति नो वाच्यं बाधस्यानुपलम्भनात्॥१३१॥
मुख्यस्थित्यादयः प्राणे गुणा दृष्टा न तेष्विह ॥
योषाग्नित्वादिवत्काश्चिद्विरोध उपलभ्यते ॥ १३२ ॥
अक्षाद्यविषया ये तु गुणा आगमतो मताः ॥
शुद्ध्यक्षतर्पकत्वाद्याः कुतस्तेषां मृषार्थता ॥ १३३ ॥
मृषात्वसाधकं मानं न किञ्चिदिह विद्यते ॥
न च कारणदोषोऽत्र वेदे सम्भाव्यते क्वचित् ॥१३४॥
अद्वैतश्रुतिबाधेन मृषात्वमिति चेन्न तत् ॥
प्राणोऽस्ति शुद्धिर्मिथ्येति नैवमाह श्रुतिः क्वचित्॥१३५॥
सत्यासत्यविभागोऽयमविभागात्मवस्तुनि ॥

उपास्तेर्विधित्सितत्वे वाक्यशेषमप्यनुकूलयति *उपास्त्येति । प्राणोपास्तिविधिमङ्गीकृत्य प्राणो न शुद्ध्यादिगुणो मानाभावाद्वाक्यस्य विधिपरत्वादिति शङ्कते *शुद्ध्यादीति ॥ देवताधिकरणन्यायेन [१-३-२६] परिहरति *बाधस्येति ॥१३१॥ आसन्यत्वादिगुणेषु प्रत्यक्षासिद्धेष्वविरोधं तावदाह *मुख्येति ॥ मुख्यास्थितिर्मुखबिलवर्त्तनमासन्यत्वमित्यर्थः । आदिपदेन आङ्गिरसत्वादिग्रहः ॥ १३२ ॥ श्रुतिमात्रगम्यानामिन्द्रियपुष्टिजनकत्वादीनामध्यक्षादिविरोधशङ्कैव नास्तीत्याह *अक्षेत्यादिना ॥ १३३ ॥ १३४॥ अद्वैतश्रुतिविरोधात् शुद्ध्यादेरसत्त्वमाशङ्क्य परिहरति *अद्वैतेति । प्राणस्य सत्यत्ववच्छुद्धितत्त्वस्याभ्युपगमेऽपि नाद्वैतक्षतिरिति भावः ॥ १३५ ॥ प्रतीयमानस्य सर्वस्यापि नित्यत्वाभ्युपगमे किं परं तर्हि नेह नानेति वाक्यं ?

प्रत्यगज्ञानहेतूत्थः पृथङ् नास्तीत्यभावत ॥ १३६ ॥
स्वाभासफलकारूढस्तदज्ञानजभूमिषु ॥
तत्स्थोऽपि तदसम्बद्ध ईशः प्राणादितां गतः ॥१३७॥
तदज्ञानं तदुत्थं च जगत्कृत्स्नं तदात्मकम् ॥
यतोऽतस्तदनूद्याह सदेवेदमिति श्रुतिः ॥ १३८ ॥
प्राणो वा तस्य शुद्धिर्वा सर्वं सत्तत्त्वमित्यसौ ॥
अद्वैतश्रुतिराचष्टे न तु किञ्चिन्निषेधति ॥ १३९ ॥
नृशृङ्गाद्यपि सत्तत्त्वमित्यभ्युपगमः श्रुतेः ॥
प्राणशुद्ध्यादिसत्तत्त्वमिति वक्तव्यमत्र किम् ॥१४०॥

तत्राह * सत्येति । आत्मा सत्यः प्रपञ्चोऽसत्य इति विभागो मोहजन्यः प्रपञ्चसत्यताया अप्यात्मस्वरूपत्वात् । निषेधश्रुतिरात्मसत्तातिरिक्तां द्वैतसत्यतामपवदति न तु द्वैतरूपमिति भावः ॥ १३६ ॥ ननु प्राणादिसत्ताया आत्मस्वरूपत्वमनुपपन्नम् असङ्गस्य तेन सम्बन्धाभावात्तत्राह *स्वेति ॥ स्वस्यात्मन आभासः प्रतिबिम्बो यस्मिन्नज्ञाने तत्तथा तस्मिन् फलके समारूढोऽविद्याद्वारेत्यर्थः ॥ आत्मनः प्राणादिभिर्वास्तवसम्बन्धाभावेऽपि व्यवहारदशायामाविद्यकं तादात्म्यमविरुद्धमिति भावः ॥ १३७ ॥ आत्मसत्तातिरेकेण द्वैतसत्ता नेत्यत्र श्रुतिं प्रमाणयति *तदिति । कार्यस्य कारणस्य सर्वस्य प्रतीचि कल्पितत्वेन तन्मात्रत्वादिदमिति तदनुवादेन सदेवेत्यद्वयं वस्तु निःसंदिग्धं श्रुतिराहेत्यर्थः ॥ १३८ ॥ निषेधवाक्यतात्पर्यं निगमयति *प्राण इति ॥ १३९ ॥ एवं श्रुतितात्पर्ये शुद्ध्यादिसत्यता कैमुतिकन्यायसिद्धेत्याह *नृशृङ्गेति ॥ नृशृङ्गशब्देन प्रातिभासिकं वस्तु लक्ष्यते तदपि नासत् असत्त्वेऽनुपलम्भप्रसङ्गादिति भावः ॥ १४० ॥ फलितमाह *यादृशमिति ॥ किञ्च प्रा-

यादृशं प्राणसत्यत्वं तादृशी शुद्धिसत्यता ॥
अनर्थकारि शास्त्रं स्यादयथावस्तुबोधने ॥ १४१ ॥
नाम ब्रह्मेत्येवमादावयथावस्तुधीर्भवेत् ॥
शास्त्रेणेति न वक्तव्यं तद्बुद्धेर्गौऽणता यतः ॥ १४२ ॥
यद्वन्निर्ज्ञातभेदेऽपि विष्णुधीरुपलात्मनि ॥
विधीयते तथा नाम्नि ब्रह्मबुद्धिर्विधीयते ॥ १४३ ॥
अज्ञातरज्जुतत्त्वो हि रज्जुसर्पधियेक्षते ॥
नामादौ न तथा तस्माद्गौणी धीर्न तु सा मृषा ॥१४४॥
ब्रह्माख्यं न हि वस्त्वस्ति बुद्धिरेवास्त्यतो मृषा ॥
इति चेन्न यतो गौणबुद्धिर्मुख्यार्थपूर्विका ॥ १४५ ॥
गौणस्य मुख्यापेक्षत्वान्मुख्यं ब्रह्म विना न तत् ॥
गौणं ब्रह्म यथा गौणो वह्निर्मुख्याग्निपूर्वकः ॥ १४६ ॥
विध्यभावाद्ब्रह्मवाक्यमाभास इति चेन्न तत् ॥

णस्याशुद्धत्वे शुद्धत्वेन तं वदन्वेदोऽप्रमाणं स्यादित्याह *अनर्थेति ॥ १४१ ॥ अयथावस्तुबोधिनोऽपि शास्त्रस्य प्रामाण्यमाशङ्क्य परिहरति *नामेति ॥ १४२ ॥ नामादौ ब्रह्मधियो गौणत्वं दृष्टान्तेन स्पष्टयति *यद्वदित्यादिना ॥१४३॥१४४॥ नामादावविद्यमानब्रह्मण एवारोपान्न तद्दृष्टिर्गौणीति शङ्कते *ब्रह्मेति ॥ सत्यादिवाक्यस्य विधिविधुरत्वान्न ब्रह्मणि मानतेत्यभिमानः । ऋगादिषु पृथिव्यादिदृष्टिविधानवन्नामादेर्गृहीतभेदस्यैव सतो ब्रह्मणस्तत्र दृष्टिविधानानियमान्न ब्रह्मदृष्टेरगौणत्वमिति मत्वा परिहरति *नेति ॥ एवं तद्दृष्टेर्गौणत्वे विनाऽपि श्रुतिं ब्रह्म सिध्यतीत्याह *यत इति ॥ १४५ ॥ उक्तमेव व्यनक्ति *गौणस्येति ॥ १४६ ॥ विधिविधुरत्वात्सत्यादिवाक्यं न ब्रह्मणि मानमिति तदनूद्य प्रत्याह *विध्यभा-

क्रियावाक्यसमानत्वाद्विद्यावाक्यस्य सर्वतः ॥१४७॥
असन्दिग्धाविपर्यस्तधीः समा वाक्ययोर्द्वयोः ॥
मानत्वे तावता सिद्धे विधिः किं ते करिष्यति ॥१४८॥
अकार्येऽपि हि मेर्वादावस्ति मेरुरितीरणात् ॥
सम्यग्धीर्जायते यद्वत्तथा तत्त्वमसीत्यतः ॥ १४९ ॥
वेदेऽप्यस्ति विना कार्यं निषिद्धार्थावबोधनम् ॥
पलाण्ड्वादावकरणान्नान्या धीर्जायते श्रुतेः ॥ १५० ॥
मृगतोये प्रवृत्तस्य तृष्णार्तस्योषरे क्षणात् ॥
तमोध्वस्तौ निवृत्तिः स्यान्निषेधेषु तथेक्ष्यताम् ॥१५१॥
इदं हितमिति भ्रान्त्या प्रवृत्तस्य निषेधतः ॥
भ्रान्तिनाशे निवृत्तिः स्यात्पलाण्ड्वादेरभक्ष्यतः॥१५२॥
तस्मान्निषेधशास्त्रस्य शुद्धभूतार्थनिष्ठता ॥
पुंव्यापारस्य गन्धोऽपि न तत्रास्तीति निश्चयः॥१५३॥
आत्मयाथात्म्यविज्ञाननिष्ठता तद्वदीक्ष्यताम् ॥
तत्त्वमस्यादिवाक्यानां नानुष्ठेयं मनागपि ॥ १५४ ॥

वादित्यादिना ॥ १४७ ॥ १४८ ॥ १४९ ॥ किन्तु अकार्यबोधिनोऽपि "लशुनं न भक्षयेत्" इत्यादिनिषधवाक्यस्य यथा प्रामाण्यं तद्वद्वेदान्तस्यापि किं न स्यादित्याह *वेदेऽपीति । निषेधवाक्यानामपि कार्यार्थत्वे विधिनिषेधाभेदप्रसङ्गात् । नञः स्वसम्बन्ध्यभावबोधने मुख्यार्थस्यार्थान्तरवृत्तौ लक्षणापाताद्रागादिप्रसक्तभक्षणादिक्रियानिवृत्त्युपलक्षितौदासीन्यादन्या धीरनुष्ठेयविषया नोदेतीत्यर्थः ॥१५०॥ हितबुद्ध्या हननादौ प्रवृत्तस्य निषेधश्रुत्या तत्राहितत्वे बोधिते औदासीन्यव्यतिरेकेण नानुष्ठेयं किञ्चिदिति दृष्टान्तपूर्वकमाह * मृगेत्यादि ॥ १५१ ॥ ॥ १५२ ॥ १५३ ॥ १५४ ॥ *पूर्वं प्रवृत्तेति । कर्मकाण्डिनः कर्त्त-

न केवलमनुष्ठेयस्याभावः किन्तु वेदनात् ॥
पूर्वं प्रवृत्तकर्मापि बाध्यं पुंसो निषेधवत् ॥ १५५ ॥
अकर्त्रात्मधिया कर्म लौकिकं वैदिकं तथा ॥
बाध्यं निषेधशास्त्रेण कलञ्जादिप्रवृत्तिवत् ॥ १५६ ॥
अथ कृष्यादिबाधेऽपि न बाधः श्रौतकर्मणः ॥
नैवमज्ञानहेतूत्थानर्थार्थत्वसमत्वतः ॥ १५७ ॥
हितत्वभ्रान्तिनरकौ कलञ्जादाविवात्मनः ॥
कर्तृत्वभ्रान्तिदेहाप्ती समाने श्रौतकर्मसु ॥ १५८ ॥
शास्त्ररागादिजन्यत्वात्काम्यानामेवमस्तु तत् ॥
शास्त्रमात्रनिमित्तत्वान्नित्यानां नेति चेन्न तत् ॥१५९॥
स्वर्गादिकामिनो यद्वदग्निहोत्रविधिस्तथा ॥
मोहकामादिदुष्टस्य नित्यं कर्म विधीयते ॥ १६० ॥
अकर्त्तारं स्वमात्मानं कर्तृत्वेनाभिमन्यते ॥
नित्यकर्माधिकार्यस्मान्मोहदोषोऽधिकारिणः ॥१६१॥
सोऽकामयत जाया मे स्यादित्यादि श्रुतौ स्फुटम् ॥
कामदोषः प्रत्यपादि सर्वकामाधिकारिणाम् ॥१६२॥

व्यतया निश्चितेऽप्यौदासीन्यं स्यादित्यर्थः ॥ १५५ ॥ उक्तमेव व्यनक्ति *अकर्त्रेति ॥१५६॥१५७॥ साम्यमेवोपपादयति *हितत्वेति ॥ निषेधशास्त्राज्ञानात्तदविश्वासाद्वा हननादौ हितत्वभ्रमः तत्करणफलं नरकपातः, एवमात्मनः तत्त्वाज्ञानात्कर्तृत्वादिभ्रमस्तत्फलं च देहान्तराप्तिः । आत्यन्तिकपुमर्थत्वाभावाच्छ्रौतकर्मणां कृष्यादितुल्यतेति भावः ॥ १५८ ॥ *शास्त्रेति ॥ शास्त्रं च रागादि च तदुभयनिमित्तत्वादित्यर्थः । नित्यानां, त्याग इति शेषः ॥ १५९ ॥ १६० ॥ नित्यकर्मकर्तुरपि मोहं कामं च क्रमेणाह *अकर्तारमिति द्वाभ्याम् ॥१६१॥१६२॥

आविरिञ्च्याद्विरक्तोऽपि मुक्तिं कामयते ततः ॥
तत्प्रवृत्तिश्च काम्येति चेत्तर्ह्येषाऽपि बाध्यताम् ॥१६३॥
आत्माज्ञानैकहेतुत्वाद्वाङ्मनःकायकर्मणाम् ॥
आत्मज्ञानेन तद्धानात्समाप्तिः सर्वकर्मणाम् ॥१६४॥
कर्मोपयोगाभावेऽपि वृथाकालक्षयाद्वरम् ॥
कर्मानुष्ठानमिति चेन्न प्रवृत्तेरसम्भवात् ॥ १६५ ॥
न चोच्छिन्नात्ममोहस्य सदैवात्मधियः स्मृतेः ॥
अल्पोऽप्यवसरोऽस्तीह वाङ्मनःकायकर्मणाम्॥१६६॥
कर्मणोऽवसरश्चेत्स्यात्त्वद्भिक्षावसरो यथा ॥
मैवं क्षुधादिदोषैकहेतुत्वेनानिवारणात् ॥ १६७ ॥
कर्मापि मोक्षकामादिमूलं चेद्यो विमुह्यति ॥
स करोत्येव कर्माणि को ह्यज्ञं विनिवारयेत् ॥१६८॥

नन्वेवं सति श्रवणादिप्रवृत्तिरपि बाध्येत, तस्या अपि मुक्तिकामनाप्रयुक्तत्वात्तथा च आसुप्तेरामृतेरित्यादिशास्त्रविरोध इति शङ्कते ॥ आविरिञ्च्यादिति । इष्टापत्त्योत्तरयति *तर्हीति । साक्षात्कारहीननरविषयत्वेनोक्तस्मृत्युपपत्तिरिति भावः ॥ १६३ ॥ उक्तमेव विशदयति *आत्मेति ॥ १६४ ॥ १६५ ॥ प्रवृत्त्यसम्भवमुपपादयति *न चेति । स्मृतेः, प्रवाहरूपेणेति शेषः ॥ १६६ ॥ विदुषो भिक्षाटनादिवत्कर्माचरणं स्यादिति शङ्कते *कर्मण इति। विद्वच्छब्देन साक्षात्कृततत्त्वः केवलविवेकी वा विवक्षितः ? आद्ये तस्य भिक्षाप्रवृत्तौ मुख्यकारणीभूतक्षुधादिवत्कर्मप्रवृत्तिहेतुकामादिदोषाभावान्न तत्र प्रवृत्तिरिति परिहरति *मैवमिति । भिक्षाटनादेरिति शेषः ॥ १६७ ॥ द्वितीयमनुवदति *कर्मेति ॥ इष्टापत्त्योत्तरयति *स इत्यादिना ॥ १६८ ॥

अनिवार्यक्षुधेवायं मोहो यस्यानिवारणः ॥
तस्मिन्कुर्वत्यमूढस्य किं छिन्नं ब्रह्मवेदिनः ॥ १६९ ॥
क्षुधितो भुङ्क्त इत्येवं भुङ्क्ते तृप्तो न कुत्रचित् ॥
मूढः कुरुत इत्येवं नैव कुर्यादमूढधीः ॥ १७० ॥
उच्छिन्नस्य न मोहस्य ह्यकस्मात्पुनरुद्भवः ॥
येन मूढः प्रवर्त्तेत नित्यकर्मसु तत्त्ववित् ॥ १७१ ॥
कर्मब्रह्मधियोः कालभेदेनावसरो यदि ॥
नैवं वस्तुनिमित्तत्वाद्ब्रह्मबुद्धेः सदा स्थितेः ॥ १७२ ॥
न वस्त्ववसरापेक्षं स्वतःसिद्धत्वकारणात् ॥
क्रियैवावसरापेक्षा तस्याः कारकतन्त्रतः ॥ १७३ ॥
यदोद्भवेत्क्षुधेवास्य प्रबला मोहवासना ॥
तदा कृतं न नित्यं स्यात्तस्य याहच्छिकत्वतः॥१७४॥
दोषजन्येऽपि भिक्षादौ कालादिनियमः श्रुतः ॥

अनिवारणो दुर्निवारः ॥१६९॥१७०॥ अज्ञानस्य नष्टस्यापि पुनरुद्भवात् ज्ञानिनोऽपि कर्मावकाशमाशङ्क्य ज्ञानध्वस्तस्य तस्योत्पत्तिकारणाभावान्निर्हेतुकोत्पत्तावनिर्मोक्षप्रसङ्गान्नैवमित्याह *उच्छिन्नस्येति । मूढः, सन्निति शेषः ॥१७१॥१७२॥ ब्रह्मधियो वस्तुनिमित्तत्वेऽपि कालापेक्षाऽस्तु को दोषस्तत्राह *नेति । वस्तुनः कालापेक्षा जन्मनि ज्ञप्तौ वा न युक्ता नित्यत्वात्स्वप्रकाशत्वाच्चेत्यर्थः॥ कस्य तर्हि कालापेक्षा तत्राह*क्रियेति॥१७३॥ विदुषामपि व्युत्थानदशायां कार्यानुष्ठानमुपलभ्यमानं विध्यभावेऽनुपपन्नं स्यादित्याशङ्क्य न विधिकृतं तत् किन्तु वासनाकृतं बालक्रीडावदित्याह * यदेति ॥१७४ ॥ न विदुषो विध्यभावः चातुर्वर्ण्यं चरेद्भैक्ष्यमित्यादिविधिश्रवणादत आह * दोषे-

विधिः स एष विदुष इति चेन्न तदिष्यते ॥ १७५ ॥
नैवायं नियमोऽस्माकं परिसङ्ख्या हि सा यतः ॥
नो चेद्विहितकालेऽस्य भिक्षात्यागो न शक्यते॥१७६॥
एवं चेत्परिसङ्ख्या ते कालेऽभुक्त्वा तु तत्त्ववित् ॥
प्रत्यवेयादिति प्राप्तं बाढमस्य न दुष्कृतम् ॥ १७७ ॥
मोहवासनया कृत्वा विहितं सुकृती यथा ॥
निषिद्धातिक्रमेणैवं दुष्कृती न भवेत्कुतः ॥ १७८ ॥
अश्लेषवचनान्नास्य सुकृतं लेपकं यदि ॥
दुष्कृतं च तथेत्येवं सन्तोष्टव्यं विपश्चिता ॥ १७९ ॥
तस्मात्कर्माधिकाराणां निषेधायात्मधीवचः ॥
निषेधवाक्यवत्तेन कार्या शङ्का न काचन ॥ १८० ॥
तथा चात्र निषेधेऽपि शुद्ध्यादौ वेदमानता ॥
ब्रह्मणीव ततः प्राण उपास्यो गुणसंयुतः ॥ १८१ ॥

त्यादिना । नियमविधित्वे बाधकमाह * नो चेदिति ॥ अस्य विदुषः ऋतौ भार्यामगच्छतो गृहस्थस्येव भोजनाकरणे प्रत्यवायः स्यादित्यर्थः ॥ १७५॥ १७६॥ परिसङ्ख्यायामप्यविहितकाले भुञ्जानस्य विदुषः प्रत्यवायः स्यादिति शङ्कते *एवं चेदिति । विदुष्येवंविधदुष्कृतसद्भावेऽपि न तस्य तस्मिन्फलजनकत्वमित्याह*बाढमिति । सुकृती भवति, विद्वानिति शेषः॥१७७॥१७८॥ "इतरस्याप्येवमसंश्लेषः"इति न्यायात्कृतमपि सुकृतं न विदुषः फलजनकमित्याशङ्क्य साम्येन समाधत्ते *अश्लेषेति ॥१७९॥ विधिहीनमपि प्रत्यक्तत्त्वधीजनकं तत्त्वमादिवाक्यं सर्वव्यवहारोपरमहेतुरित्युपसंहरति *तस्मादिति॥ तस्य सिद्धार्थबोधित्वे फलितमाह *तेनेति ॥ १८० ॥ परमप्रकृतमु-

विध्यर्थत्वादन्यायानां पूर्वस्मिन्ब्राह्मणे यथा ॥
सङ्ग्रहस्तद्वदत्रापि तृतीयब्राह्मणे कृतः ॥ १८२ ॥

इति वार्त्तिकसारे तृतीयम् उद्गीथब्राह्मणं समाप्तम् ।

श्रुतिः—तेनैतास्तृप्यन्त्येवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उ हैवंविदꣳ स्वेषु प्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनु भवति यो वै तमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १८ ॥

पसंहरति *निषेधेत्यादिना ॥ १८१ ॥ १८२ ॥

इति वार्तिकसारटीकायां तृतीयब्राह्मणं समाप्तम् ।

इयमत्र श्रुतिशेषपदयोजना । तेनैतास्तृप्यन्तीति प्राणस्याक्षतर्पकत्वमुक्तं, तच्चिन्तनफलमाह *एवमिति । एवम् उक्तगुणोपासकं स्वाः ज्ञातयः एवं वागादयः प्राणमिवाभितः संविशंति ज्ञातीनामाश्रयो भवतीत्यर्थः । आश्रितानां स्वानां भर्ता भरणसमर्थोऽपि भवति तेषां गुणतः श्रेष्ठश्च पुर एता अग्रगण्यश्चान्नादोऽरोगी च भवतीत्यर्थः । अधिपतिरधिष्ठाय पालकोऽपि भवति । किञ्च य एवंविदं प्राणविदं प्रति स्वेषु ज्ञातीनां मध्ये प्रतिः प्रतिकूलः सन् बुभूषति प्रतिस्पर्द्धीभवितुमिच्छति स भार्येभ्यो भरणीयेभ्यो नालं महद्द्वेषेण निःश्रीको रक्ष्येषु रक्षां विधातुमशक्तो भवतीत्यर्थः । अथ पुनर्ज्ञातीनां मध्ये एनं प्राणविदम् अनु अनुगतो भवति यश्चैनं प्राणविदम् अनुवर्त्तयन्नेव भार्यान्भरणीयान् बुभूर्षति भर्त्तुमिच्छति स भार्येभ्योऽलं भृत्यान् रक्षितुं समर्थो भवतीत्यर्थः ॥ १८ ॥

सोऽयास्य आङ्गिरसोऽङ्गानाᳲ हि रसः प्राणो वा अङ्गानाᳲ रसः प्राणो हि वा अङ्गानां रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अङ्गानाᳲ रसः ॥ १९ ॥

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥ २० ॥

एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥

प्राणस्याङ्गिरसत्वमुक्तं सोऽयास्य आङ्गिरस इत्यत्र तदुपपत्त्या साधयितुमुक्तमनुवदति श्रुतिः *सोऽयास्य इति॥ प्राणस्याङ्गिरसत्वं प्रसिद्धमित्याह *प्राणो हीति। तस्माच्छब्दः एष हीत्युपरितनवाक्येन सम्बध्यते। हिशब्दसूचितप्रसिद्धिमुपपादयति ॥ यस्मात्कस्माद्यतः कुतश्चिच्चाङ्गादित्यर्थः । सति प्राणे हस्ताद्यङ्गं रसवदन्यथा नीरसमित्यन्वयव्यतिरेकाभ्यां तस्याङ्गिरसत्वं सिद्धमित्युपसंहरति *तस्मादेष हीति ॥ १९ ॥ देहेन्द्रियाद्यात्मत्वकथनेन प्राणस्य रूपप्रपञ्चात्मत्वमुक्तं, नामप्रपञ्चात्मत्वमप्याह *एष इत्यादिना। एष प्राण एव बृहस्पतिः। तत्र हेतुः *वाग्वै बृहतीति। वागित्यनेन वाग्विशेषा ऋचो लक्ष्यन्ते, सर्वासाम् ऋचां बृहत्याख्यशब्दविशेषेऽन्तर्भूतत्वाद् बृहतीत्वं, तस्या ऋगात्मकत्वाच्च, एष, प्राणः पतिः पालकः प्राणेन हि पाल्यते वाक् अप्राणस्य शब्दोच्चारणासामर्थ्यात्। तस्मादु बृहस्पतिः ऋचां प्राण आत्मेत्यर्थः ॥२०॥ तथा यजुषामपीत्याह *एष इति। अत्रापि वागित्यनेन यजूंषि लक्ष्यन्ते, यजुषां ब्रह्मशब्दितवेदेन सामानाधिकरण्यं तदेकदेशत्वादुपपन्नमिति ध्येयम्।

एष उ एव साम वाग्वै साऽमैष सा चामश्चेति तत्साम्नः सामत्वम्। यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां य एवमेतत्साम वेद ॥ २२ ॥

एष उ वा उद्गीथः प्राणो वा उत्प्राणेन हीदꣳ सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः ॥ २३ ॥

यजूंषि वाग्विशेष एव तस्या वाच एष प्राणः पतिः पूर्ववत् ॥२१॥ सामात्मत्वमाह *एष इति। सामशब्दस्य प्राणे प्रवृत्तौ निमित्तमाह *वाग्वै सेति। सर्वनाम्ना सन्निहिता वागभिधीयते इत्यर्थः। *अमैष इति। एष प्राणोऽमशब्देनोच्यत इत्यर्थः। तथाच सा चामश्चेतिपदद्वयात्मकसामशब्देन वागुपसर्ज्जनप्राणोऽभिधीयत इत्युक्तम्। यस्मादेवं तस्मादेव साम्नो वाक् प्राणनिर्वर्त्यगीतिविशेषस्यापि सामत्वं प्रसिद्धं लोके इत्यर्थः। यदु एव यस्मात्सर्वेण समस्तुल्यस्तस्माद्वा सामेत्युत्तरवाक्येन सम्बन्धः। प्लुषिणा पुत्तिकाशरीरेण। त्रिभिर्लोकैः सम इति विराड्देहेन साम्यमुक्तम्। समोऽनेनेति हिरण्यगर्भदेहेन। तस्यापि वाय्वात्मकदेहोऽस्तीति उक्तम्। सामाख्यं प्राणं य आत्मत्वेनोपास्ते तस्य भावनातारतम्येन फलभेदमाह *साम्न इति ॥२२॥ एष प्राणः उद्गीथः। उद्गीथशब्दस्य प्राणे प्रवृत्तौ निमित्तमाह *प्राण इति। उत्तब्धं विधृतम्। तथाच धृतिक्रियावाचिन उच्छब्दस्य क्रियाशक्तिमति प्राणे प्रवृत्तिरित्यर्थः। गीथाशब्दार्थमाह *वागिति। गीयतेऽनयेति व्युत्पत्त्या गीथा वाक्। एवं च वागुपसर्जनप्राण उद्गीथशब्दित इत्याह *उच्च गीथा चेति ॥ २३ ॥ स उद्-

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचायं त्यस्य राजा मूर्द्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि

गीथ उद्गाननिर्वर्तकत्वाद्वागुपसर्जनप्राण एवोद्गीथदेवतेत्युक्तार्थदार्ढ्यायाख्यायिकाऽऽरभ्यते ॥ *तत्त्रोक्तार्थे ह अपि आख्यायिका श्रूयते इत्यर्थः । ब्रह्मदत्तो नामतश्चिकितानस्यापत्यं चेकितानस्तदपत्यं युवा च चैकितानेयो राजानं सोमरसम् । तद्वचनप्रकारमेवाह *अयमिति । अयं राजा मया भक्ष्यमाणसोमरसस्त्यस्य तस्य मे मूर्धानं विपातयतु यद्यहं वागुपसर्जनः प्राण उद्गानदेवतेति मिथ्यावादी स्यामित्यर्थः । न मया मिथ्योच्यते मद्वचनस्याप्तमूलत्वादित्याह *यदिति । यद्यदि अस्माद्वागुपसर्जनप्राणादन्येन देवतान्तरेण आयास्याङ्गिरसनामोदगायत्ततोहमनृतवादी स्यामिति । अयं भावः—ब्रह्मदत्तो नाम कश्चित्कस्यचिद्यज्ञे उद्गाता बभूव तत्रागतानामृषीणामुद्गीथदेवतामुद्दिश्य प्रतिपत्तिरासीत्तदा यः पूर्वं नैमिषाणां सत्रे प्राणोपास्त्या तद्भावमापन्न अतएवायास्याङ्गिरसनामा विद्वदग्रणीः प्राणोपसर्जनवाचा तेषामुद्गानं कृतवान् तस्य वाक्यं प्रमाणं मत्वा शपथद्वारेणेष्टदेवतां निर्धारितवानिति । इममेवाख्यायिकानिर्णीतमर्थमर्थवादाद्युत्थाय उपसंहरति श्रुतिः*वाचा चेति ॥२४॥ तस्यैव प्राणस्य स्वसुवर्णप्रतिष्ठाख्यगुणत्रयं विधत्ते कण्डिकात्रयेण * तस्येति ॥ तस्य ऋगाद्यात्मत्वेनोक्तस्य प्राणस्य साम्नः सामशब्दवाच्यस्य यः स्वं धनं वेदास्य विदुषः स्वं धनं भवति । किं तत्साम्नः

स्वरमिच्छेत तया वाचा स्वरसम्पन्नयाऽऽर्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव अथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥२५॥

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः॥२७॥

स्वमिति तत्राह *तस्य साम्नः स्वरः कण्ठमाधुर्यमेव स्वं भूषणं यस्मादेवं तस्मादुद्गानं करिष्यन् तैलपानादिना वाचि स्वरं सम्पादयेदिति प्रसङ्गाद्विधत्ते । कण्ठमाधुर्योपेतमुद्गातारं सर्वे द्रष्टुमिच्छन्तीत्यत्र दृष्टान्तमाह *अथो इति ॥ अथो अपि यस्य स्वं धनमस्ति तं धनिनं द्रष्टुमिच्छन्तीति लोकेऽपि प्रसिद्धमित्यर्थः । उक्तं गुणमुपसंहरति । भवति हेति । तस्य स्वर एव सुवर्णमित्यत्र स्वरशब्देन लाक्षणिकवर्णज्ञानपूर्वकं तदुच्चारणमुच्यते । शेषं पूर्ववत् *प्रतिष्ठामिति । प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठा तां साम्नो गुणं यो वेद स प्रतिष्ठां लभत इत्यर्थः ॥ प्राणप्रतिष्ठास्वरूपमाह *वागिति । वाग्छब्देन जिह्वामूलीयकण्ठदन्तोष्ठनासामूर्द्धतालूनि लक्ष्यन्ते । एतान्यष्टौ स्थानानि । प्राणस्य प्रतिष्ठेत्यत्र हेतुमाह *वाचीति ॥ उक्तस्थानेषु प्रतिष्ठितः एष प्राण एतद्गानं गीयते गीतिभावमापद्यत इत्यर्थः। अन्ने शरीरे प्रतिष्ठितः सन् प्राणो गीतिभावमापद्यत इति उ ह केचिदाहुरतो वाग्वा अन्नं वा प्रतिष्ठेत्युपास्तौ विकल्प इत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥

अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेत्, असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति, स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवै-

---

अथ प्राणविज्ञानविध्यनन्तरम् अतः प्राणवित्प्रयोज्यत्वात्तच्छेषत्वेनाभ्यारोहनामा जपो विधीयत इत्यर्थः ॥ जपकालमाह *पवमानानामिति । ज्योतिष्टोमे द्वादश स्तोत्राणि सन्ति तत्र त्रीणि पवमानाख्यानि याजमानफलानीत्युक्तं, तत्पठनसमये जपेदित्यर्थः । तत्रापि कालसङ्कोचमाह*स वै खलु प्रसिद्धः प्रस्तोता साम प्रस्तौति स यत्र यस्मिन्काले साम प्रस्तुयात्साम प्रारभेत तदा एतानि असतो मासदित्यादीनि त्रीणि यजूंषि जपेत् अस्याभिमुख्येनारोहति अनेन जपकर्मणैवंविदेवभावमित्यभ्यारोहसंज्ञा । मन्त्रार्थं स्वयमेवाह श्रुतिः *स इति । स मन्त्रः यदाहासतो मा सद्गमयेति तस्यार्थ उच्यत इत्यर्थः । मृत्यु र्वा असत् स्वाभाविककर्मविज्ञाने मृत्युरित्युच्यते तत् असत् अत्यन्ताधोभावहेतुत्वात्, सत्–शास्त्रीयकर्मविज्ञाने अमृतममरणहेतुत्वात् तस्मान्मृत्योरासुरज्ञानादेर्मां व्युत्थाप्यामृतं शास्त्रीयकर्मविज्ञाने गमय । एवं पदार्थमुक्त्वा वाक्यार्थमाह *अमृतं मा कुरु इत्येवैतदाहेति। द्वितीयमन्त्रं व्याख्यातुं सङ्गृह्णाति *तमस इति । मृत्युर्वै तम इति तत्तमः । शास्त्रीयकर्मविज्ञाने मृत्युः सातिशयविनाशिफलत्वात् तज्ज्योतिःप्राजापत्यं पदममृतं तद्धेतुत्वान्मृत्योर्माऽमृतं गमयेति मृत्योः

तदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवा-
स्ति अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागा
येत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तꣳ स एष
एवंविदुद्गाताऽऽत्मने वा यजमानाय वा यं कामं का-
मयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्य-
ताया आशाऽस्ति य एवमेतत्साम वेद ॥ २८ ॥

इत्युपनिषदि तृतीयब्राह्मणं समाप्तम् ।

शास्त्रीयकर्मविज्ञानान्मां व्युत्थाप्य तत्साध्यं फलं गमयेत्यर्थः। वाक्यार्थमाह *अमृतमिति। मन्त्रद्वयोक्तार्थ एव पुनः सङ्ग्रहेण तृतीयमन्त्रेणोच्यते ऽतः स न व्याख्येय इत्याह *नात्रेति। उ-क्तमन्त्राणां तात्पर्यमुक्तमधस्तात्तदप्यनुसन्धेयम् । एवं त्रिषु पवमानेषु याजमानमुद्गानं कृत्वाऽथानन्तरमवशिष्टेषु नवसु स्तोत्रेष्वात्मनेऽन्नाद्यमागायेत्प्राणविदुद्गाता, यथा प्राणः यजमा-नस्थानीयेन्द्रियाणामागानं कृत्वा स्वार्थमन्नाद्यमागायत्तद्वदि-त्यर्थः॥ तस्मादित्यस्य स एष एवंविदित्यनेनान्वयः । यस्मात्स एष उद्गाता एवंवित्प्राणोपास्त्या प्राणवित् प्राणभूतस्तस्मादा-त्मने स्वामिने वाऽभीष्टमागातुं समर्थः । अतस्तेषु नवसु स्तोत्रे-षु गीयमानेषु यजमानो यं कामं कामयेत तं कामं वृणीत प्रार्थयेदिति योजना । एवं कर्माधिकारिणां कर्मकाण्डीयप्राण-दर्शनेन जपेन च प्राणात्मापत्तिरुक्ता । ऊर्ध्वरेतसां तु केवलप्रा-णदर्शनात्तदापत्तिमाह *तद्ध तदिति। तदेतदुक्तप्राणदर्शनं कर्म-हीनमपि लोकजिदेव लोकसाधनमेवेत्यर्थः । न हैवालोक्यतायै अलोकार्हत्वाय आशा मनोरथोऽपि नैवास्ति, निरन्तरं प्राण-ध्यानेनात्मानं हिरण्यगर्भत्वेनानुभवतः पुंसो मम हिरण्यगर्भप्रा-प्त्यभावे कीदृशं जन्म स्यादिति मनोरथोऽपि नोदेतीति भावः। एवमेतत्साम वेदोपास्ते । उपास्तिक्रमश्च पूर्वं प्रतिपादितः ॥२८॥

इति टीकायाम् उद्गीथतृतीयब्राह्मणव्याख्या समाप्ता ॥ ३ ॥

चतुर्थे ब्राह्मणे पूर्वज्ञानकर्मफलोर्जितम् ॥
अव्याकृतं व्याकृतं च विद्याविद्ये च वक्त्यसौ ॥ १ ॥
श्रुत्वा फलोर्जितिं भीमां तद्दोषानखिलान्धिया ॥
अवेक्ष्य शुद्ध्या तस्माद्विरक्तोऽथ मुमुक्षति ॥ २ ॥
अव्याकृतोक्त्या वेदान्तप्रमेयं कथितं भवेत् ॥
व्याकृतोक्त्या ब्रह्मबोधद्वारं जीवोऽत्र वर्णितः ॥ ३ ॥
आदेयहेयनिर्देशो विद्याऽविद्यावचोद्वयात् ॥
एतावता च शास्त्रार्थः संक्षेपेणात्र पूर्यते ॥ ४ ॥
यद्वैराजं पदं पूर्वज्ञानकर्मफलं हि तत् ॥
चिदात्मैव विराड्रूपो यथा स्यादुच्यते तथा ॥ ५ ॥

पुरुषविधब्राह्मणप्रतिपाद्यमर्थं संगृह्य दर्शयति *चतुर्थे इति । *पूर्वेति । पूर्वं ब्राह्मणत्रयप्रतिपादितं ज्ञानकर्मफलोत्कर्षमसौ श्रुतिर्वक्तीत्यर्थः ॥ १ ॥ एवमत्र श्रुतिप्रतिपाद्यं प्रमेयपञ्चकमुक्त्वा तत्प्रतिपादनफलं क्रमेण वर्णयन् प्रथमं ज्ञानकर्मफलोत्कर्षप्रतिपादनस्य फलमाह *श्रुत्वेति । *तद्दोषानिति । कर्मज्ञानयोर्यदुत्कृष्टं फलं वैराजं पदं तत्प्राप्तस्यापि भयारत्यादिदोषान्वक्ष्यमाणानित्यर्थः ॥ २ ॥ अव्याकृतव्याकृतोक्तेस्तत्त्वम्पदार्थधीः फलमित्याह *अव्याकृतेति ॥ ३ ॥ अवशिष्टयोः कथनस्य फलमाह *आदेयेति । नन्वेवं शास्त्रार्थस्यात्र प्रतिपादने उत्तरग्रन्थवैयर्थ्यं स्यात्तत्राह *एतावतेति । तथा चायमेवोत्तरत्र विस्तरेण प्रतिपाद्यत इति भावः ॥ ४ ॥ नन्वादौ कर्मज्ञानफलमुच्यत इत्युक्तमयुक्तम्, आत्मैवेदमित्यात्ममात्रस्योक्तत्वात्तत्राह *यदिति । पूर्वोक्तज्ञानकर्मफलत्वेन प्रसिद्धं यद्वैराजं पदं तत् विराडुपहितश्चिदात्मैव, अयमर्थो यथास्पष्टं स्यात्तथैवोच्यत इत्यर्थः ॥ ५ ॥ प्रतिज्ञातमर्थं साधयितुमात्मैवेत्यत्रात्मपदार्थमाह

प्रत्यग्रूपः पराग्रूपाद् व्यावृत्तोऽनुभवात्मकः ॥
प्रथते यः स आत्मेति प्राहुरात्मविदो बुधाः ॥ ६ ॥
आत्मात्मीयादिरूपं यन्नामरूपादिमज्जगत् ॥
तस्य यद्वास्तवं रूपं स प्रत्यङ्ङद्वयस्तथा ॥ ७ ॥
नानात्वेनैव यद्भाति तत्प्रत्यग्दृष्टिशालिनाम् ॥
प्रत्यङ्मात्रे विलीनं स्यात्परागेवैति चित्रताम् ॥८॥
अपामार्गलतेवायं विरुद्धफलदो भवः ॥
प्रत्यग्दृशां विमोक्षाय संसाराय पराग्दृशाम् ॥ ९ ॥
अग्रादधो मार्जने सा न लग्ना कण्टकैः करे ॥
मूलादूर्ध्वं मार्जने तु लग्ना स्याद् बहुधा करे ॥ १० ॥
एवमन्तर्मुखस्यायं संसारो नैव दुःखदः ॥
बहिर्मुखस्तु संसारे दुःखाद् दुःखतरं व्रजेत् ॥ ११ ॥
प्रबुद्धोऽन्तर्मुखस्तिष्ठेदप्रबुद्धो बहिर्मुखः ॥

---

*प्रत्यगिति ॥६॥ इदंशब्दार्थमाह *आत्मीयेति ॥ आत्मैवेदमितीदमा निर्दिष्टस्य जगत आत्मसामानाधिकरण्यायोगादिदंशब्देन जगत्यनुस्यूतसत्तां लक्षयित्वाऽवधारणफलमाह *तस्येति ॥७॥ आत्मनोऽद्वितीयत्वे विद्वदनुभवं प्रमाणयति *नानात्वेनैवेति । प्रपञ्चस्य प्रतीतस्य प्रतीचि लीनत्वेन पुनस्तत्प्रतीतिर्न स्यादित्याशङ्क्याज्ञदृष्ट्या प्रतीयत इत्याह *परागिति । अत्र दृष्टिशालिनामित्यनुषज्यते । चित्रतां नानात्वम् । पराग्दृष्टिशालिनां नानात्वेन प्रतीयत इत्यर्थः ॥८॥ उक्तमर्थं दृष्टान्तेनाह*अपामार्गेति ॥ संसाराय दुःखाय ॥ ९ ॥ दृष्टान्तं स्पष्टयति *अग्रादिति ॥ १० ॥ दार्ष्टान्तिकमाह *एवमिति ॥ ११ ॥ अन्तर्मुखस्य दुःखं नेत्युक्तं, तदन्तर्मुखत्वं च केन लभ्यत इत्याशङ्क्या-

बहिर्मुखेन न ज्ञातं प्रत्यक्तत्त्वं विना मितिम् ॥ १२ ॥
यदज्ञातं परं तत्त्वं तच्छ्रुतं कारणं श्रुतौ ॥
आऽन्त्यात्कार्यात्तदेव स्यात्सर्वकार्यस्य कारणम्॥१३॥
तेन तेनात्मकार्येण विशिष्टः सन् सृजेत्प्रभुः ॥
स्वात्माभासतमोयुक्तस्तेजोबन्नानि मायया ॥ १४ ॥
ज्ञानकर्मादितन्त्रं सत्सूत्रं जज्ञे ततो विभोः ॥
ज्ञानक्रियाशक्तिमत्त्वात्तत्रेदं जगदाहितम् ॥ १५ ॥
विराडपि ततो जज्ञे त्रैलोक्यात्मकदेहवान् ॥
यथोक्तज्ञानकर्मभ्यामेवं प्रत्यग्विराडभूत् ॥ १६ ॥

त्मतत्त्वज्ञानादेवेत्याह *प्रबुद्ध इति ॥ सम्भावनायां लिङ् ॥ तत्त्वज्ञानमनोनाशयोरिवाज्ञत्वबहिर्मुखत्वयोर्मिथः साधनतामाह *बहिर्मुखेनेति ॥ मितिं विनेति, विवेकाभावादित्यर्थः ॥१२॥ एवं प्रासङ्गिकं परिसमाप्य प्रकृतं पुरुषविधशब्दार्थं दर्शयितुम् अज्ञातं ब्रह्मैव सर्वजगत्कारणमित्याह *यदिति। परस्य मूलकारणत्वेऽपि वियदाद्यवान्तरकारणमिति, नेत्याह *आऽन्त्यादिति ॥ अन्त्यं कार्यं पृथ्वी, तावत्पर्यन्तस्य सर्वकार्यस्य तेन तेनोपाधिनोपहितं ब्रह्मैव कारणमित्यर्थः ॥ कथं निर्विकारस्य ब्रह्मणः कारणता ? तत्राह *स्वात्मेति । स्वात्मनश्चिद्धातोराभासो यस्मिन् तमसि तत्तथा । उपाधिभूततमसो जगज्जनौ प्राधान्यं दर्शयितुं माययेत्युक्तम् ॥ असृजत् इति शेषः ॥१३॥१४॥ ब्रह्मण एव हिरण्यगर्भोत्पत्तिमाह *ज्ञानेति ॥ ततः सूक्ष्मभूतोपहिताद्ब्रह्मण इत्यर्थः । कर्मविज्ञानफलभूतस्य सूत्रस्य लक्षणमाह *ज्ञानेति ॥ १५ ॥ सूत्रोपहितब्रह्मणो विराडुत्पत्तिमाह *विराडिति ॥ फलितमाह *एवमिति ॥ १६ ॥ उक्त-

स एष परमोऽप्यात्मा कोशपञ्चकधारणात् ॥
संवृतः पुरुषाकारः कामाविद्याद्युपप्लुतः ॥ १७ ॥
सोऽनुवीक्ष्यात्ममोहोत्थं वैराजं रूपमात्मनः ॥
नापश्यदपरं किञ्चित्सोऽहमस्मीत्यथाभ्यधात् ॥ १८ ॥
अहमित्येव नामास्य सम्पन्नं तेन लौकिकाः ॥
तत्सृष्टाः स्वं स्वमात्मानमहमित्यभिचक्षते ॥ १९ ॥
कोशपञ्चकयुक्तस्य प्रत्यक्तत्त्वस्य नाम तत् ॥
विराजा कृतमित्येतत्सर्वसाधारणं मतम् ॥ २० ॥
असाधारणदेहस्य तत्तत्पित्रादिना कृतम् ॥
देवदत्तादिकं नाम जघन्यं पूर्वनामतः ॥ २१ ॥
कस्त्वमित्यपि पृष्टः सन्नादावहमिति ब्रुवन् ॥
पश्चाज्जघन्यनामेदं वक्ति जिज्ञासवे जनः ॥ २२ ॥

मेव व्यनक्ति *स एष इति । एवं चेदं घटादिकार्यम् अग्रेऽवान्तरप्रलये विराड्भावापन्नात्मैवासीदिति ज्ञानकर्मफलस्य विराज एवेत्युक्तत्वान्न पूर्वोक्तविरोध इति भावः ॥ १७ ॥ सोऽनुवीक्ष्येत्यादेरर्थमाह *सोऽन्विति ॥ १८ ॥ ततोऽहंनामाऽभवदित्यस्यार्थमाह *अहमिति ॥ प्रजापतिरहमित्युक्त्वाऽहंनामाऽभूदित्यत्र कार्यलिङ्गमनुमानमाह श्रुतिस्तस्मादिति। तद्व्याचष्टे *तेन लौकिका इति ॥ १९ ॥ नन्वेवमपि पित्रादिकृतनामकथनात्पूर्वमेवाहमित्युक्तौ को हेतुस्तत्राह *कोशेति ॥ २० ॥ २१ ॥ तात्पर्यमुक्त्वाऽक्षराणि योजयति *कस्त्वमिति । तस्माद्विराजा साधारणनामकरणादेतर्ह्यप्यामन्त्रितः कस्त्वमिति पृष्टोऽयं जनोऽहमित्युक्त्वाऽथानन्तरं यदस्य भवति पित्रादिकृतं नाम तद्ब्रूत इत्यर्थः ॥ २२ ॥ शुद्धस्यापीयमवस्था अहो अ-

चिदेकरस आत्मैव कश्मले कोशपञ्चके ॥
एकतामभिसम्पन्नोऽहङ्करोत्यभिमानतः ॥ २३ ॥
बह्वो वीतकल्पेऽन्ये आसन्यद्यप्युपासकाः ॥
तथापि भावनाधिक्यादेक एव विराडभूत् ॥ २४ ॥
निःशेषेणासुरं पापं दग्धवान्बहुजन्मभिः ॥
ततो विराडभूदन्योऽप्येवं दग्ध्वा भवेद्विराट् ॥ २५॥

श्रुतिः ॥ आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत् ततोऽहंनामाऽभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यं नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १ ॥

सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षां चक्रे

ज्ञानादित्याक्रोशति *चिदिति ॥ स यदित्यादेस्तात्पर्यमाह *बहव इत्यादिना ॥ २४ ॥ २५ ॥

अक्षरार्थस्तु—स विराट् यजमानावस्थायां यद्यस्मादुपासकसङ्घातात्पूर्वः प्रथमः सन्नौषत् अदहत् अत एव पूर्वम् औषदिति पुरुषाख्योऽभूत् । पुरुषत्वगुणविराडुपासनफलमाह *औषदिति । यः अस्माद्विदुषः पूर्वं प्रजापतित्वं बुभूषति भवितुमिच्छति तं विद्वानोषति वै दहत्येवेत्यर्थः ॥ अयम्भावः—अहमहमिकया प्राथम्येन प्रजापतित्वप्रेप्सूनां मध्ये प्रथमत एव भावनाद्यतिशयाद्यस्माद्भावं गतवान् तेनेतरे दग्धवञ्जिता भवन्तीति ॥ १ ॥ सोऽबिभेदित्यत्र विराजो भयकारणमाह *दग्धेति ॥ *अभ्यमन्यतेति। अहमिति शेषः ॥ अस्मदादिवदिति सदृष्टान्तं

यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यद् द्वितीयाद्वै भयं भवति ॥ २ ॥

दग्धपापोऽप्यनात्मज्ञो देहादावभ्यमन्यत ॥
ततः स्वनाशमाशङ्क्य सोऽबिभेदस्मदादिवत् ॥ २६ ॥
स्रज्यहिं कल्पयित्वाऽऽस्ते तद्भयादाकुलेन्द्रियः ॥
एवं नश्वरदेहादिं प्रतीच्यारोप्य कम्पते ॥ २७ ॥
आलोचयेत्स्रजस्तत्त्वं भीतिध्वस्तौ यथा नरः ॥
विराडालोचयत्तद्वत्प्रतीचस्तत्त्वमादरात् ॥ २८ ॥
आलोचयन्यथातत्त्वमपास्तध्वान्ततद्भयम् ॥
अनन्यानुभवं साक्षाद्ददर्शैकात्म्यमात्मनि ॥ २९ ॥
प्रत्यग्याथात्म्यविज्ञानशिखिप्लुष्टमहातमाः ॥
आप्ताशेषपुमर्थोऽथ सोऽमन्यत ततो विराट् ॥ ३० ॥
देहेन्द्रियमनोबुद्धिभावाभावादिसाक्षिणः ॥
प्रतीचोऽन्यत्किमप्यत्र नास्ति कस्माद्बिभेम्यहम् ॥ ३१ ॥

दार्ष्टान्तिकं स्पष्टयति *स्रजीति ॥ २६ ॥ २७ ॥ स हायमीक्षां चक्र इत्यस्यार्थमाह *आलोचयेदिति ॥ २८ ॥ आलोचनफलमाह *आलोचयन्निति ॥ २९ ॥ ऐकात्म्यसाक्षात्कारफलमाह *प्रत्यगिति ॥ अमन्यत अद्याप्ताशेषपुमर्थोऽस्मीति शेषः ॥ ३० ॥

तस्मादित्यादिश्रुतेरयमर्थः—यस्माद्विराड् भीतवान् तस्माद्द्याप्येकाकी बिभेति कार्यस्य भयलिङ्गेन कारणेऽपि विराजि तदनुमेयमिति भावः ॥ *स हायमिति ॥ सोऽयं विराडीक्षितवान् ॥

यन्मदन्यदित्यादेरर्थमाह *देहेन्द्रियेति ॥ ३१ ॥ एवम-

अन्वयव्यतिरेकाभ्यां स्वमात्मानं यदा पुमान् ॥
प्रतीच्येवानुसन्धत्ते ब्रह्मास्मीति तदैक्षत ॥ ३२ ॥
प्रत्यग्दृष्ट्या तदज्ञानं न तज्जं चेक्षते स्वतः ॥
ब्रह्मप्रतीचोरैकात्म्यात्तदूरीकृत्य गर्जति ॥ ३३ ॥
प्रत्यक्ता ब्रह्मणो रूपं ब्रह्मता चात्मनः स्वतः ॥
एवं सति कुतो मे भीरिति विद्वांस्त्रपायते ॥ ३४ ॥
ब्रह्मविद्यामृते नान्यद्भयहेतुविनाशकृत् ॥
अतोऽत्र बोधादेवास्य भयं वीयाय सर्वतः ॥ ३५ ॥
कस्माद्भेष्यदीशोऽयं द्वितीयात्खलु तद्भयम् ॥
द्वितीयो नेश्वरस्यास्ति ततो निर्भय एव सः ॥३६॥
ननु प्रजापतेरैक्यदर्शनं कुत उद्बभौ ॥
शास्त्राचार्यादितद्धेतोरसत्त्वात्तदसम्भवः ॥ ३७ ॥
यदि जन्मान्तराभ्याससंस्कारोत्थमिदं तदा ॥

न्यस्याप्यधिकारिण आत्मानमालोचयतः साक्षात्कारः सुलभ इत्याह *अन्वयेति ॥ ३२ ॥ साक्षात्कृततत्त्वस्य प्रजापतिवद्भीतिनिवृत्तिश्च भवतीत्याह *प्रत्यगिति ॥ तत्त्वज्ञानादज्ञानतत्कार्यादर्शने हेतुमाह *स्वत इति ॥ तदज्ञानं दूरतो निरस्य सन्तुष्यतीत्यर्थः ॥ ३३ ॥ उक्तमेव व्यनक्ति *प्रत्यक्तेति । त्रपायते किमर्थं भीतोऽहमिति लज्जावान्भवतीत्यर्थः ॥ ३४ ॥ तत एवेत्यादेरर्थमाह *ब्रह्मेति । वीयाय विस्पष्टमपगतवत् ॥ ३५ ॥ कस्मादित्यादेरर्थमाह *कस्मादिति ॥ अभेष्यत् भीतोऽभवत् ॥ ३६ ॥ ब्रह्मात्मैक्यज्ञानात्प्रजापतेर्भयध्वस्तिरयुक्ता तस्य तद्भाने हेत्वभावादित्याक्षिप्य समाधत्ते *नन्वित्यादिना ॥३७॥ *नैरर्थक्येति । पूर्वजन्मोत्पन्नविद्या चेदिदानीं सं-

नैरर्थक्यप्रसक्तिः स्यात्सम्यग्ज्ञानस्य सर्वतः ॥ ३८ ॥
स्वभ्यस्ताऽप्यात्मविद्येयं पूर्वजन्मनि तत्तमः ॥
नाधाक्षीद्येन वैराजं देहं स्वीकृत्य वर्त्तते ॥ ३९ ॥
उच्यते महता पुण्यपुञ्जपाकेन तत्पदम् ॥
वैराजं लब्धवांस्तेन ज्ञानमस्योद्भवौ स्वतः ॥ ४० ॥
ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ॥
ऐश्वर्यं चैव धर्मश्च सहसिद्धमिति स्मृतिः ॥ ४१ ॥
"सहैव सिद्धं चेज्ज्ञानं तन्निवर्त्यं भयं कथम् ॥
उदेति"इति न वक्तव्यं, भीतेरूर्ध्वं विबोधनात् ॥४२॥
सहसिद्धत्ववचसा परापेक्षा निवार्यते ॥
न जन्मकाल एवास्य ज्ञानसद्भाव उच्यते ॥ ४३ ॥
आचार्यनिरपेक्षत्वे शुश्रूषादिरनर्थताम् ॥
प्राप्नोति चेत्स्वयम्भातवेदानामस्त्वनर्थता ॥ ४४ ॥
मार्जारो रूपविज्ञाने प्रकाशं न ह्यपेक्षते ॥
नापेक्षन्ते योगिनश्च लोचनं चित्तसाधनम् ॥ ४५ ॥
एवं यत्साधनफलं सिद्धं यस्यान्यसाधनात् ॥
तस्य तत्साधनं व्यर्थमितरस्य च सार्थकम् ॥ ४६ ॥
नावेदविद् बृहन्तं तं मनुते कश्चिदित्यसौ ।

स्कारद्वारा स्मर्यते इदानीं विराड्देहस्वीकरणात्तदानीं सा विद्या अविद्यां न अदहादिति वक्तव्यं, तथाच सति सर्वं सम्यग्ज्ञानं व्यर्थं स्यादित्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥ अप्रतिघं निरङ्कुशम्, एतच्च प्रत्येकं सम्बध्यते ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ प्रजापतेः शुश्रूषाद्यनपेक्षत्वेऽप्यस्माकं तदपेक्षा सम्भवतीत्यत्र दृष्टान्तद्वयमाह *मार्जार इति ॥ ४५ ॥ ४६ ॥ नन्वेवं प्रमाणे-

श्रुतिर्ब्रह्मात्मविज्ञाने वेदादन्यं निषेधति ॥ ४७ ॥
नातो विकल्पते वेद एक एवात्मवेदने ।
अन्यानि तु विकल्पन्ते साधनानि यथायथम्॥४८॥
एवं सति स्वयम्भातवेदत्वाद् बुद्धवान्स्वयम् ॥
बोधध्वस्तात्ममोहस्याप्यरतिः समजायत ॥ ४९ ॥
स्वाभिष्टवस्त्वलाभेन चेतसो याऽनवस्थितिः ॥
अरतिः सा सिसृक्षोः सा वध्वलाभादजायत ॥५०॥
ननु विज्ञानविध्वस्तावविद्यायाः कुतोऽरतिः ॥
ध्वस्तान्ध्यस्यापि सा चेत्स्यादनिर्मोक्षः प्रसज्जते॥५१॥
अरत्युद्भूतिलिङ्गेन नास्ति विद्येति कल्प्यताम् ॥
द्वितीयवैर्यभावस्य बोधाद्भीतिरपैष्यति ॥ ५२ ॥
समीचीनाऽपि विद्येयं प्रकृतानुचितत्वतः ॥
अकालकुसुमानीव नैव प्रीतिकरी सताम् ॥ ५३ ॥
पिण्डसृष्टौ प्रवृत्तायां ज्ञानस्यावसरोऽत्र कः ॥

ऽपि विकल्पः स्याद्वेदादनुमानादेर्वा प्रमाणं विना वा ज्ञानोत्पत्तिरिति, नेत्याह *नावेदवदित्यादिना ॥ ४७ ॥ ४८ ॥ उपसंहरति *एवमिति । स वै नैव रेमे इत्यस्यार्थमाह *बोधेति ॥ ४९ ॥ अरतिशब्दार्थमाह *स्वेति ॥ ५० ॥ प्रकारान्तरेण विराजस्तत्त्वज्ञानमाक्षिपति *नन्वित्यादिना ॥ तत्त्वज्ञानाभावे पूर्वोक्तभयापगमो न स्यादित्याशङ्क्य तस्यान्यथासिद्धत्वमाह *द्वितीयवैरीति ॥ ५१ ॥ ५२ ॥ किञ्च प्रकरणविरोधाच्च नात्र परविद्योक्तिरित्याह *समीचीनेति ॥ अपिः अनुचितत्वत इत्यनेन सम्बध्यते ॥ ५३ ॥ प्रकरणविरोधं स्फोरयति *पिण्डेति ॥ पिण्डशब्देन मन्वादिदेहो गृह्यते । उक्तं

इति चेद्युक्तमेवात्र ज्ञानं प्रकरणत्वतः ॥ ५४ ॥
आरब्धोपनिषत्सर्वा विद्यार्थैव तथासति ॥
त्वद्विद्याऽऽक्षेप एवायमकालकुसुमायते ॥ ५५ ॥
पिण्डसृष्टेर्निन्द्यतया तन्निन्दायै भयादिगीः ॥
तद्भीतिध्वस्तिहेतुत्वगिरा विद्या प्रशस्यते ॥ ५६ ॥
लोकेऽपि महतीं भीतिमापन्नाः परमेश्वरम् ॥
तूर्णं शिव शिवेत्येवं स्मरन्ति भयहारिणम् ॥ ५७ ॥
विराजो जगदीशस्य भीतावन्यः परात्मनः ॥
को वा स्मार्यस्ततो विद्या स्वकालकुसुमायते ॥५८॥
न विराजो वैरिशङ्का न तादृक् पूर्ववासना ॥
सर्वात्मको विराडस्मीत्येवं पूर्वमुपासनात् ॥ ५९ ॥
अथ वैरी स्वस्य पिता भक्षणाय प्रवर्त्तितः ॥
तर्ह्ययुक्तो भीतिनाशो द्वितीयस्यात्र संस्थितेः ॥६०॥
अविज्ञातात्मवृत्तान्तो देहनाशात्स्वविच्युतिम् ॥
मत्वा भीत्या प्रबुद्धोऽभून्निर्भीरिति तु युज्यते ॥६१॥

चोद्यमनूद्य परिहरति *इति चेदिति ॥५४॥ *त्वद्विद्याऽऽक्षेप इति। त्वया कृतः "अप्रस्तुतं परविद्याकथनम्" इत्याक्षेप इत्यर्थः ॥५५॥ उपनिषदां विद्यार्थत्वे विराजो भयादिकथनं व्यर्थमत आह *पिण्डेति ॥ ५६ ॥ ५७ ॥ ५८ ॥ पिण्डसृष्टेः शरीरग्रहणस्येशस्मृतिं विनाऽपि ममात्र वैरी नास्तीति बुद्ध्या भयनिवृत्तिरुपपन्नेति उक्तमयुक्तमित्याशङ्क्य, विराजो वैरी हिरण्यगर्भोऽन्यो वा? न चरम इत्याह *न विराज इति॥५९॥आद्यमनूद्य प्रत्याह *अथेति॥६०॥ तस्मात्पूर्वोक्तमेव साध्वित्याह * अविज्ञात इति। प्रबुद्धः सन् स्वस्य प्रच्युतिभयं हित्वेत्यर्थः ॥ ६१ ॥ तर्ह्यरतिर्न स्यादि-

अप्युत्पन्नात्मबोधानामाऽधिकारसमाप्तितः ॥
अश्वत्थादि यथादृष्टं तथैव स्यात्प्रजापतेः ॥ ६२ ॥
अधिकारो यस्य यावान्भुङ्क्ते भोगं स तावति ॥
कुतो न मुच्यते मुक्तिप्रतिबन्धस्य संक्षयात् ॥ ६३ ॥
सत्यामप्यात्मविद्यायां दोषो न विनिवर्तते ॥
तेन दोषेणानुमेयोऽधिकारो विदुषामसौ ॥ ६४ ॥
विराजोऽधिकृतिः सृष्टौ व्यासादेः शास्त्रनिर्मितौ ॥
अस्मदादौ यथायोग्यं कार्यात्कारणमूह्यताम् ॥६५॥
दोषोऽस्तीत्येव विद्येयं नास्तीत्येवं न शक्यते ॥
वक्तुं, न ह्यनुमेयाऽसौ, दृष्टैषा घटबोधवत् ॥ ६६ ॥
चार्वाकवत्स्वस्य देहं पुष्णन्नपि न वैदिकः ॥
व्यतिरिक्तात्मविज्ञानविहीन इति कथ्यते ॥ ६७ ॥
व्यतिरिक्तात्मबोधस्य शङ्क्यते न परोक्षता ॥

त्युक्तामिति तत्राह *अपीति । उत्पन्नात्मबोधानाम्, अस्मदादीनामिति शेषः । अधिकारः प्रारब्धं कर्म ॥६२॥ तत्त्वधियोऽपि भयाद्यनिवर्तकत्वे निवर्तकान्तराभावात्कदाऽपि मुक्तिर्न स्यादित्याशङ्क्य भयादिप्रारब्धकर्मनिवृत्त्या तन्निवृत्तिसम्भवान्मैवमित्याह *अधिकार इति ॥ ६३ ॥ ६४ ॥ दोषहेतुभूतकर्मविशेषानुदाहरति *विराज इति ॥ ६५ ॥ दोषे सत्यपि स्वानुभवसिद्धं ज्ञानं दुरपह्नवमित्याह*दोष इति ॥६६॥ विदुषामीषद्दोषानुवृत्तिमात्रेणाज्ञत्वापादने देहादिपोषणपराणां वैदिकानां नास्तिकतापात इत्याह *चार्वाकेति ॥ ६७ ॥ ननु तेषां देहातिरिक्तात्मधीः परोक्षैव, नेत्याह *व्यतिरिक्तेति । *मानसमिति । मनोजन्यधियः प्रत्यक्षत्वं सर्वसम्मतमिति

अहं देहीत्यापरोक्ष्यान्मानसं सर्वसम्मतम् ॥ ६८ ॥
यथाऽतिरिक्तात्मबोधेऽप्यरतिः कर्मिणीक्ष्यते ॥
तथा ब्रह्मात्मबोधेऽपि विदुष्यरतिरीक्ष्यताम् ॥ ६९ ॥
नायं दोषः कर्मिणि स्याद्भोक्तृत्वादिति मन्यसे ॥
भोक्तर्येवारातिस्तर्हि विद्वद्देहेऽपि नो चिति ॥ ७० ॥
अभोक्तृचिद्विबोधेन बाधिता भोक्तृतेति चेत् ॥
अतिरिक्तात्मबोधेन देहात्मा किन्न बाधितः ॥ ७१ ॥
बाधितोऽपि यथापूर्वं वर्त्तते स्वस्वभावतः ॥
इत्येतत्कर्मिविदुषोः स्वस्थाने सममुत्तरम् ॥ ७२ ॥
देहातिरिक्तकर्त्तारं कर्मी जानात्ययं पुनः ॥
कर्त्तुरप्यधिकं ब्रह्मेत्येतावन्मात्रभिन्नता ॥ ७३ ॥
कर्त्रात्मानं विबुध्यासौ करोतीति मतं यदि ॥
तर्ह्यकर्त्रात्मबोधेन न करोतीति तत्समम् ॥ ७४ ॥
किं बहूक्तेन बोधौ द्वौ स्वस्वबोध्यावभासने ॥

भावः ॥ ६८ ॥ फलितमर्थं दार्ष्टान्तिकेऽप्याह *तथेति ॥६९॥ आत्मनि भोक्तृत्वाध्यासस्यानिवृत्तेः कर्मिणां देहपोषणं न दोषायेति शङ्कते *नायमिति । गूढाभिसन्धिरुत्तरमाह *भोक्तरीति । प्रारब्धं कर्म निवृत्ताविद्यस्यापि भोगैकनाश्यमित्युक्तमित्याशयः । *नो चितीति । शुद्धचैतन्ये नास्तीत्यर्थः ॥७० ॥ आशयमजानानस्य चोद्यमनूद्य तमुच्चाटयति *अभोक्तृचिदित्यादिना ॥ ७१ ॥ ७२ ॥ तर्हि विद्वत्कर्मिणोः को भेदस्तत्राह *देहेति ॥ ७३ ॥ ७४ ॥ तस्मात्कर्त्रात्मशुद्धात्मधियोः स्वस्वगोचरप्रकाशकत्वं तु तुल्यं, तथाच कर्मिण इव विदुषोऽपि प्रारब्धकर्माधीनव्यवहारो दुर्निवार इत्याह *किं बहूक्तेनेति

शक्तौ, व्यवहृतिर्नश्येत्स्वाधिकारानिवृत्तितः ॥ ७५ ॥
अरतेरुद्भवे भीतिः कुतो नोद्भवतीति चेत् ॥
भये नाधिकृतः किन्तु सृष्टाविति तदुत्तरम् ॥ ७६ ॥
नियामकोऽधिकारोऽतः क्वापि नातिप्रसञ्जनम् ॥
अतिप्रसङ्गभीरुः किमधिकारं नियच्छति ॥ ७७ ॥
ईश्वरोऽप्यनुसृत्यैव प्राणिकर्म जगत्सृजेत् ॥
नियन्तृमानिनस्ते त्वं सामर्थ्यं वेत्सि नो वयम् ॥७८॥
आत्मक्रीडश्चात्मरतिरिति रत्यन्तरं श्रुतिः ॥
वारयेदिति चेत्तर्हि व्यवस्थाऽस्तु श्रुतिद्वये ॥ ७९ ॥
प्रबलारब्धविषयं विज्ञेयमरतेर्वचः ॥
इतरद् भ्रान्तिविषयरत्यन्तरनिवारकम् ॥ ८० ॥
विनाऽपि प्रबलारब्धमविवेकभ्रमार्पिताः ॥
ये रागास्ते विलीयन्ते विवेकेन न संशयः ॥ ८१ ॥

॥ ७५ ॥ प्रजापतेरेवंसति भयानुवृत्तेरपि सम्भवाज्ज्ञानात्तन्निवृत्तिकथनं वृथेत्याशङ्क्य प्रारब्धकर्मणां विचित्रफलत्वान्नेदं चोद्यं शोभत इत्याह *अरतेरित्यादिना । *भये नाधिकृत इति । भयानुवृत्तिहेतुप्रारब्धकर्म नास्तीत्यर्थः ॥ ७६ ॥ ७७ ॥ नियन्तुं न शक्यते कर्मेत्यत्र हेतुमाह *ईश्वर इति । एवंविधमपि कर्म नियच्छामीति वदतस्तव शक्तिं त्वमेव जानासि न वयमित्याह *नियन्त्रिति ॥ ७८ ॥ विदुषोऽपि दोषानुवृत्त्यङ्गीकारे श्रुत्यन्तरविरोधमाशङ्क्य परिहरति *आत्मेति ॥ ७९ ॥ व्यवस्थामेवाह *प्रबलेति । इतरद् आत्मरतिरित्यादिवाक्यं भ्रान्तिजन्यरागादिनिषेधपरमित्यर्थः ॥ ८० ॥ दुर्बलप्रारब्धप्रापितस्य भ्रान्तिप्रयुक्तस्य च रागादेर्भोगं विनाऽपि निवृत्तिः सम्भवतीत्याह *विनाऽपीति ॥ ८१ ॥ इममेवात्मानमित्यादेस्तात्पर्य-

प्रबलारब्धवेगेन कामुकः सन्प्रजापतिः ॥
एकं देहं स्वभोगार्थमसृजन्मिथुनात्मकम् ॥ ८२ ॥
तं द्वेधाऽपातयद्देहमभूतां दम्पती उभौ ॥
मनुः पुमान् वधूर्ज्ञेया शतरूपाऽत्र नामतः ॥ ८३ ॥
तयोः सम्भोगतो जाता मनुष्या, दम्पती पुनः ॥
नानादेहानगृह्णीतां ताभ्यां द्वन्द्वानि जज्ञिरे ॥ ८४ ॥
गवाश्वरासभाजाविप्रमुखा आपिपीलिकम् ॥
प्राणिनो मिथुनात्मानो जाताः कर्मानुसारतः ॥८५॥

श्रुतिः–स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् सहैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्द्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत्ततो मनुष्या अजायन्त ॥ ३ ॥

माह *प्रबलेत्यादिना ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

तस्मादेकाकीत्यादिश्रुतेरयमर्थः—कार्यनिष्ठारत्या कारणेऽप्यरतिरनुमेयेत्याह श्रुतौ *तस्मादिति । स प्रजापतिररत्यपनोदनाय द्वितीयं स्त्रीवस्त्वैच्छत् । सहैतावानिति सामान्यत उक्तमेव विवृणोति श्रुतिः *स यथेति । स प्रजापतिरात्मानं स्त्रीपरिष्वक्तं कल्पयित्वा लोके स्त्रीपुमांसौ सम्परिष्वक्तौ यथा यावत्परिमाणौ स्यातां तावत्परिमाणपिण्डवानास सङ्कल्पमात्रादित्यर्थः । स इमं स्त्रीपुम्परिमाणपिण्डमात्मानमात्मस्वरूपं द्वेधा अपातयत्, द्विधा कृतवान् । एवकारेणोत्पन्नपिण्डस्यैव द्विधाकरणं न स्वरूपस्येत्युक्तं भवति । ततो द्विधा पातनात्पतिश्च पत्नी चाभवताम् । अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः ।

सो हेयमीक्षां चक्रे कथं नु माऽऽत्मन एव जनयित्वा सम्भवति हन्त तिरोऽसानीति सा गौरभवदृषभ इतरस्ताꣳ समेवाभवत्ततो गावोऽजायन्त वडवेतराऽभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्ताꣳ समेवाभवत्तत एकशफमजायत अजेतराऽभवद्वस्त इतरोऽविरितरा मेष इतरस्ताꣳ समेवाभवत् ततोऽजावयोऽजायन्तैवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

सोऽवेदहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याꣳ हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

मनुः शतरूपा चाभवदित्यर्थः। यस्मात्स्त्री शरीरार्द्धं तस्मादिदं शरीरम्, स्व इति षष्ठ्यर्थे, स्वस्य पुंसो विवाहात्पूर्वमर्द्धबृगलमिव द्विधाकृतवेणुदलादिकमिव तिष्ठतीति ह स्म किल याज्ञवल्क्यनामा ऋषिः ह इति इत्थमाह स्म उक्तवान्। यस्मादयं स्त्रीशून्यः पुमानर्द्ध आकाशस्तस्माद्विवाहेन स्त्रिया स्त्र्यर्द्धेन पूर्यते तां स्त्रियं मन्वाख्यः प्रजापतिः समभवन्मैथुन्यमुपगतवान् ततस्तस्मादुपगमनात् मनुष्या अजायन्त ॥ ३ ॥ *सो हेयमिति। सा उ ह इयमिति छेदः। सेयं शतरूपा एवमालोचितवती मामात्मन एव जनयित्वा कथं नु सम्भवति जुगुप्सितं दुहितृगमनं कथं करोति। यद्यप्ययं निर्घृणः अहं हन्त इदानीं तिरोऽसानि जात्यन्तरेण तिरस्कृता भवामीत्येवमीक्षित्वा सा गौरभवदुत्पत्स्यमानप्राणिकर्मवशात् सोऽपि ऋषभो भूत्वा तां समभवदेव। बस्त इति मेषावान्तरजातिविशेषः॥४॥ *सोऽवेदिति। स प्रजापतिरहं वाव अहमेव सृष्टिरस्मीत्यवेत् निश्चितवान्। सृष्टिशब्दः कर्म-

अथेत्यभ्यमन्थत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतस्तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदं सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिर्यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥ ६ ॥

मुखबाहूरुपादेभ्यो वह्नीन्द्रवसुभूमयः ॥

व्युत्पत्त्या जगद्वचनः। स्वस्य जगदभेदे हेतुमाह । अहं हीदं सर्वमसृक्षि सृष्टवानस्मि अतः स्वकार्यस्य स्वाभेदो युक्त इत्यर्थः । यतोऽहं सृष्टिरित्युवाच प्रजापतिस्तस्मात्सृष्टिनामाऽभवत् । य एवं सर्वं जगदहमेवेति वेद सोऽप्यस्य प्रजापतेरेतस्यां सृष्ट्यामेतस्मिन्जगति तद्वदेव स्रष्टा भवति ॥ ५ ॥ स प्राणिसृष्टेरनन्तरं तदनुग्राहकाग्न्यादिदेवताः सिसृक्षुरथेत्यभ्यमन्थत् । अथेतिशब्दद्वयमभिनयप्रदर्शनार्थम्। अनेन प्रकारेण मुखे हस्तौ प्रक्षिप्याभिमुख्येन मन्थनं कृतवानेवं कृत्वा मुखाच्च योनेर्हस्ताभ्यां च योनिभ्यामग्निमसृजत तस्माद्दाहकार्यग्नियोनित्वादेतदुभयं हस्तौ मुखं चान्तरतो लोमवर्जितम् । प्रसिद्धयोन्या च साम्यमाह *अलोमकेति । अलोमका हि योनिरन्तरतः स्त्रीणाम् ।

यद्यप्यत्र ब्राह्मणदेवताया अग्नेरेव मुखादुत्पत्तिरुक्ता, तथापि क्षत्रादिदेवतासर्गं वक्ष्यमाणं बुद्धिसौकर्यायोक्तवदुपसंहरति तद्यदिदमित्यादिश्रुतिरित्याह वार्त्तिककारः *मुखे-

देवता असृजद्ब्रह्मा चातुर्वर्ण्यनियामिकाः ॥ ८६ ॥
तत्रेन्द्रादीन् भिन्नदेवान्मन्यन्ते यागभूमिषु ॥
कर्मिणस्तदसज्ज्ञेयं विराडेवाखिला इमे ॥ ८७ ॥
अविद्वदधिकारित्वात्कर्मणां भिन्नदेवताः ॥
उच्यन्तां कर्मकाण्डेन वस्तुतस्तु न तत्तथा ॥ ८८ ॥
विराजो जीवतामाहुः केचिदन्ये परात्मताम् ॥
उभयं युक्तमेवैतद्विवक्षाया विशेषतः ॥ ८९ ॥
सोपाधिकाविवक्षायां जीव एव विराड् भवेत् ॥
निरुपाधिविवक्षायां परमात्मैव नेतरः ॥ ९० ॥
वयमप्येवमेवेति यद्युच्येत तथाऽस्तु तत् ॥
सृष्ट्वा विराड्भोक्तृवर्गं भोग्यमन्नमचीक्लृपत् ॥९१॥

ति ॥ ८६ ॥ तात्पर्यमुक्त्वाऽक्षरार्थमाह *तत्रेति ॥ ८७ ॥

तत्र कर्मप्रकरणे यदिदं वचनमाहुरमुमग्निममुमिन्द्रं यजेत्यादिना एकैकमन्यमन्यमित्यर्थः ॥ तत्र यस्मात्पूर्वोक्ता द्विविधा सृष्टिरग्न्याद्या एतस्य विराज एव स्वरूपं तस्मादेष विराडेव सर्वे देवाः कार्यकारणयोरभेदादेकैव देवतेति भावः ।

आत्मव्यतिरिक्तस्य कल्पितत्त्वात्तद्व्यतिरिक्तदेवतान्तरं नास्तीति पक्षान्तरमाह *अविद्वादिति ॥८८॥८९॥९०॥ *वयमिति । न चास्मदादितुल्यत्वे विराजः श्रुत्यादिषु कथं प्रायेण परत्वकथनमिति वाच्यम् । परस्य रजउपाधिकस्य प्रजापतिशरीरे विशेषतोऽभिव्यक्तत्वादिति दिक् । अथ यदित्यादेरर्थमाह *सृष्ट्वेति ॥ ९१ ॥

अथ भोक्तृसृष्ट्यनन्तरं यत्किञ्चेदं लोके आर्द्रात्मकं तद्रेतःसकाशादसृजत । अत्र प्रसङ्गात्किञ्चिदुपासनं विधत्ते, तद्द्रवा-

पूर्वजन्मनि मर्त्यः सन्कृत्वाऽसौ ज्ञानकर्मणी ॥
अमृतानसृजद्देवान्यद्यप्येतन्महाद्भुतम् ॥ ९२ ॥
सृष्ट्वाऽखिलमवेत्सृष्टमहमस्म्यखिलं जगत् ॥
ईदृशो महिमा ज्ञेयः कृतयोर्ज्ञानकर्मणोः ॥ ९३ ॥
वर्णितेत्थं प्रयत्नेन ज्ञानकर्मफलोर्जितिः ॥
उपासितुः प्रवृत्त्यर्थं निवृत्त्यर्थं मुमुक्षतः ॥ ९४ ॥
सृष्टयैश्वर्ये स्वतन्त्रत्वं तत्कामी बहु मन्यते ॥

त्मकं सर्वं सोमः एतावद्वा इदं सर्वमन्नं चैवान्नादश्च नातोऽधिकमस्ति । तथाच यद्यदद्यते तदन्नं सोम एवेति चिन्तयेत् । य एवान्नादो अत्ता सोऽग्निरेवेति चिन्त्यः । एवमग्नीषोमात्मकं जगदिति ध्यायन्न केनचिद्दोषेण लिप्यते इति भावः । सैषा देवसृष्टिर्ब्रह्मणोऽतिसृष्टिः । तत्र हेतुर्यच्छ्रेयस इति । यद्यस्माच्छ्रेयसोऽतिप्रशस्तान्देवानसृजत तस्मादियमतिसृष्टिरित्यर्थः । तत्रैव पक्षान्तरमाह श्रुतिः *अथेति । अथवेत्यर्थः ।

प्रजापतेर्देवत्वात्कथं मनुष्यत्वमिति शङ्कां परिहरन्नुक्तश्रुतिं व्याचष्टे *पूर्वेति । यद्यपीत्यत्रापिरवधारणे । यदि यत् एतदेवाद्भुतम्, अतिसृष्टिरित्यर्थः ॥ ९२ ॥

देवसृष्टिं स्तुत्वा तच्चिन्तनफलमाह श्रुतिः *अतिसृष्ट्यामिति ॥६॥

अस्य वाक्यस्य सो ऽवेदहमिति पूर्वोक्तवाक्येन तुल्यार्थतां मन्वानस्तद्वाक्यार्थमाह *सृष्ट्वाऽखिलमिति । उक्तां विराड्विभूतिमुपसंहरति *ईदृश इति ॥ ९३ ॥ ननु ब्रह्मप्रकरणे श्रुत्या विराड्विभूतिः किमर्थमुक्ता ? तत्राह *वर्णितेति । उपासितुः क्रममुक्तिकामस्य ॥ ९४ ॥ ननु सर्वसृष्टौ विराजः स्वातन्त्र्यकथने मुमुक्षोरपि तत्साधने प्रवृत्तिरेव स्यान्न निवृत्तिरित्यत आह

दोषानेव विवेक्यत्र बहूनुत्प्रेक्षते धिया ॥ ९५ ॥
अविद्यापटसंवीतचक्षुषामियदेव हि ॥
वैदिकं साधनं ज्ञेयं ज्ञानकर्मस्वभावकम् ॥ ९६ ॥
तच्च कर्त्रादिसापेक्षं विरिञ्च्यन्तफलप्रदम् ॥
जन्मादिविक्रियाषट्कयुक्तं सातिशयं जडम् ॥९७॥
दुःखानि च विचित्राणि सन्त्येतद् बहुजन्मसु ॥
अनेकक्लेशयुक्तेन दुर्लभं तपसा विना ॥ ९८ ॥
कथं चित्साधितेऽप्यस्मिन्परानन्दघनं प्रभुम् ॥
अन्तर्भाव्य विराट्पिण्डे स्थातव्यं हि जुगुप्सिते॥९९॥
न केवलं पिण्डवासस्तादात्म्यं चाभिमानिना ॥
ततो भयं भक्षणाय पितुर्मुखविदारणात् ॥ १०० ॥
चण्डालानां च नेयं भीः किन्तु पन्नगजन्मनः ॥
को भेदः स्याद्विराड्जन्मन्युरगात्पुत्रभक्षिणः॥१०१॥
कृच्छ्राद्भये प्रशान्तेऽपि जग्राहाथारतिग्रहः ॥
क्रियमाणे प्रतीकारे गर्दभादिशरीरताम् ॥ १०२ ॥
एकयोनौ सकृज्जातः क्लेशं सोढुं न शक्नुयात् ॥
अनन्तयोनिष्वसकृज्जायमानस्य का कथा ॥ १०३ ॥

---

*स्रष्टृत्वैश्वर्य इति । मुमुक्षोरतिनिर्मलचित्तत्वाद्वक्ष्यमाणदोषाननुसन्धाय ततो निवृत्तिः सम्भवतीत्यर्थः ॥ ९५ ॥ तत्र दोषोत्प्रेक्षाप्रकारमाह *अविद्येत्यादिना ॥ ९६ ॥ ९७ ॥ एतद् बहुजन्मसु एतदर्थं विराट्प्राप्त्यर्थम् अनेकजन्मसु, स्वीक्रियमाणेष्विति शेषः ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ *अथारतिग्रह इति । अथ भीनिवृत्तिक्षण इत्यर्थः ॥ १०२ ॥ १०३ ॥

निस्तरेद्विद्यया चेत्किं बकबन्धप्रयासतः ॥
अथ विद्यामुपेक्ष्योर्ध्वं किं विद्यां प्रार्थयिष्यते॥१०४॥
क्लेशेन महतोपास्य बहुयोनिं प्रविश्य च ॥
विद्यान्वेषणतः श्रेय इदानीमेव वेदनम् ॥ १०५ ॥
एवं विचार्य बहुशस्तूर्णमेव मुमुक्षति ॥
निवृत्तः सर्वबाह्यार्थात्प्रमेयं मातुमर्हति ॥ १०६ ॥
अधिकारी साधितः स्यादेवं फलविचारतः ॥
तेन प्रमातुं यद्योग्यं तदिदानीं निरूप्यते ॥ १०७ ॥
ननु शास्त्रं प्रमाणत्वात्प्रमापयतु वस्तु तत् ॥
प्रमातुं योग्यता त्वादौ यत्नेन किमितीर्यते ॥ १०८ ॥
न कर्मशास्त्रं यत्नेन कर्मणो मानयोग्यताम् ॥
क्वचिद् ब्रूते तथा साऽत्र न वक्तव्येति चेन्न तत्॥१०९॥

विराजः "सहसिद्धं चतुष्टयम्" इति वचनेन ब्रह्मज्ञानावश्यम्भावात्तेन सर्वदुःखनिवृत्तिर्भवति "तत्र को मोहः कः शोकः" इति श्रुतेरित्याशङ्क्य, हन्त तर्हि ब्रह्मज्ञानमेव सम्पादनीयं विराट्प्राप्तिप्रयुक्तसुखस्यापि ब्रह्मानन्दलेशत्वादिति मत्वाह * निस्तरेदित्यादिना । अथ विद्यामित्यत्राथशब्देन वैदिककर्मप्रवृत्त्यनन्तरभाव्युपासनकाल उच्यते । ऊर्ध्वं विराट्प्राप्त्यनन्तरम् ॥ १०४ ॥ *बहुयोनिमिति। उपास्तेर्बहुजन्मसाध्यत्वादिति भावः ॥१०५ ॥१०६॥ फलितमर्थं दर्शयन्नुत्तरग्रन्थस्य पूर्वेण सम्बन्धमाह * अधिकारीति ॥ १०७ ॥ नन्वधिकारिणः पुमर्थो वाच्यः न तु प्रमातुं योग्यत्वं मानस्य मेयबोधकत्वस्वाभाव्यात् । कर्मशास्त्रे तथा दृष्टत्वाच्च। अतः तद्धेदमित्यादिवाक्यमसङ्गतमित्याक्षिपति । * नन्वित्यादिना ॥ १०८ ॥ १०९ ॥ वैषम्येण प-

कर्मशास्त्रव्यवहृतिर्लौकिकव्यवहारवत् ॥
साध्यसाधनरूपेण प्रसिद्धा न विलक्षणा ॥ ११० ॥
वेदान्तप्रतिपाद्यं तु न साध्यं नापि साधनम् ॥
अलौकिकत्वात्पुम्बुद्धिर्नैतत्सम्भावयत्यपि ॥ १११ ॥
सम्भावितः प्रतिज्ञायां पक्षः साध्येत हेतुना ॥
इति न्यायेन तन्मेयमादौ सम्भाव्यते श्रुतौ ॥ ११२ ॥
उपादेयस्य मेयस्य वाच्या सम्भावना यथा ॥
हेयसंसारहेतुश्च वक्तव्यो यत्नतस्तथा ॥ ११३ ॥
संसाराख्यमहाव्याधेः किं मूलमिति चिन्तिते ॥
तद्ध्वस्तये चिकित्सेयं तदा फलवती भवेत् ॥११४॥
अविज्ञातनिदानेन भिषजा यच्चिकित्सितम् ॥
तद् अनर्थकरं यद्वत्प्रकृतेऽप्यवगम्यताम् ॥ ११५ ॥
मायामूलं द्वैतमेतदित्यज्ञाते कथं त्विदम् ॥

रिहरति * न तदित्यादिना । * साध्येति । व्रीह्यादिसाधनस्य तत्साध्यक्रियायास्तन्निष्ठेष्टसाधनत्वस्य च दृष्टसजातीयत्वादित्यर्थः । नापि साधनं, वस्तुत इति शेषः ॥ ११० ॥ १११ ॥ सम्भावितेऽर्थे एव मानं प्रवर्त्तत इत्यत्राभियुक्तसम्मतिमाह *सम्भावित इति । पर्वतो वह्निमानित्युक्ते तत्र वह्नेः सम्भावितत्वेन हेत्वाकाङ्क्षायां धूमवत्त्वादिना वह्निः साध्यते, नैवं ह्रदादाविति भावः । किञ्चास्मिन्वाक्येऽव्याकृतमित्यज्ञानमप्युच्यते ॥ तच्चावश्यं वक्तव्यं तन्मूलकसर्वानर्थनिरासाय, तस्मादपीदं वाक्यमत्र सङ्गतमित्याह *उपादेयस्येत्यादिना॥११२॥११३॥११४॥११५॥ अद्वैतं बुद्धिं कथमारोहेन्न कथञ्चिदित्यर्थः । अद्वैते बुद्ध्यनारूढे दोषमाह *स्यादत इति । अतो ऽद्वैतादन्यत्र द्वैते आकुलः स्यादि-

अद्वैतं बुद्धिमारोहेत्स्यादतोऽन्या तु नैव धीः ॥११६॥
देहादृष्टक्रियाकर्तृरागाध्यासार्थसप्तकात् ॥
द्वारा संसारहेतुः स्यादात्माज्ञानं तु लोकवत् ॥११७॥
आत्माज्ञानमनर्थानां मूलं लोकेऽपि नेतरत् ॥
स्वपराक्रममज्ञात्वा युध्यन्म्रियत एव हि ॥ ११८ ॥
एवं स्वात्मानमज्ञात्वा संसारानर्थमाप्नुयात् ॥
अनर्थाज्ञानयोः कार्यकारणत्वं प्रपञ्च्यते ॥ ११९ ॥
जिहासितस्यानर्थस्य हेतुः स्यात्सशरीरता ॥
न प्रियाप्रियविच्छेदः सशरीरस्य कस्य चित् ॥१२०॥
धर्माधर्मौ च देहस्य योनिरित्यागमोऽब्रवीत् ॥
विहितं प्रतिषिद्धं च कर्म मूलं तयोरपि ॥ १२१ ॥
कर्तुरेव भवेत्कर्म रागद्वेषाच्च कर्तृता ॥
शोभनाशोभनाध्यासौ रागद्वेषप्रयोजकौ ॥ १२२ ॥

त्यर्थः ॥११६॥ अज्ञानं नानर्थहेतुः स्वापादौ तस्य तद्धेतुत्वाद-र्शनादित्याशङ्क्य शरीरादिद्वाराऽनर्थहेतुत्वमाह *देहेति । द्वारस-प्तकं स्वयमेव वक्ष्यति ॥ ११७ ॥ लोकवदित्युक्तं दृष्टान्तं सदा-र्ष्टान्तिकं स्फुटयति *आत्मेत्यादिना ॥ ११८ ॥११९॥ तत्रा-ज्ञानस्य देहद्वाराऽनर्थहेतुत्वं तावत् दर्शयति *जिहासितस्येति । हातुमिष्टस्यानर्थस्य दुःखस्य ॥ १२० ॥ अदृष्टशब्दितधर्मादेर्देह-हेतुत्वमाह *धर्मेति । आगमः—यथाकर्म यथाश्रुतमित्यादिः । क्रियाया धर्माधर्महेतुत्वमाह *विहितमिति ॥१२१ ॥ कर्तृत्वस्य क्रियाहेतुत्वमाह *कर्तुरिति । कृतिमत्त्वरूपकर्तृत्वे रागादेर्हेतु-त्वमाह *रागेति । अध्यासशब्दितसङ्कल्पादे रागादिहेतु-त्वमाह *शोभनेति ॥ १२२ ॥ तत्रापि स्वातिरिक्तार्थसद्भाव-

उक्ताध्यासोऽप्यन्यवस्तुसद्भावात्स्यान्न चान्यथा ॥
वस्त्वन्तरस्य सद्भाव आत्माज्ञानेन कल्पितः ॥१२३॥
एवं देहादिवस्त्वन्तसप्तकव्यवधानतः ॥
संसारानर्थहेतुः स्यादात्माज्ञानं जगत्सृजत् ॥ १२४ ॥
प्रत्यग्याथात्म्यसंमोहाज्जगत्सदिव भासते ॥
प्रत्यग्याथात्म्यसम्बुद्धौ न सत्तन्नासदुच्यते ॥ १२५ ॥
अशेषानर्थरूपस्य प्रत्यगज्ञानरूपिणः ॥
ध्वस्तौ ध्वस्तिरनर्थानामानन्दश्च समाप्यते ॥ १२६ ॥
निरस्तातिशयानन्दरूपता प्रत्यगात्मनः ॥
यो वै भूमा तत्सुखं स्यादित्यादिश्रुतिसम्मता ॥ १२७॥
स्वत आनन्दयाथात्म्येऽप्यबोधाद् दुःखसंप्लुतिः ॥
स बोधोऽनर्थहेतुत्वान्निर्देष्टव्यश्चिकित्सितुम् ॥ १२८ ॥
अबुद्धमात्मनस्तत्त्वं प्रमातुं योग्यमागमैः ॥
निर्देष्टव्यं तदप्यत्र सम्भावयितुमञ्जसा ॥ १२९ ॥

धीर्मूलमित्याह *उक्तेति ॥ तत्राज्ञानं हेतुरित्याह *वस्त्वन्तर· स्येति ॥ १२३ ॥ उपसंहरति *एवमिति ॥ जगत्सृजत्—जगदात्मनि कल्पयदज्ञानं तद्द्वारा दुःखहेतुः स्यादित्यर्थः ॥ १२४ ॥ एवमज्ञानस्य दुःखहेतुत्वमुक्त्वा तन्निवृत्त्या सर्वानर्थनिवृत्तिमाह *प्रत्यगित्यादिना । न केवलतन्निवृत्त्या सर्वानर्थनिवृत्तिः किन्तु निरतिशयानन्दावाप्तिरित्याह *आनन्दश्चेति ॥१२५॥१२६॥ आत्मन उक्तसुखरूपत्वे श्रुतिं प्रमाणयति। *निरस्तेति ॥१२७॥ आत्मनः सुखरूपत्वेऽप्यारोपितदुःखप्रतीतिरुपपद्यत इत्याह *स्वत इति॥ अज्ञानस्यात्र वक्तव्यत्वम् अज्ञातवस्तुन आगमैः प्रमातुं योग्यतायाश्च निर्देष्टव्यत्वमुक्तं क्रमेणोपसंहरति *स इत्यादिना ॥ १२८ ॥ १२९ ॥ ननूभयं वक्तव्यं चेदत्र केन पदेन

तमबोधं तच्च मेदमव्याकृतगिरा श्रुतिः ॥
निरदिक्षच्छ्रुतिः सा तु न्यायेनात्र विचार्यते ॥ १३० ॥
तद्धेदं तर्ह्यविस्पष्टमासीदव्याकृताभिधम् ॥
इत्येतस्मिञ्छ्रौतवाक्ये पदार्थस्तावदीर्यते ॥ १३१ ॥
अज्ञातात्मावशेषेण लीनं ब्रह्मस्वरूपधृक् ॥
तच्छब्देन जगत्प्रोक्तं परोक्षार्थाभिधायिना ॥१३२॥
अव्याकृतस्य जगतो भूतकालाभिसङ्गिनः ॥
बुभुत्सुं प्रति पारोक्ष्यात्तच्छब्दस्तत्र युज्यते ॥१३३॥
ऐतिह्यार्थे हशब्दः स्यात्सुखेनार्थावबुद्धये ॥
तर्केणोक्तौ धियः क्लेशः परमाण्वनुमानवत् ॥ १३४ ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ॥
नाप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः ॥ १३५ ॥
नामरूपादिविकृतं पराज्ञानेन भासितम् ॥
इदंशब्देन निखिलं जगदेतदुदीर्यते ॥ १३६ ॥
सामानाधिकरण्येन तदिदम्पदयोः श्रुतम् ॥

तदुच्यत इति तदाह *तमबोधमिति। निरदिक्षत् निर्दिष्टवती। *न्यायेनेति। पदार्थकथनानन्तरमिति शेषः ॥ १३० ॥ एवं वाक्यसङ्गतिमुक्त्वा वाक्यस्थपदानि व्याख्यातुमुपक्रमते*तद्धेदमिति ॥ १३१ ॥ तत्पदार्थमाह *अज्ञातेति ॥ १३२ ॥ कथं जगतो यथोक्तस्य परोक्षत्वं? तत्राह *अव्याकृतस्येति ॥१३३॥ निपातार्थमाह ॥ *ऐतिह्येति ॥१३४॥ न केवलं तर्कोक्तौ धियः क्लेशः, तेनातर्क्यब्रह्मावशेषं जगन्न सिद्ध्यति चेत्याह* अचिन्त्या इति ॥ अतः परोक्षस्य सुखधीरैतिह्याधीनेति तदेव वक्तव्यमिति भावः ॥ १३५ ॥ इदंशब्दार्थमाह। *नामेति ॥ १३६ ॥

कार्यकारणयोरैक्यं व्याकृताव्याकृतात्मनोः ॥ १३७॥
एकस्य जगतोऽवस्थे व्याकृताव्याकृतात्मिके ॥
अवस्थयोर्विभेदेऽपि तद्धर्मी न हि भिद्यते ॥ १३८॥
बाल्ययौवनभेदेऽपि देवदत्तो न भिद्यते ॥
ततो जगदभेदेन सामानाधिकरण्यधीः ॥ १३९ ॥
नामरूपाद्यभिव्यक्तेः प्राक्तनः काल उच्यते ॥
तर्हीत्यनेन शब्देन, स कालो लोककल्पितः ॥१४०॥
यद्यप्यव्याकृते कालव्यक्तिर्नास्ति तथाऽप्यमी ॥
लोकाः प्रलयकालत्वव्यवहारं प्रकुर्वते ॥ १४१ ॥
जगतोऽप्यनभिव्यक्तिरव्याकृतगिरोच्यते ॥
न जगत्प्रागवस्थायां व्यक्तं गर्भस्थपुत्रवत् ॥ १४२ ॥
आसीदिति च सत्त्वमधिष्ठानतयोदितम् ॥
तथाच भावरूपत्वाज्जगद्व्याकृतिमर्हति ॥ १४३ ॥
अव्याकृतं च वस्त्वेवमवतार्यास्य वर्णिताः ॥
पदार्था, अथ वाक्यार्थो न्यायेनैव निरूप्यते ॥ १४४ ॥

पदद्वयसामानाधिकरण्यफलमाह *सामेति ॥ १३७ ॥ कार्यकारणयोरत्यन्ताभेदे कारकव्यापारवैयर्थ्यादिदोषमाशङ्क्याह *एकस्येति ॥ १३८ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *बाल्येति ॥ १३९ ॥ तर्हिपदार्थमाह *नामेति । अविद्योपहितचिद्व्यतिरेकेण तन्निष्ठकाले मानाभावात्कथमनेन पदेन तदुक्तिरित्यत्राह *स काल इति ॥ १४० ॥ १४१ ॥ अवशिष्टपदयोरर्थमाह *जगत इत्यादिना ॥ १४२ ॥ जगत उत्पत्तेः प्रागधिष्ठानसदात्मनाऽवस्थाने फलितमाह *तथाचेति ॥ १४३ ॥ १४४ ॥ प्रतिज्ञातमर्थं निरूपयितुं सिद्धान्त्यभिम-

नन्वव्याकृतवस्त्वत्र वाक्यार्थस्तस्य च त्वया ॥
प्रमेयत्वं कारणत्वमित्याकारावुभौ मतौ ॥ १४५ ॥
आस्तां कारणताऽऽकारः प्रमेयत्वं निरूपय ॥
अज्ञात आत्मा मेयश्चेन्नाज्ञानस्यानिरूपणात् ॥ १४६॥
ज्ञानाभावः किमज्ञानं किंवा ऽनिर्वाच्यरूपभृत् ॥
आद्ये तवापसिद्धान्तो द्वितीये तु न सम्भवः ॥१४७॥
अनिर्वाच्यं किमज्ञानं मीयतेऽथ न मीयते ॥
आद्ये मानानिवर्त्यं स्यान्नेतरस्तदसिद्धितः ॥ १४८ ॥
अप्रमेयं तदज्ञानं भासते वा न भासते ॥
भानं च किं स्वतःसिद्धमात्मचैतन्यतोऽथ वा ॥१४९॥
जडस्य न स्वतो भानमात्माऽप्येतन्न भासयेत् ॥
तद्भासनेऽस्य तत्सङ्गादसङ्गत्वं विहन्यते ॥ १५० ॥
विधूताशेषसम्बन्धम् अनन्यानुभवात्मकम् ॥
कूटस्थसंविन्मात्रैकं ब्रह्मात्मेति मतं तव ॥ १५१ ॥
स्वतोऽवबुद्धं तद्यस्मान्निरविद्यमतः सदा ॥

तार्थानुवादपूर्वकमाक्षेपमवतारयति *नन्वित्यादिना ॥ १४५ ॥ *निरूपयेति । तच्च दुर्निरूपमिति भावः। दुर्निरूपत्वासिद्धिं शङ्कते *अज्ञात इति । अज्ञाने निरूपिते तद्विशिष्ट आत्मा वेदान्तप्रमेयः स्यात्, तदेव दुर्निरूपं विकल्पासहत्वादित्याह *नेत्यादि॥१४६॥ ॥१४७॥ अनिर्वाच्यमिथ्याज्ञानस्यासम्भवं प्रकटयितुं विकल्प्य दूषयति *अनिर्वाच्यमित्यादिना ॥ आत्मभास्यमज्ञानमिति पक्षे ऽप्यात्मा स्वसम्बद्धं भासयति असम्बद्धं वा ? अन्त्येऽतिप्रसङ्गं मत्वाऽऽद्यं दूषयति *तद्भासने इति ॥१४८॥१४९॥१५०॥ आत्मनो ऽसङ्गत्वानङ्गीकारे ऽपसिद्धान्तमाह *विधूतेति ॥ १५१ ॥

सङ्गतिर्निरविद्यस्य नाविद्याजनितैर्मलैः ॥ १५२ ॥
नातोऽसङ्गेन भातं तदभातं तु न सिध्यति ॥
नैष्फल्याच्च तदज्ञानं नैव कल्प्यं चिदात्मनि ॥१५३॥
अतिरोभूतसंवित्कः सदाऽनस्तमयोदयः ॥
निःसामान्यविशेषोऽयं तत्राज्ञानेन किं फलम् ॥१५४॥
अत्रोच्यते किमज्ञाने विचारासहतोच्यते ॥
किंवा स्वानुभवाभाव आद्यः सिद्धान्त एव मे ॥१५५॥
अविचारितसंसिद्धिमविद्यां ब्रूम आत्मनि ॥
स्वभावव्यतिरेकाभ्यां ध्वान्तसिद्धेरसम्भवात् ॥१५६॥
न चिदात्मस्वभावः स्यादविद्या जाड्यरूपतः ॥

आत्मनः स्वप्रकाशत्वाङ्गीकाराच्च न तत्राविद्यातत्कार्यसम्बन्ध इत्याह *स्वत इति ॥ १५२ ॥ फलितमाह *नात इति । यतोऽसङ्गे ज्ञानं नास्त्यतोऽसङ्गेनात्मना तन्न भातमित्यर्थः । न भासत इति पक्षं दूषयति *अभातमिति । किञ्चाज्ञाने कल्पिते प्रकाशलोपो वाच्यः, स च न सम्भवति, तस्य नित्यत्वात् अतः कल्पितमप्यज्ञानं वृथैवेत्याह *नैष्फल्यादिति ॥ १५३ ॥ अज्ञानस्य स्वरूपसंविदावरकत्वान्न नैष्फल्यमित्याशङ्क्य, संवित्सामान्यमावृणोति उत तद्विशेषं वा ? नाद्यः, तस्य सदाऽहमिति अवगतेरित्याह *अतिरोभूतेति । द्वितीयं निराह *निःसामान्येति ॥ १५४ ॥ सर्वानुभवसिद्धमज्ञानं युक्त्या दुरपह्नवमिति समाधत्ते *अत्रोच्यत इति ॥ किम् उक्तरीत्या विचारासहत्वमात्रमुच्यते उतानुभवाभावोऽपीति विकल्पार्थः ॥ १५५ ॥ स्वसिद्धान्तमेव प्रकटयति *अविचारितेति । तत्र हेतुः *स्वभावेति । आत्माभिन्नतया, तद्भिन्नत्वेन, स्वतन्त्रतया वा तदसिद्धेरित्यर्थः॥१५६॥

नापि चात्मातिरेकेण स्वतः सिद्ध्यति जाड्यतः ॥१५७॥
न द्वितीयो यतः स्वात्मन्यविद्यैषाऽनुभूयते ॥
स्वानुभूतिर्न वेद्मीति दृष्टा प्रागैक्यबोधतः ॥ १५८ ॥
विधूताशेषसम्बन्धमित्यादि यदुदीरितम् ॥
तत्तथैवाभ्युपैम्यत्र नासङ्गे विवदामहे ॥ १५९ ॥
निरविद्योऽप्यसङ्गोऽयमज्ञातः स्यात्स्वभावतः ॥
तमोवृत्तमपेक्ष्यैव न तु वास्तववृत्ततः ॥ १६० ॥
यादृग्वस्तुनि मर्यादा न तादृक् स्यात्तमस्यसौ ॥
दृश्यते स्वशिरश्छेदो निद्राणेन तमस्विना ॥ १६१ ॥
वस्तुमर्यादया स्वात्मा निरविद्योऽपि सन्नसौ ॥
तमोमर्यादया कस्मात्साविद्यो न भविष्यति ॥१६२॥
मर्यादयोर्यदि ज्ञातुं नियामकमिहेच्छसि ॥

एतदेव स्फुटयति *नेति ॥ १५७ ॥ अनुभवाभावमसिद्ध्या दूषयति *न द्वितीय इति । अनुभवमभिनयति *स्वेति ॥ १५८ ॥ यदुक्तमात्मनोऽसङ्गत्वं तदङ्गीकरोति *विधूतेति ॥ १५९ ॥ निरविद्यस्यापि कल्पिताविद्याश्रयत्वमविरुद्धमित्याह *निरविद्य इति । स्वभावत इत्युक्तं हेतुं व्याकरोति *तम इति । ब्रह्मणो वस्तुतः शुद्धत्ववत्कल्पिताज्ञानवत्त्वमपि स्वभाव इति भावः ॥ १६० ॥ सत्यवस्तुनि या मर्यादा सा कल्पिते नास्तीत्यत्र दृष्टान्तमाह *दृश्यत इति ॥ १६१ ॥ * वस्त्विति । विरुद्धस्वभावयोरपि भिन्नसत्ताकयोरेकवृत्तित्वं युक्तमिति भावः ॥ १६२ ॥ उक्तमर्यादाभेदे वा किं नियामकम् ? इत्याशङ्क्य प्रतिबन्द्योत्तरयति *मर्यादयोरित्यादिना । *नीरादाविति । किञ्चिज्जलं हिमकरकादिरूपं कठिनं, किञ्चिद् द्रवात्मकं,

द्रवकाठिन्ययोस्तर्हि नीरादौ तदुदीर्यताम् ॥ १६३ ॥
तादृक्स्वभावभेदश्चेत्समोऽसौ ब्रह्ममाययोः ॥
स्वभाववादापत्तिश्च समानैवावयोर्द्वयोः ॥ १६४ ॥
अनुभूत्या समाधानमुभयोरपि तत्समम् ॥
एवं च युक्तिहीनत्वं शङ्कितुं च न शक्यते ॥ १६५ ॥
वस्तुस्वभावानुभवावनुसृत्योपपाद्यते ॥
यन्मतं युक्तियुक्तं तद्ब्रह्मवादश्च तादृशः ॥ १६६ ॥
तर्हि स्वभाववादोऽयं कुतो विप्रैर्निषिध्यते ॥
धर्माधर्मस्वभावस्य लङ्घनादिति विद्धि भोः ॥ १६७ ॥
स्वभावो लौकिको यद्वद्वैदिकोऽपि तथा यदि ॥
चार्वाकेणाभ्युपेतः स्यान्नासौ दूष्यस्तथासति ॥ १६८ ॥
ब्रह्मणो निरविद्यत्वस्वभावस्त्वनुभूयते ॥
ज्ञातात्मतत्त्वो जानाति त्रिकालं निरविद्यताम् ॥ १६९ ॥
अविद्यायाः स्वभावश्च ब्रह्मावरणलक्षणः ॥

तत्र नियामकवदेवेत्यर्थः ॥ १६३ ॥ १६४ ॥ १६५ ॥ १६६ ॥ नन्वेवंसति स्वभावमनुभवं चानुसरतश्चार्वाकस्य मतं युक्तियुक्तत्वाद्वैदिकैः किमर्थं निषिध्यत इति पृच्छति * तर्हीति । वेदस्वभावातिलङ्घनादित्याह * धर्मेति ॥ १६७ ॥ यदि लोकस्वभाववद्वेदोऽप्यन्वयव्यतिरेकाद्यसिद्धहितसाधनत्वबोधकस्वभाव इति तेनाङ्गीकृतः स्यात्तदा स न दूष्यत एवेत्याह *स्वभाव इति ॥ १६८ ॥ ब्रह्मणः शुद्धस्वभावत्वमसिद्धं तथाऽनुपलम्भादित्याशङ्क्यासिद्ध्या दूषयति * ब्रह्मण इति ॥ १६९ ॥ विद्वदनुभवसिद्धं ब्रह्मस्वभावमुक्त्वा ऽविद्वदनुभवसिद्धोऽविद्यास्वभाव इत्याह *अविद्याया इति ॥ १७० ॥ ब्रह्मणः स्वप्रकाशत्वेन सदा प्रकाश इति

अनुभूयत एवेह प्राकृतैरखिलैर्जनैः ॥ १७० ॥
अत एव न वैफल्यमविद्यायाश्चिदात्मनि ॥
अतिरोभूतसंवित्त्वादिकं तत्त्वविदां दृशा ॥ १७१ ॥
इत्थमात्मा स्वतोऽसङ्गोऽप्यविज्ञातो ऽनुभूतितः ॥
सिद्धोऽस्यार्थस्य दार्ढ्यार्थमनुभूतिः परीक्ष्यते ॥ १७२॥
ननु कैषाऽनुभूतिः स्याद्याऽविद्यायाः प्रसाधिका ॥
किं मानजन्या धीवृत्तिश्चिदात्मा वाऽथ वेतरः॥१७३॥
नाद्यो नामाद्यभिव्यक्तेः प्राग्धीवृत्तेरसम्भवात् ॥
ऊर्ध्वं च मानहेयत्वान्न मानेन प्रमीयते ॥ १७४ ॥
किञ्च मात्राद्युपादाने कथं मानं प्रवर्त्तते ॥
अव्याकृतैकदेशत्वाच्चाविद्यायां कुतो मितिः ॥१७५॥

व्यवहारसामग्र्यां सत्यां न प्रकाशत इति विपरीतव्यवहारदर्शनेन तद्योग्यत्वलक्षणावरणसिद्धौ फलितमाह *अत एवेति । यदुक्तं चित्सामान्ये तद्विशेषे वाऽऽवरणं न सम्भवतीति तत्राह *अतिरोभूतेति । संवित्सामान्यप्रतीतावप्यखण्डानन्दात्मत्वेनाप्रतीतेर्विद्वद्दृष्ट्या निःसामान्यविशेषस्याप्यज्ञदृष्टिकल्पितविशेषांशसम्भवात्तत्रावरणमुपपद्यत इति भावः॥१७१॥१७२॥अज्ञानसाधकानुभूतिं निर्णेतुं शङ्कामुत्थापयति *नन्विति ॥ १७३ ॥ आद्येऽपि नामरूपात्मनाऽभिव्यक्तेः पूर्वं धीवृत्तिरविद्यां साधयति ऊर्ध्वं वा ? नाद्यः, अव्याकृतस्यातीन्द्रियत्वेनाक्षमानाविषयत्वादित्याह *नामादीति ॥ द्वितीयं निराह *ऊर्ध्वमिति ॥ घटादिधियस्तदज्ञाननिवर्त्तकत्वदृष्टेरिति भावः ॥ १७४ ॥ धीवृत्तिमात्रस्याज्ञानासाधकत्वे युक्त्यन्तरमाह *किञ्चेति ॥ प्रमात्रादिविभागात्पूर्वं सुप्तौ प्रमितेरेवायोगादिति भावः । तत्रैव हेत्वन्तरमाह *अव्याकृतेति ॥ १७५ ॥ अव्याकृतैकदेशस्य मेयत्वे

अव्याकृतमविज्ञातं प्रमाणाविषयं विदुः ॥
प्रमाणानभिसम्बद्धं प्रमाणाच्चेति साहसम् ॥ १७६ ॥
प्रमात्रादिनिषेधेन यदव्याकृतमुच्यते ॥
तस्य मानाभिसम्बन्धो न बालेनापि शङ्क्यते ॥१७७॥
तद्धेदमित्यनेनापि वाक्येनाव्याकृतं नहि ॥
प्रमीयते, किन्तु तत्त्वबोधायैतदनूद्यते ॥ १७८ ॥
न द्वितीयश्चिदात्माऽयमविकारी न साधयेत् ॥
न तृतीयो बुद्धिचिद्भ्यां को वाऽन्योऽनुभवो भवेत्॥१७९॥
अत्रोच्यते चिदात्माऽयमविकार्यपि भासयेत् ॥
न विक्रियन्ते सूर्याद्या जगतोऽस्यावभासने ॥ १८० ॥
स्वरूपसत्तामात्रेण योऽन्यस्योपकरोत्यसौ ॥
न विक्रियत एवात्र प्रयत्नानुपयोगतः ॥ १८१ ॥

को दोषस्तत्राह *अव्याकृतमिति । तस्य व्याख्या *अविज्ञातमिति । प्रमाणाविषयत्वं साधयति *प्रमाणेति । प्रमित्युत्पत्तिनान्तरीयकतया नष्टस्याज्ञानस्य तत्सम्बन्धायोगादित्यर्थः । प्रमाणात्, ज्ञातमिति शेषः ॥ १७६ ॥ तस्मान्न मात्रादिविभागशून्यस्याव्याकृतस्य मानगम्यत्वशङ्केत्युपसंहरति *प्रमात्रादीति ॥ १७७ ॥ प्रमात्रादिविभागानन्तरमव्याकृतवाक्येन तत्सिद्धिमाशङ्क्य तस्य ऐक्यपरत्वान्नाज्ञानप्रमापकत्वमित्याह *तद्धेदमिति ॥१७८॥ अज्ञानसाधकः साक्षीति पक्षं प्रत्याह *न द्वितीय इति । उक्तज्ञानद्वयविलक्षणं ज्ञानान्तरं तत्साधकमिति पक्षं निराह *नेति ॥ १७९ ॥ मध्यमं पक्षमादाय समाधत्ते *अत्रेति ॥ निर्विकारस्यापि साक्षिणस्तद्भासकत्वं दृष्टान्तमुखेनोपपादयति *नेत्यादिना ॥ १८० ॥ १८१ ॥ अज्ञानं साक्षिणा

यथा प्रमाप्रमाभासरागादीनामशेषतः ॥
स्वार्थानन्यप्रमाणात्स्यात्प्रसिद्धिस्तमसस्तथा ॥ १८२॥
न मानानि स्वतो भान्ति जडत्वान्न परस्परम् ॥
भासयन्ति पृथक्कालवर्त्तित्वाद्भान्त्यतोऽन्यतः॥ १८३॥
संदेहमिथ्याज्ञानाख्यौ प्रमाभासौ न मानतः ॥
भातो माननिवर्त्त्यत्वादतोऽन्यद्भासकं तयोः ॥ १८४॥
धीवृत्तिरूपा रागाद्याः प्रमीयन्ते न मानतः ॥
वृत्तिद्वयस्य युगपदभावाद्भान्त्यतोऽन्यतः ॥ १८५ ॥
तच्चान्यत्स्वार्थमेव स्यान्नो चेन्मेयत्वमापतेत् ॥
मेयत्वे चानवस्था स्यादतः स्वार्थमनन्यगम् ॥ १८६॥
तमसो मानमेयत्वं दूषितं पूर्वपक्षिणा ॥
भाति चेत्तत्ततस्तस्मात्साक्षिणैव विभाति तत्॥१८७॥
तस्मादात्मानमाश्रित्य स्वतःसिद्धमनन्यगम् ॥

सिध्यतीत्यत्र दृष्टान्तमाह *यथेति *स्वार्थेति । स्वार्थं स्वतन्त्रम् अनन्याधीनसिद्धिकमिति यावत् । अनन्यत् प्रत्यग्रूपं यत् प्रमाणं साक्ष्याख्यं तस्मादित्यर्थः ॥ १८२ ॥ प्रमितीनां चिद्भास्यत्वं तावदुपपादयति । *नेति ॥ १८३ ॥ प्रमाऽऽभासयोस्तदुपपादयति *संदेहेति ॥ १८४ ॥ रागादेरपि तदाह *धीवृत्तीति ॥ १८५ ॥ ननु तेषां ज्ञानान्तरभास्यत्वेऽपि न साक्षिभास्यत्वसिद्धिस्तत्राह *तच्चेति ॥ स्वार्थं स्वप्रकाशम् । तत्र हेतुमाह *अनन्यगमिति । संविद्रूपमित्यर्थः ॥ १८६ ॥ एवं प्रमाणादिदृष्टान्तेन तमसः साक्षिवेद्यत्वमुक्त्वा परिशेषाच्च तदाह *तमस इति ॥१८७॥ यस्मात्साक्षिसिद्धं तमः तस्मात्कार्यमपि तेनैव सिध्यतीति प्रसङ्गादाह *तस्मादिति

भावाभावात्मकं विश्वं सर्वमेतत्प्रसिध्यति ॥ १८८॥
नहि संविदनारूढः प्रमात्रादिः प्रसिद्ध्यति ॥
संविन्मात्रैकयाथात्म्यात्प्रमात्रादेरनात्मनः ॥ १८९ ॥
प्रमात्रादिवियुक्तैषा संवित्कुत्रानुभूयते ॥
इति चेत्, सुप्तिकाले सा विस्पष्टमवभासते ॥१९०॥
प्रत्यक्षकुम्भवत्साक्षात्सुषुप्तेऽनन्यबोधनम् ॥
आत्मा ह्यात्मानमैकात्म्यादात्मना वेत्त्यकारकः॥१९१॥
न चावस्थान्तरेऽप्यात्मा न विविक्तोऽनुभूयते ॥
अज्ञानसंशयादीनां प्रबुद्धेनानवेक्षणात् ॥ १९२ ॥
प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ॥
नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते ॥ १९३ ॥
पराक्प्रवणया दृष्ट्या विमूढो मोहमात्मनि ॥

॥१८८॥ तदेव व्यतिरेकमुखेन व्यनक्ति *न हीति ॥ तत्र हेतुः *संविदिति ॥१८९॥ प्रमात्रादेः तत्र कल्पितत्वेन तन्मात्रत्वमुक्तमयुक्तं, तदधिष्ठानसाक्षिणस्तद्विविक्ततया कदाऽप्यप्रतीतेरिति शङ्कित्वा परिहरति *प्रमात्रादीति ॥ १९० ॥ उक्तमेव व्यनक्ति *प्रत्यक्षेति। अनन्यबोधनम् अधिष्ठानान्तरशून्यम् आत्मानं स्वापे आत्मना आत्मा साक्षाद्वेत्तीत्यन्वयः। कर्मकर्तृभावं व्यावर्त्तयति *अकारक इति। वस्तुतः कर्तृत्वादिशून्य इत्यर्थः। तत्र हेतुः *ऐकात्म्यादिति।सुप्तौ स्वमहिमस्थः स्वयमेव प्रथत इति भावः॥१९१॥ किं चात्मा विदुषां सदा विविक्त एव भातीत्याह *न चेति। तत्रात्मास्फुरणसंशयविपर्ययाभावं हेतुमाह *अज्ञानेति ॥१९२॥ एतदेव प्रपञ्चयति *प्रत्यगित्यादिना॥१९३॥१९४॥ननु विद्वद्दृष्ट्याऽपि सुप्तावज्ञानमस्ति, अन्यथा उत्थितस्य तस्य नावेदिषमि-

खकार्ष्ण्यवत्कल्पयतु विद्वद्दृष्टेः किमागतम् ॥१९४॥
विदुषोऽविदुषश्चापि सुप्तावज्ञानमात्मनि ॥
अस्त्युत्थाने परामर्शादिति चेत, नैतदिष्यते ॥१९५॥
न सुषुप्तगमोहस्य नाज्ञासिषमिति स्मृतिः ॥
अनतीतात्मगत्वेन मोहेऽस्मिन्स्मृत्यसम्भवात् ॥१९६॥
न भूतकालस्पृक् प्रत्यङ् न चागामिस्पृगिष्यते ॥
अन्यथा वर्त्तमानेऽस्मिन्काले प्रत्यङ् न सम्भवेत् ॥१९७॥
क्वापि प्रत्यक्षविज्ञानान्नात्मतत्त्वं समीक्ष्यते ॥
नानुमानादयः सन्ति मिथ्याज्ञानमतो भवेत् ॥१९८॥

ति परामर्शो न स्यादिति शङ्कते *विदुष इति । दृष्टान्तार्थमविदुष इत्युक्तम् । नायं परामर्शः सुप्तिकालाज्ञानसाधक इति परिहरति *नैतदिति ॥ १९५ ॥ नेयं सुप्तिकालीनमोहगोचरस्मृतिरित्यत्र हेतुमाह *अनतीति । आत्मनः कालव्यवधानाभावेन तद्गताज्ञानस्यापि व्यवधानाभावान्न स्मृतिविषयत्वमिति भावः ॥१९६॥ विद्वद्दृष्ट्या प्रत्यक्तत्त्वस्य कालव्यवधानं नेत्युक्तमेव प्रपञ्चयति *न भूतेति । *अन्यथेति । विदुषोऽपि मूढवद् ब्रह्म न प्रकाशत इति प्रतीतिः स्यादिति भावः ॥१९७॥ नावेदिषमित्यस्य स्मृतित्वाभावेऽपि सुप्तिकालीनाज्ञानसाधकत्वमाशङ्क्य,किं तत्प्रत्यक्षमुत परोक्षं? नाद्यः, तस्य वर्त्तमानमात्रग्राहित्वादित्याह *क्वेति। द्वितीयं निराह *नेति। अतीतत्वस्याश्वशृङ्गवदसत्त्वेन साधनसामानाधिकरण्याद्ययोगान्न मानगम्यतेति भावः । का तर्हि नाज्ञासिषमिति व्यवहारस्य गतिस्तत्राह *मिथ्येति । यतोऽज्ञानं पूर्वकालश्च न स्तोऽतो नाज्ञासिषमिति तद्गोचरज्ञानं मिथ्याविकल्परूपमित्यर्थः । तदुक्तमभियुक्तैः- "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"इति ॥ १९८ ॥ विदु-

तस्मात् तिसृष्ववस्थासु कालभ्रमवतीष्वतः ॥
अविलुप्तस्वप्रकाशं दृगात्मानं सदेक्षते ॥ १९९ ॥
यथा कालभिदां प्रत्यक्कटाक्षेणापि नेक्षते ॥
एवं देशविभेदोऽपि न प्रतीच्युपपद्यते ॥ २०० ॥
देशभ्रमयुताः सर्वे देहाद्याः पारतन्त्र्यतः ॥
स्वतन्त्रं प्रत्यगात्मानं देशत्वेन समाश्रिताः ॥ २०१ ॥
यत्तत्त्वगं स्याद्यद्वस्तु न तत्तदतिवर्तते ॥
नाज्ञातरज्जुजः सर्पो रज्जुमुल्लङ्घ्य वर्त्तते ॥ २०२ ॥
तस्मान्नानाशरीरेषु ह्यन्योन्यव्यभिचारिषु ॥
प्रत्यक्चैतन्यमेवैकं सर्वत्राव्यभिचारवत् ॥ २०३ ॥
सर्वधीविक्रियासाक्षिण्येवं सिद्धे स्वतो दृशौ ॥
कार्यं येऽनुभवं प्राहुस्ते वार्याः श्रुतियुक्तिभिः ॥२०४॥
न जायतेऽज इत्यादि विज्ञानघन इत्यपि ॥

षां परपरिकल्पितावस्थात्रयेऽप्यात्मस्फुरणमुक्तं निगमयति *तस्मादिति ॥ १९९ ॥ कालपरिच्छेदाभाववदात्मनो देशपरिच्छेदाभावमप्याह *यथेति ॥ २०० ॥ कथं तर्ह्यात्मनि परिच्छेदव्यवहार इत्याशङ्क्याह *देशभ्रमयुता इति । परिच्छिन्नधीविषया इत्यर्थः । तथाचात्मनि देहाद्युपाधिकृतः परिच्छेद इति भावः ॥२०१॥ प्रतीचो देहाद्याश्रयत्वे सद्वितीयत्वमाशङ्क्याह *यदिति । कल्पितस्याधिष्ठानापरिच्छेदकत्वे दृष्टान्तमाह *नेति ॥२०२॥ साक्षिणो विश्वभासकत्वमुपसंहरति *तस्मादिति॥२०३॥ एवं कालाद्यपरिच्छिन्नस्याद्वितीयत्वेन नित्यत्वे सिद्धेऽप्यहङ्कारभासकचैतन्यस्यानित्यत्वं केचिदाहुः, तन्मतं श्रुतिविरुद्धत्वादुक्तवक्ष्यमाणयुक्तिविरुद्धत्वाच्चानादेयमिति आह *सर्वधीति॥२०४॥

कृत्स्नपुंविक्रियोत्सारि वाक्यं कस्मादुपेक्ष्यते ॥ २०५ ॥
प्रमात्राद्युत्थितेः पूर्वं कारकं दुर्लभं चितः ॥
कारकव्यापृतिस्तत्र निपुणेनापि नेक्ष्यते ॥ २०६ ॥
भवताऽप्यभ्युपेतव्यमेतच्च स्वानुभूतितः ॥
तस्मादजायमाना चिज्जायमानेव लक्ष्यते ॥ २०७ ॥
प्रमेये च क्रियायां च प्रमाणेऽद्य प्रमातरि ॥
सम्बन्धात्तदुपाधित्वाज्जायमानेव चिद्भवेत् ॥ २०८ ॥
तद्विनाशेऽपि साक्षित्वाद्विनश्यन्तीव लक्ष्यते ॥
यतोऽतः कार्यतां तस्या नेश्वरोऽपि प्रसाधयेत् ॥२०९॥
कार्यत्वे प्रागभावोऽस्या वक्तव्यः स न युज्यते ॥
अशेषाभावसाक्षित्वात्प्रागभावो न संविदः ॥२१०॥
तस्याश्चेत्प्रागभावः स्यात्सिद्ध्येन्निःसाधकः कथम् ॥
प्रध्वंसासम्भवोऽप्येवं तस्मान्नित्यैव चिद्भवेत् ॥२११॥
स्वात्मसाक्षिकतां मुक्त्वा भावाभावाख्यवस्तुनः ॥

श्रुतिमुदाहरति *न जायत इति ॥ २०५ ॥ युक्तिमप्याह *प्रमात्रादीति ॥ २०६ ॥ वादिभिरप्यनुभवानुसारिभिः सुप्तौ प्रमात्राद्यभावः स्वीकार्य इत्याह *भवतेति । तर्हि ज्ञानमुत्पन्नमित्यादिव्यवहारः कथमित्याशङ्क्य उपाध्युत्पत्त्या तदुपहिताचितोऽप्युत्पन्नत्वमुपचारादित्याह *तस्मादिति ॥२०७॥ उक्तमेव व्यनक्ति *प्रमेय इति । क्रिया मानमेयसन्निकर्षः । अद्य जायमानेत्यन्वयः। सत्यां सामग्र्यां वृत्तिरूपज्ञानोत्पत्तौ तदवच्छिन्नचितोऽप्युत्पन्नत्वप्रतीतिरुपपद्यत इति भावः ॥ २०८ ॥ अतएव स्वतश्चैतन्यनाशो नेत्याह *तदिति ॥ २०९ ॥ चितो नित्यत्वे युक्त्यन्तरमाह *कार्यत्व इत्यादिना ॥२१०॥२११॥ जन्माद्यभा-

यतोऽसिद्धिरतः प्रत्यङ्ङिरस्ताखिलविक्रियः ॥ २१२ ॥
याऽविद्यायाः साधिका स्यात्साऽनुभूतिः परीक्षिता ॥
याऽनुभूत्या साध्यमाना साऽविद्याऽथ परीक्ष्यते॥२१३॥
नन्वविद्या स्वतो बुद्धे न कथंचन सम्भवेत् ॥
विरोधादविरोधे तु केन सैषा निवर्त्यते ॥ २१४ ॥
न तन्निवर्त्तकं मानं तत्कार्यत्वाद्घटादिवत् ॥
चिद्योगान्नाशकं तच्चेच्चिदेवास्तु निवर्त्तिका ॥ २१५ ॥
असम्भवे त्वविद्यायास्तत्कार्या संसृतिः कुतः ॥
तदभावे मेयचिन्ता काकदन्तपरीक्षणम् ॥ २१६ ॥
उच्यते किं तमस्व्येवं चोदयेदुत तत्त्ववित् ॥
नाद्यो मूढस्य चोद्यार्थ ईदृग्व्युत्पत्त्यसम्भवात् ॥२१७॥
स्वतो बुधे कुतो ऽविद्या तामृते संसृतिः कुतः ॥
इति बुद्धात्मतत्त्वस्य गीरियं न तमस्विनः ॥२१८॥
अयुक्तोपालम्भनं स्यात्तत्त्वज्ञस्यात्र चोदने ॥
न तं प्रति वयं तत्त्वपरीक्षामारभामहे ॥ २१९ ॥

वादेवात्मानुभवस्य विकारान्तराणि न सन्तीत्याह *स्वात्मेति। सर्वविक्रियासाक्षिणो न काऽपि विक्रियेत्यर्थः ॥ २१२ ॥ या ऽविद्याया इति। अविद्याभासकसाक्षी निरूपितः,इदानीं तद्भास्या ऽविद्या विचार्यत इत्यर्थः ॥ २१३ ॥ तत्र पूर्वपक्षमुत्थापयति *नन्वित्यादिना । स्वतो बुद्धे स्वप्रकाशे । *चिदेवेति । वृत्तेः जडत्वेन सहकारित्वेनाप्यानिवर्त्तकत्वादिति भावः॥२१४॥२१५॥ ॥२१६॥ विकल्पासहत्वान्नेदं चोद्यं शोभत इति परिहरति *उ-च्यत इति । तमस्वी आत्मतत्त्वानभिज्ञः ॥२१७॥२१८॥ अस्तु तर्हि तत्त्वविद एवेदं चोद्यं तत्राह *अयुक्तेत्यादिना ॥२१९॥

तमस्विनं प्रति त्वेषा परीक्षा, तस्य दृष्टितः ॥
स्वप्रकाशाद्यप्रसिद्धं तमसा तदपह्नुतेः ॥ २२० ॥
यथोच्छिन्नात्ममोहोऽयं गुर्वादीनपि निह्नुते ॥
तथा तमस्वी बोधात्प्रागैकात्म्यमपि निह्नुते ॥२२१॥
काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः ॥
या निशा सर्वभूतानामित्यवोचत्स्वयं हरिः ॥ २२२ ॥
सत्येव तत्त्वे व्युत्पत्तेः प्राङ्मोहादीक्ष्यते यतः ॥
तस्मान्न वस्तुनस्तत्त्वं तद्ध्वान्ताद्यपनोदकृत् ॥२२३॥

न चात्मनः स्वप्रकाशत्वादज्ञस्यापीदं चोद्यमुपपन्नं तत्राह *तस्येति ॥२२०॥२२१॥ विद्वद्दृष्ट्या गुर्वादेः, अविद्वद्दृष्ट्याऽत्मतत्त्वस्यासत्त्वमित्यत्र दृष्टान्तमाह *काकेति । काकादीनां प्रसिद्धा निशा तस्यामुलूको जागर्ति, तद्दृष्ट्या साऽपलप्यते, यदा काकादयो जाग्रति तदा नक्तंदर्शां निशेति काकादिदृष्ट्या साऽपह्नूयते यथा,एवमज्ञदृष्ट्याऽत्मतत्त्वस्य विद्वद्दृष्ट्या संसारस्यासत्त्वमित्यर्थः । तत्र भगवद्वाक्यं प्रमाणयति *या निशेति । या ब्रह्मावस्था सर्वप्राणिनां निशाऽसत्कल्पा स्यात् तस्यां विद्वान् जागर्ति, यस्यामविद्यावस्थायां सर्वप्राणिनो जाग्रति सा निवृत्ताविद्यस्यासत्कल्पेति दृष्टिभेदेन सत्त्वादिविभागं भगवानप्याहेत्यर्थः ॥ २२२ ॥ यद्यपि वस्तुयाथात्म्यमज्ञस्य न स्फुरति तथापि स्वप्रकाशे चेदविद्या तर्हि निवर्त्तकाभावात्सा न निवर्तेतेत्यादि तेनापि शङ्कितुं शक्यत एवेति तत्परिहारो वाच्य इत्याशङ्क्य स्वरूपज्ञानस्य निवर्त्तकत्वमङ्गीकरोति *सत्येवेति । व्युत्पत्तिः प्रमाणज्ञानम् । मोहादित्यादिना प्रमातृत्वादिग्रहः ॥ २२३ ॥

प्रमाणमूढतां लब्ध्वा हन्त्यविद्याद्यशेषतः ॥
ब्रह्मविद्भिरतो यत्नात्प्रमाणमिह संश्रितम् ॥ २२४ ॥
तृणादेर्भासिकाऽप्येषा सूर्यदीप्तिस्तृणं दहेत् ॥
सूर्यकान्तमुपारुह्य तन्न्यायं चिति योजयेत् ॥२२५॥
नैतावता प्रमाणस्य प्राधान्यमिह शङ्क्यते ॥
विषयस्य महिम्नैव प्रमाणानां प्रमाणता ॥ २२६ ॥
अबाधितात्मयाथात्म्यसमुल्लेखनसंश्रयात् ॥
तन्मानमत्र मानत्वं लभते न तु केवलम् ॥ २२७ ॥
चिन्मात्रमेव याथात्म्यं प्रत्यगात्मत्वकारणात् ॥

केवलचितेरबोधाद्यनिवर्त्तकत्वेऽपि बुद्ध्याद्युपारूढायास्तस्यास्तन्निवर्तकत्वमाह *प्रमाणेति ॥ प्रमाणजन्यस्याज्ञानध्वंसित्वादेव वेदान्तानां ब्रह्मणि प्रामाण्यं सूत्रकारादिभिरादृतमित्याह *ब्रह्मविद्भिरिति ॥ २२४ ॥ अज्ञानसाधकमपि चैतन्यं वृत्त्युपारूढं सत्तन्निवर्तयतीत्याह *तृणादेरिति ॥२२५॥ यदुक्तं वृत्तेर्जडत्वेन घटादिवदज्ञानादाहकत्वमिति । तत्र वक्तव्यं किं वृत्तेः प्राधान्येन तद्दाहकत्वमुत सहकारित्वेनापि ? नान्त्यः, सूर्यकान्तादिवज्जडस्यापि तत्सम्भवादित्यभिप्रेत्याद्यमङ्गीकरोति *नेति ॥२२६॥ उक्तमेव स्फुटयति *अबाधितेति । आत्मयाथात्म्यसमुल्लेखनं तदाकारभजनम् । तदाश्रयात् आत्मप्रतिबिम्बग्रहणादिति यावत् । तन्मानं वाक्यजन्यज्ञानम् अत्र व्यवहारभूमौ अज्ञानध्वंसित्वात् मानत्वं लभते, न केवलं जडरूपेणेत्यर्थः ॥२२७॥ ननु घटादिज्ञानवदात्मज्ञानस्यापि मात्रादिहेतुकत्वात्कथं चिन्मात्राकारत्वं तत्राह *चिदिति । घटादिषु ज्ञानोत्पत्तिकालवत्कालान्तरेऽपि मात्रादिभेदोऽस्ति, प्रतीचि तु ज्ञानोदयकाले सन्नपि तज्जन्मनान्तरीयकत्वेन बाधितस्य प्रमात्रादिजगन्मात्रस्य

पराक्षिवव न भेदोऽस्ति मात्रादेः प्रत्यगात्मनि॥२२८॥
कूटस्थोऽपि स्वतः प्रत्यक्पराग्व्यवहृतावयम् ॥
स्वाचिदाभासवन्मोहयोगादाप्नोति मातृताम् ॥२२९॥
चिन्मात्रस्यैव वस्तुत्वेऽप्यनाद्यज्ञानमात्मनि ॥
प्रथते स्वात्मचैतन्यात्स्वरूपेणाविरोधतः ॥ २३० ॥
कार्यकारणरूपाभ्यामतथाविधतात्त्विका ॥
आत्माविद्यैव सर्वत्र प्रथते स्वात्मसाक्षिका ॥२३१॥
मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ॥
इति श्रीमत्सुरेशस्य वाक्यमेवं समञ्जसम् ॥ २३२ ॥
अविद्या वाऽथ तत्कार्यं न भेदान्नाप्यभेदतः ॥
निरूप्यते यतोऽतः स्यादविचारितसिद्धिकम् ॥२३३॥
स्वमहिम्ना न संसिद्ध्येज्जडत्वान्नात्मनः पृथक् ॥

प्रत्यग्रूपेणावसानादुत्तरक्षणे स नास्तीति भावः ॥ २२८ ॥ नन्वेवमपि प्रतीचः प्रमाकर्तृत्वेन कौटस्थ्यहानिस्तत्राह *कूटस्थ इति । स्वकीयचिदाभाससहितमोहद्वारा कर्तुर्न तात्त्विककौटस्थ्यहानिरिति भावः ॥ २२९ ॥ साक्षिभास्यत्वेन साधितमज्ञानं निगमयति *चिदिति ॥ २३० ॥ उक्ताविद्यैवानिर्वचनीया कार्याकारेणापि वर्त्तत इत्याह *कार्येति ॥ इत्थम्भावे तृतीया। *अतथाविधेति । आत्मवन्न सत्या किं त्वनिर्वचनीयेत्यर्थः । तथाचाविद्यकसंसारनिवृत्त्यर्थं मेयचिन्ता सफलेति भावः ॥ २३१ ॥ जगतो मायाकार्यत्वे भगवद्वाक्यं प्रमाणयति *मयेति॥२३२॥अविद्यातत्कार्ययोरनिर्वचनीयत्वं युक्तितोऽप्याह *अविद्येति ॥२३३॥ उक्तमेव स्फुटयति *स्वेत्यादिना । अतो

अत एव जडत्वान्न चिद्भेदं समर्हति ॥ २३४ ॥
जडस्वभावान्नैवान्यद्रूपं कार्येषु गम्यते ॥
तमश्च चिद्विभातत्वान्न जाड्यमतिवर्त्तते ॥ २३५ ॥
यथा नीलोत्पलाभं खं द्विरेफोदरवत्तमः ॥
अविचारितसिद्ध्यैवं तमस्तज्जं च वीक्ष्यताम् ॥ २३६ ॥
स्वानुभूत्या भासितत्वान्नाविद्या खरशृङ्गवत् ॥
विचारबाधितत्वेन नाप्यविद्या चिदात्मवत् ॥२३७॥
अनुभूतावविद्याया विवादो नैव कस्यचित् ॥
न वेद्मीति व्यवहृतेराऽङ्गनाबालपण्डितम् ॥ २३८ ॥
प्रमात्रादिविविक्तार्थमनुभूयोत्थितस्ततः ॥
नावेदिषमिति प्राह स्वानुभूत्यनुसारतः ॥ २३९ ॥
प्रमात्राद्युत्थितेः पूर्वं चिदन्यानन्वयात्तमः ॥
चैतन्येनैव तद्भास्यं नतु मानेन केनचित् ॥ २४० ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ॥

नात्मनः इत्यन्वयः ॥ २३४ ॥ २३५ ॥ द्वैतस्य कल्पितत्वे दृष्टान्तमाह *यथेति । “ आलोकाभावस्तमः ” इति मते निदर्शनान्तरमाह *द्विरेफेति । नीरूपयोराकाशतमसोर्यथा नैल्यं कल्पितम् एवमविद्यातत्कार्यमपीत्यर्थः ॥ २३६ ॥ अविद्यायाः सदसद्विलक्षणत्वमेव प्रपञ्चयति *स्वानुभूत्येत्यादिना ॥२३७॥२३८॥२३९॥ मानागोचरत्वादप्यविद्याऽनिर्वाच्येत्याह *प्रमात्रादिति । स्वापादौ चिद्व्यतिरिक्तवस्त्वभावेन तमसस्तेन सम्बन्धाभावादित्यर्थः ॥ २४० ॥ अज्ञानस्य मानागम्यत्वं तद्गमकमनुवचनविरुद्धमित्याशङ्क्याह *आसीदिति । प्रागवस्थस्य जगतोऽप्रत्यक्षत्वमाह * अप्रज्ञातमिति । अनु-

इति स्मृत्या न तन्मेयमनुभूतं त्वनूद्यते ॥ २४१ ॥
सुप्तिस्मृतिर्यथाऽस्माकमनायासेन सिद्ध्यति ॥
अनायासात्तथा सिद्ध्येन्मन्वादेः प्रलयस्मृतिः॥२४२॥
न मानात्सिद्ध्यतो लोके ज्ञातताऽज्ञातते अपि ॥
मूलाविद्या न प्रमेयेत्येवं वक्तव्यमत्र किम् ॥ २४३ ॥
अज्ञातत्वं न मानेभ्यो ज्ञातत्वं तत्कृतं यतः ॥
तैरप्यज्ञातता चेत्स्यात्काऽतिशीतिर्मितेर्भवेत्॥२४४॥
ज्ञातत्वमपि मानेन क्रियते नतु मीयते ॥
ज्ञातत्वं मानतः पूर्वमसत्तन्मीयते कथम् ॥ २४५ ॥
ज्ञातोऽयमर्थो ऽज्ञातो वेत्येतत्साक्ष्यवभासयेत् ॥
ज्ञानाज्ञाने अपि तथा भास्येते साक्षिणैव हि ॥२४६॥

मानाद्यविषयत्वमाह * अलक्षणमिति ॥ २४१ ॥ ननु प्रलयकालस्य स्मृत्यगोचरत्वात्तत्कालेऽनुभूतमज्ञानं कथमनूद्यते इति तत्राह * सुप्तीति । ईश्वरप्रसादादिति शेषः ॥ २४२ ॥ किंचाविद्याद्वारा साक्षिण्यध्यस्ते ज्ञातत्वाज्ञातत्वे साक्षिमात्रभास्ये किमु वक्तव्यं साक्षाच्चिदध्यस्ताविद्यायाश्चिन्मात्रभास्यत्वमित्याह *नेति ॥ २४३ ॥ अज्ञातत्वस्य मानापेक्षा कुतो नास्तीत्याशङ्क्य, किं तदुत्पत्तौ मानमपेक्षते ज्ञप्तौ वा ? नाद्यः इत्याह *अज्ञातत्वमिति । न मानेभ्यो, भवतीति शेषः । विपक्षे दोषमाह *तैरिति ॥ किं मानैरज्ञाततामात्रं क्रियते किंवा ज्ञातताऽपि । आद्ये मानवैफल्यं, प्रागेव तत्सिद्धेः। द्वितीये त्वज्ञातत्वस्य ज्ञातत्वाव्यतिरेकः स्यात् मानकार्यत्वात्, तद्वदित्यर्थः ॥ २४४ ॥ अस्तु तर्हि ज्ञातत्ववदज्ञातत्वस्यापि ज्ञप्तौ मानापेक्षेत्याशङ्क्य दृष्टान्तासिद्ध्या दूषयति *ज्ञातत्वमिति॥२४५॥२४६॥ ज्ञातत्वादीनां

प्रथते यः स्वयं साक्षादज्ञातत्वादिभूमिषु ॥
अप्रमेयं स्वयञ्ज्योतिः प्राक् प्रसिद्धेः प्रमाणतः॥२४७॥
स्वयम्प्रकाशतत्त्वोऽपि स्वाविद्याया: प्रमाणतः ॥
अनिवृत्तेरविज्ञातः स प्रमाणमपेक्षते ॥ २४८ ॥
असाधारणमज्ञानं प्रतीच्येव यतः स्थितम् ॥
ततोऽयमेवाज्ञातत्वान्मानमेयो न चेतरः ॥ २४९ ॥
अज्ञानकार्यमखिलं न तस्याज्ञातता भवेत् ॥
न खड्गधारा खड्गेन प्रहृता कुत्रचिद्भवेत् ॥ २५० ॥
अज्ञात आत्मा यः पूर्वं सङ्ग्रहेणोपपादितः ॥
चिदाविद्यापरीक्षाभ्यां स एवेत्थं प्रपञ्चितः ॥ २५१ ॥

साक्षिमात्रभास्यत्वे मानानां विषयाभावादमानतेत्याशङ्क्य अज्ञातत्वोपलक्षितप्रतीचो विषयभानान्मैवमित्याह *प्रथत इति । स्वयं प्रथमानत्वे प्रत्यक्षसंविद्रूपत्वं हेतुमाह *साक्षादिति । कथमस्य मुक्त्यालम्बनस्याध्यक्षादिविषयत्वं ? तत्राह *अज्ञातत्वादीति । आदिना संदिग्धत्वादिग्रहः । उक्तं स्वप्रकाशत्वमनूद्य तत्र हेत्वन्तरमाह *स्वयञ्ज्योतिरिति । *प्रागिति ॥ मात्रादिविभागात्पूर्वमात्मनः स्वापादौ प्रथनादपि स्वप्रकाशत्वसिद्धिः ॥ २४७ ॥ ननु स्वप्रकाशस्य कथं मानापेक्षा ? तत्राह *स्वयमिति ॥ प्रमाणत इत्यत्र प्रागित्यनुषज्यते । स्वाविद्यायाः अनिवृत्तेरिति सम्बन्धः ॥ २४८ ॥ आत्मन एव सर्वमानमेयत्वमुक्तमुपसंहरति *असाधारणमिति ॥ २४९ ॥ आत्मन एव मेयत्वासिद्ध्यर्थं जडेषु अज्ञातत्वाभावं साधयति*अज्ञानेति॥२५०॥ मेयपरीक्षायामेवास्य कथितत्वात् पौनरुक्त्यमित्याशङ्क्य पूर्वोक्तार्थस्य युक्त्यन्तरेणात्र पुनः साधनान्न पुनरुक्तिदोष इत्याह *अज्ञात इति ॥२५१॥ वृत्तानुद्रवणपुरःसरमुत्तरग्रन्थतात्पर्यमाह *अज्ञान

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः। (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम्। महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः। पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः। (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम्। महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम्। १३

(२०) ब्रह्मसूत्रभाष्यम्। श्रीभास्कराचार्यविरचितं असम्पूर्णम् (वेदान्तः) २

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम्। आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम्। (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः। अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्याः व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः। बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः। मणिभद्रकृतटीकया सहितः। हरिभद्रसूरिकृतः। १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः। प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका। १३

(३०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः। सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा। श्रीभगवत्पुरुषोत्तमाचार्यकृता। २

(३४) प्रस्थानरत्नाकरः। गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम्। १

(३६) योगदर्शनम्। परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम्। २

(३७) वेदान्तदर्शनम्। परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम्। ४

(३८) विश्वप्रकाशः। कोशः। विद्वद्वरश्रीमहेश्वरसूरिविरचितः। २

(३९) श्रीसुबोधिनी। श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता। २

(४०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः। ४

(४१) वेदान्तसिद्धान्तसंग्रहः। श्रुतिसिद्धान्तापरनामकः। श्रीब्रह्मचारिवनमालिमिश्रविरचितः वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः। श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः। स्वकृतटीकाविभूषितश्च। १

(४३) याज्ञवल्क्यस्मृतिः। बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता। व्यवहाराध्यायः १०

(४४) गादाधरी। श्रीगदाधरभट्टाचार्यचक्रव-

र्तिकृता । श्रीगङ्गेशोपाध्यायविरचित-तत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता। २

(४५) शास्त्रदीपिका। श्रीपार्थसारथिमिश्र प्रणीता। रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्ययातथासोमनाथकृतया मयुखमालिकया च व्याख्यया समलङ्कृता ! ३

(४६) वैयाकरणसिद्धान्तमञ्जूषा । श्रीमदुपाध्यायोपनामक श्रीनागेशभट्टविरचिता। श्रीमद्दुर्बलाचार्यविरचितकुञ्जिकाटीका-श्रीमद्बालम्भट्टविरचितकलाटीका-इति टीकाद्वयसंवलिता । ... २

(४७) व्याकरणासिद्धान्तसुधानिधीः। पर्वतीय विश्वेश्वरसूरिविराचितः। ३

(४८) वीरमीत्रोदयः। लक्षणप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ४

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः। महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकयासमलंकृतः। ३

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी।

April 1915.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 208.

बृहदारण्यकवार्तिकसारः

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SASTRI VAJHE.

FASCICULUS IV-४.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT BOOK-DEPOT. BENARES.

AGENTS:-

OTTO HARRASSOWITZ, LEIPZIG

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२०८

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया-व्याख्यया सहितम् । सम्पूर्णम् । १?
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता संपूर्णा (मीमांसा) ... २
(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्-विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री६श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् वेदान्तः १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः । सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) ... २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

अज्ञानावृतचैतन्यं प्रमेयमिति साधितम् ॥
परवादिप्रमेयं यत् तदिदानीं निरूप्यते ॥ २५२ ॥
अविज्ञातार्थगन्तॄणि प्रमाणानीति वादिनाम् ॥
सर्वेषां सम्मतिस्तत्र प्रमेयोऽर्थो विचार्यते ॥ २५३ ॥
ज्ञातोऽयमर्थोऽज्ञातो वा ज्ञाताज्ञातात्मकोऽथवा ॥
यदि वानुभयात्माऽयं चतुर्द्धाऽपि न युज्यते ॥२५४॥
आद्ये ज्ञातत्वमर्थस्य न तावद्ब्रह्मसंविदः ॥
अनभ्युपगमान्नापि प्रमाणाद्बकबन्धतः ॥ २५५ ॥
ज्ञातत्वमादौ सम्पाद्य ज्ञातमर्थं प्रमापयत् ॥
मानं न बकबन्धस्य प्रयासमतिवर्त्तते ॥ २५६ ॥
स्वत एव प्रमेयोऽर्थो यदि ज्ञातस्तथापि च ॥
अनन्यायत्तसंसिद्धेर्मेयत्वं किन्निबन्धनम् ॥ २५७ ॥
नहि दीपान्तराद्दीपो भारूपत्वं प्रपद्यते ॥
तद्वत्स्वतो ज्ञातघटो मानेन नहि मीयते ॥ २५८ ॥

इति ॥ २५२ ॥ परपक्षे सर्वव्यवहारासिद्धिरिति वक्तुमनेकमतसिद्धमर्थमाह *अविज्ञातेति ॥२५३॥ विचारं दर्शयति *ज्ञात इति । अयं साङ्ख्यस्य पक्षे, अज्ञात इति वैशेषिकादेः, तृतीयस्तु योगाचारस्य, सम्भावनोपनीतश्चतुर्थः कल्प इति द्रष्टव्यम् ॥२५४॥ ज्ञातार्थो मेय इत्यत्राप्यर्थगतं ज्ञातत्वं किं ब्रह्मचैतन्येन निष्पन्नम् उत मानमेव स्वप्रवृत्त्यर्थं पूर्वं तत्र ज्ञातत्वं सम्पादयति अथ वा स्वतःसिद्धम् । नाद्यः, इत्याह *आद्य इति । न द्वितीय इत्याह *नापीति । बकबन्धन्यायापातादित्यर्थः ॥ २५५ ॥ तमेव स्पष्टयति *ज्ञातत्वमिति ॥ २५६ ॥ तृतीयं दूषयति *स्वत इत्यादिना ॥२५७॥॥२५८॥ वैशेषिकादिमतमनूद्य विकल्प्य दूषयति

अथाज्ञातो घटाद्यर्थस्तदाप्यज्ञातता कुतः
स्वतो वा परतो वा स्यात् स्वतश्चेद्बाध्यते कथम्॥२५९॥
नहि मृन्मयता बाध्या घटस्याज्ञातता तथा ॥
किंचाज्ञाते कल्पितं स्याज्ज्ञातत्वं रज्जुसर्पवत्॥२६०॥
नच यद्वास्तवं रूपं तदध्यासेन बाध्यते ॥
रज्जुसर्पधिया लोके न रज्जुरिति धीह्नुतिः॥२६१॥
परतोऽपि कुतो न्वेतदज्ञातत्वं घटे भवेत् ॥
अनिर्वाच्याज्ञानतो वा ज्ञानाभावादुतेर्यताम्॥२६२॥
आद्ये तवापसिद्धान्तो द्वितीये कूर्मलोमवत् ॥
अज्ञातत्वं प्रसज्येत न ह्यभावात्सतो जनिः ॥२६३॥
यदाऽत्यन्ताभावरूपमज्ञातत्वं तदा तव ॥
स्वतः सर्वज्ञतैव स्यान्न वस्त्वज्ञातमस्ति हि ॥२६४॥
साधकाभावतश्चेद्दृगज्ञातत्वं न सिध्यति ॥
नच मानात्प्रसिद्धिः स्यात्कूर्मलोमादिवस्तुनः॥२६५॥
ज्ञाताज्ञातोभयात्मत्वं पर्यायेणैकदाऽथवा ॥
पर्यायेऽनुगतं वस्तु न तयोर्वस्तुरूपता ॥ २६६ ॥

---

*अथेति ॥ २५९ ॥ स्वाभाविकस्याबाध्यत्वे दृष्टान्तमाह *नहीति । अज्ञाततायाः स्वाभाविकत्वे तद्विरुद्धज्ञाततायास्तत्रारोपो वाच्यः, तथा चारोपितज्ञातत्वेन तन्निवृत्तिरेव न स्यादिति दूषणान्तरमाह *किञ्चेत्यादिना ॥२६०॥२६१॥ द्वितीयं विकल्प्य दूषयति *परत इत्यादिना ॥ २६२ ॥ २६३ ॥ अस्तु तर्हि अज्ञातत्वमप्यसदेवेति तत्राह *यदेति । अभावशब्दोऽसद्वचनः ॥ २६४ ॥ अज्ञातत्वमसादिति पक्षे दोषान्तरमाह *साधकेति ॥ २६५ ॥ योगाचारमतं विकल्प्य दूषयंति *ज्ञाताज्ञातेति ॥ २६६ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *नेति ।

न देवदत्तस्यात्मानौ क्रमभाविगमागमौ ॥
ज्ञातताऽज्ञातते तद्वद्व्रजतो न घटात्मताम् ॥ २६७ ॥
शीतोष्णवद्विरुद्धत्वाद्यौगपद्यं न युज्यते ॥
नापि चानुभयात्मत्वं विविक्तस्यानुदाहृतेः ॥ २६८ ॥
ज्ञातताऽज्ञाततेत्युक्त्वा घटमात्रं त्वया क्व वा ॥
उदाह्रियेतावगत एव स्यात्तदुदाहृतौ ॥ २६९ ॥
ज्ञातताऽज्ञातते यस्य स तयोरनुगच्छति ॥
व्यावृत्ताभ्यां विभिन्नोऽयमिति चेत्तत्र का प्रमा॥२७०॥
सर्वावभासकः साक्षी त्वया वेदविरोधिना ॥
उपेक्षितोऽन्यः को नाम तत्सर्वं तव भासयेत्॥२७१॥
चतुर्विधविकल्पानामभावेऽप्यानिरूपितः ॥
यद्यज्ञातस्तदाऽवश्यं भवेन्मे मतमेव ते ॥ २७२ ॥

यथा पर्यायेणोत्पन्नयोर्गमनागमनयोर्देवदत्तशरीरमनुस्यूतं भवति न तु क्रियाया देहस्वरूपत्वम्, एवं ज्ञातत्वाज्ञातत्वयोः पर्यायेऽङ्गीक्रियमाणे धर्मिणस्तयोरनुस्यूतिरेव स्यान्न पुनस्तयोर्धर्मिरूपत्वमित्यर्थः ॥ २६७ ॥ एकदेति पक्षं दूषयति *शीतेति । चतुर्थकल्पं निराह *नापीत्यादिना ॥२६८॥ *अवगत एवेति । मेयज्ञानाभावे तदुदाहरणायोगादित्यर्थः ॥ २६९ ॥ क्रमभाविनोर्ज्ञानत्वाज्ञानत्वयोरनुगतधर्मिणस्ताभ्यां भिन्नत्वादनुभयात्मत्वमिति शङ्कते *ज्ञाततेति । क्रमभाविनोस्तयोर्भासकाभावान्नायं पक्षः साधुरिति दूषयति *तत्रेत्यादिना ॥२७०॥२७१॥ ननु दुर्निरूपमप्यज्ञातं वस्त्वनुभवबलादङ्गीकार्यमिति चेत्, ओमित्याह *चतुर्विधेति ॥२७२॥ अज्ञानस्य सा-

सर्वथा न तवाज्ञातं प्रमाणेन प्रसिध्यति ॥
अज्ञानं न यथा मानान्मिथ्याधीसंशयौ तथा॥२७३॥
प्रत्यक्षादिप्रमाणानामज्ञानादिप्रसिद्धये ॥
नेक्ष्यतेऽन्यतमं मानं स्वप्रकाशं न वर्त्तते ॥ २७४ ॥
विषयेन्द्रियसम्बन्धविरहाद्बाह्यमक्षजम् ॥
नास्ति दुःखादिधीवत्स्यात्प्रत्यक्षं नापि मानसम्॥२७५॥
ज्ञानाभावाख्यमज्ञानं मानसे सति तत्कथम् ॥
अयौगपद्यात्प्रत्यक्षं संशयादेर्न मापकम् ॥ २७६ ॥

क्षिगम्यत्वमुपसंहरति *सर्वथेति । उक्तन्यायमन्यत्राप्यतिदिशति* अज्ञानमिति । मानादित्यत्र न सिध्यतीत्यनुषज्जते॥२७३॥ साक्षिसिद्धस्याज्ञानस्यान्यतोऽपि सिद्धिसम्भवात्साक्षिमात्रभास्यत्वमनुपपन्नं येन तद्दृष्टान्तेन संशयादेरपि तत्स्यादित्याशङ्क्य, किं मानेन तत्सिद्ध्यति उत स्वप्रकाशतया ? नाद्य इत्याह *प्रत्यक्षेति । निर्धारणे षष्ठी । द्वितीयं प्रत्याह *स्वप्रकाशमिति । अनात्मत्वादित्यर्थः ॥ २७४ ॥ स्वतःसिद्धत्वाभावेऽपि कथं तत्साधकमानानीक्षणमित्याशङ्क्य किं तत्राध्यक्षं मानम् उतानुमानादि? आद्येऽपि किं तद्बाह्येन्द्रियजन्यम् उत मनोजन्यं ? नाद्य इत्याह *विषयेति । सम्बन्धविरहश्चाज्ञाने कदापि चाक्षुषत्वादेरननुभवादिति ध्येयम् । आद्यद्वितीयं प्रत्याह *दुःखादीति । दुःखादिधियः साक्षित्वेन मानसत्वासिद्धेरिति भावः ॥२७५॥ किंच परैर्ज्ञानसामान्याभावव्यतिरेकेणाज्ञानानङ्गीकारात् तस्य च मानसज्ञाने सत्ययोगान्न तद्गोचरत्वमित्याह *ज्ञानेति । अस्तु तर्हि संशयादेर्मानसत्वं तत्राह *अयौगपद्यादिति ॥ २७६ ॥ एतदेव व्यनक्ति *नेति । एकं करणमेकदैकामे-

न ज्ञानयौगपद्यं त्वन्मतेऽस्ति युगपत्कथम् ॥
ग्राह्यग्राहकविज्ञाने स्यातां संशयमानसे ॥ २७७ ॥
प्रत्यक्षार्थवदेवेदमज्ञानाद्यनुभूयते ॥
नाशङ्क्यतेऽनुमानादि यतः पारोक्ष्यबोधकम् ॥ २७८ ॥
मिथ्याज्ञानादिसंसिद्ध्यै क उपाय इतीर्यताम् ॥
इति चेत्, शरणं गच्छ साक्षिणं सर्वभासकम् ॥ २७९ ॥
यथेह घटविज्ञाने घटाकारोऽनुभूयते ॥
विशदः साक्षिणस्तद्वदज्ञानाद्यनुभूयते ॥ २८० ॥
इत्थं साधनदोषाभ्यां स्वपक्षपरपक्षयोः ॥
प्रमेयं साधितं तस्य जगत्कारणतोच्यते ॥ २८१ ॥
कार्यकारणभावोऽयं शास्त्रयुक्तिपरीक्षणे ॥
अविचारितरम्यः सन् भासते नतु वास्तवः ॥ २८२ ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ॥
इति वास्तवजन्मादि शास्त्रेणैव निराकृतम् ॥ २८३ ॥

व क्रियां जनयतीति नियमादिति भावः । उक्तनियमासिद्धौ फलितमाह *युगपदिति ॥ २७७ ॥ सुखादिवदध्यक्षेणानुभूयमानाज्ञानादेः परोक्षमानगम्यत्वशङ्का नास्तीति द्वितीयं कल्पं निराह *प्रत्यक्षेति ॥ २७८ ॥ अतः परिशेषात्तेषां साक्षिमात्रभास्यत्वमनिच्छताऽपि स्वीकार्यमिति प्रश्नपूर्वकमाह *मिथ्येति ॥ २७९ ॥ २८० ॥ *इत्थमिति । स्वपक्षसाधनेन परपक्षदोषेण चेत्यर्थः । *प्रमेयमिति । अज्ञातं ब्रह्म प्रमेयमिति साधितमित्यर्थः ॥ २८१ ॥ २८२ ॥ जगतोऽनिर्वचनीयत्वात्तत्कारणमपि तथेत्यत्र शास्त्रं तावदुदाहरति *नेति । असतोऽनुत्पन्नस्य भाव उत्पत्तिर्वस्तुतो नास्तीत्यत उत्पन्नस्य विनाशोऽपि न वास्तव इत्यर्थः ॥ २८३ ॥

युक्तिश्चान्योन्यसापेक्षा कार्यकारणतेत्यसौ ॥
मृषात्वमाह न तयोरेकस्याप्यनपेक्षता ॥ २८४ ॥
नाकुर्वत्कारणं दृष्टं कार्यापेक्षा ततो भवेत् ॥
कार्यं नाक्रियमाणं स्यात्कारणापेक्षता ततः ॥ २८५॥
अविचारितरम्यश्चेदज्ञानात्मैकहेतुकः ॥
स्यात्, स्वप्नस्य तथा दृष्टा ह्यज्ञातात्मैकहेतुता ॥२८६॥
अज्ञातात्मातिरेकेण ब्रुवतो जगतो जनिम् ॥
सम्यग्ज्ञानान्न मुक्तिः स्यान्न ज्ञानं वस्तुनुत्क्वचित्॥२८७॥
कर्मभ्योऽपि न मुक्तिः स्यात्कर्मापि नहि वस्तुनुत् ॥
ततो ज्ञानेन मुक्त्यर्थमज्ञातात्मैकहेतुता ॥ २८८ ॥
प्रथते वैश्वरूप्येण यस्याविद्यैव सर्वदा ॥

तत्र युक्तिमाह *युक्तिश्चेति॥२८४॥ कार्यकारणयोर्मृषात्वापादकं परस्परापेक्षत्वं प्रकटयति *नाकुर्वदिति। कार्यविषयव्यापाररहितस्य कारणत्वे सदा कार्योत्पत्तिः स्यात्, एवं कारकव्यापाराविषयस्यापि तत्कार्यत्वे पटोऽपि दण्डादिकार्यं स्यादिति कारणसिद्धौ कार्यसिद्धिः कार्यसिद्धौ तत्सिद्धिरित्येकमपि न सिद्ध्येदिति भावः ॥२८५॥ अस्मत्पक्षे कार्यकारणभावोऽपि मायिकत्वात्स्वप्नादिवदुपपन्न इत्याह *अविचारितेति ॥ २८६ ॥ किञ्च कर्तृत्वादिप्रपञ्चस्याज्ञानकार्यत्वाभावे ज्ञानेन कर्मणा वा सत्यस्य निवृत्त्ययोगादनिर्मोक्षप्रसङ्ग इत्याह *अज्ञातेत्यादिना ॥ २८७॥ तस्मात् "तरति शोकमात्मवित्" इत्यादिश्रुतिप्रामाण्याय प्रपञ्चस्याज्ञानकार्यत्वमास्थेयमित्याह *तत इति। वक्तव्येति शेषः॥२८८॥ नन्वज्ञातात्महेतुकोऽपि प्रपञ्चस्ततोऽत्यन्तमभिन्नो भिन्नो वा, आद्येऽज्ञातात्मव्यतिरेकेण प्रपञ्चो नास्तीत्युक्तं स्यात्। अन्त्ये उपा-

तन्मतेऽनुपपत्तिः का नोपालभ्यो भ्रमः क्वचित् ॥२८९॥
वस्तुवृत्तमपेक्ष्यैतन्न स्वतः परतस्तमः ॥
तज्जं वाऽतस्तमोदृष्ट्या तमस्तत्कार्ययोर्वचः ॥२९०॥
तमश्चिदाभासयुतं नाज्ञासिषमितीक्षणात् ॥
जगज्जन्मस्थितिलयास्तस्मादज्ञातआत्मनि ॥ २९१ ॥
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् ॥
परः कारणतामेति जडाजडभिदा ततः ॥ २९२ ॥
तत्तत्प्राणिकृतैस्तैस्तैर्भावनाज्ञानकर्मभिः ॥
देवतिर्यङ्मनुष्यादिवैचित्र्यमुपपद्यते ॥ २९३ ॥
तत्तज्जात्युदिते शिल्पे भूयोऽभ्यासेन वासना ॥
कौशलातिशयाख्या या भावनेत्युच्यते हि सा॥२९४॥

दानोपादेयभावो न स्यात् अद्वैतहानिश्चेति तत्राह *प्रथत इति । वैश्वरूप्येण कार्यकारणमित्यनेकाकारेणेत्यर्थः । *नोपालभ्य इति । नहि भ्रान्तेर्लक्षणं नास्तीति भावः ॥ २८९ ॥ द्वैतस्य भ्रमविषयत्वमेव स्फुटयति *वस्त्विति । यस्मादद्वितीयवस्तुस्वरूपमपेक्ष्याज्ञानतत्कार्ये न भेदेनाभेदेन वा सिध्यतः, तस्मादेवाविद्वद्भ्रमकल्पितत्वं तयोरित्यर्थः ॥ २९० ॥ अस्तु तर्ह्यज्ञानमेव लाघवाज्जगत्कारणमिति तत्राह *तम इति । यस्माच्चित्संवलितमेवाज्ञानमनुभूयते तस्माद्विशिष्टस्यैव हेतुत्वमित्यर्थः ॥ २९१ ॥ विशिष्टस्यैव कारणत्वे कार्ये जगति चेतनाचेतनविभागभानं कथमित्याशङ्क्य कारणेऽपि विभागमाह *तम इति ॥ २९२ ॥ नन्वेवमपि चेतनेष्वेवावान्तरवैलक्षण्यं कथमिति तत्राह *तत्तदिति ॥ २९३॥ भावनाज्ञानकर्मशब्दानामभिप्रेतार्थं क्रमेण व्यनक्ति *तत्तज्जात्युदितेत्यादिना ॥ २९४ ॥

शास्त्राभ्यासोपासनादिज्ञानमप्यभिधीयते ॥
विहितं प्रतिषिद्धं च कर्म नैश्चित्रजन्मता ॥ २९५ ॥
यच्चाकृतगतं किञ्चिद्भावनादि समीक्ष्यते ॥
तदव्याकृतरूपेण स्थितं व्यज्येत सृष्टये ॥ २९६ ॥
तद्व्यक्तौ तम एवात्र निमित्तं लोकदृष्टितः ॥
लोके कार्यविशेषाणां तम एव नियामकम् ॥ २९७ ॥
तैलशक्तिस्तिले कस्माद् दधिशक्तिः कुतो नहि ॥
इति पृष्टो न जानामीत्येवं प्रत्युत्तरं वदेत् ॥ २९८ ॥
तन्नियामकमज्ञानमिति तेनोदितं भवेत् ॥
प्रष्टुश्च तावता तत्र गच्छत्येव पिपृच्छिषा ॥ २९९ ॥
वक्तुर्नाकौशलं शङ्क्यं कुशलैश्चैवमीरणात् ॥
अन्यथा कुशलम्मन्यस्त्वमेवात्रोत्तरं वद ॥ ३०० ॥
सर्वेषामविवादेन प्रश्नोत्तरतया वचः ॥
यद्विभाति न तद्भातं किन्तु वस्तु तथैव तत् ॥ ३०१ ॥

॥ २९५ ॥ ईश्वरस्य कर्माद्यपेक्षया हेतुत्वे प्रलये तदस्ति न वा । आद्ये सर्वलयासिद्धेः । चरमे तदपेक्षस्याकारणत्वमिति तत्राह *यदिति ॥ २९६ ॥ अनभिव्यक्तकर्मादौ सृष्टिकालेऽभिव्यक्तौ को हेतुरित्याशङ्क्य प्राणिनां भोगकालाभिज्ञेश्वरसंकल्पवशात्तच्छक्त्या तमसैव तद्व्यज्यते इत्याह *तद्व्यक्ताविति ॥ २९७ ॥ अज्ञानस्यैव कार्यविशेषहेतुत्वं लोके दृष्टमित्युक्तमुदाहरणेन स्फुटयति *तैलेत्यादिना ॥ २९८ ॥ पिपृच्छिषा प्रष्टुमिच्छा ॥ २९९ ॥ न जानामीत्युक्तेरन्यथापि सम्भवान्नैतावता तस्य हेतुत्वसिद्धिरित्याशङ्क्य किमसामर्थ्यात्तदुक्तिरुत भ्रान्त्या ? नाद्य इत्याह *वक्तुरिति । *अन्यथेति । तिले दधिशक्तिः कुतो नेत्युक्ते न वेद्मीति व्यतिरेकेण त्वयाऽप्युत्तरं वक्तुमशक्यमित्यर्थः ॥ ३०० ॥ द्वि-

प्रश्नविश्रान्तिभूमित्वाच्चोद्यं तमसि नोदियात् ॥
न बुद्धिमन्तः पृच्छन्ति न जानामीति वादिनम्॥३०२॥
पृच्छन्त्यभिज्ञमिति चेद्बाढं न विवदामहे ॥
चोद्यानर्हत्वमज्ञाने तावता वारितं कथम् ॥ ३०३ ॥
न चोदनीयमज्ञानं दुर्घटानां नियामकम् ॥
इति लौकिकदृष्टान्तात्सिद्धं वेदविदां मतम् ॥३०४॥
एवं तर्हि न जानामीत्येवं सर्वत्र भण्यताम् ॥
किं सृष्टयुक्तिश्रमेणेति वक्षि चेदुत्तरं शृणु ॥३०५॥
साक्षान्नियामकं यत्र तमस्तत्रैव तद् ब्रुवे ॥
अन्यद्द्वारा नियमने वक्तव्यं द्वारमापतेत् ॥३०६ ॥
परमाणुर्मूलहेतुरित्येवं द्व्यणुकादिकम् ॥
ननूच्यते यथा तद्वद्वच्मि सृष्टिं तमःकृताम् ॥ ३०७ ॥
तमो नियामकं चेत्तत्किमन्तर्यामिणेति चेत् ॥
अन्तर्यामिस्वशक्तिर्या सैव तत्तम उच्यते ॥ ३०८॥

तीयं प्रत्याह *सर्वेषामिति ॥ ३०१ ॥ कुशलेनापि काश्चित्कक्षां गत्वा न जानामीति कथनात्प्रष्टुराकाङ्क्षानिवृत्तेश्चाज्ञानस्य हेतुत्वमित्याह *प्रश्नेति ॥ ३०२ ॥ न जानामीत्युक्ते प्रष्टुराकाङ्क्षा न निवर्त्ततेऽन्यथा विशेषज्ञं प्रति तन्न पृच्छेदित्याशङ्कते *पृच्छन्तीति ॥ न वेद्मीत्युक्त्या क्वचिदाकाङ्क्षानिवृत्त्यभावेऽपि तमसश्चोद्यानर्हतया पूर्वोक्तहेतुभिश्च दुर्घटकार्यहेतुत्वं सिद्धमेवेत्याह *चोद्येत्यादिना॥३०३॥३०४॥३०५॥३०६॥अज्ञानस्यैव मूलकारणत्वेऽप्यवान्तरकारणाभिप्रायेणाकाशाद्वायुरित्याद्युक्तिरुपपन्नेत्यत्र पराभिमतं दृष्टान्तमाह *परमेति । *ननूच्यत इति । उच्यत एवेत्यर्थः ॥३०७॥३०८॥ साक्षिव्यतिरेकेणान्तर्याम्यभ्यु-

ईशस्तमःप्रधानः सन्नियम्यानां नियामकः ॥
तेष्वेव चित्प्रधानः सन् साक्षितां प्रतिपद्यते ॥३०९॥
तमोनियमिताः कर्मभावनाद्यास्तमास्विनम् ॥
जीवं बध्नन्ति नो मुक्तं कारणानतिवृत्तितः ॥३१०॥
यथा कार्यो घटः कोऽपि मृत्तिकां नातिवर्तते ॥
तमःकार्यं भावनादि नातिक्रामंस्तमस्तथा ॥ ३११ ॥
जलूका व्रणगा रक्तं दुष्टमेव विवेचयेत् ॥
तथाऽऽत्मगतकर्मादि लब्धात्मानं विचिन्तयेत् ॥३१२॥
स्वकर्तुरुपभोगार्थं कर्माव्याकृतरूपकम् ॥
व्यक्तीभवत्प्रयुङ्क्ते तद् भूतभौतिकवज्जगत् ॥ ३१३ ॥

पगमे ऽद्वैतहानिरित्याशङ्क्य तयोः कल्पितावान्तरभेदमाह *ईश इति ॥३०९॥ नन्वव्याकृतात्मना लीनाः कर्माद्या ईशेन चेदभिव्यज्यन्ते तर्ह्यविशेषान्मुक्तानपि बध्नीयुरिति नेत्याह *तम इति *तत्र हेतुमाह *कारणेति ॥ ३१० ॥ कर्माद्या मूढकार्यत्वात्तमतिक्रम्य न वर्त्तन्त इत्यत्र दृष्टान्तमाह *यथेति । तमःशब्दो मूढवचनः ॥३११॥ किञ्च यथा व्रणसम्बन्धाज्जलूका स्वभावादेव शुद्धशोणितं विहाय दुष्टशोणितमेव पृथक्कृत्य पिबाति तद्वत् स्वभावादेव कर्मादयो जीवमाश्रयन्तीत्याह *जलूकेति। *लब्धात्मानमिति । लब्ध आत्मा स्वरूपं यस्मात्स तथोक्तस्तस्य कर्त्तारमित्यर्थः ॥ ३१२ ॥ एवं तमसो भावनाद्यभिव्यक्तिहेतुत्वमुपपाद्य तदभिव्यक्तेः फलमाह *स्वेति ॥ पूर्वकल्पे जीवेन कृतमव्याकृतात्मना स्थितं यत्कर्म तदेव व्यक्तं सत् जीवभोगाय भूतभौतिकात्मकं जगत्सृजतीत्यर्थः ॥ कर्मशब्दो ज्ञानादेरुपलक्षणम् ॥३१३॥ कर्मादिना जगज्जन्म चेत् तस्य सदा भावात्सदा

अव्यक्तजगतो व्यक्तिरन्तर्यामिप्रभावतः ॥
भवन्ती देशकालादिव्यवस्थां प्रतिपद्यते ॥ ३१४ ॥
यथा नियमयत्येष तथा भवति तज्जगत् ॥
नियन्ता सर्वजगतो नान्यः सम्भाव्यते प्रभोः॥३१५॥
न चोपालब्धुमस्माभिः शक्यते परमेश्वरः ॥
अतो विमुच्य चोद्यानि श्रूयतां महिमेश्वरः ॥३१६ ॥
अन्तर्यामी यदा कर्म नोद्बोधयाति संहृतिः ॥
तदा भवेद्यदोद्बोधं कुर्यात्सृष्टिस्तदा भवेत् ॥ ३१७ ॥
अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् ॥
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥ ३१८॥
तादृशो ब्रह्मणोऽकस्मात्कर्मोद्बोधे प्रवर्तकम् ॥
तथा कर्मोपसंहारे नेश्वरोऽन्यदपेक्षते ॥ ३१९ ॥
वाति वायुर्यथा ऽकस्मादकस्माच्चोपशाम्यति ॥

जगज्जायेतेति प्रलयादिव्यवस्था न स्यात्तत्राह *अव्यक्तेति । जगच्छब्दः कर्मादिपरः ॥३१४॥ उक्तमेव व्यनक्ति *यथेति । ईशोऽपि किमिति कदाचिदेव जगद् व्यनक्ति न सर्वदेत्याशङ्क्य स्वतन्त्रत्वात्तस्य न चोद्यावकाश इत्याह *नियन्तेति ॥ ३१५॥३१६॥ संहृतिः प्रलयः ॥ ३१७॥ नन्वीदृक्शक्तिसम्पन्नं चेद् ब्रह्म तर्हि तस्यैव जगद्धेतुत्वसम्भवात् किं तमसो जडस्य तद्धेतुत्वकल्पनयेत्याशङ्क्य तम एव तच्छक्तिरिति पूर्वोक्तं स्मारयति *अस्य द्वैतेति ॥ ३१८ ॥ जगद्व्यवस्था ईश्वरकृता चेत्तस्य तर्हि सशरीरत्वं स्यात् लोकेश्वरवत्तत्राह *तादृश इति। अज्ञानसहितस्येत्यर्थः । अकस्मात् अज्ञानातिरिक्तहेतुं विना ॥३१९॥ ईशस्य देहं विनाऽपि प्रवर्त्तकत्वे दृष्टान्तमाह *वातीति ।

निर्निमित्ते तथैवयात्कर्मोद्बोधोपसंहृती ॥ ३२० ॥
उत्थास्यामि मुहूर्तेऽहं ब्राह्म इत्यभिसन्दधत् ॥
शयानो नियमेनैव तदोत्तिष्ठेत्तथेक्ष्यताम् ॥ ३२१ ॥
संहरन्नभिसन्धत्त इयत्तां संहृतेस्ततः ॥
तावत्याः संहृतेरन्ते सिसृक्षोदेति सत्वरम् ॥ ३२२॥
अज्ञानमात्रोपहितं ब्रह्माकाशस्य कारणम् ॥
आकाशोपहितं वायोर्वायूपहितमर्चिषः ॥ ३२३॥
अग्निनोपहितं चापां जलेनोपहितं भुवः ॥
एवमुत्तरकार्येषु ततः सर्वकृदुच्यते ॥ ३२४ ॥
कार्यकारणरूपेण स्थितं यज्जगदीक्ष्यते ॥
ओतं प्रोतं तदीशोऽस्मिन्कार्पासे तन्तुवस्त्रवत् ॥३२५॥
प्रतिबिम्बतया कार्येष्वीशो नानात्वमाव्रजेत् ॥

तृणादि चालयतीत्यर्थः ॥ ३२० ॥ तस्य नियतकालसृष्टौ दृष्टान्तमाह *उत्थास्यामीति । स्वतन्त्रश्चेतनः स्वसङ्कल्पानुरोधेन यथा कृत्यं निर्वहति तथा निरङ्कुशस्वातन्त्र्ययुक्तः परमेश्वरोऽपि सङ्कल्पानुरोधेन नियमेन सृष्ट्यादिकं करोतीत्यर्थः ॥ ३२१ ॥ ॥ ३२२ ॥ कर्मादीनामपि जगद्धेतुत्वे ब्रह्मणः सर्वकर्तृत्वसर्वाधारत्वहानिस्तत्राह *अज्ञानेति ॥ ३२३ ॥ ३२४ ॥ तत्तत्कार्यस्वरूपेण स्थितं ब्रह्मैव सर्वकारणमित्युक्त्वा तथैव सर्वाधारत्वं सदृष्टान्तमाह * कार्येति ॥ ३२५ ॥ नन्वेवमपि कथं ब्रह्मणोऽद्वितीयत्वं जीवानां पृथक्त्वेनोपलम्भात् इत्याशङ्क्य तद्भेदस्यौपाधिकत्वं दृष्टान्तेनाह * प्रतिबिम्बेति । “ आदित्याज्जायते वृष्टिः ” इतिस्मृतेरादित्योत्सृष्टा वृष्टिधारा इत्यर्थः

स्वोत्सृष्टतोयधारासु प्रतिबिम्बैर्यथा रविः ॥ ३२६ ॥
अपास्ताज्ञान ईशो ऽसावस्थूलाद्युक्तिगोचरः ॥
साभासाज्ञानयुक्तः सन्साक्ष्यन्तर्यामितां व्रजेत् ॥ ३२७ ॥
हिरण्यगर्भो बुद्धिस्थो रजःसत्त्वतमोगुणैः ॥
ब्रह्मा हरिः पिनाकी स्यादेवमत्र्यादयस्तथा ॥ ३२८ ॥
तत्तत्सोपाधिजन्मैवं जन्मात्मन इहोच्यते ॥
अजनेर्वियतो जन्म यथा कुम्भादिजन्मना ॥ ३२९ ॥
असाधारणरूपैव मृत् स्वकार्ये बहुत्वतः ॥
सामान्यरूपतामेति स्वकार्येष्वीश्वरस्तथा ॥ ३३० ॥
अव्यावृत्ताननुगतमपि ब्रह्म तमोवशात् ॥
व्यावृत्तानुगतात्मत्वमित्थं प्राप्तमिवेक्ष्यते ॥ ३३१ ॥

॥ ३२६ ॥ तत्रैव दृष्टान्तान्तरमप्याह *अपास्तेत्यादिना । यथाऽयमेव परमात्मा निरुपाधिकः सन्निर्गुणं ब्रह्मेत्युच्यते, स एव साभासाज्ञानयुतश्चित्प्रधानतयाऽऽत्मा साक्षी, तमःप्रधानतयाऽन्तर्यामीति च व्यपदिश्यते । यथा वा समष्टिबुद्ध्युपहितः स एव हिरण्यगर्भ इति, गुणत्रयोपहितः सन् ब्रह्मविष्णुरुद्रा इति च व्यपदिश्यन्ते । एवं व्यष्टिबुद्धिषु प्रतिबिम्बितः सन् जीव इत्युच्यत इत्यर्थः ॥ ३२७ ॥ ३२८ ॥ अत एव जीवस्य जनिरप्यौपाधिकीति सदृष्टान्तमाह *तत्तदिति ॥ ३२९ ॥ ननु कारणत्वेन विशेषात्मना स्थितस्य ब्रह्मणः सर्वानुस्यूतसद्रूपेण कथं सामान्यात्मकत्वमेकरसत्वविरोधात्तत्राह *असाधारणेत्यादिना ॥ ३३० ॥ ३३१ ॥ नन्वज्ञानमनादि उत सादि ? आद्ये तन्निवृत्तिर्न स्यात् । अन्त्ये तन्मूलसंसारस्याकस्मिकत्वं स्यादत आह *अनादीति । तत्र हेतुः *तज्ज्ञेति । अज्ञान-

अनादि तत्तमो ज्ञेयं तज्ज्ञकालाद्यनाप्लुतेः ॥
आगन्तु चेदिहाज्ञानमनिर्मोक्षः प्रसज्यते ॥ ३३२ ॥
न चानादेरनुच्छित्तिरनाद्यज्ञाननाशने ॥
मानानां मानतां सर्वे आश्रयन्ति हि वादिनः॥३३३॥
मान्तरैः पूर्वमज्ञातं वस्तु मेयमितीर्यते ॥
यद्वस्तुबोधादज्ञाननाशकं मानमुच्यते ॥ ३३४ ॥
उक्ताज्ञानप्रधानत्वे कार्यकारणता चितः ॥
चित्प्राधान्यविवक्षायां कार्यकारणसाक्षिता ॥३३५॥
साक्ष्ये अज्ञानतत्कार्ये अपेक्ष्य भ्रान्तबुद्धिभिः ॥
कूटस्थो निर्द्वयोऽप्यात्मा साक्षीत्यध्यस्यते जडैः॥३३६

नत्वात्कालादेस्तस्य तेनापरिच्छेदादित्यर्थः *अनिर्मोक्ष इति नष्टस्यापि पुनः उत्पत्तिसम्भवादिति भावः ॥ ३३२ ॥ अनादिभावस्यात्मवदनुच्छित्तिमाशङ्क्याह *न चेति । मानतां हेतुतामिति यावत्। मानेनाज्ञाननिवृत्तेरनुभवात्तस्यास्तत्फलत्वं वादिभिरङ्गीकार्यम्। अन्यथा मानवैफल्यप्रसङ्गादिति भावः॥३३३॥ एतदेव स्पष्टयति *मान्तरैरिति। पूर्वं कदापि मानान्तरादज्ञातं यद्वस्तु तस्य मेयत्वमङ्गीकृत्य तद्बोधकमानस्य तदज्ञाननिवर्त्तकत्वं वदद्भिरनाद्यज्ञाननिवृत्तेर्मानफलत्वमङ्गीकृतम्, अतोऽनादेरपि प्रागभाववन्निवृत्तिः सम्भवतीति भावः ॥३३४॥ ईश्वरस्य सर्वात्मत्वे " मयाऽध्यक्षेण प्रकृतिः " इत्यादिवचनविरोध इत्याशङ्क्य विवक्षाभेदेनोभयोपपत्तिमाह *उक्तेति॥३३५॥ ननु चित्प्रधानत्वे साक्षित्वस्याविद्यत्वं न स्यादिति नेत्याह *साक्ष्येति ॥ ३३६ ॥ इयांस्तु विशेषः—अज्ञानमात्रान्न साक्षित्वं किन्तु अज्ञानाभासेनापि भाव्यमित्याह *मोहेति ।

मोहतत्कार्यनीडं यत्कूटस्थाभासरूपकम् ॥
ज्ञानं तदविनाभूतः परः साक्षीति भण्यते ॥ ३३७ ॥
कूटस्थस्य न साक्षित्वं द्वितीयासङ्गतेर्भवेत् ॥
नाशिनोऽपि न साक्षित्वं साक्ष्येणाव्यतिरेकतः॥३३८॥
अज्ञानमात्रहेतौ तु सर्वमेतत्समञ्जसम् ॥
कर्त्तृत्वाद्यन्यथाज्ञानहेतुत्वात्तस्य चात्मनि ॥ ३३९ ॥
नचाज्ञानस्य वस्तुत्वं शक्यते शङ्कितुं बुधैः ॥
तेन साक्षित्वकर्तृत्वभोक्तृत्वादेरवस्तुता ॥ ३४० ॥
ज्योतिषामपि तज्ज्योतिरस्मद्धीपारिमोषणात ॥
तमोरूपमिवाभाति भानुर्नक्तंदृशामिव ॥ ३४१ ॥

अज्ञाने तत्कार्ये च स्थितं यच्चिदाभासात्मकं ज्ञानं तेन तादात्म्यं गतः परमात्मा साक्षीत्युच्यत इत्यर्थः ॥३३७॥ *कूटस्थस्येति । साक्ष्येण सम्बद्धः साक्षी, असङ्गस्य तदयोगादित्यर्थः । *नाशिन इति । प्रमातुरपि साक्ष्यावच्छिन्नत्वेन तत्कोटिनिविष्टत्वादित्यर्थः ॥ ३३८ ॥ सामञ्जस्यमेवाह *कर्तृत्वादिति । अज्ञानस्यात्मनि दर्शनकर्तृत्वात्मकसाक्षित्वारोपहेतुत्वादारोपितं तदुपपन्नमिति भावः ॥ ३३९ ॥ अज्ञानकार्यस्यापि साक्षित्वादेः सत्यत्वमस्त्वित्याशङ्क्य अज्ञानस्य स्वप्रकाशात्मनो भेदेनाभेदेन वा दुर्निरूपस्यासत्यत्वे सिद्धे तत्परिणामस्य जगतः सत्त्वशङ्कैव नास्तीत्याह *न चेति ॥ ३४० ॥ आत्मनः स्वप्रकाशत्वे तदभिन्नब्रह्मानुभवः सदा किमिति न स्यादत आह *ज्योतिषामिति । आदित्यादिप्रकाशकं ब्रह्म यद्यपि स्वप्रकाशं तथाप्यशुद्धबुद्धीनामस्वप्रकाशमसदिव भाति उलूकादीनामिवादित्य इत्यर्थः ॥ ३४१ ॥ तर्हि स्वप्रकाशब्रह्मणो मोहस्य कः सम्ब-

आत्मात्मवत्त्वसम्बन्ध आत्मात्माज्ञानयोर्मतः ॥
ईशादिविषयान्तं यत्तदविद्याविजृम्भितम् ॥ ३४२॥
मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥
इति वेदशिरःसूक्तिरुक्तार्थे युज्यते स्फुटम् ॥ ३४३ ॥
दैवी ह्येषा गुणमयी मम मायेति च स्मृतिः ॥
वैष्णवी खल्वियं मायेत्येवं लोके च गीयते ॥३४४॥
इत्थमव्याकृतस्यास्य जगत्कारणतोदिता ॥
प्रमेयत्वं पूर्वमुक्तं द्वैविध्यं तत्र सुस्थितम् ॥ ३४५ ॥
चित्प्रधानं प्रमेयत्वे हेतुत्वे मोहमुख्यता ॥
मेयत्वात्तदुपादेयं हेयं तत्कारणत्वतः ॥ ३४६ ॥
तस्मिन्नव्याकृते ब्रह्मभागः शास्त्रेण मीयते ॥
मोहभागोऽनर्थमूलं ब्रह्मबोधेन बाध्यते ॥ ३४७ ॥
यतो बिभ्यति भूतानि संसाराख्यादनर्थतः ॥

न्धस्तत्राह * आत्मेति । आत्मात्मवत्त्वमाध्यासिकं तादात्म्यम् । ब्रह्मातिरिक्तस्य मायिकत्वमुक्तमुपसंहरति *ईशादीति ॥ ३४२ ॥ तत्र श्रुत्यादि प्रमाणयति *मायामिति ॥ ३४३ ॥ ॥ ३४४ ॥ एवमुपपादितार्थस्य निरवद्यत्वमाह *इत्थमित्यादिना ॥ ३४५ ॥ द्वैविध्यकथनस्य फलमाह *मेयत्वादिति । प्रमातुं योग्यत्वात् तत् चित्प्रधानमव्याकृतम् उपादेयं प्रमितव्यम्। मोहप्रधानमव्याकृतमनर्थहेतुत्वाद्धेयं ब्रह्मज्ञानेन प्रविलाप्यमित्यर्थः ॥ ३४६ ॥ एतदेव स्फुटयति * तस्मिन्निति ॥ ३४७ ॥ सम्भावितप्रातिज्ञायां संसाराख्यमहाव्याधेः किं मूलमित्यादिना प्रमेयसम्भावनायाः अनर्थमूलत्वस्य च वक्तव्यत्वमुक्त्वा तदुभयकथनायाव्याकृतवाक्यं प्रवृत्तमित्युक्तम् । इदानीमनर्थ-

तन्मूलं मोह इत्युक्ते स्यादुच्छेद्यत्वसम्भवः ॥ ३४८ ॥
आगता बहवश्चोरा इति श्रुत्वाऽतिविह्वलः ॥
स्वप्नप्रलापं तं ज्ञात्वा भवेत्स्वस्थो यथा तथा ॥३४९॥
महासम्भ्रमसंसारदुरुच्छेदत्वशङ्कया ॥
विह्वलो मूलशैथिल्यं ज्ञात्वोच्छेदे प्रवर्तते ॥ ३५० ॥
स्वात्मैव मेय इत्युक्ते बोधसौलभ्यसम्भवात् ॥
भवेदभिमुखो यत्नाच्छ्रुतमव्याकृतं ततः ॥ ३५१ ॥
इत्यव्याकृतवाक्यार्थो न्यायेन सुनिरूपितः ॥
अथ व्याकृतवाक्यार्थः क्रमप्राप्तो निरूप्यते ॥ ३५२ ॥
व्याकृतं द्विविधं देहसृष्टिर्देहप्रवेशनम् ॥
देहादिर्विषयत्वेन प्रवेशात्पूर्वमुच्यते ॥ ३५३ ॥
अव्याकृतं यत्पुरोक्तमनामकमरूपकम् ॥
श्रुतिः—तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत ॥
वार्त्तिकम्–तदिदं नामरूपाभ्यामेव

मूलमज्ञानमित्युक्तेः प्रयोजनमाह *यत इति ॥ ३४८ ॥ उक्तमर्थं दृष्टान्तपूर्वकमुपपादयति *आगता इत्यादिना । चोरागमनवाक्यस्याप्तोक्तत्वभ्रमादुत्पन्ना भीतिर्यथा तस्य सुप्तप्रलपितत्वज्ञानान्निवर्त्तते एवं दुःखहेतुरपि संसारो दुरुच्छेद इति भ्रमस्तस्य निर्मूलत्वज्ञानान्निवर्त्तेत इत्यर्थः ॥ ३४९ ॥ ३५० ॥ आत्मनो मेयत्वोक्तेः फलमाह *स्वेति । *श्रुतमिति । यस्मान्मेयत्वाज्ञानयोरुक्तिः सफला तस्मादर्थोन्मुखतश्च तदुभयं वक्तुमव्याकृतवाक्यं प्रवृत्तमित्यर्थः ॥ ३५१ ॥ ३५२ ॥ *देहादिरिति । प्रवेश्यं विना प्रवेशानुपपत्तेरित्यर्थः ॥ ३५३ ॥

व्याक्रियते स्वयम् ॥ ३५४ ॥
सुषुप्तादुत्थितो राज्ञः स्वयमेव यथा तथा ॥
जग्धाशेषजगन्मूर्तेरव्यक्ताद्व्याकृतिर्मुहुः ॥ ३५५ ॥
नामरूपे तु शब्दार्थौ न ताभ्यामतिरिच्यते ॥
जगत्किञ्चिद्घटादौ हि द्वयमेव समीक्ष्यते ॥ ३५६ ॥
प्रक्रियानियमो नात्र पुंव्युत्पत्तिप्रधानतः ॥
अतः श्रुतिषु सृष्ट्यादिविगानं बहुधेक्ष्यते ॥ ३५७ ॥
यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ॥
सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता॥३५८॥

तन्नामरूपाभ्यामित्यादेरर्थमाह *अव्याकृतमिति ॥ ३५४ ॥ अज्ञातप्रत्यग्धातोर्बाह्यनिमित्तानपेक्षस्य स्रष्टृत्वे दृष्टान्तमाह *सुषुप्तादिति । यद्यपि बन्दिभिर्बोध्यते राजा तथापि कदाचित्स्वयमेव प्रतिबुध्यमानो दृश्यत इति दृष्टान्तासिद्धिः । *मुहुरिति संसारस्यानादित्वं सूचयति ॥ ३५५ ॥ तन्नामरूपाभ्यामित्यत्र नामरूपशब्दयोरर्थं वदन्नवधारणस्याप्यर्थमाह *नामेति॥३५६॥ नामरूपाभ्यां सकारणेऽपि व्याक्रियमाणतत्त्वानि कियन्तीत्याशङ्क्य सृष्टेरविवक्षितत्वान्न सृज्यमानसङ्ख्याऽन्वेषणमित्याह *प्रक्रियेति । अविवक्षितत्वे हेतुः * पुंव्युत्पत्तीति । पुंसो व्युत्पत्तिर्ज्ञानं तत्परत्वात्सृष्टिश्रुतेरित्यर्थः । तत्रैव हेत्वन्तरमाह *अत इति । क्वचिदाकाशादिका क्वचिदग्न्यादिका क्वचिदक्रमेणेति विरुद्धमुच्यत इत्यर्थः ॥ ३५७ ॥ का तर्हि सृष्टिरेष्टव्या ? *ययेति । इहेति श्रुतौ मार्गोक्तिः । साध्वीति फलवत्त्वकथनम् । व्यवस्थिता तर्हि सेत्याशङ्क्याधिकारिबुद्धितारतम्यान्नैवमित्याह *सा चेति ॥ ३५८ ॥ व्याक्रियतेति पदस्यार्थमाह

विस्पष्टत्वं व्याकृतत्वं शुक्तिकारजतादिवत् ॥
स्पष्टमव्याकृतान्मोहान्मिथ्याज्ञानमिदं जगत्॥३५९॥
ननु सामान्यविज्ञानविशेषाज्ञानसंश्रयात ॥
जातरूप्यस्मृतेर्लोके मिथ्याज्ञानं प्रसिध्यति ॥३६०॥
यत्राध्यासो यदध्यस्तं भेदश्चापेक्षितस्तयोः ॥
या मिथ्याज्ञानसामग्री सा त्वैकात्म्येऽति दुर्लभा॥३६१॥
उच्यतेऽनिर्वाच्यवादे त्रितयान्न मृषा मतिः ॥
अपि त्वज्ञानमेवैकं भ्रान्तिरूपेण वर्त्स्यति ॥ ३६२ ॥
येनानिर्वाच्यमज्ञानमुपेक्ष्यान्यदुपेयते ॥
मिथ्याज्ञानं मते तस्य त्रितयं भ्रान्तिकारणम् ॥३६३॥
अवस्तुत्वादनिर्वाच्यं कथं संसारकारणम् ॥
मिथ्याज्ञानं तु वस्तुत्वाद्धेतुः स्यादिति चेन्न तत्॥३६४॥

---

*विस्पष्टत्वमिति। किमपेक्षया स्पष्टत्वं ? तदाह *स्पष्टमव्याकृतादिति । मिथ्याज्ञानशब्दः कर्मव्युत्पत्त्या विषयवचनः । मिथ्याज्ञानविषयः प्रपञ्चः शुक्तिरजतवत् स्पष्टो बभूवेत्यर्थः ॥ ३५९ ॥ दृष्टान्तवैषम्यं शङ्कते *नन्विति । दृष्टान्ते कारणत्रयमस्ति दार्ष्टान्तिके तन्न दृष्टम् आत्मनो निःसामान्यविशेषत्वादनात्मनश्च नित्यसाक्षिवेद्यत्वेन स्मृत्ययोगादित्यर्थः ॥ ३६० ॥ किञ्च भेदाग्रहोऽध्यासव्यापकः तदभावान्नानात्माध्यास इत्याह *यत्रेति । अद्वैतवादे भेदस्यैवाभावादिति भावः । ततः सामग्र्यभावादध्यासासम्भव इत्युपसंहरति *या मिथ्येति ॥ ३६१ ॥ कारणत्रयाभावान्न भ्रान्तिरित्युक्तं तावत् चोद्यं समाधत्ते *उच्यत इत्यादि॥३६२॥३६३॥अज्ञानस्य संसारहेतुत्वे सिद्धे तदेव मिथ्याज्ञानरूपेणापि वर्तते तदेवासिद्धमिति शङ्कते *अवस्तुत्वादिति । किं तर्हि तत्कारणं तत्राह *मिथ्येति ॥ ३६४ ॥

वस्तुप्रमित्या हेयस्य मिथ्याज्ञानस्य वस्तुता ॥
न युक्ता वस्तुनो मानहेयत्वे शून्यशेषता ॥ ३६५ ॥
मिथ्या च वस्तु चेत्येतत्कथं न व्याहतं वचः ॥
न च त्रितयजन्यत्वं मिथ्याज्ञानस्य युक्तिमत् ॥३६६॥
व्योमनैल्ये दिग्भ्रमे च रविप्राग्याननिद्रयोः ॥
अङ्गीकर्त्तव्यमेवैतन्मिथ्याज्ञानमृते त्रयात् ॥ ३६७ ॥
व्योमन्यचाक्षुषे नैल्यभ्रमश्चाक्षुष ईक्ष्यते ॥
न च सामान्यविज्ञानं चाक्षुषं तत्र सम्भवेत् ॥३६८॥
नीरूपदिग्विभेदेषु प्राच्यादिव्यत्ययेक्षणम् ॥
पश्चाद्गच्छत्सु मेघेषु रवौ प्राग्गतिविभ्रमः ॥ ३६९ ॥
स्वप्ने नानाप्रपञ्चाढ्यं मिथ्याज्ञानमवेक्ष्यते ॥
न सम्पादयितुं शक्यं तत्र तत्रोचितं त्रयम् ॥३७०॥
सम्यग्ज्ञाने च मिथ्यात्वं स्यात्तत्र त्रयसम्भवात् ॥
सोऽयं घट इति ज्ञाने सम्भवत्युदितं त्रयम् ॥३७१॥

संसारहेतुत्वेनाभिमतं मिथ्याज्ञानम् अधिष्ठानज्ञानेन बाध्यते न वा ? आद्ये न तस्य वस्तुत्वमित्याह *वस्त्विति । सत्यस्यापि माननिवर्त्यत्वे दोषमाह *वस्तुन इति ॥ ३६५ ॥ द्वितीयं निराह *मिथ्या चेति । अधिष्ठानज्ञानादीनां मिथ्याज्ञानहेतुत्वमभ्युपेत्य अनिर्वचनीयवादेन तदपेक्षेत्युक्तम्, इदानीमभ्युपगमं त्यजति *न चेत्यादिना ॥३६६॥३६७॥ गगननैल्यादिभ्रमचतुष्टयस्याधिष्ठानज्ञानाद्यहेतुत्वं क्रमेणोपपादयति *व्योमनीत्यादिना ॥३६८॥३६९॥३७०॥ किञ्च न सामान्यज्ञानादित्रयजन्यत्वं भ्रमत्वं सम्यग्ज्ञानेऽतिव्याप्तेरित्याह *सम्यगिति ॥ ३७१ ॥ *विशेष इति । घटाद्यन्तःप्रवेशेन चक्षुःसन्निक-

कालद्वयेऽप्यनुगतं सामान्यं भात्यथान्तरे ॥
विशेषो नैव भात्यस्ति तत्रांशे स्मरणं तथा ॥३७२॥
मिथ्याधियः स्मृतित्वेन वस्तुत्वं ये प्रचक्षते ॥
तन्मतं च न सम्भाव्यं पुरोवर्तित्वभासनात् ॥३७३॥
अनालिङ्गितबाह्यार्था बुद्धावेव स्मृतिर्भवेत् ॥
इदं रजतमित्येतद्भाति बाह्यार्थगोचरम् ॥ ३७४ ॥
वस्तुत्वं वस्तुबोधित्वान्मिथ्यासंशययोर्यदि ॥
सम्यग्ज्ञानात्तयोर्भेदस्तदा ते केन हेतुना ॥ ३७५ ॥
अतोऽनिर्वचनीयं तदज्ञानं भावरूपकम् ॥
रजताद्यन्यथाज्ञानकारणं युक्तिगौरवात् ॥ ३७६ ॥
अहमत्र विपर्येमि सन्दिहानोऽथवा न मे ॥
अस्त्यत्र ज्ञानमित्याहुस्तयोरज्ञानहेतुताम् ॥ ३७७ ॥
मिथ्याज्ञानातिरेकेण ये त्वज्ञानं न मन्वते ॥
तेषां दोषद्वयं वज्रसमानं केन वार्यते ॥ ३७८ ॥
किं न्वेतदिति जिज्ञासोर्नेदं रजतमित्यतः ॥

षाभावादिति ॥ ३७२ ॥ अन्ये तु मिथ्याज्ञानस्य स्मृतित्वान्न भ्रमत्वमित्याहुः, तान्प्रत्याह *मिथ्येति । तस्य स्मृतित्वाभावे हेतुः *पुर इति ॥ ३७३ ॥ स्मृतिवैलक्षण्यमेवाह *अनालिङ्गितेति । अनालिङ्गितोऽविषयीकृतो बाह्यार्थः सन्निकृष्टविषयो यया ॥ ३७४ ॥ मिथ्याधीसंशययोरुभयोरपि सत्यवस्तुविषयत्वं केचिदाहुः, तान्निराह *वस्तुत्वमिति ॥ ३७५ ॥ परिशेषादनिर्वाच्यवाद एव श्रेयानित्युपसंहरति *अत इति ॥ ३७६ ॥ अनुभवानुसारित्वाच्चेदं मतमुपादेयमित्याह *अहमिति ॥३७७॥३७८॥ दुष्परिहरं दोषद्वयमुदाहरति *किं न्विति

प्रतिषेधाद्वस्तुतत्त्वं बुध्येताज्ञानहानतः ॥ ३७९ ॥
रजतभ्रमयुक्तस्य शुक्तिकैषेति वाक्यतः ॥
शुक्तिबोधो भवेन्नैव मिथ्याज्ञानानिषेधतः ॥ ३८० ॥
अज्ञानमेव हेतुः स्याद्यदि भ्रान्तेस्तदा कथम् ॥
रूप्यधीनियमः शुक्ताविति चेत्तेऽपि तत्समम्॥३८१॥
अथ ते शौक्ल्यसाम्येन रौप्यधीर्यदि तर्हि ते ॥
वस्तुत्वसाम्यतः शुक्तौ गजधीरपि नो कुतः ॥३८२॥
अस्तु शौक्ल्येन नियमस्तस्य वा रूप्य एव कः ॥
पक्षपातो विना हेतुं बलाकाज्ञानकृन्न किम् ॥ ३८३ ॥
अदृष्टेनास्य नियमे समो मायामतेऽपि सः ॥
यद्वा दुर्घटकारिण्यां मायायामेव सम्भवेत् ॥ ३८४॥

द्वाभ्याम् । अधिष्ठानसाक्षात्कारात्पूर्वं किमेतच्छुक्तिका वा रजतं वेति ज्ञातुमिच्छतो नेदं रजतमित्याप्तोपदेशानन्तरं शुक्तितत्त्वसाक्षात्कारं विनाऽपि जिज्ञासा निवर्तेत, त्वदभिमताज्ञानस्य वाक्यादेव नष्टत्वात्। एवमिदं रजतमिति पुरोवर्तिनि रूप्यभ्रमवतीयं शुक्तिरेवेत्याप्तवाक्याच्छुक्तितत्त्वधीर्नोदियात्, नेदं रजतमिति त्वदभिमताज्ञानानिषेधादित्यर्थः । सिद्धान्ते त्वियं शुक्तिरिति वाक्याच्छुक्तितत्त्वे ज्ञाते तन्नान्तरीयकतया तदज्ञाननिवृत्तिः, नेदं रजतमित्येतत्तदनुवादकमिति भावः ॥ ३७९ ॥ ३८० ॥ ३८१ ॥ *वस्तुत्वेति । वस्तुत्वस्य सामान्यत्वेन शौक्ल्यात्प्रागेव ग्रहणादित्यर्थः ॥३८२॥ *अस्त्विति। शौक्ल्यस्य बलाकादिभिरपि सम्बन्धाच्छुक्तौ बलाकाज्ञानं वा किमिति न करोतीत्यर्थः॥ ३८३ ॥ शुक्तौ नियमेन रूप्यभ्रमेऽदृष्टस्य हेतुत्वमङ्गीकृत्य साम्येन परिहृतम्, इदानीमङ्गीकृतं परित्यजति *यद्वेत्यादिना । मायायां, सत्यामेव भ्रमनियम इति शेषः ॥ ३८४ ॥ मायाचोद्ये

कस्मादृदृष्टमप्येतन्नान्यथैव नियच्छाति ॥
मायाचोद्ये वस्तुवादी कथं परिहारिष्यति ॥ ३८५ ॥
न जानामीति चेद्वक्ति मायावाद्येव तर्हि सः ॥
तस्मादज्ञानएवैष विभ्रमः पर्यवस्यति ॥ ३८६ ॥
अज्ञातशुक्तौ रजतभ्रान्तिर्यद्वत्तथाऽऽत्मनि ॥
अविज्ञाते नामरूपे विभ्रमाद् द्वैतलक्षणम् ॥ ३८७ ॥
पदार्थान्तरसद्भावमपेक्ष्यान्यस्य वस्तुनः ॥
यस्य सिद्धिर्मृषा तत्स्याद्रज्जुसर्पद्विचन्द्रवत् ॥ ३८८ ॥
प्रमात्रादीह यत्किञ्चित्तत्सर्वं प्रत्यगात्मनः ॥
सत्तामपेक्ष्य संसिद्ध्येत्तस्मात्तत्स्वप्नवन्मृषा ॥ ३८९ ॥
अनन्यापेक्ष आत्माऽयं स्वमाहिम्नैव सिद्ध्यति ॥
नहि भावमपेक्षन्ते लोका अहमितीक्षणे ॥ ३९० ॥
अस्य द्वैतस्य वस्तुत्वं यद्विभाति प्रतीतितः ॥
तदात्मवस्तुसम्बन्धाद्भाति तत्र नतु स्वतः ॥ ३९१ ॥
रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः ॥

मायावादिचोद्ये इत्यर्थः ॥ ३८५ ॥ ३८६ ॥ शुक्तिरजतस्याज्ञानकार्यत्वे सिद्धे दृष्टान्तवैषम्याभावादज्ञानकार्यनामरूपात्मकद्वैतस्य मिथ्यात्वं सिद्धमित्याह *अज्ञातेति । अविज्ञाते आत्मनीति सम्बन्धः । विभ्रमात् स्फुरतीति शेषः ॥ ३८७ ॥ किञ्च जगत् कल्पितं सापेक्षत्वात् रज्जुसर्पवदित्याह *पदार्थेति ॥ ३८८ ॥ सापेक्षत्वमेवाह *प्रमात्रादीति ॥ ३८९ ॥ उक्तहेतोरात्मनि व्यभिचारमाशङ्क्य अनादिस्वप्रकाशस्यात्मन उत्पत्तौ ज्ञप्तौ वा नान्यापेक्षेत्याह *अनन्येति ॥ ३९० ॥ ननु सन् घटः इत्यादिना सत्यत्वेन प्रतीयमानद्वैतस्य कथमसत्यत्वं ?

स्वतो निरात्मकं तत्स्यात्सात्मद्वैतं तथाऽऽत्मना ॥३९२॥
यत्स्याद्यस्मिन्नविज्ञाते ज्ञाते तस्मिन्न तद्भवेत् ॥
स्वतो निरात्मकं तत्स्यादिदं द्वैतं च तादृशम् ॥ ३९३॥
अहं ब्रह्मेत्यविज्ञाते द्वैतमेतद्विभासते ॥
ज्ञाते त्वविद्याविध्वंसान्न कचिद्भेदधीर्भवेत् ॥ ३९४ ॥
विद्योत्पत्तावविद्येयं विरुद्धत्वेन बाध्यते ॥
नातः पृथगपेक्षाऽस्ति मिथ्याधीबाधनं प्रति ॥३९५॥
मिथ्याधियोऽस्याः सद्भावः स्यादविद्यैकमूलतः ॥
मूलध्वस्तौ हतैवैषा भाताऽप्यस्मान्न बाधते ॥३९६॥
मूले क्रकचसंलूने सुमहानपि पादपः ॥

तत्राह *अस्येति ॥ ३९१ ॥ ३९२ ॥ जगतः स्वसत्ताशून्यत्वेऽनुमानमाह *यत्स्यादिति । विमतं सत्ताशून्यं ज्ञाननिवर्त्यत्वात् सम्मतवदित्यर्थः ॥ ३९३ ॥ ३९४ ॥ ज्ञानस्याज्ञाननिवर्त्तकत्वेऽपि न प्रपञ्चनिवर्त्तकत्वं, ज्ञाततत्त्वस्यापि तत्प्रतीत्यनुवृत्तेः । अतो ज्ञानानन्तरभाविज्ञाननिवर्त्यत्वं वक्तव्यमिति नोक्तहेतुना तस्य मिथ्यात्वसिद्धिरित्याशयेन शङ्कते *विद्योत्पत्ताविति ॥३९५॥ तत्त्वान्यत्वाभ्यां दुर्निरूपस्य द्वैतस्याविद्यामूलत्वस्य वक्तव्यत्वाज्ज्ञानेनैव तन्निवृत्तिः, तत्त्वधियः सविलासाज्ञाननिवर्त्तकत्वदृष्टेः । अतो न हेत्वसिद्धिरिति परिहरति *मिथ्याधिय इति । कथं तर्हि ज्ञानानन्तरं तदनुवृत्तिस्तत्राह *भाताऽपीति । बाधितस्यापि प्रारब्धकर्मवशादनुवृत्तिसम्भवात्तन्नाशादेव नाशोपपत्तेर्न ध्यानादिनाश्यत्वं कल्प्यमिति भावः॥३९६॥ मूलनाशे सति कार्यनाशे न हेत्वन्तरापेक्षेत्यत्र दृष्टान्तमा-

यथापूर्वं फलं नैव दत्ते शुष्यति कालतः ॥ ३९७ ॥
यत्राध्यासो यदध्यस्तं भेदो भाति तयोरिति ॥
यदुक्तं तदसद्भेद एवात्राध्यस्यते यतः ॥ ३९८ ॥
न भेदभेदिनोर्लोके भेदान्तरमपेक्ष्यते ॥
तस्मादध्यस्यते भेदो निर्भेदात्मन्यविद्यया ॥३९९ ॥
ईश्वराव्याकृतप्राणविराड्भूतेन्द्रियादिधीः ॥
नाविद्योपाश्रयं मुक्त्वा सम्भाव्या प्रत्यगात्मनि॥४००॥
प्रत्यग्याथात्म्यदृष्ट्या तन्निपुणोऽपि न वीक्षते ॥
नच प्रत्यग्धियं मुक्त्वा पराग्बुद्धिर्मितिर्भवेत्॥४०१॥
पराञ्चि खानीत्येतच्च साटोपमभिधीयते ॥

ह *मूलेति ॥ ३९७ ॥ भेदग्रहाभावादात्मन्यनात्माध्यासो नेति पूर्वपक्षोक्तमनूद्य निराकरोति *यत्रेति ॥ ३९८ ॥ उक्तमेव व्यनक्ति *नेति ॥ वस्तुस्वरूपव्यतिरेकेण भेदस्य दुर्निरूपत्वादिति भावः ॥ ३९९ ॥ अत एवेश्वराद्यष्टावस्थं जगत् सत्यमिति मतं निरस्तमित्याह * ईश्वरेति ॥ अन्तर्यामिसाक्षिणौ ईश्वरशब्दितौ । भूतशब्दो भौतिकस्याप्युपलक्षणम् ॥ इन्द्रियशब्देन देवतोच्यते । आदिना जातिः ॥ ४०० ॥ उक्तेऽर्थे हेत्वन्तरमाह *प्रत्यगिति ॥ तथापि परागदृष्ट्या दृष्टत्वात् द्वैतस्य सत्यत्वमित्याशङ्क्याह *नचेति ॥ ४०१ ॥ आत्मनोऽपि तर्हि पराग्बुद्धिबोध्यत्वान्मिथ्यात्वं, स हि सर्वप्रत्ययवेद्योऽभ्युपेयते, नेत्याह *पराञ्चीति॥ एतत् प्रत्यग्दृष्टिरूपमानमात्रगम्यत्वमात्मनो वेदान्तेषु पराञ्चीत्यादिश्रुत्या सतात्पर्यमुच्यते, नहि तस्य सोपाधिकस्य सर्व-

प्रत्यङ्मानैकमेयत्वं वेदान्तेष्वात्मवस्तुनः ॥ ४०२ ॥
नित्यशुद्धस्तथा बुद्धो मुक्तः सत्यः परः स्वतः ॥
प्रत्यग्दृष्ट्याऽवसेयोऽसौ सद्वेदान्तोक्तिमानतः ॥४०३॥
एवम्भूतोऽप्यसम्बुद्धस्वात्मतत्त्वो महेश्वरः ॥
आपेदे कारणात्मत्वं नामरूपादिसर्जने ॥ ४०४ ॥
नामरूपाध्यास एवं व्याकृतः प्रतिपादितः ॥
प्रवेश्यः, तत्र जीवस्य प्रवेशः प्रतिपाद्यते ॥ ४०५ ॥
श्रुतिः-असौनामाऽयमिदꣳरूप इति, तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामाऽयमिदꣳरूप इति, स एष इह प्रविष्ट आनखाग्रेभ्यः ॥

प्रत्ययवेद्यत्वेऽपि निरुपाधिकस्य तथात्वमिति योजना ॥४०२॥ तर्हि प्रत्यङ्मानमात्रगम्यात्मा कीदृशः ? तत्राह * नित्य इति । *सदिति । निर्दुष्टापौरुषेयवेदान्तवाक्यादित्यर्थः ॥४०३॥ एवम्भूतस्यापि परस्याविद्यावशात्कारणत्वं सम्भावयति * एवमिति ॥ ४०४ ॥ व्याकृतवाक्यार्थमुपसंहरन्नुत्तरवाक्यस्यानेन सङ्गतिमाह * नामेति ॥ ४०५ ॥

असौनामाऽयमित्यादिश्रुतेरयमर्थः— असाविति निपातः, तेन नामसामान्यं व्यपदिशति । चैत्रो मैत्र इति यो नामास्येत्यसौनामा । अयमिति रूपसामान्यनिर्देशः । शुक्लं कृष्णं वा रूपमस्येतीदंरूपमव्याकृतवस्तु नामरूपसामान्यात्मना तद्विशेषात्मना च निमित्तवशाद्व्यक्तीबभूवेत्यर्थः । अव्याकृतमेव व्याकृतात्मना व्यक्तमित्येतत्सुप्तप्रबुद्धदृष्टान्तेन स्पष्टयति—तदिदमव्याकृतं वस्तु सुप्तिकालीनमेव । एतर्हि प्रबोधकाले ।

वा० सर्वशास्त्रारम्भ एष यदर्थस्तद्विबुद्धये ॥
स एष इह देहेषु प्रविष्ट इति गीयते ॥ ४०६ ॥
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्भवः ॥
संसारोच्छेदमेवामी फलं शास्त्रकृतो ब्रुवन् ॥ ४०७॥
स्वत एव मनुष्याणां प्रवृत्तिर्भोगसिद्धये ॥
तत्रानुवादि शास्त्रं स्यान्निवृत्तावेव तन्मितिः ॥४०८॥
विरोधः सर्वशास्त्रेषु पदार्थानां व्यवस्थितौ ॥
युक्तस्तात्पर्यहीनत्वाच्छ्रुतौ सृष्टिविगानवत् ॥४०९ ॥
अपि वात्स्यायनादीनां शास्त्राणां द्वारभेदतः ॥
प्रामाण्यमविरुद्धं स्यादैकात्म्यज्ञानजन्मने ॥ ४१० ॥

स एष इहेत्यादिवाक्यतात्पर्यमाह * सर्वेति ॥ ४०६ ॥ यदर्थं सर्वशास्त्रारम्भ इत्युक्तं विवृणोति *आत्मेति । तत्र हेतुः *संसारेति ॥ ४०७ ॥ अन्यार्थत्वेन प्रवृत्तशास्त्राणां कथं संसारनिवृत्तिफलकत्वमित्याशङ्क्य, स्वर्गादिबोधित्वेन तदुपायबोधित्वेन वा तेषां प्रवृत्तिः ? नाद्य इत्याह * स्वत एवेति । भोगसिद्ध्यर्थमिच्छात्मिकायाः प्रवृत्तेः स्वतःसिद्धत्वात्तद्बोधकत्वेन प्रवृत्तं शास्त्रमनुवादकं सत् अप्रमाणं स्यादित्यर्थः ॥ द्वितीयं प्रत्याह *निवृत्ताविति । स्वर्गादेः पुमर्थाभासत्वात्तत्रापर्यवस्यच्छास्त्रं रागादिनिवृत्तिद्वारा संसारोच्छेदपरमित्यर्थः॥४०८॥ सर्वशास्त्रारम्भस्य संसारनिवृत्त्यर्थत्वे मिथो विरोधः शास्त्राणां स्यादित्याशङ्क्य अविवक्षितांशविरोधेऽपि विवक्षितसंसारनिवृत्तौ न विरोध इत्याह *विरोध इति ॥ ४०९ ॥ वात्स्यायनीयशास्त्रात्स्त्रीसम्भोगे प्रवृत्तस्य ततो निवृत्तिहेत्वभावात्कथमात्मज्ञानपरत्वं तस्येत्याशङ्क्याह *अपीति ॥ ४१० ॥ द्वार-

प्रवर्त्तमानः कामेषु शास्त्रदीपितवर्त्मना ॥
दुर्लभत्वादिकान्दोषान्दृष्ट्वाऽतो विनिवर्त्तते ॥४११॥
अनित्यदुःखशून्यत्वं पदार्थानां स्फुटं ब्रुवन् ॥
बुद्धोऽपि रागाद्युच्छित्तौ यतते नात्मनिह्नुतौ॥४१२॥
यद्वा वेदस्य कृत्स्नस्य स्वात्मज्ञानार्थतोदिता ॥
तिष्ठन्त्वनात्मवादास्ते किन्नस्तैस्तैः प्रयोजनम् ॥४१३॥
स एषोऽत्रानखाग्रेभ्यः प्रविष्ट इति वेदगीः ॥
व्याख्यायतेऽसौ पदश आदौ मीमांस्यते त्वथ ॥४१४॥
स इत्यनेन शब्देन प्रकृतार्थावलेहिना ॥
अव्याकृताध्यक्ष आत्मा यः पुरोक्तः स उच्यते ॥४१५॥
ननु व्याक्रियतेत्येष शब्दः स्यात्कर्मकर्त्तरि ॥

भेदमाह *प्रवर्त्तमान इति ॥ ४११ ॥ नन्वेवमपि वैनाशिकशास्त्रस्य कथं तदर्थता तस्य नैरात्म्यपरत्वात्तत्राह *अनित्येति ॥ ४१२ ॥ यथोक्तन्यायेन सर्वशास्त्राणामात्मज्ञानार्थत्वे मुमुक्षूणां क्षपणकादिमतेष्वपि यथेच्छया प्रवृत्तिः स्यादित्यरुचेराह *यद्वेति । ॥४१३॥ * स एष इति । स एष इत्यादौ पदार्थः कथ्यतेऽनन्तरमयमर्थः उपपद्यते न वेति विचार्यत इत्यर्थः ॥ ४१४ ॥ ४१५ ॥ स इति पदेनाव्याकृतसाक्षी परामृश्यते इत्युक्तमाक्षिपति * नन्विति । अव्याकृतशब्दितस्य तमःप्रधानात्मन एव प्रकृतत्वेनाप्रकृतः साक्षी कथं परामृश्येत । न चाव्याकृतपरिणामनिमित्तत्वेन सोऽपि प्रकृत इति वाच्यम् । व्याक्रियत इति कर्मकर्तृप्रयोगेण जगत्कर्तुरविवक्षितत्वान्न साक्षी प्रकृत इत्यर्थः । कर्त्तारं विना कार्यायोगादस्ति साक्षिणः प्रकृतत्वमिति समाधत्ते * नार्थेति । कर्मकर्तरि लकारस्तु स्व-

नोक्तोऽतोऽध्यक्ष इति चेन्नार्थाक्षिप्तत्वसम्भवात्॥४१६॥
अव्याकृतेदम्पदयोः सामानाधिकरण्यतः ॥
व्याकृताव्याकृतैकत्वादध्यक्षोऽत्रैव कल्प्यताम्॥४१७॥
इदं जगन्नियन्त्रादिविभिन्नानेकरूपवत् ॥
यथाऽधुना तथा पूर्वमव्यक्तत्वं विशिष्यते ॥ ४१८ ॥
नामरूपाद्यभिव्यक्तेः प्रागव्यक्तापह्नवेऽप्यभूत् ॥
अव्यक्ताध्यक्ष आत्मैको व्यक्तं यत्साक्षिकं जगत्॥४१९॥
अध्यक्षोऽर्थाक्षिप्त एव न शाब्द इति चेन्न तत् ॥
जगदन्तर्गतत्वेन शाब्दत्वस्यापि सम्भवात् ॥४२०॥
तत्सम्भवप्रकारश्च विशदः प्रतिपाद्यते ॥

यमेव लूयते केदार इतिवत् व्याकरणसुकरत्वापेक्षयोक्त इति भावः ॥४१६॥ अध्यक्षस्य प्रकृतत्वे हेत्वन्तरमाह * अव्याकृतेति। अत्र व्याकृतावस्थायां यथा स्वसाक्षिकं जगत् एवमव्याकृतावस्थायामपि तस्य साक्षी कल्प्यः, तयोरेकत्वादित्यर्थः। एकत्वे हेतुः * व्याकृतेति। इदमव्याकृतमासीदिति सामानाधिकरण्यात्तस्य चाभिन्नार्थवृत्तित्वादित्यर्थः ॥ ४१७ ॥ अत्रैव कल्प्यतामित्युक्तं निवृणोति * इदमिति ॥ ४१८ ॥ ननु पूर्वावस्थायां जगतो व्यक्तत्वाभाववत्साक्ष्यभावोऽप्यस्तु, तत्राह *नामेति। अभिव्यक्तं जगत् येन साक्षिणाऽनुभूयते स तदुत्पत्तेः पूर्वं तदपह्नवात् ऊर्ध्वं चाव्यक्तसाक्षित्वेनापि वर्त्तेत इति वक्तव्यम्, अन्यथा तस्यासिद्धिप्रसङ्गात् साक्षिभेदे मानाभावाच्चेत्यर्थः॥४१९॥ एवमपि साक्षी न तच्छब्देन परामर्ष्टुं योग्यः तस्याशाब्दत्वात्, शाब्दी ह्याकाङ्क्षा शब्देनैव शाम्यतीति न्यायादित्याशङ्क्यासिद्धिमाह *अध्यक्ष इति ॥ ४२० ॥ एवमव्याकृतपदस्यानेकार्थ-

ग्रामादिवदनेकार्थो जगच्छब्दो विवक्षया ॥ ४२१ ॥
ग्रामः शून्य इति प्रोक्ते निवासस्थलमुच्यते ॥
ग्राम आगत इत्युक्ते निवासिजन उच्यते ॥ ४२२ ॥
ग्रामः सुस्थित इत्युक्ते द्वयमप्यभिधीयते ॥
अर्थत्रयं जगच्छब्दे ग्रामशब्दवदिष्यते ॥ ४२३ ॥
जगन्नश्वरमित्युक्ते जडमेवाभिधीयते ॥
जगदव्यक्तमित्युक्ते चिन्मात्रमभिधीयते ॥४२४॥
व्याकृतं वाऽव्याकृतं वा जगदित्यभिधानतः ॥
आत्मानात्मोभयार्थैव विवक्षेत्यभिगम्यताम् ॥४२५॥
तर्ह्यव्याकृतवाक्येऽस्मिन् द्वयस्य प्रकृतत्वतः ॥
परस्यैव परामर्शः कथमत्रेति चेच्छृणु ॥ ४२६ ॥
जगज्जनिस्थितिध्वंसनृत्तसाक्षिणमीश्वरम् ॥
मुक्त्वाऽन्यस्य प्रवेश्यत्वात्प्रवेष्टा शिष्यते परः ॥४२७॥
अथवा भयनाशाय विराजः स्वात्मवीक्षणे ॥

त्वाभावात्कथं साक्षिणः शाब्दत्वसम्भवस्तत्राह *तत्सम्भव इति ॥ ४२१ ॥ विवक्षाभेदेन ग्रामादिशब्दस्यानेकार्थत्वं वा कथमित्याशङ्क्य तद्विवरणपूर्वकं दार्ष्टान्तिकं प्रपञ्चयति *ग्राम इत्यादिना ॥ ४२२ ॥ ४२३ ॥ ४२४ ॥ ४२५ ॥ अव्याकृतपदस्योभयथाऽभिधायकत्वे साक्षिमात्रपरामर्शो न स्यादित्याशङ्कते *तर्हीति ॥ ४२६ ॥ उभयोः प्रकृतत्वेऽपि योग्यतावशादेकस्यैव परामर्शः सम्भवतीत्याह *जगदिति ॥ ४२७ ॥ अस्तु वाऽव्याकृतवाक्ये परस्याप्रकृतत्वं तथापि यन्मदन्यत् नास्तीत्यत्र प्रकृतत्वात्तस्यात्र शब्देन परामर्शो युक्त इत्याह *अथ वेति

तच्छब्देनोदितः साक्षी स परामर्शमर्हति ॥ ४२८॥
यद्वा विराडधिष्ठानं ब्राह्मणादावुदीरितम् ॥
आत्मशब्देन तस्यात्र परामर्शो भविष्यति ॥ ४२९॥
तच्छब्देन परामृष्टः साक्ष्यव्याकृतभासकः ॥
एतच्छब्देन कार्यस्थः प्रत्यक्षमुपदिश्यते ॥ ४३० ॥
अद्वितीयमधिष्ठानं कार्यस्थः सद्वयस्तयोः ॥
स एष इत्यभेदोक्तिर्दुष्करेति न चोद्यताम् ॥ ४३१॥
अज्ञातवस्तुतत्त्वस्य दुष्करं नास्ति किञ्चन ॥
नीलीकृतं नभः पश्य चक्षुषा नीलवस्त्रवत् ॥ ४३२ ॥
योग्यायोग्यव्यपेक्षेयं मानव्यवहृतौ भवेत् ॥

॥ ४२८ ॥ तत्रैव पक्षान्तरमाह *यद्वेति । *आत्मशब्देनेति ॥ आत्मैवेदमग्र इत्यत्रेत्यर्थः ॥ ४२९ ॥ सर्वथाऽपि युज्यते तच्छब्देन साक्षिपरामर्श इत्याह *तच्छब्देनेति । एतत्पदार्थमाह *एतदिति । कार्यस्थः बुद्धिस्थः प्रत्यगात्मेति यावत् ॥ ४३० ॥ स एष इति सामानाधिकरण्यात्तत्त्वम्पदार्थयोरुक्तमैक्यमाक्षिपति *अद्वितीयमिति । द्वैतस्याविद्यातो भानाद्वस्तुतो विरोधासिद्धेः सामानाधिकरण्यलब्धमैक्यमविरुद्धमिति परिहरति *न चोद्यतामिति ॥ ४३१ ॥ अज्ञानादपि कथमैक्यविरुद्धद्वैतधीरित्याशङ्क्य कुर्यान्मेरावणुधियमित्यत्रोक्तं स्मारयति *अज्ञातेति ॥ तत्र दृष्टान्तमाह *नीलीकृतमिति ॥ ४३२ ॥ चक्षुरयोग्यस्य नभसः कथं चाक्षुषत्वं तत्राह *योग्येति । अविद्याव्यवहारेषु योग्यायोग्यविभागापेक्षा नास्तीत्यत्र हेतुमाह *कल्पनेति । अज्ञानभूमयो विभ्रमास्तेषु न योग्यायोग्यविभागापेक्षा तेषां प्रतिभा-

कल्पनामात्रनिष्पत्तेर्नापेक्षाऽज्ञानभूमिषु ॥ ४३३ ॥
इहेत्यनेन सूत्रादिस्थाणुपर्यन्तविग्रहाः ॥
उच्यन्ते, तेषु जीवोऽयं विस्पष्टमुपलभ्यते ॥ ४३४ ॥
प्रविष्ट इति शब्देन चिदाभासतमोन्विता ॥
जीवत्वेनोपलब्धिर्या चितः सैषाऽभिधीयते ॥४३५॥
चिदाभासप्रवेशस्तु प्रत्यङ्मोहे स्वतो भवेत् ॥
तत्कार्येष्वनुवृत्तः स उपाधिश्चित्प्रवेशने ॥ ४३६ ॥
जपाकुसुमरक्तत्वं स्फटिके कल्प्यते यथा ॥
चिदाभासप्रवेशोऽयं चित्यध्यारोप्यते तथा ॥४३७॥
सूत्रादिस्थाणुपर्यन्तं जगत्सृष्ट्वा स्वमायया ॥
स्वाभासैकसहायेन स एव प्राविशत्परः ॥ ४३८ ॥
आनखाग्रेभ्य इत्युक्त्या मर्यादाऽस्य प्रवेशने ॥

समात्रदेहत्वादित्यर्थः ॥ ४३३ ॥ इहेतिपदस्यार्थमाह *इहेति । उक्तेऽर्थे हेतुमाह *तेष्विति ॥ ४३४ ॥ प्रविष्टपदार्थमाह *प्रविष्टेति । चैतन्यस्याविद्याद्वारा बुद्ध्युपाधौ प्रतिबिम्ब एव प्रवेश इति भावः ॥ ४३५ ॥ साभासतमःसहितस्य चैतन्यस्यैव जीवत्वेनोपलब्धिः प्रवेश इत्युक्तमुपपादयति *चिदाभासेति । मोहकार्येषु बुद्ध्यादिषु चित्प्रतिबिम्बे उपाधिभूतो यः साभासमोहः सोऽप्युपादानत्वात्तेष्वन्वेतीति बुद्धिस्थजीवस्य तमःसाहित्यमुपपन्नमिति भावः ॥ ४३६ ॥ तर्हि चिदाभासस्य प्रवेशो न चित इति परस्य प्रवेशकथनमयुक्तमिति तत्राह *जपाकुसुमेति ॥ ४३७ ॥ प्रवेशवाक्यार्थमुपसंहरति *सूत्रादिति ॥ स्वाभासैकसहायेन तद्द्वारेति यावत् ॥ ४३८ ॥ आनखाग्रेभ्य

उक्ता, स्पर्शेन चैतन्यं नखाग्रावधि लभ्यते ॥४३९॥
श्रुतिः—यथा क्षुरः क्षुरधानेऽवाहितः स्याद्विश्वम्भ-
रो वा विश्वम्भरकुलाये ॥
वा० सामान्येन विशेषाच्च चित् देहं व्याप्य वर्तते ॥
दृष्टान्ताभ्यां द्वयी वृत्तिर्द्विविधाभ्यामिहोच्यते॥४४०॥
दारु कृत्स्नमभिव्याप्य यथाऽग्निर्दारुणि स्थितः ॥
संव्याप्य तद्वदखिलं देहमात्मा व्यवस्थितः ॥ ४४१ ॥
तस्थावसंव्याप्य यथा क्षुरपात्रं क्षुरस्तथा ॥
श्रोत्रादिनाडीमध्यस्थस्तनुमव्याप्य संस्थितः॥४४२॥
क्षुरपात्रे स्थानभेदाद्विभिद्यन्ते यथा क्षुराः ॥
चैतन्यानि विभिद्यन्ते तथा नाडीविभेदतः ॥४४३॥
प्राप्नोति वृत्ती द्वे जीवः स्वप्नजाग्रदवस्थयोः ॥
सामान्यवृत्तिमेवैकां सुषुप्तेः प्रतिपद्यते ॥ ४४४ ॥

इत्यस्यार्थमाह *आनखेति । तत्रोपपत्तिमाह *स्पर्शेनेति ॥४३९॥

उक्तमर्थमुदाहरणेन स्पष्टयति श्रुतिः *यथेति। यथा लोके क्षुरधाने क्षुरो धीयतेऽस्मिन्निति क्षुरधानं तस्मिन्नापितोपस्करणपात्रे क्षुरोऽवहितः प्रवेशितः स्यात्। यथा वा विश्वम्भरो जाठराग्निरूपेण विश्वस्य भरणाद्विश्वम्भरः कुलाये नीडे काष्ठादाववहितः स्यादित्यनुवर्त्तते ॥

दृष्टान्तद्वयकथनस्य तात्पर्यमाह *सामान्येति॥४४०॥उक्तमेवार्थं श्रुतिव्याख्यानेन स्पष्टयति *दार्विति ॥४४१॥४४२॥ क्षुरपात्रस्थक्षुरवच्चैतन्यस्य शरीरैकदेशस्थत्वमनुपपन्नम् आनखाग्रमुपलम्भादित्याशङ्क्य तस्यार्थान्तरमाह*क्षुरपात्रेति॥४४३॥सामान्येन विशेषेण च जीवचैतन्यस्य देहे सर्वदाऽभिव्यक्तौ सुप्तावपि स्पर्शोपलम्भः स्यादिति तत्राह *प्राप्नोतीति ॥४४४॥ वृत्तिद्वय-

सामान्यवृत्तिर्या साऽत्र जीवनायोपयुज्यते ॥
विशेषवृत्तयो देहे शब्दाद्या लोचनोद्यताः॥ ४४५ ॥
प्रवेशवाक्यं पदशस्तात्पर्याच्च स्फुटीकृतम् ॥
तदनुग्राहको न्याय इदानीं प्रविचार्यते ॥ ४४६ ॥
किं देवदत्तगृहवत्प्रवेशो ऽथोपलादिवत् ॥
जलार्कबिम्बवत्किंवा यद्वा द्रव्यगुणादिवत् ॥ ४४७ ॥
फलबीजवदाहोस्वित्, नाद्यः सर्वगतत्वतः ॥
देवदत्तः परिच्छिन्नः सांशश्चात्मा तु नो तथा॥४४८॥
अव्यावृत्ताननुगतयाथात्म्यादात्मवस्तुनः ॥
परिच्छेदाद्यसम्भाव्यं नेतिनेतीति वारणात् ॥४४९ ॥
नातोऽनवच्छिन्नतनोर्निर्विभागात्मवस्तुनः ॥
पूर्वस्थानवियोगेन नृवत्स्थानान्तरागमः ॥ ४५० ॥
न द्वितीयोऽपरिणतेरश्मान्तः सर्परूपतः ॥
भूतानि परिणम्यन्ते न त्वात्मा परिणामवान् ॥४५१॥

स्याप्यावश्यकतामाह *सामान्येति ॥४४५॥४४६॥ *किमिति। देवदत्तस्य बहिःस्थितस्य गृहे प्रवेशवदित्यर्थः। *उपलादिवदिति। पाषाणस्य सर्पाद्याकारेण परिणामवत्परस्य जीवरूपेण परिणामः प्रवेश इत्यर्थः ॥ जलेऽर्कप्रतिबिम्बवत्, द्रव्ये गुणादेः प्रवेशवत्, फले बीजानां प्रवेशवच्चेत्यर्थः ॥ ४४७ ॥ ४४८ ॥ ॥ ४४९ ॥ ४५० ॥ *न द्वितीय इति। अपरिणतेः, आत्मन इत्यनुषङ्गः। अश्मादिरूपेण स्थितभूतपञ्चकस्याश्मान्तः सर्पाद्याकारेण परिणामवन्नात्मनः परिणामः सम्भवतीत्यर्थः ॥ तदेव व्यतिरेकेणाह *न त्विति। निर्विकारत्वश्रुतेरिति भावः

न तृतीयोऽर्कजलयोरिव देहचिदात्मनोः ॥
न संयोगविभागौ स्तो येन तद्वत्प्रवेशनम् ॥४५२ ॥
न चतुर्थो ऽपारतन्त्र्यात्, द्रव्यतन्त्रा गुणादयः ॥
न त्वात्मा देहतन्त्रोऽयं सर्वेश्वर इति श्रुतेः ॥४५३॥
न पञ्चमो ऽविक्रियत्वाद्बीजं विक्रयया युतम् ॥
षड्भावविक्रियाहीन आत्मा शास्त्रेषु सम्मतः ॥४५४ ॥
आधाराधेयता सर्पशिलयोः फलबीजयोः ॥
अंशांशितेति वैषम्यान्न तत्र पुनरुक्तता ॥ ४५५ ॥
परिच्छिन्नो जीव एव देहेषु प्रविशत्वतः ॥
न दोष इति चेन्मैवं स्रष्टुरेव प्रवेशनात् ॥ ४५६ ॥
तत्सृष्ट्वाऽथ तदेवानु प्राविशत्स इति श्रुतेः ॥
स्रष्टप्रवेष्ट्रोरेकत्वं स्याद् भुक्त्वा व्रजतीतिवत् ॥४५७॥
ततः केनाप्युपायेन प्रवेशो घटते नहि ॥
इति प्राप्ते पूर्वपक्षे प्रवेश उपपाद्यते ॥ ४५५८ ॥
अप्रविष्टस्वभावोऽयं दिग्देशाद्यनभिप्लुतेः ॥
कल्पितोऽस्य प्रवेशः स्याज्जलपात्रार्कबिम्बवत् ॥४५९॥

॥ ४५१ ॥ ४५२ ॥ न चतुर्थ इति । आत्मन इत्यनुषङ्गः । अपारतन्त्र्यमेव व्यनक्ति *न त्विति । अविक्रियत्वादात्मन इत्यनुषङ्गः ॥ ४५३ ॥ ४५४ ॥ ४५५ ॥ अस्तु तर्हि जीवस्यैव प्रवेशः उक्तदोषाभावादित्याशङ्क्य निराकरोति *परिच्छिन्न इत्यादिना ॥ ४५६ ॥ ४५७ ॥ ४५८ ॥ किं परस्य वास्तवप्रवेशो निषिध्यते काल्पनिको वा ? तत्राद्यमङ्गीकृत्य द्वितीयं प्रत्याह *कल्पित इति ॥ ४५९ ॥ यदुक्तमुपाधिबिम्बयोः संयोगाद्यभावे तत्र न प्रतिबिम्ब-

विभागाद्यंशवैषम्येऽप्यस्ति साम्यं विवक्षितम् ॥
उपाधिस्थोपलब्ध्यादि साम्यं केन निवार्यते॥ ४६० ॥
उपाधावुपलभ्यत्वमन्यथात्वेन भासनम् ॥
बहुत्वभानमित्येतत् दृष्टदार्ष्टान्तियोः समम् ॥ ४६१ ॥
तेजोऽधिकं रवेर्बिम्बमशक्यं द्रष्टुमञ्जसा ॥
तथापि जलमध्ये तद्बिम्बं सम्यगवेक्ष्यते ॥ ४६२ ॥
स्वयम्प्रकाश आत्मैवं नोपलभ्योऽनुपाधिकः ॥
जडदेहाद्युपाधौ तु विस्पष्टमुपलभ्यते ॥ ४६३ ॥
दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम् ॥
प्राप्नुवन्त्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम् ॥४६४॥
देहाद्युपप्लुतैवं धीरात्मानं व्याप्नुवत्यसौ ॥
अविक्रियं विक्रियाभिर्युक्त इत्येव भासयेत् ॥ ४६५॥
एकोऽप्यनेकधा भाति तरणिः पात्रभेदतः ॥

सम्भव इति, तत्राह *विभागादीति ॥ ४६० ॥ विवक्षितांशसाम्यमेवोपपादयति *उपाधाविति । *दृष्टेति । दृष्टान्तदार्ष्टान्तिकयोरित्यर्थः ॥ ४६१ ॥ ४६२ ॥ ४६३ ॥ उपाधावुपलभ्यमानत्वमात्मनो दृष्टान्तपूर्वकमुपपाद्यान्यथात्वेन भासनं दर्शयितुं दृष्टान्ते तदुपपादयति *दर्पणेति । बाह्यार्थग्रहणाय प्रवृत्ता दृष्टिः सन्निकृष्टदर्पणेन स्वच्छद्रव्येण प्रतिहता व्यावृत्य ग्रीवास्थमेव मुखं व्याप्नुवती तदेव मुखं दर्पणस्थत्वेन साभिमुखत्वेन च दर्शयेदित्यर्थः ॥ ४६४ ॥ दार्ष्टान्तिके विपरीतभानं दर्शयति *देहादीति । शुद्धात्मानं ग्रहीतुं प्रवृत्ता धीरज्ञानारोपितदेहद्वयप्रतिबद्धा सती उपहितमात्मानं व्याप्नुवती तं विपरीततया दर्शयेदित्यर्थः ॥ ४६५ ॥ बहुत्वभानं सदृष्टान्तमुपपा-

एवं नानादेहभेदाद् भ्रान्त्याऽऽत्मैकोऽप्यनेकधा॥४६६॥
निर्धूताशेषनानात्वतद्धेतुरविभागवान् ॥
अनन्यसाक्षिकोऽपीदृक् स्यात्प्रवेशभ्रमादयम् ॥४६७॥
द्रष्ट्रादिरूपरहितः प्रत्यगात्माऽभवत्पुरा ॥
नामरूपजनौ सत्यां द्रष्टृत्वादियुतो भवेत ॥ ४६८ ॥
द्रष्टृश्रोत्रादिरूपो यो यश्च द्रष्ट्रादिवर्जितः ॥
बुद्धितत्कारणोपाधी क्षेत्रज्ञेश्वरसंज्ञकौ ॥ ४६९ ॥
जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ॥
स सर्वसाक्षी पूर्वाभ्यामुपलक्षणमर्हति ॥ ४७० ॥

दयति *एक इति । ॥४६६॥ उक्तमेव स्पष्टयति *निर्धूतेति । तस्य नानात्वस्य हेतुर्धर्मिग्रहादिः । निर्धूतम् अशेषं नानात्वं तद्धेतुश्च यत्र स यथा । केवलभेदाभावेऽप्यभेदसहितस्य भेदस्य सत्त्वमाशङ्क्याह *अविभागवानिति । प्रकाश्यप्रकाशकत्वेनापि न भेद इत्याह *अनन्येति ॥ ४६७ ॥ उक्तमर्थमनुवदन् "ईदृक् स्यात्" इत्युक्तं व्याचष्टे *द्रष्ट्रादीति । सर्गात्पूर्वमेकरसमेव ब्रह्म उत्तरकालं बुद्ध्यादिसम्बन्धाज्जीवत्वं प्राप्नोतीत्यर्थः ॥ ४६८ ॥ तर्हि नामभेदात्तयोर्वस्तुतः भेदः स्याद् घटपटवादित्यत आह *द्रष्ट्रिति । बुद्ध्युपाधिकस्य प्रमातुः कारणोपाधिकस्य च परस्यौपाधिकभेदादेव संज्ञाभेदा इत्यर्थः ॥ ४६९॥ ननु कार्यकारणोपाधिविशिष्टयोर्जीवेश्वरत्वे तयोर्जडत्वेन बुद्ध्यादिभासकत्वं न स्यात्तत्राह *जिघ्राणीति । अहं जिघ्राणीति गन्धधीकर्तृत्वेन स्थितमात्मानम् अविक्रियः सन् यो वेत्ति स एव बुद्ध्यादिसाक्षी, विशिष्टस्याप्रकाशकत्वेऽपि पूर्वोक्तोपाधिद्वयोपलक्षितं चैतन्यं बुद्ध्यादिभासकमित्यर्थः ॥४७०॥ विशिष्टादुपलक्षितो भिन्न इत्ये·

अप्पात्रोत्थापिताद्भानोर्दिवि भानुर्यथेक्ष्यते ॥
सर्वसाक्षी तथा धीस्थात्कर्तृभोक्त्रादिलक्षणात्॥४७१॥
प्रकाशात्मा यथा चन्द्रः शाखाग्रादतथाविधात् ॥
लक्ष्यस्तथा चिदात्मापि कारणोपाधितो जडात्॥४७२॥
जीवत्वभ्रान्तिरेषैवं प्रत्यग्बोधोपयोगतः ॥
जलपात्रार्कसाम्येन प्रवेश इति कल्प्यते ॥ ४७३ ॥
दिग्देशकालशून्यस्य प्रवेशो बिलसर्पवत् ॥
न त्वजस्य परस्यास्ति तेनाविद्याप्रकल्पितः ॥ ४७४॥
अविद्यया तु साक्ष्येष केवलोऽप्याविवेकतः ॥
बुद्ध्यादिकार्यगैर्धर्मैः प्रतिबिम्बवदिष्यते ॥ ४७५ ॥
अग्निः सूर्यो मरुच्चेति दृष्टान्ताः श्रुत्युदीरिताः ॥
अप्रविष्टस्वभावोक्ताः कार्यमात्माऽऽविशज्जगत् ॥४७६॥
अग्निर्यथैको भुवनं काष्ठलोष्टादिरूपकम् ॥
प्रविष्टः प्रतिरूपोऽभूदप्रविष्टोऽपि सन्स्वतः ॥ ४७७॥

तद् दृष्टान्तमुखेन दर्शयति *अप्पात्रेति । भानोः, भिन्नत्वेनेति शेषः ॥ ४७१ ॥ नन्वीश्वरसाक्षिणोर्भेदे जगत्कारणत्वादिकं न साक्षिलक्षणं स्यात्, तथा चाद्वितीयब्रह्मलक्षकजन्मादिसूत्रमसङ्गतं स्यात्तत्राह *प्रकाशेति ॥ ४७२ ॥ उक्तमर्थमुपसंहरति *जीवत्वेति ॥ ४७३ ॥ प्रवेशः किमर्थमाविद्यकः कल्प्यते ? तत्राह *दिग्देशेति ॥ ४७४ ॥ तस्य आविद्यत्वेऽनवद्यतामाह *अविद्ययेति । यथा मुखं स्वतः श्यामत्वादिहीनम् उपाधियोगात्प्रतिबिम्बद्वारा श्यामतादिशालिवत् दृश्यते; तथा शुद्धोऽप्यात्माऽविद्यया बुद्ध्यादितादात्म्यापन्नः कर्त्रादिमान् दृश्यते इत्यर्थः॥४७५॥

आत्मनः कल्पितप्रतिबिम्बाख्यप्रवेशे दृष्टान्तत्वेनोक्तकठवल्लीवाक्यान्युदाहरति *अग्निरित्यादिना ॥ ४७६ ॥ ४७७ ॥

वायुर्यथैको भुवनं नानाव्यजनरूपकम् ॥
प्रविष्टो बहुरूपोऽभूदप्रविष्टोऽपि सन्स्वतः ॥ ४७८ ॥
सूर्यो यथोदपात्रेषु प्रविष्टो बहिरेव सन् ॥
तथाऽऽत्माप्यप्रविष्टः सन्प्रविष्ट इति कल्प्यते ॥४७९॥
यथा सृष्ट्यादयः क्लृप्ताः प्रवेशोऽपि तथेक्ष्यताम् ॥
युक्त्या नैवोपपद्यन्ते सृष्ट्याद्याः कल्पिताः स्वतः॥४८०॥
नासतो जन्मना योगः सतः सत्त्वं न चेष्यते ॥
कूटस्थे विक्रिया नास्ति दस्मादज्ञानतो जनिः ॥४८१॥
रूपं रूपमितीयं तु स्पष्टमृक्प्रत्यगात्मनः ॥
याथात्म्यदर्शनायैव सृष्ट्यादीन्यभ्यभाषत ॥ ४८२ ॥
क्षुरपात्राख्यदृष्टान्ताद्विशेषेण प्रवेशनम् ॥
इन्द्रियेष्वतिविस्पष्टमुपलभ्यत्वमात्मनः ॥ ४८३ ॥
यदग्निकाष्ठदृष्टान्तात्सामान्येन प्रवेशनम् ॥
तदधिष्ठानरूपेण कार्यव्यापित्वमुच्यते ॥ ४८४ ॥
अधिष्ठानारोप्यभावमन्तरेण न कुत्रचित् ॥

॥४७८॥४७९॥ किञ्च प्रवेशः कल्पितः अविक्रियब्रह्मकर्तृत्वात् सृष्ट्यादिवदित्याह *यथेति । साध्यवैकल्यपरिहाराय दृष्टान्ते कल्पितत्वं साधयति *युक्त्येति ॥ ४८० ॥ ४८१ ॥ किमर्थं तर्हि श्रुतौ सृष्ट्यादिकथनमित्याशङ्क्य श्रुत्यैव तत्प्रयोजनं चोक्तमित्याह *रूपमिति । अस्या ऋचोऽर्थश्चतुर्थे वक्ष्यते ॥४८२॥ पूर्वं क्षुरपात्रदृष्टान्तेनाग्निकाष्ठदृष्टान्तेन च जीवचैतन्यस्यानखाग्रं त्वगिन्द्रियादौ विशेषतः उपलभ्यमानत्वं विशेषेण प्रवेशनं, सामान्यतो देहं व्याप्य वर्त्तमानत्वं सामान्यप्रवेशः, इति यदुक्तं तत्र द्वितीयदृष्टान्ते चैतन्यस्य देहव्यापित्वमुपपादयितुमुक्तार्थमनु-

व्याप्यव्यापकयोः कृत्स्नस्वरूपव्याप्तिरीक्ष्यते ॥४८५॥
अत्यन्तभिन्नयोर्व्याप्तिर्नहि दृष्टा गवाश्वयोः ॥
नाप्यत्यन्तमभिन्नस्य, व्याप्यव्यापकवर्जनात् ॥४८६॥
भेदाभेदौ वास्तवौ तु दुर्लभौ तेन शिष्यते ॥
अधिष्ठानारोपितयोरेव व्याप्तिर्बलादियम् ॥ ४८७ ॥
तमसैव यथा सर्पे स्रक् प्रविष्टा नतु स्वतः ॥
प्रत्यगज्ञानकार्याणि स्वात्मैवं मायया ऽऽविशत् ॥४८८॥
व्यापित्वमुपलभ्यत्वमिति द्वेधा प्रवेशनम् ॥
सिद्धं, प्रविष्टात् ये दोषास्तान्निराचक्ष्महेऽधुना ॥४८९॥
पर एव प्रविष्टश्चेत् प्रविष्टानामनेकतः ॥
तदनन्यत्वतः प्रापन्महेशस्याप्यनेकता ॥ ४९० ॥
नैषदोषोऽस्य चोद्यस्य विपरीतत्वसम्भवात् ॥
बहूनामेकतादात्म्यादेकत्वं किं न चोद्यते ॥ ४९१ ॥
नियामकस्त्वागमोऽत्र स च भेदं निवारयेत् ॥

वदति *क्षुरेत्यादिना ॥ ४८३ ॥ ४८४ ॥ ४८५ ॥ ४८६ ॥ अधिष्ठानस्यारोप्येण संयोगाद्यसम्भवात्कथं तद्व्यापित्वमित्याशङ्क्य कल्पिततादात्म्येनाधिष्ठानस्यैवारोप्यव्यापित्वं नान्यस्येत्याह *अधिष्ठानेति ॥ ४८७ ॥ दृष्टान्तावष्टम्भेन प्रवेशविचारमुपसंहरति *तमसेति । स्वाज्ञानादेव स्रजो भुजङ्गे प्रवेशवत्प्रतीचोऽपि स्वाज्ञानोत्थे जगत्यज्ञानादेव प्रवेशो न परमार्थत इत्यर्थः ॥४८८॥ प्रविष्टाद्धेतोः, प्रविष्टं परमुपजीव्य तस्मिन्नानात्वदुःखित्वादिदोषा ये वादिभिरापाद्यन्ते ते निराक्रियन्त इत्यर्थः ॥४८९॥४९०॥४९१॥ एकस्य बहुभिरभेदादनेकत्वं बहूनामेकस्मादभेदादेकत्वं वेति विशये श्रुतियुक्तिभ्यामैक्य-

कल्प्यैः सर्पादिभिर्भेदैर्नतु रज्जुर्विभिद्यते ॥ ४९२ ॥
एको देवो निविष्टोऽत्र बहुधेति श्रुतीरणात् ॥
वियद्वदेक एवैष ईश्वरोऽभ्युपगम्यताम् ॥ ४९३ ॥
संसारित्वात्प्रविष्टानां परस्य तदभेदतः ॥
संसारित्वं प्रसक्तं चेत्, न, क्षुधाद्यत्ययश्रुतेः ॥४९४॥
सुखदुःखविमोहादिदर्शनान्नेति चेत्, न तत् ॥
न लिप्यते लोकदुःखैर्लोकबाह्य इति श्रुतेः ॥ ४९५ ॥
उपाधिजनितो योऽयं चिदाभासोऽवभासते ॥
दुःखाद्यनुभवस्तत्र सावकाशो भविष्यति ॥४९६ ॥
दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भवेत् ॥
दुःखिनः साक्षिता नैव साक्षिणो दुःखिता तथा॥४९७॥
नर्ते स्यात् विक्रियां दुःखी साक्षिता का विकारिणः॥
धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ॥४९८॥

मेवेति निश्चय इत्याह *नियामक इत्यादिना ॥ ४९२ ॥ ४९३ ॥ *न क्षुधेति । "अशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" इति श्रुतेरित्यर्थः ॥ ४९४ ॥ अनुभवमनुसृत्य शङ्कते *सुखेति । न, क्षुधादिवैधुर्यमिति शेषः ॥ ४९५ ॥ का तर्ह्यनुभवस्य गतिस्तत्राह *उपाधीति ॥ ४९६ ॥ ननु साक्षिण्येव दुःखित्वं किन्न स्यादित्यत आह *दुःखीति । दुःख्येव कश्चित् दुःखिनः साक्षीत्याशङ्क्याह *दुःखिन इति। तथा इत्युक्तेति यावत्॥४९७॥ दुःखित्वसाक्षित्वयोरेकत्रायोगे हेतुमाह *नेति । परिणामित्वं विना न दुःखितेत्यर्थः । परिणामित्वेऽपि साक्षित्वमित्याशङ्क्याह *साक्षितेति । तस्य जाड्यादसाक्षितेत्यर्थः । विकारिणोऽसाक्षित्वे फलितमाह * धीविक्रियेति ॥ ४९८ ॥ दुःखादेः सा-

शरीरेन्द्रियसङ्घाते आत्मत्वेनाभिमानिनीम् ॥
चिदाभासयुतां बुद्धिं विशिंषन्ति सुखादयः ॥४९९॥
उदासीनो यथा पश्येद्दण्डिनं कलहोदितम् ॥
सुखदुःखादिमद्बुद्धिं साक्षी तद्वदसंहतः ॥ ५०० ॥
एवंसति पराच्येव दुःखं प्रत्यक्षमिष्यताम् ॥
प्रतीच्यात्मनि वेदोऽयमक्षादीनि निषेधति ॥ ५०१ ॥
विज्ञातारमरे केन विजानीयादिति श्रुतिः ॥
विदिताविदिताभ्यां तदन्यदेवेति च श्रुतेः ॥ ५०२ ॥
अहं सुखीति विज्ञानमात्मच्छायैककर्मकम् ॥
आत्मन्यारोप्यते भ्रान्तैर्विद्वद्भिश्चोपचर्यते ॥ ५०३ ॥
नासिकाग्रे महद्दुःखं पादाङ्गुष्ठाग्र इत्यपि ॥
देहावयवगं दुःखं दृष्टमात्मनि तत्कथम् ॥ ५०४ ॥

भासबुद्धिनिष्ठत्वमुक्तमेव प्रपञ्चयति *शरीरेति ॥ ४९९ ॥ किञ्चोदासीनस्यैव साक्षित्वात्तस्य कर्तृनिष्ठदुःखादिना न सम्बन्ध इति सदृष्टान्तमाह *उदासीन इति ॥५००॥ आत्मनो दुःखित्वाभावे सिद्धेऽहं सुखीति सुखविशिष्टत्वेनानुभवादात्मन इन्द्रियाद्यगोचरत्वश्रुतिरुपचरितार्थेति केश्चिदुक्तमपास्तं; तयोर्भिन्नविषयत्वेनाविरोधादित्याह *एवं सतीति ॥ ५०१ ॥ आत्मनः प्रत्यक्षाद्यविषयत्वबोधकश्रुतिमुदाहरति *विज्ञातारमिति । तत्रैव श्रुत्यन्तरमाह *विदितेति । श्रुतेः, नाक्षगोचर आत्मेति शेषः ॥ ५०२ ॥ कथं तस्याविशेषेणाविदुषां विदुषां चाहं सुखीत्यात्मनिष्ठतया सुखित्वव्यवहारस्तत्राह *अहमिति ॥ ५०३ ॥ आत्मनो दुःखित्वाभावे हेत्वन्तरमाह *नासिकेति ॥ ५०४ ॥ किञ्च दुःखमात्मनि व्याप्यवृत्ति न

प्रतीचि चेद्भवेद् दुःखं व्याप्नुयाद्बोधवद्वपुः ॥
चिद्वद् द्रष्टृस्वरूपत्वात्प्रतिकूलं च नो भवेत् ॥५०५॥
आत्मनस्त्वेव भोगाय सर्वं प्रियमिति श्रुतेः ॥
सुखमात्मैकविषयमिति चेत्, तन्न युज्यते ॥ ५०६ ॥
यत्र वाऽन्यस्य क्लृप्तिः स्यात्तत्रान्योऽन्यत्प्रपश्यति ॥
इति भ्रान्तात्मविषयं श्रुतं द्वैतं सुखात्मकम् ॥ ५०७॥
यत्र त्वात्मैव सर्वं स्यात्तत्र कं केन पश्यति ॥
इति बुद्धात्मनि द्वैतं सुखदुःखादि वारितम् ॥५०८॥
तुभ्यं न रोचते पापात् मया त्वित्यनुभूयते ॥
प्रत्यक्प्रवणया दृष्ट्या संसारः कोऽपि नात्मनि॥५०९॥
इच्छाद्वेषादिमानात्मेत्येवं समयबन्धनम् ॥
तार्किकैः क्रियतां, तत्तु नैव युक्त्योपपद्यते ॥ ५१० ॥

वा ? आद्ये देहाद्बहिरपि तद्धीः स्यादित्याह *प्रतीचीति । अन्त्ये आत्मनः प्रदेशाभावात्, कल्पितप्रदेशाश्रयत्वे दुःखमपि तथा स्यादिति भावः । अपिच दुःखस्यात्मधर्मत्वे ज्ञानवत्प्रतिकूलवेदनीयत्वं न स्यादित्याह *चिद्वदिति ॥ ५०५ ॥ श्रुतिवशात्सुखस्य तावदात्माश्रयत्वं वक्तव्यम्, अतस्तदविनाभूतदुःखमपि तत्रैव स्यादित्याशङ्कते *आत्मन इति । आत्मन्याविद्यकसंसारानुवादेन परमानन्दत्वप्रतिपादकम् "आत्मनस्तु कामाय" इति वाक्यं, नतु तस्य सुखित्वप्रतिपादकमिति मत्वा समाधत्ते *तन्नेति ॥५०६॥ तत्र गमकमाह *यत्रेति ॥५०७॥५०८॥ विद्वत्प्रत्यक्षविरोधाच्च नात्मनः संसारितेत्याह *तुभ्यमिति ॥ ५०९ ॥ आत्मनोऽसंसारित्वं तार्किकसमयविरुद्धमित्याशङ्क्य श्रुतियुक्तिविरुद्धत्वात्समय एवानुपपन्न इत्याह *इच्छेति॥५१०॥

नित्यानुमेय आत्मा चेत् मनसा तस्य दुःखिता ॥
न भायात्,दृश्य आत्मा चेद् द्रष्टृभावः प्रसज्यते॥५११॥
द्रष्टृत्वं दृश्यता चास्य निरंशत्वान्न युज्यते ॥
सांशत्वे स्यादनित्यत्वं नातो दुःखित्वमात्मनः॥५१२॥
अदुःखित्वे परस्येष्टे तदन्यस्याप्यभावतः ॥
कस्य दुःखनिवृत्त्यर्थमारब्धोपनिषत्त्वया ॥ ५१३ ॥
प्रत्यगज्ञानहेतूत्थदुःखित्वादिभ्रमो ऽत्र यः ॥
तद्ध्वंसमात्रसिद्ध्यर्थमारब्धोपनिषन्मया ॥ ५१४ ॥
नवसङ्ख्येयमात्रेक्षी दशमां विभ्रमाद्यथा ॥
न वेत्ति दशमोऽस्मीति स्वीक्षमाणोऽपि तान्नव॥५१५॥
निःशेषानात्मदृक्तद्वदनिर्ज्ञातात्मतत्त्वकः ॥

संसार्येवात्मा नित्यानुमेयश्चेति केचित्, तन्मतमनूद्य विकल्प्य निराह *नित्येति ॥ ५११ ॥ जडाजडत्वादात्मनो दृश्यत्वं द्रष्टृत्वं चोपपद्यत इत्याशङ्क्य, किमात्मा निरंशः सांशो वा ? नाद्यः इत्याह *द्रष्टृत्वमिति । अन्त्यं निराह *सांशत्व इति । स्वपक्षं निगमयति *नात इति ॥ ५१२ ॥ आत्मनो निर्दुःखत्वे तद्व्यतिरिक्तस्य दुःखिनोऽप्यभावाद् दुःखोच्छेदाय त्वन्मते शास्त्रारम्भो वृथेति शङ्कते *अदुःखित्व इति ॥५१३॥ आत्मन्यारोपितदुखोच्छेदार्थमस्मन्मते शास्त्रारम्भः, इति परिहरति *प्रत्यगिति ॥ ५१४ ॥ आत्मनो ऽविद्यासंसारनिवृत्त्यर्थं शास्त्रमित्येतत् दृष्टान्तेन साधयिष्यन्नादौ तस्याविद्यावत्त्वे दृष्टान्तमाह *नवेति । *स्वीक्षमाणोऽपीति । स्वातिरिक्तान्नव पुरुषान्पश्यन् स्वज्ञानं प्राप्तमपि न लभते ऽज्ञानसामर्थ्यादित्यर्थः ॥५१५॥ दार्ष्टान्तिकमाह *निःशेषेति । स्वातिरिक्तानहङ्कारादीनात्मना

न वेत्त्यैकात्म्यमस्मीति स्वीक्षमाणोऽप्यनात्मनः॥५१६॥
दशमोऽस्मीति वाक्योत्थसम्यग्ज्ञानानलार्चिषा ॥
प्लुष्ट्वाऽऽत्मदशमाज्ञानं दशमोऽस्मीति वीक्षते॥५१७॥
तथा तत्त्वमसीत्यादिवाक्योत्थज्ञानवह्निना ॥
प्लुष्ट्वाऽत्रात्मतमस्तज्जं चैकात्म्यं प्रतिपद्यते ॥ ५१८ ॥
प्रत्यगज्ञानहेतूत्थशास्त्राचार्यादिसाधनः ॥
तद्विरुद्धं निजैकात्म्यं प्रत्यपद्यत मायया ॥ ५१९ ॥
प्रविष्टमुपजीव्यापि दोषः कोऽपि न वादिभिः ॥
इहापादयितुं शक्यः प्रवेशस्तेन सुस्थिरः ॥ ५२० ॥
श्रुतिः—तं न पश्यन्ति ॥
वा० नन्वेवं पर एवात्र प्रविष्टश्चेत्तदा जनाः ॥
पश्यन्ति तं विना शास्त्रमिति शास्त्रं वृथा भवेत् ॥५२१॥
अहं प्राणिम्यहं वच्मि पश्याम्येतच्छृणोमि तत् ॥
मन्येऽहमित्यहम्बुद्ध्या दृष्ट एवाखिलैः परः ॥ ५२२॥

सह साक्षात्कुर्वन्नपि ब्रह्माहमस्मीत्यनेन प्रकारेण न वेत्तीत्यर्थः ॥ ५१६ ॥ परस्याविद्यां दृष्टान्तेनोक्त्वा तद्विद्यया तद्ध्वंसमपि दृष्टान्तपूर्वकमाह *दशम इत्यादिना । प्लुष्ट्वा दग्ध्वा ॥५१७॥५१८॥ उक्तमर्थं सोपस्करमुपसंहरति *प्रत्यगिति । अज्ञानकृतशास्त्राचार्यादिद्वारोत्पन्नया मायया ब्रह्मविद्यया मायातत्कार्यविरुद्धमैक्यं यदा पुमान्प्रतिपन्नवान्, तदा तस्य सर्वानर्थध्वस्तिरिति शेषः ॥ ५१९ ॥ ५२० ॥ तं न पश्यन्तीति श्रुतिं व्याचिकीर्षुस्तद्व्यावर्त्यां शङ्कामाह *नन्विति । इतिशब्दो हेतौ । यस्माज्जनाः परं शास्त्रं विना पश्यन्ति तस्मात्तद् वृथा स्यादित्यर्थः ॥५२१॥ परदर्शनमभिनयति *अहमिति ॥ ५२२ ॥ शङ्कोत्त-

उच्यते तं न पश्यन्ति प्रविविक्षुं स्वतो जनाः ॥
नोच्छ्वासभाषणे दृष्टिश्रुती वा स्तोऽस्य नो मतिः ॥५२३॥
प्रविष्टस्यास्ति चेच्छ्वासभाषणाद्यस्तु तावता ॥
प्रवेष्टरि किमायातं शास्त्रबोध्यः स एव हि ॥५२४॥
प्रविष्टस्य प्रवेष्टुश्च रूपाभेदेऽपि भिन्नताम् ॥
प्रविष्टत्वाप्रविष्टत्वधर्माभ्यां को निवारयेत् ॥५२५॥
प्रविष्टं ये प्रपश्यन्ति नाप्रविष्टममी विदुः ॥
व्याधत्वेन प्रपश्यन्तो न विदू राजपुत्रताम् ॥ ५२६ ॥
व्याधोऽयमित्यसावुक्तिर्योजयेत्प्राणसङ्कटे ॥
राजदेवादिकोक्तिस्तु भवेद्बहुफलप्रदा ॥ ५२७ ॥

रत्वेन श्रुतिमवतारयति *उच्यत इति। तं परं प्रविविक्षुं प्रवेष्टुमिच्छन्तं बिम्बात्मानमित्यर्थः। पूर्वोक्तानुभवस्य परमात्माविषयत्वे हेतुमाह *नोच्छ्वासेति। दृष्टिश्रुती वा न स्तो, न भवत इत्यर्थः। नो मतिरस्य, मतिरपि नास्तीत्यर्थः ॥ ५२३ ॥ परस्यैव प्रविष्टत्वात्प्रविष्टे चोच्छ्वासादिप्रतीतेः कथं परस्मिन् तदसम्भव इति शङ्कते *प्रविष्टस्येति। जीवपरयोर्वास्तवाभेदेऽपि प्रविष्टत्वप्रवेष्टृत्वरूपोपाधिकभेदसत्त्वान्न परस्मिन् प्राणनादिव्यापारः इति गूढाभिसन्धिः परिहरति *अस्त्विति। प्रवेष्टरि बिम्बात्मनि ॥ ५२४ ॥ आशयमजानानस्य चोद्यमनूद्य तदुद्घाटयति *प्रविष्टस्येति ॥ ५२५ ॥ परमपि जीवत्वेन पश्यन्तो न परदर्शिन इति सदृष्टान्तमाह *प्रविष्टमिति। जीवत्वेनेति शेषः ॥ ५२६ ॥ किञ्चात्मन एकत्वेऽपि तस्य जीवत्वेन दर्शनमनर्थहेतुः, परत्वेन ज्ञानं पुमर्थहेतुरित्यत्रापि स एव दृष्टान्त इत्याह *व्याधोऽयमिति ॥ ५२७ ॥ दार्ष्टान्तिकमाह *तद्वदिति

तद्वत्प्रविष्टदृष्टिर्या सा संसारे नियोजयेत् ॥
अप्रविष्टात्मदृष्टिस्तु मोचयेत्सर्वसङ्कटात् ॥ ५२८ ॥
अतोऽप्रविष्टदृष्ट्यर्थं निन्द्यतेऽत्र प्रविष्टदृक् ॥
प्रविष्टदर्शनं यत्स्यान्न तद्दर्शनमात्मनः ॥ ५२९ ॥
अव्यावृत्तानुगतं प्रत्यग्वस्तु स्वतो मितेः ॥
तद्विरुद्धेह या दृष्टिर्मिथ्यारूपैव सा मता ॥ ५३० ॥
अयं मेयः प्रमाताऽहं मानमेतदितीक्षणे ॥
मिथ्याज्ञाने जनस्तुष्टः स्वप्नमायेन्द्रजालवत् ॥५३१॥
नन्वत्र तं न पश्यन्तीत्यनेन वचसोच्यते ॥
प्रविष्टदर्शनाभावः प्रविष्टस्यैव सन्निधेः ॥ ५३२ ॥
परात्मदर्शनाभावपरत्वेन कथं त्वया ॥
व्याख्यातमिति चेदत्र तच्छब्देनेति विद्धि भोः॥५३३॥
स एष इति पूर्वत्र तदेतच्छब्दयोः क्रमात् ॥

॥ ५२८ ॥ तं न पश्यन्तीति श्रुतितात्पर्यमुपसंहरति *अत इति । *न तद्दर्शनमिति । किन्तु मिथ्याज्ञानमेवेत्यर्थः ॥५२९॥ तस्य मिथ्याज्ञानत्वं वक्तुमात्मनो वास्तवं रूपमाह *अव्यावृत्तेति । प्रतीचः स्वत एकरसत्वे हेतुः *मितेरिति । विरुद्धदनुभवादित्यर्थः । उक्तस्वरूपविपरीतविषयत्वात्प्रविष्टदृष्टिर्मिथ्येत्याह *तदिति ॥५३०॥ मात्रादिप्रपञ्चस्य तुष्टिहेतुत्वदृष्टेर्न तस्य मिथ्यात्वमित्याशङ्क्य, मिथ्याधियोऽपि तुष्टिहेतुत्वं दृष्टमिति सदृष्टान्तमाह *अयमिति ॥ ५३१ ॥ एवमपि तच्छब्दस्य सन्निहितजीवपरामर्शित्वान्न पश्यन्तीति श्रुतिरयुक्तेति शङ्कते *नन्वित्यादिना ॥५३२॥ स एष इतिवाक्ये तच्छब्दोपस्थापितपरस्यापि प्रकृतत्वेन तत्परामर्शसम्भवान्नोक्तदोष इति

अप्रविष्टप्रविष्टौ द्वौ वाक्यार्थादुपवर्णितौ ॥ ५३४ ॥
एतच्छब्दं परित्यज्य तच्छब्देनात्र वर्णनात् ॥
अप्रविष्टं परात्मानं प्रत्याभिज्ञापयेच्छ्रुतिः ॥ ५३५ ॥
प्रविष्टदर्शनाभावोऽनुभूत्या च विरुध्यते ॥
अप्रविष्टादर्शनं तु प्राकृतैरनुभूयते ॥ ५३६ ॥
नन्वेकस्य परस्यैव प्रविष्टत्वं दशान्तरम् ॥
ततः प्रविष्टदृष्टौ स्यात्परस्यैवात्र दर्शनम् ॥ ५३७॥
राजानं भूषितं दृष्ट्वा न दृष्ट इति लौकिकाः ॥
न मन्यन्ते, परस्तेन दृष्ट एवात्र पामरैः ॥ ५३८ ॥
दृष्टान्तो विषमोऽन्ये तु दृष्टान्ताः प्रकृतोचिताः ॥
श्रूयन्तां दोषदुष्टार्था इहोदाहरणोचिताः ॥५३९ ॥
गङ्गोदकं पूतमपि श्वदृतौ धारितं पुनः ॥
अगङ्गोदकमित्याहुर्न हि तस्यास्ति पूतता ॥ ५४० ॥

समाधत्ते *अत्र तच्छब्देनेति ॥ ५३३ ॥ ५३४ ॥ ५३५ ॥ किञ्च जीवपरामर्शे न पश्यन्तीति श्रुतेर्बाधितविषयत्वेनाप्रामाण्यप्रसङ्गाद्योग्यतया व्यवहितोऽपि परः परामृश्यत इत्याह *प्रविष्टेति ॥ ५३६ ॥ समाहितमपि चोद्यं दृष्टान्तावष्टम्भेन पुनरुत्थापयति *नन्विति ॥ ५३७ ॥ *दृष्ट इति । राजेति शेषः ॥ ५३८ ॥ भूषितस्यापि राज्ञो निर्दुष्टत्वात् जीवस्य पुनरज्ञानारोपितकर्तृत्वादिमलैर्दुष्टत्वान्न दृष्टान्तसाम्यम्, इति परिहरति । *दृष्टान्त इति । के तर्हि प्रकृतोचिता दृष्टान्तास्तत्राह *श्रूयन्तामिति ॥ ५३९ ॥ ५४० ॥ *पूरयेदिति । आशीर्वादेन कथनमिति शेषः । शुद्धोऽप्यग्निः श्मशानसम्बन्धाद्यथाऽशुद्धः, यथा हीनवेषधरो राजा ऽराजेत्येवमाद्युदाहार्यमित्याह *अ-

नमस्कृतोऽशुचिर्विप्रो नमस्कारवतां नहि ॥
पूरयेदेवमेवाऽन्ये ऽप्युदाहार्या दिशाऽनया ॥५४१॥
श्रुतिः—अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनः ॥
वा० स्वतः परोऽपि देहादौ प्रविष्टोऽकात्स्न्र्यदोषतः ॥
दूषितो दर्शनं तस्य न भवेत्परदर्शनम् ॥ ५४२ ॥
अकृत्स्नत्वं यथाऽस्य स्याद्व्यवहारे तथोच्यते ॥
श्वासयोगात्प्राणिता स्याद्वक्ता वदनयोगतः ॥५४३॥
द्रष्टा दर्शनयोगेन श्रोता श्रवणयोगतः ॥
मन्ता मननयोगेन स्प्रष्ट्रादौ योजयेत्तथा ॥ ५४४ ॥
एवं चाहं प्राणितेति ज्ञाते वक्त्राद्यसङ्ग्रहः ॥
वक्ताऽहमित्यपि ज्ञाते प्राणित्रादेरसङ्ग्रहः ॥ ५४५ ॥
यतिदीक्षितचोरादिभूमिका धारयेन्नरः ॥

न्येऽपीति ॥५४१॥ तं न पश्यन्तीत्यनेन प्रविष्टदर्शनस्य आरोपितविषयत्वान्न परविषयत्वं, तत्र श्रुत्या हेतुः उक्तः *अकृत्स्नो हीति ॥ तद्व्याचष्टे *स्वत इति ॥५४२॥ प्रविष्टस्याकृत्स्नत्वं च स प्राणन्नेवेत्यादिश्रुत्योक्तं, तद्व्याचष्टे *अकृत्स्नत्वमिति ॥ ५४३ ॥ वदनादिशब्दोऽनुक्तेन्द्रियव्यापारोपलक्षणमित्याह *स्प्रष्ट्रेति ॥ ५४४ ॥ नन्वात्मनः प्राणनादिक्रियाकर्तृत्वेन लावकपाचकादिवत्प्राणनादिसंज्ञाऽस्तु, तथापि कथम् अकृत्स्नत्वं? तत्राह *एवं चेति ॥५४५॥ प्राणनादिक्रियाविशिष्टात्मदृष्टेर्वदनक्रियाविशिष्टात्माविषयत्वादेकैकक्रियाविशिष्टस्य अकृत्स्नत्वमित्येतत् दृष्टान्तेनाह *यतीति । कश्चिच्छैलूषो भिक्षुदीक्षितादिवेषान् क्रमेण धत्ते, तत्र दीक्षितदर्शनस्य यत्यादिविषयत्वं यथा

तत्र दृष्टे दीक्षितेऽन्ये दृष्टा यत्यादयो नहि ॥५४६ ॥
यस्मिन्दृष्टे ह्यदृष्टोऽन्यो द्रष्टव्यः शिष्यते तथा ॥
अदृष्टेऽप्यन्यदृष्टिः स्यादकृत्स्नस्तादृगुच्यते ॥५४७॥
प्रत्येकं दीक्षिताद्याश्च प्राणित्राद्याश्च तादृशाः ॥
अतोऽकृत्स्ना इमे ज्ञेयास्तदृदृष्टिस्तेन नात्मदृक्॥५४८॥
अत्र केचिन्महात्मानोऽकृत्स्नत्वेन विनिन्दनात् ॥
अशेषोपाधिसंयुक्तः परात्मेति प्रचक्षते ॥ ५४९ ॥
मृत्योः स मृत्युमाप्नोति योऽत्र नानेव पश्यति ॥
इत्यादिना विरुद्धं तन्महतामेव शोभते ॥ ५५० ॥
कर्त्राद्युपाधयः कृत्स्नाः परस्परविभेदिनः ॥
निरुपाधिक आभान्ति ह्यागमापायसाक्षिणि ॥५५१॥

नास्ति तद्वद् इत्यर्थः ॥ ५४६ ॥ अकृत्स्नो हीत्यादेः स योऽत इत्यस्मात्प्राक्तनसन्दर्भस्य तात्पर्यमुक्त्वाऽकृत्स्नपदार्थमाह *यस्मिन्निति । यस्मिन्भगवत्पादपद्मे दृष्टेऽदृष्टोऽन्यो मुखेन्दुर्द्रष्टव्यत्वेन शिष्यते, तथाऽन्यदृष्टिरपि । यस्तु द्रष्टव्यत्वेन शिष्टो मुखेन्दुः पूर्वदृष्टादन्यस्तज्ज्ञानमप्यदृष्टे स्याददृष्टविषयं स्यात्, मुखमात्रगोचरं स्यादिति यावत् । तादृशः पादपद्मो मुखेन्दुश्च प्रत्येकमकृत्स्न इत्यर्थः ॥ ५४७ ॥ उक्तमकृत्स्नत्वं पूर्वोक्तदृष्टान्तदार्ष्टान्तिकयोर्योजयति *प्रत्येकमिति । फलितमाह *अत इति । प्राणित्रादेरकृत्स्नत्वे तद्दृष्टिर्यथा भूतात्मगोचरा न भवतीत्यर्थः ॥ ५४८ ॥ अकृत्स्नो हीत्यादिश्रुतेः स्वाभिमतमर्थमभिधाय परोक्तमर्थमनुभाष्य दूषयति *अत्रेत्यादिना ॥ ५४९ ॥ ५५० ॥ तस्मात्कर्तृत्वादेः कल्पितत्वमेव युक्तमित्याह *कर्त्रादीति । अकृत्स्नत्वे हेतुः *परस्परेति ॥ ५५१ ॥

साक्षिरूपं स्वतःसिद्धं सर्वेष्वव्यभिचारतः ॥
कर्त्रादयः स्वतोऽसिद्धाः बहुधा व्यभिचारतः ॥५५२॥
देशतः कालतो रूपादवस्थातोऽर्थधर्मतः ॥
सदा व्यभिचरन्त्यन्ये कर्त्राद्याः प्रत्यगात्मनि॥५५३॥
अज्ञातायां यथा रज्ज्वां तदध्यस्तैकरूपिणाम् ॥
व्यभिचारः स्रगादीनां प्रतीच्येवमनात्मनाम् ॥५५४॥
श्रुतिः—तान्यस्यैतानि कर्मनामान्येव ॥
वा० संयुक्तो नामरूपाभ्यां प्राणनादिषु कर्मसु ॥
लक्ष्यते मोहतः प्रत्यग्रज्जुः सर्पादिभिर्यथा ॥ ५५५ ॥
प्राणादिकं तस्य नाम, रूपं श्वासादिधारणम् ॥

न केवलं मृत्योः स मृत्युमित्यादिश्रुत्या द्वैतस्य कल्पितत्वं किन्तु युक्तेरपीत्याह *साक्षीति ॥ ५५२ ॥ बहुधा व्यभिचारमेवाह *देशत इति । यस्मिन्देशे काले च यत्सत्तदन्यत्र नास्ति, यदेकस्य स्वरूपं तन्नान्यस्य भवति, यदेकस्य जन्मावस्था तदन्यस्य नाशावस्था, एकस्यार्थस्य धर्मो नान्यस्यास्तीत्येवं व्यभिचरन्तीत्यर्थः । न च तत्र मानाभावः, उक्तव्यभिचारस्य साक्षिसिद्धत्वादिति मत्वाऽऽह *प्रत्यगात्मनीति ॥ ५५३ ॥ उक्तमर्थं दृष्टान्तेनापि साधयति *अज्ञातायामिति ॥ ५५४ ॥ तान्यस्यैतानीत्यादेरर्थमाह *संयुक्त इति । प्राणनादिकर्मसु सत्सु आत्मा नामरूपाभ्यां संयुक्तो लक्ष्यत इत्यर्थः । आत्मनो नामरूपत्वस्य श्रौतत्वे ब्रह्मवद्वस्तुत्वमिति, नेत्याह *मोहत इति । यथा सर्पादिहीनाऽपि रज्जुर्मोहतः सर्पादियुक्तेव लक्ष्यते, एवं मोहतो नामरूपाभ्यां संयुक्तेव लक्ष्यत इत्यनुषङ्गः । न च तस्य श्रौतत्वेन सत्यत्वं, श्रुतेरनुवादकत्वादिति भावः ॥ ५५५॥ उक्तना-

व्योम्नीव तरवो नैते सम्भाव्यन्ते चिदात्मनि॥५५६॥
अनन्यमेयतन्मानमातृ वस्त्वविभागवत् ॥
अमेयमानमात्रेकं तदात्मेति प्रचक्ष्महे ॥ ५५७ ॥
यत एवमविद्योत्थं प्राणाद्यस्यातदात्मनः ॥
नामरूपमतस्ताभ्यां पश्यन्नपि न पश्यति ॥ ५५८ ॥
श्रुतिः—स यो ऽत एकैकमुपास्ते ॥
वार्त्ति० ॥ प्राणनादिकृतां मध्ये एकैकं यः समीक्षते ॥
न स जानात्यकृत्स्नत्वादेतदीक्षितृवस्तुनः ॥ ५५९ ॥
सर्वेषां मेलनं त्वत्र दूषितं महतां मतम् ॥

मरूपे अनुवदन्नात्मस्वरूपपर्यालोचनयाऽपि तयोस्तत्र कल्पितत्वमिति सदृष्टान्तमाह *प्राणादिकमिति ॥ ५५६ ॥ विद्वज्जनप्रसिद्धमात्मस्वरूपमेव दर्शयति *अनन्येति। अन्यन्मेयमस्य नास्तीत्यनन्यमेयं तदेव स्वरूपं मानं मातृ चेति तन्मानमातृ, अनन्यमेयं च तन्मानमातृ चेति विग्रहः। तस्य सत्यतामाह *वस्त्विति। एकरसत्वमाह *अविभागवदिति। उक्तमेव पुनः सङ्गृह्य दर्शयति *अमेयेति ॥ ५५७ ॥ नामरूपस्य कल्पितत्वे फलितमाह *यत इति। एवं व्यभिचारादात्मस्वरूपपर्यालोचनया चातदात्मनो नामरूपरहितस्य यतः प्राणादिनामरूपमविद्योत्थमित्यन्वयः। इत्थम्भावे तृतीया। पश्यन्नपि, आत्मानमिति शेषः॥५५८॥स योऽत इत्यादेरर्थमाह *प्राणनादीति। प्राणनादिकृतां मध्य इति श्रुतिगतातःशब्दव्याख्या। *एतदीक्षितृवस्तुनः इति। उपासकाविदितात्मन इत्यर्थः ॥ ५५९ ॥ अस्तु तर्हि कृत्स्नस्यैवोपास्यत्वमिति, नेत्याह *सर्वेषामिति। किञ्चात्मनः कृत्स्नत्वं स्वाभाविकं चेत् युगपदेव प्राणनादिसर्वव्यापारः स्यात्

न चाशेषं मेलयित्वा व्यवहर्तुं क्षमो नरः ॥ ५६० ॥
अतो यः प्राणिमीत्यादि स्वरूपं यावदीक्षते ॥
अक्रियाकारकं वस्तु न तावद्वेद तत्त्वतः ॥ ५६१ ॥
यत्नात्प्रवेशः श्रुत्युक्तः पुनः श्रुत्या स निन्द्यते ॥
इत्यत्राभिप्रायभेदः को ऽसाविति स ईर्यते ॥५६२॥
ब्रह्मबोधद्वारतया प्रवेशः प्रतिपादितः ॥
द्वारं ब्रह्मतया भ्रान्त्या ये विदुस्तान्विनिन्दति॥५६३॥
विद्याभासोऽपोदितः स्यात्कर्तृदर्शननिन्दनात् ॥
इत्युक्तं व्याकृतं सर्वं जडाजडविभागवत् ॥ ५६४ ॥
श्रुतिः–न स वेदाकृत्स्नो ह्येषो ऽत एकैकेन भवति ॥

तच्चानिष्टमित्याह *न चेति ॥५६०॥ उपास्तेर्ज्ञातत्वात् य एकैकमुपास्ते न स वेदेति श्रुतौ व्याघातं परिहरन्नुक्तमुपसंहरति *अत इति । अयं जनो यावत्प्राणनादिकर्तारमात्मानं वेद न तावत्तत्त्वतो वेत्ति, यतो वस्तु अक्रियाकारकमिति योजना॥५६१॥ तं न पश्यन्तीत्यादिश्रुत्या प्रविष्टदर्शनं चेन्निन्द्यते तर्हि प्रवेशकथनं मुधा स्यात् "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायादित्याशङ्कते *यत्नादिति ॥ ५६२ ॥ प्रवेशश्रुतितात्पर्यमाह *ब्रह्मेति । निन्दाश्रुतितात्पर्यमाह *द्वारमिति । चिदाभासद्वारा ब्रह्म ज्ञेयमिति प्रवेशश्रुतितात्पर्यमज्ञात्वा द्वारमेव ब्रह्मत्वेन ये भ्रमन्ति तान् निन्दतीत्यर्थः ॥ ५६३ ॥ निन्दायाः फलमाह *विद्येति ।परमप्रकृतमुपसंहरति *इतीति ॥ ५६४ ॥

श्रुतौ स वेदेत्यत्र हेतुः*अकृत्स्न इति । तत्र हेतुः *ह्येष इति । एष प्राणनादिनां मध्ये हि यस्मादेकैकेन विशेषेण विशिष्टो भवति तस्मादकृत्स्न इति पूर्वेण सम्बन्धः ॥

वार्त्ति०प्रमेयं प्रमितिद्वारं प्रमाभासविनिन्दनम् ॥
त्रयमुक्त्वा प्रमित्यर्थं विद्यासूत्रमथोच्यते ॥ ५६५ ॥
प्रायेणारोप एवात्र तृतीयेऽध्याय ईर्यते ॥
तथापि तदमुख्यत्वज्ञप्त्यै विद्या च सूचिता ॥५६६॥
अन्यथाऽऽरोप एवात्र प्रतिपाद्य इति भ्रमः ॥
प्राप्नुयात्, तद्व्युदासार्थं विद्यां मुख्यामसूत्रयत्॥५६७
श्रुतिः—आत्मेत्येवोपासीत ॥
वार्त्ति०आत्मेत्येवमुपासीतेत्येतत्सूत्रमुदाहृतम् ॥
अपरेऽत्र विकल्पेन चतुर्धा सूत्रमूचिरे ॥ ५६८ ॥
आत्मेत्येकमिदं सूत्रं कण्डिकाद्वयमेव वा ॥
अध्यायो वा समस्तोऽयमध्यायद्वयमेव वा ॥ ५६९ ॥
अव्याकृतप्रवेशात्मपदनीयप्रियोक्तयः ॥
पञ्चसूत्राणि गीतानि कैश्चित्तान्यपि सन्तु वा ॥५७०॥
यथोक्तानां तु सूत्राणामाशास्त्रार्थसमापनात् ॥
वृत्तिः स्यादुत्तरो ग्रन्थस्तत्र चैषां समापनात् ॥५७१
सर्वथाऽप्यात्मसूत्रेऽस्मिन्विवादो नास्ति कुत्रचित् ॥
तत्सूत्रेण निवर्त्या या शङ्का सा तावदुच्यते ॥५७२॥

विद्यासूत्रस्य पूर्वेण वाक्येन सम्बन्धमाह *प्रमेयमिति । अव्याकृतं प्रमेयम् । प्रविष्टः परः प्रमाद्वारम् । प्रविष्टः प्रमाभासः । प्रमित्यर्थं, परस्येति शेषः ॥ ५६५ ॥ विद्यायाः विस्तरतो वक्ष्यमाणत्वादध्यारोपकथनमध्ये सूत्ररूपेण तस्याः कथनं किमर्थमित्याशङ्क्याह *प्रायेणेत्यादिना ॥ ५६६ ॥ ॥ ५६७ ॥ ५६८ ॥ ५६९ ॥ मतान्तरमाह *अव्याकृतेति ॥ ५७० ॥ ५७१ ॥ परमतोपन्यासफलमाह *सर्वथाऽपीति ॥५७२॥ ननु प्रतिपादितमात्मतत्त्वं जागरादौ न स्फुर-

व्याकृते हेतुकार्याभ्यामव्यक्ते कारणेन तत् ॥
तिरोहितं वस्तुतत्त्वं कथं तत्त्वं विबुध्यताम् ॥ ५७३॥
कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ॥
प्राज्ञः कारणबद्धः स्यादिति नैगमिकं वचः ॥ ५७४ ॥
तुरीये तूक्तबन्धौ तौ न सिद्ध्यत इतीरणात् ॥
तुरीयत्वेन बोद्धव्यमिति चेत्तत्कदा वद ॥ ५७५ ॥
विस्फारिताक्षो जानाति शब्दाद्येव न तत्परम् ॥
आपीतकरणग्रामः शब्दाद्यपि न वेत्ति हि ॥५७६ ॥
एतच्छङ्कानिवृत्त्यर्थमात्मेत्येवेति सूत्रणम् ॥
उक्त्वा पदार्थं शङ्काया उत्तरं योजयिष्यते ॥ ५७७ ॥
यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ॥
यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते॥५७८॥
व्याप्नोत्यनवशेषेण सर्पादीन्स्रागिवाखिलान् ॥

ति अतः कथं सिद्धिरिति शङ्कामेवाह *व्याकृत इति । व्याकृते जाग्रत्स्वप्नयोरज्ञानतत्कार्याभ्याम्,अव्यक्ते सुप्तेऽज्ञानेन च तिरोहितं वस्तुतत्त्वं यस्मात् अतस्तत्तत्त्वं कथं बुध्यतामित्यर्थः॥५७३॥ जागरादावज्ञानतत्कार्याभ्यां, स्वापेऽज्ञानेन प्रतिबद्धं तत्त्वमित्यत्र मानमाह *कार्येति ॥५७४॥ "द्वौ तु तुर्ये न सिध्यतः" इत्युत्तरवाक्यबलात्तुर्ये तत्त्वबोधं शङ्कते *तुरीय इति । तुर्यावस्थाया एव दुर्लभत्वान्न तत्र तत्त्वधीरिति समाधत्ते *तत्कदेति ॥ ५७५ ॥ तत्र हेतुमाह *विस्फारितेति । जागरादौ तत्त्वविरुद्धशब्दादिज्ञानात्स्वापे च ज्ञानस्यैवाभावात् दुर्लभा तत्त्वधीरिति भावः ॥ ५७६ ॥ ५७७ ॥ आत्मपदार्थमाह *यच्चेति । यच्छब्दचतुष्टयं यस्मादर्थे । चशब्दाः समुच्चये ॥ ५७८ ॥ इम-

कल्पनाधिष्ठानतया प्रत्यङ्ङात्मा भवेत्ततः ॥५७९॥
सर्वाधिष्ठानसन्मात्र इत्यशेषजगत्प्रति ॥
अधिष्ठानतया व्याप्तिं श्रुतिर्ब्रूते सदाऽऽत्मनः ॥५८०॥
स्वचिदाभासमोहेन तदुत्थानखिलान्यतः ॥
आदत्ते ऽनात्मनः प्राज्ञस्ततश्चात्मेति तं विदुः॥५८१॥
पर आत्मनि सर्वेऽपि सम्प्रतिष्ठन्त एकले ॥
पृथिव्याद्या अनात्मान इति चाथर्वणे वचः ॥ ५८२॥
आत्माभासाः पराचीना धीवृत्तीर्विषयोन्मुखाः ॥
प्रत्यङ्ङत्ति यतोऽतो ऽसावात्मेत्युक्तो मनीषिभिः५८३॥
विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ॥
आनन्दभुक् तथा प्राज्ञ इति चागमशासनम् ॥५८४॥

मेवार्थं विवृण्वन् यस्मादाप्नोति तस्मादात्मेत्येतस्यार्थमाह *व्याप्नोतीति ॥ ५७९ ॥ उक्तेऽर्थे मानमाह *सर्वेति ॥ ५८० ॥ यदादत्ते इत्यस्यार्थमाह *स्वेति । स्वकीयचिदाभासवता मोहेन तस्मादेव मोहादुत्पन्नानशेषाननात्मनो यस्मादादत्ते तस्मात्तमात्मेति विदुरिति योजना । आदत्ते स्वात्मन्येव संहरतीति यावत् । प्राज्ञः स्वापादावित्यर्थः ॥ ५८१ ॥ अत्रापि प्रश्नोपनिषदं प्रमाणयति *पर इति । सम्प्रतिष्ठन्ते लीयन्ते ॥ ५८२ ॥ यच्चात्तीत्यादेरर्थमाह *आत्मेति । आत्मन आभासो यासु तास्तथोक्ताः । पराचीनाः इत्यस्य व्याख्या विषयोन्मुखा इति । अत्ति साक्षात्करोतीति यावत् ॥ ५८३ ॥ अत्र माण्डूक्यश्रुतिं पठति *विश्व इति । बाह्येन्द्रियोपनीतत्वं विषयाणां स्थौल्यं, वासनामात्रोपस्थापितत्वं प्रविविक्तत्वमिति भेदः । आनन्दशब्देन कारणकोशो गृह्यते, तं भुङ्क्ते पश्यतीत्यानन्दभुगुच्यते सौषुप्तः पुरुषः ॥ ५८४ ॥ यच्चास्येत्यादेरर्थमाह

अव्यावृत्ताननुगतः पूर्णः स्वात्मन्यवस्थितः ॥
यतोऽस्य सन्ततो भावस्तस्मादात्मेति पठ्यते॥५८५॥
तद्विष्णोरिति मन्त्रोऽपि विष्णुस्तत्परमं पदम् ॥
चक्षुर्वदाततं व्योम्नि व्याचष्टे प्रत्यगात्मनि ॥ ५८६॥
चतुर्विधानिरुक्त्याऽत्र चत्वारोऽर्थाः प्रकीर्तिताः ॥
अधिष्ठानं कारणत्वं जीवभावो विमुक्तता ॥ ५८७॥
यन्मुक्तरूपं साक्षित्वाद्व्याकृतेऽव्याकृतेऽपि तत् ॥
अतिरोहितमत्रात्मशब्देनैतद्धि सूत्रितम् ॥ ५८८ ॥
प्रत्यक्तया यः प्रथते स्वयञ्ज्योतिःस्वभावकः ॥
तिरोधीयेत यद्येष जगदान्ध्यं तदा भवेत् ॥ ५८९ ॥
जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ॥
स आत्मा तत्परं ज्योतिरिति वेदशिरो वचः ॥५९०॥

---

*अव्यावृत्तेति ॥ ५८५ ॥ तद्विष्णोः परमं पदमिति मन्त्रं प्रमाणयति *तदिति । परमं कार्यकारणमिति यावत् । *दिवीव चक्षुराततमित्येतदर्थतः पठति *चक्षुर्वदिति । आकाशे यथा सर्वतो विप्रसृतं तथा परस्य स्वरूपं प्रतीच्येव व्याप्तमप्रत्यगर्थाभावादिति मन्त्रो वदतीत्यर्थः ॥ ५८६ ॥ उक्तमर्थं सङ्गृह्य दर्शयति *चतुर्विधेति ॥ ५८७ ॥ एवमात्मपदार्थमुक्त्वा, यदुक्तमात्मनो ऽवस्थात्रयेऽपि मानायोगात्कथं तस्य सिद्धिरिति, तत्रोत्तरत्वेनात्मशब्दं योजयति *यन्मुक्तेति ॥ ५८८ ॥ व्यक्ताव्यक्तजगति साक्षित्वेन स्वप्रकाशात्मभानानङ्गीकारे बाधकमाह *प्रत्यक्तयेति ॥ ५८९ ॥ यो वेदेदं जिघ्राणि स आत्मेत्यादिवाक्यमपि साक्षिण्यात्मनि मानमित्याह *जिघ्राणीति भवत्वात्मा जगत्साक्षी ब्रह्मणस्तु किमायातम् ? इत्याशङ्क्य तस्य ब्रह्मत्वं श्रुत्यैकगम्यमिति मत्वाह *तत्परमिति ॥ ५९० ॥

आत्मशब्दधियो रात्मा विषयो नेति भाषितुम् ॥
सूत्रेऽस्मिन्नितिशब्दोऽयं यथैतत्स्यात्तथोच्यते ॥५९१॥
व्यवहर्त्तुं शक्य एष न च माण्डूक्यवाक्यतः ॥
अमात्रो यश्चतुर्थः सोऽव्यवहार्य इतीदृशात् ॥ ५९२॥
अभिज्ञा चाभिवदनमुपादानमिति त्रिधा ॥
व्यवहार उपादानं सर्वगे सम्भवेन्न हि ॥ ५९३
यतो वाचो निवर्त्तन्ते ह्यप्राप्य मनसा सह ॥
स ब्रह्मानन्द इत्युक्ते व्यवहारान्तरं च न ॥ ५९४ ॥
अथापि बोधसिद्ध्यर्थं यदि व्यवजिहीर्षितः ॥
प्रत्यक्तदा मनोवाग्भ्यामात्मेत्युपचरेदमुम् ॥ ५९५ ॥
यत्रेति परशब्दः स्यात्तत्रोपचरितं वचः ॥
ज्येष्ठं पितेति पश्यन्तीत्यादावेवमवेक्षणात् ॥ ५९६ ॥
अवाङ्मनसगम्यत्वमितिशब्देन सूचितम् ॥

इतिशब्दार्थमाह *आत्मशब्देति । ननु विरुद्धमिदमुच्यते, तत्राह *यथैतदिति ॥ ५९१ ॥ *अमात्र इति । कार्यकारणान्यतरोपहितस्यैव शास्त्रधीगम्यत्वं न निरुपाधिकस्य चिद्धातोरिति भावः ॥ ५९२ ॥ व्यवहारासम्भवमेव तद्भेदप्रदर्शनपूर्वकमाह * अभिज्ञा चेत्यादिना ॥ ५९३ ॥ ५९४ ॥ आत्मनः शब्दागम्यत्वे आत्मानमुपदिशेत्यादिव्यवहारायोगात्तद्बोधो न स्यादित्याशङ्क्य लक्षणया शब्दगम्यत्वाङ्गीकृतेर्मैवमित्याह *अथेति । बोधाय प्रत्यग् व्यवहर्तुमिष्टश्चेदहमात्मादिशब्दैर्लक्षणया व्यवहरेदित्यर्थः । इतिशब्दशिरस्कं पदं लक्षणयैव प्रयुज्यते॥५९५॥प्रयुज्यत इति दृष्टान्तमाह *ज्येष्ठमिति ॥५९६॥ उक्तमर्थं द्रढयितुमाक्षिपति *अवागिति। इतिशब्देनात्मेतीत्यत्रस्थे-

अन्यत्र च श्रुतं साक्षात्तथाऽप्येतन्न युज्यते ॥ ५९७ ॥
का वाचोऽतो निवर्तेत न तावल्लौकिकोक्तयः ॥
अप्रसक्तेः, वेदवाचां निवृत्तौ तद्वचो वृथा ॥ ५९८ ॥
यतो वाचो निवर्तन्ते इत्येतद्वैदिकं वचः ॥
ब्रह्मणो विनिवृत्तं सत्किमन्यत्प्रतिपादयेत् ॥ ५९९ ॥
शृण्वात्मनि वचस्त्वेतद्वाच्यत्वं प्रतिषेधति ॥
नात्मानं वक्त्यतश्चैतदात्मनो विनिवर्त्यते ॥ ६०० ॥
तथैवाशब्दमस्पर्शमिति शब्दाद्यपह्नुतिः ॥
यथा चास्थूलमित्यादि तथा वाच्यत्ववारणम् ॥ ६०१ ॥
अस्थूलादिवचो यद्वत् स्थूलत्वादिनिषेधतः ॥
पर्यवस्येद्ब्रह्मतत्त्वे तथा वाच्यत्वनुद्वचः ॥ ६०२ ॥
निषेध्यविषयत्वेन निषेधवचनैर्नहि ॥
ब्रह्मवाच्यमपि त्वेतल्लक्ष्यते विषभुक्तिवत् ॥ ६०३ ॥
विषं भुङ्क्ष्वेति वाक्येन नोच्यते भुक्तिवारणम् ॥

न । अन्यत्र यतो वाच इत्यादिश्रुतौ ॥ ५९७ ॥ कथं न युज्यते इत्याशङ्क्य किं लौकिकस्य वैदिकस्य वा वचसो ब्रह्मबोधकत्वमिति विकल्प्य दूषयति *का वाच इत्यादिना ॥ ५९८ ॥ ५९९ ॥ यत इत्यादिश्रुतेर्ब्रह्मणि वाच्यत्वमात्रनिषेधेन तत्र पर्यवसानं, न तद्वैयर्थ्यमिति समाधत्ते *शृण्विति ॥ ६०० ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *यथेति ॥ ६०१ ॥ यथा चास्थूलमित्युक्तं विवृणोति *अस्थूलादीति ॥ ६०२ ॥ अस्थूलादिवचसामपि ब्रह्मवाचकत्वमेवेत्याशङ्क्य, नेति, सदृष्टान्तमाह *निषेध्येति ॥ ६०३ ॥ विषभुक्तिवदित्येतद्व्याचष्टे *विषमिति । शत्रुगृहे भोजननिवृत्तिपरत्वेन प्रयुक्तं विषं भुङ्क्ष्वेत्यादिवाक्यं न मुख्यवृत्त्या तद्बोधकं

पदार्थासङ्गतेः किन्तु तत्तात्पर्येण लक्ष्यते ॥ ६०४ ॥
अवाच्यब्रह्मणो वाक्यं निवृत्तमपि सार्थकम् ॥
यतो लक्षणयाऽप्यत्र वाक्येन ब्रह्म बोध्यते ॥ ६०५ ॥
निषिद्धे सति वाच्यत्वे सत्यज्ञानादिकान्यपि ॥
लक्षयन्त्येव नो तत्त्वं ब्रुवते तदसम्भवात् ॥ ६०६ ॥
स्थूलत्वादि यथा नास्ति निषेध्यत्वात्तथाऽऽत्मनि ॥
सत्यत्वाद्या वाच्यधर्मा न सन्त्येषां निषेधतः ॥६०७॥
कल्प्यस्थौल्यनिषेधस्य वाच्यस्य द्वारता तथा ॥
कल्प्यधर्मविधिर्वाच्यो द्वारं ब्रह्मोपलक्षणे ॥ ६०८ ॥
आरोप्याधिष्ठानभावः सम्बन्धो द्वारलक्ष्ययोः ॥
यः सर्पो रज्जुरेषेति यथा तद्वदितीष्यताम् ॥ ६०९ ॥

तत्र तद्बोधकपदाभावात् किन्तु तात्पर्यानुपपत्त्या तल्लक्षकमित्यर्थः ॥६०४॥ नन्वेवमपि कथमस्थूलादिश्रुतिवैयर्थ्याभावस्तत्राह *अवाच्येति ॥६०५॥ अस्थूलादिवाक्यानां स्थूलत्वाद्यभावाभिधायिनां तदुपलक्षितब्रह्मलक्षकत्वमुक्त्वा सत्यादिवाक्यानामपि तल्लक्षकत्वमाह *निषिद्ध इति ॥६०६॥ ब्रह्मणः सत्यादिपदवाच्यत्वासम्भवमेवोपपादयति *स्थूलत्वेति ॥६०७॥ वाच्यसम्बन्धस्यैव लक्ष्यत्वात्तत्सत्यादिपदवाच्यसत्यत्वादेर्ब्रह्मण्यभावे तस्य लक्ष्यत्वमेव न स्यादित्याशङ्क्य वास्तवधर्माभावेऽपि तत्र कल्पितधर्माङ्गीकारान्नैवमिति सदृष्टान्तमाह *कल्प्येति । कल्पितं यत्स्थूलत्वादि तदभावस्येत्यर्थः ॥ द्वारता, यथेति शेषः । *कल्प्यधर्मविधिरिति । आरोपितभावधर्म इति यावत् ॥६०८॥ तर्हि वाच्यलक्ष्ययोः कः सम्बन्धस्तत्राह *आरोप्येति ॥ ६०९ ॥ एवमपि वाच्यपदवाच्यत्वाद् ब्रह्मणः सर्वपदलक्ष्यत्वमसिद्धमिति

कथं लक्ष्यत्वमत्यन्तावाच्यस्येति न चोद्यताम् ॥
अत्यन्तावाच्यशब्देन लक्ष्यस्यैवात्र सम्भवात्॥६१०॥
अत्यन्तावाच्यशब्दोऽयं निरर्थश्चेत्त्वयेरितः ॥
सुप्तोन्मत्तप्रलापः स्यात्सार्थत्वेऽर्थः स कीदृशः॥६११॥
वाच्यत्वे व्याहृतिः स्पष्टा लक्ष्यत्वे स्यात्समीहितम् ॥
सिद्धं भवत्यवाच्यस्य लक्ष्यत्वाङ्गीकृतेरिह ॥ ६१२ ॥
प्रतिवादिभ्रमस्यायमनुवाद इति त्वया ॥
न मन्तव्यं यतोऽत्यन्तावाच्यशब्दस्तु लौकिकः॥६१३॥
कौ तर्हि मुख्यलक्ष्यार्थौ लौकिकाविति चेच्छृणु ॥
मुख्यो वाच्यत्वधर्मस्य निषेधः शब्दसङ्गतेः ॥ ६१४ ॥
इक्षुक्षीरादिमाधुर्यविशेषो लक्षयिष्यते ॥
तत्रात्यन्तावाच्यशब्दस्तात्पर्यात्पर्यवस्यति ॥ ६१५ ॥
इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ॥

शङ्कते *कथमिति । असिद्ध्या दूषयति *न चोद्यतामिति ॥ ६१० ॥ किञ्चात्यन्तावाच्यशब्दः किं निरर्थकः सार्थको वा ?। आद्येऽवाच्यमिति त्वदुक्तानुवादो न घटेत। द्वितीये यथाऽस्थूलादिशब्दस्य स्थूलार्थत्वे व्याघातः एवमवाच्यपदस्य वाच्यार्थकत्वे व्याघातात्तस्य लक्ष्यार्थकत्वमनिच्छताऽपि त्वयाऽङ्गीकार्यमित्याह *अत्यन्तेति ॥ ६११ ॥ ६१२ ॥ ननु निरर्थक एवावाच्यशब्दः, न चानुवादायोगः, निरर्थकस्याप्यसदेवेदमितिवदनुवादसम्भवादिति शङ्कते *प्रतिवादीति । अस्थूलादिशब्दवत्प्रसिद्धार्थत्वादवाच्यशब्दस्य न भ्रमसिद्धत्वमिति परिहरति *नेति ॥ ६१३ ॥ उक्तमेवार्थमाकाङ्क्षापूर्वकमुपपादयति*कौ तर्हीत्यादिना। *शब्दसङ्गतेरिति । अवाच्यशब्दस्य वाच्यत्वाभावेन सह वाच्यवाचकत्वसम्बन्धसत्त्वादित्यर्थः

तथापि न तदाख्यातुं सरस्वत्याऽपि शक्यते ॥६१६॥
युक्तं माधुर्यभेदस्य लक्ष्यत्वं यदि भासनात् ॥
ब्रह्मापि तर्हि भातत्वाच्छास्त्रेणात्रोपलक्ष्यताम्॥६१७॥
लक्ष्यत्वधर्मस्तत्र स्यादिति चेदस्त्वदैर्घ्यवत् ॥
अदीर्घमित्यपह्नुत्यामन्यन्नेति व्यपोह्यते ॥ ६१८ ॥

॥ ६१४ ॥ ६१५ ॥ ६१६ ॥ मानसिद्धस्यैव लक्ष्यत्वनियमादनुभवसिद्धमाधुर्यविशेषस्य लक्ष्यत्वेऽपि मानासिद्धत्वाद्ब्रह्मणः कथं लक्ष्यत्वमिति शङ्कते*युक्तमिति। असिद्ध्या दूषयति *ब्रह्मेति। शबलबोधकसत्यादिवाक्यैरेव शुद्धब्रह्मणोऽपि विशेष्यतया भातत्वादिति भावः। अत्र कश्चिदाह—विशिष्टवाचकतत्त्वमादिपदैरेव शुद्धब्रह्मणोऽपि विशेष्यतया भाने योग्यतया विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयसम्भवान्न तदर्थं लक्षणा कल्प्या, यथा "गेहे घटः" इति वाक्ये वाच्यैकदेशघटगेहव्यक्त्योरेव योग्यतावशादाधाराधेयभावान्वयस्तद्वदिति, तदसत्। घटगेहव्यक्त्योराधाराधेयभावान्वयेऽपि यथा घटत्वगेहत्वयोस्तदवच्छेदकतया*ऽन्वयस्तथा तत्त्वम्पदवाच्ययोर्विशेषणयोरप्यन्वयो वाच्यः, पदोपस्थितानां पदार्थानां साक्षादवच्छेदकतया वाऽन्वयनियमात्, तथा चाद्वैतहानिरिति शुद्धोपस्थित्यर्थं लक्षणाया आवश्यकत्वादिति दिक् ॥ ६१७ ॥ ब्रह्मणि लक्ष्यत्वाङ्गीकारेऽप्यद्वैतहानिमाशङ्क्य परिहरति*लक्ष्यत्वेति। अदीर्घमित्यादिवाक्ये दीर्घत्वाद्यपह्नुतौ यथाऽदीर्घत्वादिधर्मा अभ्युपगतास्तद्वल्लक्ष्यत्वाङ्गीकारेऽपि न दोषस्तेषां कल्पितत्वादिति भावः। तेषां कल्पितत्वे मानमाह *अन्यन्नेति। न ह्येतस्मादिति नेत्यन्यत्परमस्तीत्यत्र सर्वधर्मनिषेधात्ते तत्र कल्पिता इत्यर्थः॥६१८॥

* तदवच्छेदकतया—आधेयत्वाधारत्वावच्छेदकतयेत्यर्थः।

नाभावोऽपि प्रसज्येत नेतिनेतीति वीप्सया ॥
भावाभावोभयान्यादिसर्वदृश्यनिषेधनात् ॥६१९॥
सर्वदृश्यनिषेधे तु कीदृग्ब्रह्मेति चेच्छृणु ॥
पृच्छयते वा ऽऽक्षिप्यते वा प्रश्ने तावदिदं वद॥६२०॥
ब्रह्मानुभववाञ्छा किं यद्वा दृष्टान्तकामना ॥
आद्ये त्वमेव ब्रह्मासि दृष्टान्तस्तु न तत्समः ॥६२१॥
मयि देहादयो वाच्या दृश्यन्त इति चेत्तदा ॥
हित्वा वाच्यानवाच्यं त्वं द्रष्टारं ब्रह्म विद्धि भोः॥६२२॥
आक्षेपेऽनुपपत्तिः का यदि बुद्ध्यप्रवेशनम् ॥
तन्नात्राक्षेप्तुकामस्य तव बुद्धेः प्रवेशनात् ॥ ६२३ ॥
आक्षेपाय विशोद्धीर्मे पुरुषार्थाय नेति चेत् ॥
अहो बत महत्पुण्यं फलितं जन्मकोटिभिः ॥ ६२४ ॥
तस्माद्ब्रह्माभिधानानि प्रयुक्तान्युपलब्धये ॥
सर्वाण्यनभिधायैव निवर्त्तन्ते विबोध्य च ॥ ६२५ ॥

तर्हि कल्पिताभावस्य परमार्थत्वात्कथं नाद्वैतक्षतिरित्याशङ्कय अधिष्ठानातिरिक्ताभावानभ्युपगमान्मैवमित्यभिप्रायेणाह *नेति ॥६१९॥६२०॥६२१॥ मम ब्रह्मत्वमनुपपन्नम्, अहम्पदवाच्यैकदेशाहङ्कारादेर्जडत्वेन ब्रह्माभेदाभावादित्याशङ्क्य भागत्यागलक्षणया त्वम्पदलक्ष्यं ब्रह्मत्वेन जानीहीत्याह*मयीति॥६२२॥६२३॥ *अहो बतेति। मलिनधियस्तत्राप्रवेशोऽपि पुमर्थाय शुद्धधियस्तत्र प्रविशन्तीति भावः ॥६२४॥ यतो वाच इत्यादिवाक्यार्थं निगमयति*तस्मादिति ॥ ६२५ ॥ ननु धर्मिसमानसत्ताकधर्मवत एव लक्ष्यत्वदृष्टेरतथाविधब्रह्मणः कथं लक्ष्यत्वमित्याशङ्क्य मायाया दुर्घटकारित्वान्मैवमित्याह*इन्द्रजालमित्यादिना। अल-

इन्द्रजालमिदं शब्दा अवाच्यं वक्तुमुद्यताः ॥
अलक्ष्यं लक्षयन्तीति वक्षि चेत्त्वमबुध्यथाः ॥ ६२६ ॥
जगन्मायेन्द्रजालस्य हेतुं मायां पुरा श्रुताम् ॥
चोद्यव्याजेनाधुना त्वं युक्तिधीभ्यामपेक्षसे ॥ ६२७ ॥
माहात्म्यमेतच्छब्दस्य यदबुद्धप्रबोधनम् ॥
लोके सार्वजनीनं तत्सुषुप्तनरबोधने ॥ ६२८ ॥
अगृहीत्वैव सम्बन्धमभिधानाभिधेययोः ॥
हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः ॥६२९॥
न शृणोति नरः सुप्तो जाग्रतीवाक्षराण्यपि ॥
भेरीध्वन्यादिभिर्बोधात्सम्बन्धग्रहणं कुतः ॥ ६३० ॥
दुर्बलत्वादविद्याया आत्मत्वाद्बोध्यवस्तुनः ॥

क्ष्यं वस्तुतो लक्ष्यत्वधर्मशून्यम् ॥ ६२६ ॥ ६२७ ॥ ननु ब्रह्मणि शब्दो गृहीतसम्बन्धो न वा । आद्ये वागविषयत्वानुपपत्तिर्द्वितीये तस्य शब्दप्रमाणकत्वायोगेन तज्ज्ञानाभावान्न तदज्ञानध्वस्तिस्तत्राह*माहात्म्यमिति । यथा सुप्तबोधकशब्दः सम्बन्धज्ञानानपेक्षस्तस्य बोधमादधाति, तथा तत्त्वमादिशब्दस्य शबले ज्ञातशक्तेः प्रतिपाद्येऽर्थे शक्तिधीनिरपेक्षस्यैव लक्षणया ज्ञानं जनयत एष महिमा यदज्ञाननिरासित्वम्। अतो युक्तमनभिधेयस्य ब्रह्मणः शब्दप्रमाणकत्वमिति भावः ॥ ६२८ ॥ सार्वजनीनामित्युक्तं व्यनक्ति*अगृहीत्वेत्यादिना ॥ ६२९ ॥ ॥ ६३० ॥ ब्रह्मणि वाक्याज्ज्ञातेऽपि कथं तद्ज्ञानमज्ञानं निवर्तयति वैपरीत्यं कुतो न? अत आह*दुर्बलत्वादिति। अविद्यादौर्बल्यं शुक्त्यादौ दृष्टमिति भावः। स्फुरणरूपस्यात्मनो वृत्त्युपारूढस्य तद्दाहकत्वसम्भवाच्चेत्याह*आत्मत्वादिति । शब्दशक्ते-

शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तन्मोहहानतः ॥ ६३१ ॥
लक्षकत्वेऽपि वेदान्तशब्दा एवात्मलक्षकाः ॥
लक्ष्यं गङ्गेत्येव तीरं वालुकेति तु न क्वचित् ॥ ६३२ ॥
प्रचुरव्यवहारश्चेद्गङ्गादौ विनियामकः ॥
वेदान्तव्यवहारस्य प्राचुर्यं ब्रह्मणीक्ष्यताम् ॥ ६३३ ॥
एवञ्च प्रकृतेऽप्यात्मशब्दोऽयं वस्तुलक्षकः ॥
न वाचको वाचकत्वहेतोरात्मन्यसम्भवात् ॥ ६३४ ॥
षष्ठीगुणक्रियाजातिरूढयः शब्दहेतवः ॥
नात्मन्यन्यतमोऽमीषां तेनात्मा नाभिधीयते ॥६३५॥
आप्नोतीत्यादिधात्वर्थाश्चत्वारो व्यावहारिकाः ॥
आत्मशब्दस्य वाच्यार्थाः प्रतीचि परिकल्पिताः॥६३६॥

मन्त्रादिशक्तिवद् दुर्ज्ञानत्वादित्याह*शब्देति । उक्तहेतुभिस्तं प्रत्यञ्चं मोहशब्दितविरुद्धांशनिरासद्वारा लक्षणया शब्दादेव विद्म इत्यर्थः ॥ ६३१ ॥ आत्मनो वाचकपदाभावेऽपि यत्किञ्चित्पदं तल्लक्षकमस्तु, नेत्याह *लक्षकत्वेऽपीति ॥ ६३२ ॥ सिकतायां घोष इति वृद्धप्रयोगाभावान्न तस्य तीरलक्षकत्वमिति शङ्कते*प्रचुरेति । औपनिषदत्वश्रुतेर्वेदान्तानामेव ब्रह्मलक्षकत्वमित्याह*वेदान्तेति ॥ ६३३ ॥ फलितमाह*एवं चेति ॥ ६३४ ॥ हेत्वभावं स्पष्टयति *षष्ठीति । रूढिः अनादिव्यवहारसिद्धसम्बन्धविशेषः । गोमान्नीलोत्पलं पाचको घटः आकाश इत्यादिशब्दानां तत्तदर्थप्रवृत्तौ क्रमेण षष्ठ्यादयो हेतवः तेऽसङ्ग आत्मनि न सम्भवन्तीति न निर्विशेषस्य वाच्यतेत्यर्थः ॥६३५॥ किं तर्ह्यात्मपदस्य वाच्यमात्मतत्त्वस्य लक्षणाद्वारमित्याशङ्क्य पूर्वोक्तं स्मारयति*आप्नोतीत्यादिना ॥ ६३६ ॥

तैर्द्वारैरात्मनस्तत्त्वं यथावदुपलभ्यते ॥
तदेतद्वागगम्यत्वमितिशब्देन सूत्रितम् ॥ ६३७ ॥
मनोऽपि दृश्यविषयं न दृशं मन्तुमर्हति ॥
दृशा मनो दृश्यतेऽतस्तेन दृग् दृश्यते कथम् ॥६३८॥
मनुते यन्न मनसा येन त्वाहुर्मनो मतम् ॥
ब्रह्म विद्धि तदेव त्वमित्युवाचापरा श्रुतिः ॥ ६३९ ॥
ब्रह्म मन्तुं प्रवृत्तं सन्मनो ऽप्राप्य निवर्तते ॥
वेदनं चामतत्वं च द्वयं तेनोपपद्यते ॥ ६४० ॥
वेदान्तोत्थमनोवृत्त्या ब्रह्मविद्याभिधानया ॥
विद्धीत्यनेन यत्प्रोक्तं वेदनं तत्प्रसिद्ध्यति ॥ ६४१ ॥
यदि मन्तव्यताधर्मो ब्रह्मणि स्यात्तदा मनः ॥
ब्रह्माप्नोत्येष न त्वास्ति तस्माद्ब्रह्मामतं च तत् ॥६४२॥
यथा वाच्यत्वलक्ष्यत्वे विना वाग्ब्रह्म बोधयेत् ॥

निर्विशेषस्य वागगम्यत्वमुक्तं निगमयति*तदिति ॥ ६३७ ॥ मनोऽगम्यत्वमाह*मन इति । स्वभावतो दृश्यविषयत्वान्न मनसो दृग्गोचरतेत्युक्त्वा दृश्यत्वाच्च रूपादिवन्न दृग्विषयतेत्याह*दृशेति॥ ६३८ ॥ उक्तेऽर्थे श्रुतिमाह*मनुत इति॥६३९॥ ब्रह्म विद्धीति ब्रह्मणो वेदनविषयत्वोक्तेर्न मनुत इत्यमतत्वोक्तिरयुक्तेति, नेत्याह*ब्रह्मेति ॥ ६४० ॥ उपपद्यत इत्युक्तं व्यनक्ति* वेदान्तेति । न मनुत इति ब्रह्मणि मन्तव्यत्वधर्मो वास्तवो निषिध्यतेऽतो न वृत्तिविषयत्वविरोध इति भावः ॥ ६४१ ॥ ६४२ ॥ ननु सप्रकारकधिय एवाज्ञाननिवर्त्तकत्वात्कथं निष्प्रकारकधिया तन्निवृत्तिरित्याशङ्क्यान्यत्र तथा दृष्टत्वेऽपि श्रुतिवशान्निर्धर्मकधियोऽपि तन्निवर्त्तकत्वमविरुद्धमिति स-

मन्तव्यत्वं विना तद्वदज्ञानं तु निरस्यति ॥ ६४३ ॥
अन्यत्रैव मनोवाचौ व्याप्रियेते यथायथम् ॥
निर्धर्मकं तु ब्रह्मातो न वाङ्मनसगम्यता ॥ ६४४ ॥
एतत्सर्वं द्योतयितुमितिशब्दमसूत्रयत् ॥
व्यावृत्तिरेवकारेण व्याकृताव्याकृतात्मनोः ॥ ६४५ ॥
विदिताविदिताभ्यां तदन्यदेवेति शास्त्रगीः ॥
व्याकृताव्याकृतात्मभ्यां तत्त्वं व्यावर्तयत्यसौ॥६४६॥
न व्याकृताव्याकृतयोः सम्भवेत्तत्त्वरूपता ॥
मृषात्वमेवानात्मत्वाद्विचारे शिष्यते तयोः ॥६४७॥
आत्मनो भिद्यतेऽनात्मा यदि वा नैव भिद्यते ॥
भिन्नत्वे निःस्वरूपस्य नैव सिद्धिः खपुष्पवत्॥६४८॥
स्वरूपमात्मशब्दोक्तं ततो यदि विभिद्यते ॥
निःस्वरूपः कथं न स्यादभेदे त्वात्ममात्रता ॥६४९॥
अनात्मा सत्स्वरूपत्वमिच्छंश्चेल्लीन आत्मनि ॥

दृष्टान्तमाह*यथेति। अतः, तस्येति शेषः ॥६४३॥६४४॥ इतिश-ब्दार्थमुपसंहरति*एतदिति। अवधारणपदस्यार्थमाह*व्यावृत्तिरिति ॥ ६४५ ॥ अकार्यकारणतत्त्वमित्यत्र श्रुत्यन्तरं संवादयति*विदितेति। उक्तमेव व्यनक्ति*व्याकृतेति। असौ–एवकारः ॥ ६४६ ॥ उपपन्नं चैतदित्याह *नेति । जडाजडयोरैक्यायोगादिति भावः। तयोरेकत्वाभावे फलितमाह *मृषात्वमिति ॥ ६४७ ॥ विचारमेव दर्शयति *आत्मन इति ॥ ६४८ ॥ जडस्यात्मभिन्नत्वेऽपि कथं निःस्वरूपत्वमित्याशङ्क्यात्मस्वरूपशब्दयोः पर्यायत्वादित्याह*स्वरूपमिति। न भिद्यते इति पक्षं दूषयति*अभेदेति ॥६४९॥ तदेव व्यनक्ति*अनात्मेति। *अस्य

तदात्मनाऽस्य जग्धत्वात्त्वनात्मा सिध्यतां कथम् ६५०
आत्मन्यन्तर्भवन्नेष सिद्ध्यतीति मतं यदि ॥
कथं विरुद्धयोरात्मानात्मनोः सहवासिता ॥ ६५१ ॥
यद्यनात्मैव शिष्येत सर्वं शून्यं भवेत्तदा ॥
आत्मैकशेषेऽनात्मा ऽयं भवेद्दत्तजलाञ्जलिः ॥६५२॥
आत्मैषोऽनात्मतां नैव सहते तं परित्यजेत् ॥
स्वयं सेद्धुमशक्तोऽयमनात्माऽतो मृषा भवेत् ॥६५३
शक्नोति सर्वः संसेद्धुं स्वरूपमवलम्ब्य हि ॥
यः स्वरूपेऽपि निर्भाग्यः कथं सोऽन्यत्र सिद्ध्यति॥६५४
व्यक्ताव्यक्तविभागोऽतः सिद्ध्येदात्मन्यतद्वति ॥
अहोरात्रविभागोऽयं भानौ तद्रहिते यथा ॥ ६५५ ॥

जग्धत्वादिति । आत्ममात्रतया परिशिष्टत्वादित्यर्थः ॥६५०॥ आत्मतादात्म्यादनात्मासिद्धिं शङ्कते*आत्मनीति । किं भिन्नयोस्तादात्म्यमभिन्नयोर्वा । नाद्यः, अश्वमाहिषयोरिव तदयोगादित्याह*कथमिति ॥ ६५१ ॥ द्वितीये आत्मनो ऽनात्मन्यन्तर्भावो वैपरीत्यं वा ?, नोभयथाऽपीत्याह *यदीति । द्वितीयं निराह । आत्मेति ॥६५२॥६५३॥ स्वयं सेद्धुमशक्त इत्येतद्व्याचष्टे *शक्नोतीति । यः स्वरूपभागशून्यः स खपुष्पवन्न सिद्ध्यतीत्यर्थः ॥६५४॥कथं तर्हि कार्यकारणविभागः इत्याशङ्क्याज्ञानकल्पित एवेति दृष्टान्तेनाह*व्यक्तेति । यथाऽऽदित्ये प्रकाशैकस्वभावे दर्शनादर्शनाभ्यामहोरात्रविभागस्तद्धीने कल्प्यते एवं कार्यकारणशून्ये चिति तद्विभाग आविद्यक इत्यर्थः॥६५५॥ आत्मानात्मविभागवत्कार्यकारणविभागः सत्योऽस्त्विति चेत्, न दृष्टान्तासम्मतेरित्याह*आत्मेति । आत्मास्पर्शित्वे दृश्यत्वं हे-

आत्मानात्मविभागोऽपि नायमात्मस्पृगिष्यते ॥
अज्ञातात्मैकसाक्षित्वादज्ञानोत्थं न वस्तुगम् ॥६५६॥
तस्मान्नानात्मनोऽस्त्यात्मा नाप्यनात्माऽऽत्मनः स्वतः॥
आत्मनस्तु स्वतःसिद्धिर्भ्रान्तेः सिद्धिरनात्मनः॥६५७॥
श्रुतिगुर्वाद्यनात्मानमपेक्ष्यात्मा प्रसिद्ध्यति ॥
इति चेत् तदपेक्षाऽपि न स्वरूपस्य सिद्ध्यति ॥ ६५८ ॥
गुरुशास्त्रादयो भ्रान्तिं वारयन्त्येव केवलम् ॥
न त्वात्मानं साधयन्ति स्वयं तेनात्मवत्त्वतः ॥ ६५९ ॥
गुर्वादयो हि सात्मान आत्मनैव भवन्ति हि ॥
विनाऽऽत्मानं निःस्वरूपाः कथं ते साधयन्ति तम्॥६६०॥
साध्यसाधनभावस्ते यदीष्टस्तर्ह्यनात्मनः ॥
प्रापय्य सात्मतामात्मा साधयेदिति युज्यते ॥६६१॥

तुमाह*अज्ञातेति। आत्मसाक्षिकत्वादिति यावत्॥६५६॥अतस्तयोः परस्परसम्बन्धोऽपि वस्तुतो नास्तीत्याह *तस्मादिति । कथं तर्हि जडभानमित्याशङ्क्य स्वप्रकाशात्मना कल्पितसम्बन्धादित्याह *आत्मन इति ॥ ६५७ ॥ अनात्माधीनसिद्धिकत्वादात्मनः स्वतःसिद्धत्वमसिद्धमिति शङ्कित्वा परिहरति *श्रुतीत्यादिना ॥ ६५८ ॥ गुर्वादीनामात्मासाधकत्वे हेतुमाह *तेनात्मवत्त्वत इति । आत्मना स्वस्वरूपत्वादित्यर्थः ॥६५९॥ उक्तमेव स्पष्टयति *गुर्वादय इति ॥ ६६० ॥ तर्हि तेषामुपलब्धिसाधनत्वं तस्यास्तत्साध्यत्वं वा कथमित्याशङ्क्य आत्मैव तान् स्वसत्तया सत्तावतः कृत्वा साध्यसाधनभावयोग्यान् करोतीत्याह *साध्येति ॥ ६६१ ॥ आत्मनस्तु स्वतः

बुद्ध्यादेर्विषयान्तस्य स्वसामर्थ्यादसिध्यतः ॥
आत्मना सह सम्बन्ध आत्मात्मीयत्वलक्षणः॥६६२॥
अबाध्यत्वात्स्वरूपत्वाद्बाध्येनानात्मना सह ॥
अव्यावृत्ताननुगतं सङ्गतं रज्जुसर्पवत् ॥ ६६३ ॥
व्याकृताव्याकृते इत्थं कल्पिते हि विचारतः ॥
एते वारयितुं सूत्रे एवकारमसूत्रयत् ॥ ६६४ ॥
उपेति सामीप्यवाची तन्निष्ठा प्रत्यगात्मनि ॥
कार्यकारणरूपाभ्यां प्रत्यङ् नेदीय ईक्ष्यते ॥ ६६५ ॥
व्याकृताव्याकृतात्मभ्यां भ्रान्तः प्रत्यङ् विभिद्यते ॥
प्रत्यक्तत्त्वधिया हत्वा तावुपैत्यात्मतन्त्रताम् ॥६६६॥
बोधादूर्ध्वं यथा प्रत्यग्ब्रह्मणोरेकता तथा ॥
पुराऽपि ब्रह्म, सामीप्यं तेन विश्रान्तमात्मनि॥६६७॥

सिद्धिरित्यादिनाऽऽत्मानात्मनोः कल्पिततादात्म्यसम्बन्ध इति सङ्क्षेपेणोक्तं प्रपञ्चयति *बुद्ध्यादेरिति । *स्वसामर्थ्यादिति । जडस्य प्रकाशनशक्तिविधुरत्वादिति भावः ॥ ६६२ ॥ अननुगतम्, आत्मतत्त्वमिति शेषः । रज्जुसर्पेणेवेत्यर्थः ॥ ६६३ ॥ उपसंहरति *व्याकृतेति ॥ ६६४ ॥ उपेत्युपसर्गस्य वाच्यार्थमाह *उपेतीति । तस्य लक्ष्यार्थमाह *तदिति । सामीप्यं प्रतीचि पर्यवसितमित्यर्थः। तत्र हेतुः *कार्येति । प्रतीचो नेदीयस्त्वमत्यन्तसन्निकृष्टत्वम् । तत्र मानमाह *ईक्ष्यत इति ॥६६५॥ कार्यकारणाभ्यां पृथक्करणात्प्रतीचः सद्वयत्वमाशङ्क्याह *व्याकृतेति । भ्रान्तः अज्ञः । उपैति प्राप्नोति ॥६६६॥ सामीप्यं न प्रतीचि पर्यवस्यति, तस्य ब्रह्माभेदात्पूर्वं जीवसाक्षिब्रह्मण एवातिसन्निहितत्वादिति, तत्राह *बोधादिति । ब्रह्म प्रत्यगेवेति शेषः । उपसर्गार्थमुपसंहरति *सामीप्यमिति ॥६६७॥ जीवस्य

वाक्यं तत्त्वमसीत्यादि प्रसिद्धं निखिलागमे ॥
आसीतेति तुशब्देन कूटस्थत्वमसूत्रयत् ॥ ६६८ ॥
व्युत्थाय कारणात्कार्यात्तत्तत्त्वज्ञानवर्त्मना ॥
उपेत्य कूटस्थमजमासीतापरिणामवान् ॥ ६६९ ॥
मातृत्वकञ्चुको यद्वदात्माऽनात्मानमीक्षते ॥
दृष्टिमात्रैकरूपत्वान्न तथाऽऽत्मानमीक्षते ॥ ६७० ॥
कर्तृत्वप्रतिषेधार्थं द्रष्टुर्दृष्टेरितिश्रुतिः ॥
दृष्टिरेव तु यो द्रष्टेत्याह दृष्टिविशेषणम् ॥ ६७१ ॥
इत्यात्मसूत्रवाक्येऽस्मिन्पदार्थः प्रविवेचितः ॥
वाक्यार्थोऽप्यत्र निष्पन्नः सङ्क्षेपेण प्रदर्श्यते ॥ ६७२ ॥
वाच्यमन्तव्यताहीनो व्यक्ताव्यक्तविलक्षणः ॥
अभिन्न आत्मा कूटस्थ इति वाक्यार्थ इष्यते ॥ ६७३ ॥

सर्वदा ब्रह्मरूपत्वे मानमाह *वाक्यमिति । आसीतेत्यस्यार्थमाह *आसीतेति । आसनादिव्यवहारव्यावृत्त्यर्थं तुशब्दः शब्देनेत्यनेन सम्बध्यते ॥ ६६८ ॥ उक्तं विवृणोति *व्युत्थायेति । कार्यकारणस्वरूपभूतप्रत्यग्याथात्म्यधिया ताभ्यां व्युत्थाय ते शिथिलीकृत्याऽकार्यकारणमात्मानमुपेत्याविकारः सन्नासीतेत्यर्थः ॥ ६६९॥ आत्मनो निर्विकारत्वमसिद्धं मुक्तावपि स्वविषयज्ञानहेतुत्वात् अन्यथा स्वस्यासिद्धिरत आह *मातृत्वकञ्चुक इति । मातृत्वोपहित इत्यर्थः ॥ ६७० ॥ अनुपाहितस्य द्रष्टृत्वाभावे मानमाह * कर्तृत्वेति । न हि द्रष्टुरित्यादिश्रुतेर्यो द्रष्टा स दृष्टिरेवेति समानाधिकरणषष्ठ्या दृष्टिर्द्रष्टुर्विशेषणं दर्शनकर्तृत्वनिषेधार्थमाहेति योजना । न चात्मासिद्धिः, स्वमहिम्नैव तत्सिद्धेरिति भावः ॥ ६७१ ॥ ६७२ ॥ ६७३ ॥ वाङ्मनसा-

व्याकृताव्याकृताभ्यां तद्वस्तुतत्त्वं तिरोहितम् ॥
इति यच्छङ्कितं तन्न स्वरूपस्यातिरोहितेः ॥६७४॥
स्वस्वरूपं तिरोधातुं नहि केनापि शक्यते ॥
विस्फार्यतामिहाक्षाणि किमक्षैरपराध्यते ॥ ६७५ ॥
आपादयेयुः शब्दादीन्यद्यक्षाणि तथापि ते ॥
का हानिस्तस्य शब्दादेरेव तत्त्वं विबुध्यताम्॥६७६॥
तैः शब्दादितया भाति तत्त्वरूपतया नतु ॥
इति चेदत एवैतद्वेदवाक्येन बुध्यताम् ॥ ६७७ ॥
न परोक्षत्वमाशङ्क्यं स्वस्वरूपत्वहेतुतः ॥
शब्दादितत्त्वं यद्बोद्‌धुः स्वरूपं तन्न चेतरत् ॥ ६७८ ॥
एकस्याप्यत्र चित्तस्य सहकारिविभेदतः ॥

तीतः प्रपञ्चविलक्षण एकरस आत्मा वाक्यगम्यश्चेत्तर्ह्यनेन पूर्वोक्तशङ्कायाः कथं परिहार इत्याशङ्क्य तत्प्रकारं वक्तुं शङ्कामनुवदति *व्याकृतेति । जाग्रदादौ चिन्मात्रं तिरोहितं तस्य ब्रह्मत्वं वा ? नाद्य इत्याह *तन्नेति ॥ ६७४ ॥ यदुक्तं विस्फारिताक्षो जानातीत्यादिना जागरादौ तत्त्वविरुद्धशब्दादिज्ञानान्न तत्त्वबोध इति, तत्राह *विस्फार्यतामिति ॥ ६७५ ॥ *तत्त्वं विबुध्यतामिति ।शब्दः सन्निति सद्रूपात्मनोऽपि सहैव प्रतीतेरित्यर्थः ॥ ६७६ ॥ द्वितीयमनूद्य प्रत्याह *तैरिति ॥ ६७७ ॥ ब्रह्मणः परोक्षत्वात्कथं शब्दादिसत्ताया ब्रह्मस्वरूपत्वमित्याशङ्क्याह *नेति ॥ ६७८ ॥ नन्वेवमपि शब्दाद्याकारेण परिणतमनसः कथं तत्सत्तायां ब्रह्मधीहेतुत्वम्, एकस्योभयाकारत्वविरोधात्तत्राह *एकस्येति । अक्षादिसहकृतं मनः शब्दादि गृहीत्वाऽनन्तरक्षणे तत्सत्तायां ब्रह्मत्वं श्रुत्या निश्चिनोतीत्यर्थः

क्रमेण ग्रहणं तत्त्वे शब्दादौ च कुतो नहि ॥ ६७९ ॥
इति शङ्कोत्तरं प्रोक्तमेतत्सूत्रेण सूचितम् ॥
स्वरूपवाच्यात्मशब्दादतिरोधानभासनात् ॥ ६८० ॥
यद्वोपासीतेतिशब्दो न कूटस्थं ब्रवीत्ययम् ॥
किन्तु जानातिधात्वर्थं विवक्षित्वा प्रयुज्यते ॥६८१॥
ततो वाक्यार्थ एवं स्यादात्मशब्दोपलक्षितम् ॥
वस्त्वित्येव विजानीयादुपेक्ष्य प्राणनादिकम् ॥६८२॥
रसगन्धादियुक्तेऽपि द्रव्ये दृष्ट्या विविच्यते ॥
रूपमेव यथा तद्वद् बुद्ध्या तत्त्वं विविच्यताम् ॥६८३॥
एवं सत्युक्तशङ्कायाः साक्षादुक्तमिहोत्तरम् ॥
व्याकृते सूक्ष्ममनसा तुरीयं बुध्यतामिति ॥ ६८४ ॥
इति सूत्रस्य तात्पर्यं यथावत्प्रतिपादितम् ॥
अथ पक्षान्निराकुर्वे वाक्येऽस्मिन्प्रतिवादिनाम्॥६८५॥
उपासीतेति वचनं श्रुत्वा केचिदुपासनम् ॥

॥ ६७९ ॥ वाक्यार्थमुपसंहरति *इतीति । अस्मिन्सूत्रे केन पदेन तत्सूचितं तत्राह *स्वरूपेति। तत्र हेतुः *अतिरोधानेति। स्वरूपस्येत्यनुषङ्गः ॥ ६८० ॥ अथात्मपदेनैवालं तावता शङ्कायाः परिहारात्किमवशिष्टसूत्रस्थपदेनेत्यरुच्या पक्षान्तरमाह *यद्वेति ॥ ६८१ ॥ उपास्तेर्ज्ञानार्थत्वविवक्षायां वाक्यार्थनिष्पत्तिप्रकारं दर्शयति *तत इति। आत्मशब्देन लक्षणया प्रतिपादितं यदखण्डैकरसं वस्तु तदेव तत्त्वं, न पूर्वोक्तप्राणनादीति विविच्य जानीयादित्यर्थः ॥ ६८२ ॥ अनात्मसहितमपि तत्त्वं सूक्ष्मबुद्ध्या विवेक्तुं शक्यत इति दृष्टान्तेनाह *रसेति ॥६८३॥ व्याकृते जाग्रदादौ॥६८४॥६८५॥चिन्तात्रैविध्यमेवाह*किमिति

विधीयत इति प्राहुश्चिन्ता तत्र त्रिधा मता ॥६८६॥
किमुपास्यं किं विधेयं को विधिश्चेति सा त्रिधा ॥
आत्मोपास्योऽथवाऽनात्मेत्युपास्यस्यात्र संशयः॥६८७॥
इतिशब्दो विरूपत्वं निषेधश्चेति हेतवः ॥
अनात्मन उपास्यत्वं साधयन्ति प्रियादिवत् ॥६८८॥
प्रियमित्येवमित्यत्र प्रियदृष्ट्या प्रियेतरः ॥
उपास्यते यथा प्राणस्तथाऽनात्माऽऽत्मदृष्टितः॥६८९॥
इतिशब्दशिरस्कत्वं प्रियवाक्ये यथा श्रुतम् ॥
आत्मेत्येवेति वाक्येऽपि तथैव श्रूयते स्फुटम् ॥६९०॥
आत्मानमेव लोकं त्वित्यात्मोपास्तिर्द्वितीयया ॥
श्रुताऽन्यत्रेह न तथा विरूपत्वमिदं मतम् ॥ ६९१ ॥
तं न पश्यन्तीति वाक्ये निषिद्धा प्रकृतात्मदृक् ॥
अनात्माऽत उपास्यः स्यादिति चेन्नैवमिष्यते ॥६९२॥
आत्मोपासनमेवेदं वाक्यशेषावलोकने ॥

॥६८६॥६८७॥ आत्मेत्येवोपासीतेत्यत्रात्मशब्दादात्मा उपास्यः, तस्येतिशब्दशिरस्कत्वादनात्मा वेत्युपास्यसंशयं प्रदर्श्य तत्र पूर्वपक्षमाह *इतीति ॥६८८॥ प्रियादिवदित्युक्तं व्यनक्ति *प्रियमित्यादिना । यथा प्रियमित्येतदुपासीतेत्यत्रानात्मत्वेनाप्रियेऽपि प्राणे प्रियदृष्टिर्विधीयते तद्वदत्रात्मदृष्टिर्विधीयत इत्यर्थः ॥६८९॥६९०॥वैरूप्यं प्रकटयति*आत्मानमिति । आत्मन उपास्यत्वे तद्वदत्रापि द्वितीया स्यादिति भावः ॥ ६९१ ॥ निषेधं स्फुटयति *तन्नेति ॥ ६९२ ॥ अनन्यथासिद्धवाक्यशेषबलादात्मैवोपास्य इति सिद्धान्तयति * आत्मेति । तदेतत्पदनीयं सर्वस्मादन्तरमात्मानमेव प्रियमुपासीतेति वाक्यशेषस्यानात्म-

पदनीयान्तरतरप्रियात्मोपासनोक्तितः ॥ ६९३ ॥
अवाङ्मनसगम्यत्वमितिशब्देन वर्णितम् ॥
वाक्यशेषोऽयमात्मानमेवेति न पृथग्वचः ॥ ६९४ ॥
निषेधोऽकृत्स्नविषयो ननु कृत्स्नात्मगोचरः ॥
तस्मादुपास्य आत्मा स्याद्विधेयं चिन्त्यतेऽधुना॥६९५॥
शाब्दज्ञानं विधेयं किं निरोधो वाऽथ सन्ततिः ॥
इति त्रिधा संशये सत्याद्यः पक्षोऽभिधीयते ॥६९६॥
विद्युपास्त्योरिहैकार्थ्याक्रियात्वात्रयंशसम्भवात् ॥
शेषित्वान्मुक्तिहेतुत्वाच्छाब्दज्ञानं विधीयते ॥६९७॥
यद्यप्युपास्तिरावृत्तिस्तथाऽप्यत्र तु वेदनम् ॥
भवेद्विद्याप्रकरणात्ततो ज्ञानविधिर्मतः ॥ ६९८ ॥

परत्वेन नेतुमशक्यत्वादिति भावः ॥ ६९३ ॥ अनात्मन उपास्यत्वे उक्तहेतूनन्यथयति *अवागित्यादिना । *न पृथगिति । तथा च न वैरूप्यमिति भावः ॥ ६९४ ॥ ६९५ ॥ निरोधो, मनस इति शेषः । सन्ततिर्ज्ञानसन्तानम् । *आद्य इति । शाब्दधीर्विधेयेति प्रथमः पूर्वपक्ष उपपाद्यत इत्यर्थः॥६९६॥ अत्र ज्ञानवाचकपदाभावात्क्रियाविलक्षणत्वेन ज्ञानस्य विध्ययोग्यत्वाद्विध्यपेक्षितांशत्रयाभावाच्च न धीविधिसम्भव इत्याशङ्क्य सर्वत्रासिद्धिमाह *विद्युपास्त्योरिति । इह विद्याप्रकरणे । ज्ञानोपासनशब्दयोरिहैकार्थत्वादित्यर्थः । अपि च विध्यभावे वेदान्तानामानर्थक्यप्रसङ्गात्सिद्धार्थवाक्यशेषित्वेन धीविधिरेष्टव्य इत्याह *शेषित्वादिति । यागादिवत्पुमर्थहेतुत्वाच्च ज्ञानं विधेयमित्याह *मुक्तीति ॥ ६९७ ॥ आद्यहेतुं विवृणोति *यद्यपीति ॥ ६९८ ॥ क्रियात्वादिति हेतुं व्याचष्टे*वषडिति

वषट्करिष्यंस्तां ध्यायेदिति ध्यानं यथा तथा ॥
क्रियैव मानसी विद्या तथाऽस्ति विधियोग्यता॥६९९॥
किं केन कथमित्यंशा आत्मचित्तशमादयः ॥
अतोऽत्र भावना त्र्यंशा शाब्दज्ञानेऽपि सम्भवेत्॥७००॥
ये तु सिद्धार्थवेदान्तास्ते शेषाः शेष्ययं विधिः ॥
अतः सिद्धार्थवेदान्तैर्वेदार्थत्वं विधेर्नहि ॥ ७०१ ॥
स्वातन्त्र्ये सिद्धवाक्यानां भवेदपुरुषार्थता ॥
अत्रोच्यते ऽननुष्ठानादकार्यत्वादकर्तृतः ॥
विध्यानन्त्यान्नैरपेक्ष्यादशक्तेर्नात्र धीविधिः ॥७०२॥
जीवब्रह्मैक्यविज्ञानं वाक्यश्रवणमात्रतः ॥
सिद्ध्यत्येवेत्यनुष्ठानं न तदर्थमपेक्षते ॥ ७०३ ॥
यथाऽग्निहोत्रयाथात्म्यविज्ञानव्यतिरेकतः ॥

॥ ६९९ ॥ तृतीयहेतुं विभजते*किमिति । आत्मनो मुक्तिरूपेण साध्यत्वमुपेत्य किमंशशब्दितफलांशत्वं द्रष्टव्यम् । भावनापेक्षितमंशत्रयं सम्भवत्येवातो भावनाख्यो विधिरप्यत्र सम्भवतीत्यर्थः ॥ ७०० ॥ शेषित्वादित्युक्तं हेतुं व्यनक्ति*ये त्विति । विधेः शेषित्वादेव विधेयधियः पुमर्थहेतुत्वमपि सिध्यतीत्याह*अत इति । वेदार्थत्वं पुमर्थहेतुत्वम् । विधेर्ज्ञाननियोगस्यैव मुक्तिहेतुत्वं, न सिद्धार्थवेदान्तैः, मुक्तिरिति शेषः॥७०१॥ कार्यानन्वितसिद्धवाक्यानामपुमर्थत्वं लौकिकवाक्येऽपि दृष्टमित्याह*स्वातन्त्र्य इति । विधिविधुरत्वं स्वातन्त्र्यम् । सप्तद्वीपा वसुमतीत्यादिवाक्यस्य प्रवृत्त्याद्यज्ञापकत्वेनापुमर्थत्वं दृष्टमिति भावः ॥ उक्तहेतूनामुत्तरत्र दूषणं वक्ष्यामीत्यभिप्रेत्यधीविध्यभावसाधकहेतून्सङ्गृह्णाति *अत्रेति ॥ ७०२ ॥ आद्यहेतुं विभजते *जीवेति द्वाभ्याम् । ज्ञानं न विधेयं स्वविषया-

तदनुष्ठानमस्त्येवं नात्मबोधेऽस्ति किञ्चन ॥ ७०४ ॥
मुमुक्षुपुरुषार्थस्य मोहमात्रान्तरायतः ॥
ज्ञानात्तन्मोहविध्वस्तौ किं वा कार्यं विधीयते॥७०५॥
यदुत्पत्त्यादियोग्यं सद्धेतुं कश्चिदपेक्षते ॥
तत्रानुष्ठानसाफल्यं नानुत्पाद्ये विमोक्षणे ॥७०६॥
सम्भावितात्मकर्तृत्वो ब्राह्मणाद्यधिकारवान् ॥
विधिश्रुतेः प्रवर्त्तेत नतु कर्तृत्ववर्जितः ॥ ७०७ ॥
अपूर्वानपराबाह्यं ब्रह्मास्मीति विजानतः ॥
कर्तृत्वं नैव सम्भाव्यं तद्धेत्वज्ञानहानतः ॥ ७०८ ॥
आत्मनो ब्रह्मता सिद्धा ब्रह्मणोऽप्यात्मता स्वतः ॥
तत्त्वमस्यादिवाक्योत्थबोधाच्चेत्किमितीहते ॥७०९॥
अन्तरेण विधिं वाक्यं श्रवणायापि नेहते ॥

नुष्ठानं विना जायमानत्वात् व्यतिरेकेणाग्निहोत्रवदित्यर्थः॥७०४॥ अकार्यत्वादिति हेतुं विवृणोति *मुमुक्षिवति । ज्ञानस्य विधेयत्वे तत्साध्यं फलं किञ्चिद्वक्तव्यम् । अज्ञाननिवृत्तेर्ज्ञानमात्रफलत्वाद्ब्रह्मात्मैक्यस्य नित्यसिद्धत्वान्नात्र विधेयक्रियाजन्यफलमस्तीति न ज्ञाने विधिरित्यर्थः । कार्यं, साध्यमुद्दिश्येति शेषः ॥ ७०५ ॥ अत्र व्यतिरेकदृष्टान्तमाह *यदिति । ज्ञानं न विधेयं साध्यफलविधुरत्वात् उत्पत्त्याप्तिविकृतिसंस्काराणामन्यतमफलकक्रियावदित्यर्थः ॥ ७०६ ॥ तृतीयहेतुं व्याचष्टे *संभावितेति ॥ ७०७ ॥ विदुषः कर्तृत्वाभावे हेतुमाह *अपूर्वेति ॥ ७०८ ॥ विदुषो भिक्षाटनादिप्रवृत्तिवद्वैधी प्रवृत्तिरप्यस्त्वित्याशङ्क्य, तद्वदत्र दृष्टफलाभावान्नैवमित्याह *आत्मन इति । चेच्छब्दो निश्चयार्थः ॥ ७०९ ॥ ज्ञानोत्पत्तिरेव ज्ञान-

इति ब्रुवाणं प्रब्रूयादनिष्टं श्रूयते कुतः ॥ ७१० ॥
अधिक्षेपं शृणोत्येव विनाऽपि विधिना पुमान् ॥
तत्त्वमस्यादिवाक्यानां श्रवणं न तथा कुतः ॥७११॥
वैदिकत्वाद्विध्यपेक्षा यदि तर्हि विधेरपि ॥
श्रवणे विध्यपेक्षायां विध्यानन्त्यं प्रसज्ज्यते ॥७१२॥
उत्पन्नस्यापि बोधस्य विध्यपेक्षामुदीरयन् ॥
किं वा प्रयोजनं ब्रूयात्तद्विचार्यं प्रयत्नतः ॥ ७१३ ॥
प्रयोगार्थं बोधनार्थं मात्वार्थं मेयसिद्धये ॥
आत्मत्वायातिरोहित्यै निरुपाध्यनुभूतये ॥ ७१४ ॥
सम्भवार्थं तमोनुत्त्यै ज्ञानवृत्तिनिवृत्तये ॥
तमोहानिनिवृत्त्यै वा, सर्वथाऽपि न युज्यते ॥७१५॥
स्वरूपलाभमात्रेण हन्ति विद्या तमस्ततः ॥
नापेक्षते प्रयोगं तु लब्धरूपा कुठारवत् ॥ ७१६ ॥

विधिफलं यागाद्यनुष्ठानाय विध्यतिरेकेणाप्रवृत्तिवज्ज्ञानोत्पादकवाक्यश्रवणाय तं विना प्रवृत्त्ययोगादिति शङ्कते *अन्तरेणेति । शब्दस्य श्रवणमात्रे विध्यपेक्षा उत वैदिकशब्दश्रवणे ? नाद्यः, इत्याह *इतीति ॥७१०॥७११॥ द्वितीयमनूद्य चतुर्थहेतुं विवृण्वन्दूषयति *वैदिकत्वादिति ॥७१२॥ पञ्चमं हेतुं प्रपञ्चयति *उत्पन्नस्येत्यादिना ॥७१३॥७१४॥७१५॥ यथोत्पन्नोऽपि बोधः कुठाराद्यनुष्ठानं विना काष्ठादौ द्वैधीभावादिसिद्धये नालं; तथा ज्ञानमप्यननुष्ठितं न मोक्षाय पर्याप्तमिति तदनुष्ठानाय विधिरिति प्रथमकल्पं दृष्टान्तवैषम्येण दूषयति *स्वरूपेति । लब्धस्वरूपा विद्या फलाय कुठारवन्न व्यापारमपेक्षते किन्तूत्पद्यमानैव ब्रह्मावाप्तिहेतुरित्यर्थः ॥ ७१६ ॥ यथा रत्नज्ञानमुत्पन्नमपि

स्वप्रकाशात्मनस्तत्त्वे तमोनाशातिरेकतः ॥
बोधनं नैव सम्भाव्यं घटादौ तज्जडे भवेत् ॥ ७१७॥
नद्यास्तीरे फलानीति नृवचोऽन्यदपेक्षते ॥
प्रामाण्याय, तथा वेदवाक्यं नान्यदपेक्षते ॥ ७१८ ॥
प्रमाणमप्रमाणं च प्रमेयो निश्चितिस्तथा ॥
यत्सान्निध्यात्प्रसिध्यन्ति तत्सिद्धौ किमपेक्षते॥७१९॥
इदमेवमिदं नैवमिति बुद्धिरनात्मिका ॥
येनात्मवत्येष आत्मा स्वत एव न चान्यतः ॥७२०॥
जाग्रत्स्वप्नसुषुप्तेषु तद्भावाभावसाक्षिणः ॥

तदवान्तरविशेषज्ञानाय सामग्र्यन्तरमपेक्षते, एवमात्मधीरपि-विशेषज्ञानाय विधिमपेक्षते इति द्वितीयं पक्षं प्रतिक्षिपति *स्वप्रकाशेति । आत्मनो निःसामान्यविशेषत्वादिति भावः ॥७१७॥ यथा पौरुषेयवाक्यजन्यज्ञानं प्रमात्वाय मूलप्रमाणमपेक्षते, एवं वेदान्तधीरपि तदर्थं विधिमपेक्षत इति तृतीयं निराह *नद्या-इति । अपौरुषेयवाक्यस्य स्वतःप्रमाणत्वादिति भावः ॥ ७१८॥ अनभ्यासदशापन्नदूरस्थजलज्ञानं यथा स्वविषयसंशयादिनिवृत्तयेऽन्यदपेक्षते तद्वदिति चतुर्थं प्रत्याह *प्रमाणमिति । प्रतीचोऽतिसन्निहितत्वेन तत्र पुंसः संशयायोगादिति भावः ॥७१९॥ यथा घटादिज्ञानं परमते स्वविषयसत्यत्वाय गुणजन्यत्वमपेक्षते, तद्वदिति पञ्चममपवदति *इदमिति । घटादि पृथुबुध्नोदराकारत्वादिमद्युक्तं न तथा पटादीति या बुद्धिः सा स्वतःसत्ताशून्याऽपि येनात्मना सत्तावती लक्ष्यते । एषः स्वत एव सत्यस्वरूप इत्यर्थः ॥ ७२० ॥ षष्ठेऽपीदं वाच्यं चिदंशस्थावरणनिवृत्तये ज्ञानं विधिमपेक्षते उत आनन्दांशस्थावरणनिवृत्तये? नाद्यः,तत्रा-

नास्ति तस्य तिरोधानमन्यथा जगदन्धता ॥ ७२१ ॥
कर्त्रादिव्यापृतेः पूर्वमसंकीर्णमुपाधिभिः ॥
अविक्षिप्तमसंसुप्तं स्वानुभूत्यैव गम्यते ॥ ७२२ ॥
प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ॥
कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः ॥ ७२३ ॥
शैत्यापनोदने वह्निर्यथा नान्यदपेक्षते ॥
विरोधित्वात्तथा विद्या निरपेक्षा तमोहतौ ॥ ७२४ ॥
या तमोघातिनी विद्यावृत्तिः सा स्वयमेव हि ॥
नश्यत्यविद्यया सार्द्धं हत्वा रोगमिवौषधम् ॥ ७२५ ॥
प्रत्यङ्मात्रावशेषो यः स तमोहानिरुच्यते ॥

वरणस्यैवाभावादित्याह *जाग्रदिति । द्वितीये दीपादिवदुत्पद्यमानमेव ज्ञानं तन्निवर्तयतीति भावः ॥ ७२१ ॥ अन्तःकरणाद्युपाधिनिवृत्तये विध्यपेक्षेति सप्तमपक्षेऽपि किं तन्निवृत्तिरनात्यन्तिकी आत्यन्तिकी वा विवक्षिता ? नाद्यः, सुप्त्यादौ तस्य स्वतःसिद्धत्वादित्याह *कर्त्रादीति । द्वितीये अज्ञाननिवृत्त्यैव तन्निवृत्तेर्नान्यापेक्षेति ध्येयम् ॥ ७२२ ॥ विषयासम्भावनानिवृत्त्यर्थं विधिमपेक्षते इत्यष्टमं निराचष्टे *प्रमाणमिति । प्रमाभासः संशयः । एतानि दृश्यत्वेन द्रष्टरि प्रमां कुर्वन्ति दृश्यस्य द्रष्टारमन्तरेणायोगात्तत्र नासम्भावनेत्यर्थः ॥ ७२३ ॥ नवमं प्रत्याख्याति *शैत्येति । शुक्त्यज्ञाननिवृत्तौ विध्यपेक्षाऽदृष्टेश्चेति भावः ॥ ७२४ ॥ अविद्यानिवर्तकं ज्ञानं स्वनाशाय विधिमपेक्षते इति दशमं निरस्यति *या तम इति ॥ ७२५ ॥ अविद्याध्वंसनिवृत्तये विध्यपेक्षेत्यन्त्यः पक्षोऽपि न साधुरित्याह *प्रत्यगिति । अविद्यानिवृत्तेरधिष्ठानमात्रत्वात्तस्य च नित्यत्वात्त-

अनश्वरी तमोहानिर्नात्रातो विध्यपेक्षिता ॥ ७२६ ॥
पश्येदात्मानमित्येष विधिरत्र निरर्थकः ॥
अशक्यत्वाद्वस्तुतन्त्रं नेच्छया कर्तुमीश्महे ॥ ७२७ ॥
दर्शनं वस्तुतन्त्रं स्यात्कर्तृतन्त्रं नहि क्वचित् ॥
कर्तृतन्त्रधियोपास्यं यत्स्यात्तद्ब्रह्म नैव हि ॥ ७२८ ॥
मनुते यं न मनसा मतं येन मनः सदा ॥
ब्रह्म विद्धि तदेव त्वं न त्विदं यदुपासते ॥ ७२९ ॥
इति शृङ्गग्राहिकया श्रुत्योपास्यस्य वारिता ॥
ब्रह्मता, साक्षिणस्त्वस्य ब्रह्मत्वं स्फुटमीरितम् ॥ ७३० ॥
हेतवः पूर्वपक्षस्य ये प्रोक्तास्तेषु सम्मतम् ॥

स्मिन्नपि पक्षे विध्यपेक्षा नेत्यर्थः ॥ ७२६ ॥ अशक्तेरित्युक्तं हेतुं व्याख्याति *पश्येदिति । अशक्यत्वमुपपादयति *वस्त्विति । वस्तुतन्त्रं यद्वस्तु तत् इच्छया कर्तुमकर्त्तुं वा न प्रभवामेत्यर्थः ॥ ७२७ ॥ *कर्तृतन्त्रमिति । अनिच्छतोऽपि दुर्गन्धाद्युपलम्भादिति भावः । तर्ह्युपास्तिरूपज्ञानस्य कर्तृतन्त्रत्वादेव विधेयत्वमित्याशङ्क्य ब्रह्मणोऽनुपास्यत्वान्नैवमिति आह *कर्तृतन्त्रेति ॥ ७२८ ॥ उक्तेऽर्थे मानमाह *मनुत इति ॥ ७२९ ॥ ब्रह्मणोऽनुपास्यत्वेऽपि साक्षिणि किमायातं ? तत्राह *साक्षिण इति । तत्त्वमादिवाक्यैरिति शेषः ॥ ७३० ॥ एवं शब्दादुत्पन्नब्रह्मात्मैक्यज्ञानस्य पुंव्यापारानपेक्षत्वाद्विधेयव्यापारसाध्यादर्शनादनुष्ठातुरभावाद्विध्यानन्त्याज्ज्ञानाधीनप्रयोजनस्य विध्यनपेक्षत्वादपुंतन्त्रत्वेन विधातुमशक्यत्वाच्च न तत्र विधिरित्युक्तम् । इदानीं ज्ञाने विधिरस्तीत्यत्र पूर्वोक्तहेतून् क्रमेण दूषयति *हेतव इति । *सम्मतमिति । तयोरेकार्थत्वे ह्युक्तहेतुभ्यो

विद्युपास्त्योरिहैकार्थ्यं क्रियात्वं नतु सम्मतम् ॥७३१॥
यागे यद्देवताध्यानं नृतन्त्रत्वाक्रियाऽस्तु सा ॥
प्रमाणमेयतन्त्रत्वाद्धियैषा स्यात्कथं क्रिया ॥७३२॥
सर्वाकाङ्क्षामूलहेतोरज्ञानस्यैव बाधनात् ॥
अंशत्रयमनाकाङ्क्षं कथं सा भावनोदियात् ॥ ७३३ ॥
स्वतन्त्रा ब्रह्म वेदान्ता बोधयित्वा विमुक्तिदाः ॥
अतः शाब्दज्ञानविधिर्न कथञ्चन युज्यते ॥ ७३४ ॥
न योगशास्त्रसंसिद्धो निरोधोऽपि विधीयते ॥
विमुक्तिसाधनत्वेन तस्यानधिगमाच्छ्रुतेः ॥ ७३५ ॥
अनुष्ठातुमशक्यश्च प्रत्यग्बोधं विना न सः ॥
प्रत्यग्ज्ञाने निरुध्यन्ते चित्ततद्वृत्तयोऽखिलाः ॥७३६॥
वस्तुतस्तु निरोधोऽस्तु मा वाऽस्त्वेतेन किं तव ॥
प्रत्यग्बोधमृते नान्यन्मुक्तेरस्तीह साधनम् ॥ ७३७ ॥
विधेयस्तर्हि सन्तान इति चेत्, तत्र को विधिः ॥
अपूर्वो नियमो वा स्यात्परिसङ्ख्याऽथवोच्यताम्॥७३८॥

न ज्ञानविधिसम्भव इत्यर्थः । क्रियात्वादित्येतदसिद्ध्या दूषयति *क्रियात्वमिति ॥ ७३१ ॥ ७३२ ॥ त्र्यंशसंभवादित्युक्तं धुनीते *सर्वेति ॥ ७३३ ॥ शेषित्वं मुक्तिहेतुत्वं च सिद्धब्रह्मबोधिवाक्यानामप्यस्तीत्याह *स्वतन्त्रा इति । न च सिद्धबोधिवाक्यानामपुमर्थता; नायं सर्प इत्याप्तवाक्ये तद्दर्शनादिति भावः ॥ ७३४ ॥ चित्तनिरोधो विधेय इति द्वितीयं पक्षमनूद्य निराकरोति *न योगेत्यादिना ॥ तमेव विदित्वेत्यादिश्रुतेर्ज्ञानमेव मुक्तिहेतुः, श्रुतिविरोधे योगशास्त्रस्यान्यपरत्वादिति भावः ॥७३५॥७३६॥७३७॥ धीसन्ततिरूपा क्रिया विधीयते इति पक्षमनूद्य विकल्पयति *विधेय इति ॥ ७३८ ॥ अस्य विधेर-

अपूर्वोऽत्यन्तमप्राप्तौ नियमः पाक्षिके सति ॥
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्याविधीयते॥ ७३९ ॥
अत्र त्वत्यन्तमप्राप्तमात्मोपासनमन्यतः ॥
अपूर्वविधिरेवातो यथैतत्स्यात्तथोच्यते ॥ ७४० ॥
एकार्थोल्लेखिवृत्तीनामातादात्म्याभिमानतः ॥
आवर्तनं हि शब्दार्थः सर्वत्रोपासनश्रुतेः ॥ ७४१ ॥
विद्युपास्तेरिहैकत्वं यदि तर्हि विदेरपि ॥
अर्थ आवृत्तिरेवास्तु पूर्वब्राह्मणवाक्यवत् ॥ ७४२ ॥
पूर्वत्रैतत्साम वेदेत्येवं वेदेति शब्दतः ॥
उपासनं व्यवहृतं तथा श्रुत्यन्तरेष्वपि ॥ ७४३ ॥
विद्याप्रकरणं चात्र न विरुद्धमुपास्तितः ॥

पूर्वत्वं वक्तुं विधित्रयस्यापि लक्षणमाह *अपूर्व इति ॥७३९॥ *यथैतदिति । यथा ज्ञानसन्ततिविधेरपूर्वत्वं स्यात्तथा साध्यत इत्यर्थः ॥ ७४० ॥ तत्साधनायोपासनशब्दार्थमाह *एकेति । विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहीकरणम् उपास्यसाक्षात्कारावसानं, सर्ववेदेषूपासीतेति श्रुतेः । शब्दार्थः वाक्यार्थ इति यावत् । तथा चाप्तं तदेव विधीयत इति भावः ॥ ७४१ ॥ न स वेदेति पूर्ववाक्ये ज्ञानस्य प्रकृतत्वादुपासीतेत्यस्यापि समानार्थत्वादत्रावृत्तिविधिरनुपपन्न इति शङ्कते *विद्युपास्त्योरिति । ज्ञानस्य प्रकृतत्वमसिद्धं न स वेदेत्यत्राप्यावृत्तेरभिधानाद्यत्स एवमेतत्साम वेदेत्यत्र वेदनशब्दस्यावृत्त्यर्थत्वेन प्रकृतत्वादित्याह *तर्हीति ॥७४२॥७४३॥ ननु वेदनशब्दस्यावृत्त्यर्थत्वे प्रकरणविरोधः स्यादिति, नेत्याह

अपरोक्षब्रह्मविद्याजन्मनः सुलभत्वतः ॥ ७४४ ॥
नहि सिद्धार्थवाक्योत्थज्ञानमात्रेण कश्चन ॥
ब्रह्मानुभवितुं शक्तस्तस्यावाक्यार्थरूपतः ॥ ७४५ ॥
नानापदार्थसंसृष्टरूपं वाक्यात्प्रतीयते ॥
ब्रह्मासंसृष्टरूपत्वान्न वाक्येनानुभूयते ॥ ७४६ ॥
न चावेदार्थता शङ्क्या वेदोक्तोपासनोत्थितात् ॥
साक्षात्काराद्ब्रह्म भाति तस्माद्वेदार्थतैव हि ॥ ७४७॥
देवो भूत्वा देवमेतीत्यादिश्रुत्यनुरोधतः ॥
साक्षात्कारं ध्यानजन्यमन्तरेण न मुच्यते ॥ ७४८॥
शब्दाद् ज्ञाने समुत्पन्ने आसाक्षात्कृतिभावना ॥
प्रत्ययावृत्तिरूपा या न प्राप्तैषाऽन्यमानतः ॥ ७४९ ॥
सिद्धार्थशब्दात्स्वाध्यायविधितो वाऽन्यतोऽथवा ॥
तत्प्राप्तिः शङ्क्यते तत्र सिद्धार्थो न विधायकः ॥७५०॥
अक्षरार्थज्ञानमात्रावसायध्ययने विधिः ॥
न चान्यदत्र सम्भाव्यमप्राप्तोपासना ततः ॥ ७५१ ॥
अपूर्वविधिरेवातः स्मृतिसन्तानगोचरः ॥

---

*विद्येति ॥ ७४४ ॥ ७४५ ॥ ब्रह्मणो वाक्यार्थत्वाभावमाह *नानेति ॥ ७४६ ॥ तर्ह्यौपनिषदत्वविरोध इत्याशङ्क्योपनिषदर्थज्ञानजन्यसाक्षात्कारविषयत्वाद्ब्रह्मणस्तन्न विरुध्यते इत्याह *न चेति ॥ ७४७ ॥ ध्यानसाक्षात्कारस्य मुक्तिहेतुत्वे श्रुतिमप्यनुकूलयति *देवो भूत्वेति ॥ ७४८ ॥ ननु ज्ञानसन्ततिः प्राप्तत्वान्न विधेयेति, नेत्याह *शब्देति ॥७४९॥ अप्राप्तत्वमसिद्धमिति वदन्तं प्रति तत्प्राप्तिः केनेति विकल्प्य दूषयति *सिद्धार्थेत्यादि ॥ ७५० ॥ अक्षरग्रहणमर्थावबोधमात्रं वाऽव-

इति प्रथमपक्षो यस्तस्य दूषणमुच्यते ॥ ७५२ ॥
नापूर्वविधिरेष स्यात्प्राप्तत्वात् स्मृतिसन्ततेः ॥
अनुभूते हि विषये स्मृतिः प्राप्ता विधिं विना॥७५३॥
स्मर्यन्त एव पित्राद्याः श्राद्धाद्यर्थं तदा तदा ॥
अनुभूतो निजात्माऽयं कुतो न स्मर्यते वद ॥ ७५४ ॥
न शाब्दज्ञानमात्रेणानुभूतं ब्रह्म तद्भवेत् ॥
अवाक्यार्थात्मकत्वेनेत्येतदत्र न सङ्गतम् ॥ ७५५ ॥
अवाक्यार्थात्मकं ब्रह्मेत्येतद्वाक्येन गम्यते ॥
अन्येन वा, यदा वाक्यात्तदा वाक्यार्थता भवेत्॥७५६॥
अथान्येनानुभूतं तदवाक्यार्थात्मकं तदा ॥
तावतैव कृतार्थत्वाद् व्यर्थं ध्यानादिचेष्टितम् ॥७५७॥
ब्रह्म संसृष्टरूपं चेद्वाक्यादध्यवसीयते ॥
संसृष्टरूपं तन्नेति गीर्वाणैरपि दुर्लभम् ॥ ७५८ ॥
घटाकाशो महाकाश इति वाक्ये यथा तथा ॥
तत्त्वमस्यादिवाक्येषु कुतोऽखण्डार्थधीर्न ते ॥ ७५९ ॥
साक्षात्कारो ध्यानजन्य इत्युक्तं यत्तदप्यसत् ॥

सानं यस्य स तथोक्तः ॥ ७५१ ॥ ७५२॥ ७५३ ॥ ७५४ ॥ यदुक्तं शब्दाद्ब्रह्मानुभवितुमशक्यमिति तदनूद्य निराह *न शाब्दज्ञानेति॥७५५॥कथमसङ्गतमित्याशङ्क्य ब्रह्म वाक्यार्थरूपं नेति वदता न तज्ज्ञातमिति वक्तव्यम् । न ज्ञातं केनेति विकल्प्य दूषयति *अवाक्येत्यादिना ॥ ७५६ ॥ ७५७ ॥ वाक्यादेव परोक्षतया ज्ञाते ब्रह्मण्यापरोक्ष्यार्थं ध्यानादिकमर्थवदित्याशङ्क्य वाक्यस्य संसृष्टार्थबोधकत्वे ब्रह्मणोऽखण्डत्वमेव न सिद्ध्येदिति वाक्यस्यैव तद्बोधकत्वं वाच्यमित्याह *ब्रह्मेति ॥ ७५८ ॥ वाक्यस्या·

ध्यानं क्रिया न प्रमाणं क्वानुभूतिरमानतः ॥ ७६० ॥
यथा वस्तु तथा बुद्धिरनुभूतिरतो भवेत् ॥
भ्रान्तैव ध्यानजन्या धीर्मृतपुत्रापरोक्षवत् ॥ ७६१ ॥
किं च वाक्येन यद्बुद्धं तद्भ्रान्तं ते मते ततः ॥
तद्ध्यानं क्वोपयुज्येत स्रक्सर्पध्यानसाम्यतः ॥ ७६२ ॥
अथ सिद्धार्थवाक्येन ब्रह्मानुभव इष्यते ॥
अनुभूतिध्वस्तमोहः कुतः स्मृतिमपेक्षते ॥ ७६३ ॥
मानोत्थानुभवेनात्ममोहो यदि न नश्यति ॥
तर्ह्येष स्मृतिमात्रेण सर्वथा नैव नश्यति ॥ ७६४ ॥
अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः ॥
स निष्फलेषुतुन्नाङ्गो नश्यतीत्यतिदुष्करम् ॥ ७६५ ॥

खण्डार्थबोधकत्वं दृष्टान्तेन साधयति *घटेति ॥ ७५९ ॥ ७६० ॥ मानाजन्यस्याप्रमात्वं दर्शयितुं प्रमालक्षणमाह *यथेति । अनुभूतिः प्रमा । ध्यानजन्यधीर्भ्रान्तिरेवेति सदृष्टान्तमाह *मृतेति ॥ ७६१ ॥ ध्यानजन्यधियोऽपि विषयाबाधात्प्रमात्वमाशङ्क्य दूषणान्तरमाह *किञ्चेति ॥ ७६२ ॥ यद्यपि तत्त्वमादिवाक्यमेवाखण्डार्थबोधकं तथापि तत्साक्षात्काराय तत्सन्ततिर्विधीयत इति शङ्कते *अथेति । यत्साक्षादित्यपरोक्षैकरसे ब्रह्मणि वाक्येनापि वस्तुवृत्तमनुसृत्य साक्षाद्बोधसम्भवादात्मनि स्मृतेरफलत्वान्न तत्सन्ततिर्विधेयेत्यभिप्रेत्याह *अनुभूतीति ॥ ७६३ ॥ ७६४ ॥ मानजन्यधिया मोहानिवृत्तावुक्तं बाधकं दृष्टान्तेन स्पष्टयति *अपीति । चेदित्यवधारणे । क्रियापदादुपरि सम्बध्यते । तुन्नत्वं पीडितत्वम् । निष्फलत्वं नैशित्यराहित्यम् ॥ ७६५ ॥ साक्षात्कारे जाते स्मृतेरफलत्वान्न सन्तति-

आत्मन्यवगते साक्षात्प्रमाणार्थसमाप्तितः ॥
किमन्यत्स्मृतिसन्तानात्प्रार्थ्यते भवता फलम् ॥७६६॥
भविष्यत्कालसम्बन्धि फलं स्यान्नहि नाकवत् ॥
धीजन्मन्येव तत्सिद्ध्येदग्निजन्मनि दाहवत् ॥ ७६७ ॥
किञ्चानुभव एवात्र नित्यं सन्निहितत्वतः ॥
सम्भवेत्सर्वदा तस्मान्न स्मृत्याऽस्ति प्रयोजनम् ॥७६८॥
आस्तां दूषणमालेयं स्मृतिर्वाऽनुभवोऽपि वा ॥
स्वतः प्राप्नोति नापूर्वविधिस्तेनात्र सन्ततेः ॥ ७६९ ॥
नन्वेवं तर्हि सन्ताने भवेन्नैयमिको विधिः ॥
आत्मोपासनमप्राप्तं पक्षे तेन नियम्यते ॥ ७७० ॥
अनुभूतेऽपि पित्रादौ नियमेन स्मृतिर्नहि ॥
दृष्टा, तथाऽऽत्मतत्त्वेऽपि नैरन्तर्येण तत्स्मृतिः ॥७७१॥
यद्प्यव्यवधानेन स्मृतेर्विघ्नो न कश्चन ॥

विधेयेत्युक्तमेव प्रपञ्चयति *आत्मनीति ॥ ७६६ ॥ दृष्टफला-भावेऽप्यदृष्टफलाय विधिरित्याशङ्क्याह *भविष्यादिति । नाकवदिति व्यतिरेकदृष्टान्तः । तत्र हेतुः *धीजन्मनीति । यथाऽग्निजन्मसमकालमेवैधसां भस्मीभावः, एवं ज्ञानोदयसमकालमेव सर्वकामावाप्तिरूपकैवल्यसिद्धिरित्यर्थः ॥ ७६७ ॥ सन्ततेरविधेयत्वे हेत्वन्तरमाह *किञ्चेति । ब्रह्मविदो विषयान्तराभावेन प्रत्यग्बोधस्य सदा प्राप्तत्वात्स्मृतिसन्तानविधिर्व्यर्थ इत्यर्थः ॥ ७६८ ॥ अपूर्वविधिनिराकरणमुपसंहरति *आस्तामिति ॥ ७६९ ॥ द्वितीयमुत्थापयति *नन्विति ॥ ७७० ॥ पाक्षिकप्राप्तिमाह *अनुभूत इति ॥ ७७१ ॥ विदुषो विषया-

तथाऽऽप्यारब्धदोषेण बलाद्विस्मर्यते पुमान् ॥ ७७२ ॥
मोचकात्प्रबलैर्मुक्तो बाणस्तु न निवार्यते ॥
प्रवृत्तत्वात्तथाऽऽरब्धं कर्म ज्ञानान्न नश्यति ॥ ७७३ ॥
वाङ्मनःकायचेष्टानामभावे कर्मणः फलम् ॥
भोक्तुं न शक्यते तेन मनो विक्षिप्यते बलात्॥७७४॥
विक्षिप्तचित्तः पुरुषस्तत्त्वं संस्मृतिवर्जितः ॥
अविद्वानिव संसारदुःखैरेषोऽभिभूयते ॥ ७७५ ॥
अविक्षेपे स्मृतिः प्राप्ता विक्षेपे न तु सा ततः ॥
पाक्षिक्यां स्मृतिसम्प्राप्तौ तत्सन्तानो नियम्यते॥७७६॥
उपस्थितं यदा दुःखं तदा तस्योपशान्तये ॥
आनन्दात्मकमद्वैतं स्मरेद्ब्रह्म पुनः पुनः ॥ ७७७ ॥
इत्येवं मृदुचित्तानां मतं भाष्यकृतस्तथा ॥
अङ्गीकृत्य भरं चक्रुरपूर्वविधिवारणे ॥ ७७८ ॥
अद्यैव मृतिरायातु कल्पान्तनिचयेन वा ॥

न्तराभावादात्मबोधो नित्यं स्वतःप्राप्त एवेत्युक्तमनूद्य परिहरति *यद्यपीति ॥ ७७२ ॥ आरब्धं कर्मात्मज्ञानापेक्षया प्रबलमित्येतद् दृष्टान्तमुखेनाह *मोचकादिति ॥ ७७३ ॥ ॥७७४॥७७५॥७७६॥७७७॥ किमयं नियमविधिः सर्वनरसाधारण इत्याशङ्क्य नेति व्यवस्थामाह * इत्येवमिति । मृदुचित्तानाम्—अवशीकृतमानसानाम् । कथं तर्ह्यविशेषेण भाष्यकृन्नियमविधिमङ्गीचकारेत्याशङ्क्य तद्वचनस्यापूर्वविधिनिराकरणपरत्वान्न दोष इत्याह *अङ्गीकृत्येति । भरं चक्रुः यत्नं कृतवन्तः ॥ ७७८ ॥ वशीकृतचित्तानां त्वात्मधियो नित्यप्राप्तत्वान्न नैयमिकोऽपि विधिरित्याह *अद्यैवेत्यादिना । ननु

इत्यादिधीराचित्तानां नित्यप्राप्तिरथोच्यते ॥ ७७९ ॥
यत्साक्षादितिवाक्योत्थप्रत्यग्याथात्म्यलोहिना ॥
ज्ञानेन तमसो दाहान्नित्यप्राप्तैव तत्स्मृतिः ॥ ७८० ॥
देहादिभावनालिङ्गादहम्बुद्धेश्च यं पुरा ॥
सदेक्षते तमेवाद्य श्रुत्या ब्रह्मतयेक्षते ॥ ७८१ ॥

सर्वेषामपि विदुषामात्मनो नित्यप्राप्तिः किं न स्यादविशेषादविद्यानिवृत्तेरिति चेत्, अयं भावः—यस्तूपास्यदेवतासाक्षात्कारपर्यन्तं सगुणोपासनं विधाय विद्यायां प्रवृत्तः तस्य विचारेण ज्ञानोत्पत्तौ विक्षेपाभावादात्मधीर्नित्यप्राप्तैव। यः पुनरुपासनमकृत्वा श्रवणाद्यनुष्ठाय तत्त्वं निश्चिनोति तस्य चित्तवशीकरणाभावे विक्षेपसम्भवात्तं प्रति नियमविधिः । न च तत्त्वज्ञानेनाज्ञानस्य नष्टत्वाद्विधिवैयर्थ्यं, चित्तवशीकरणाभावे शास्त्रेण नश्येत्परमार्थरूपमित्यज्ञाने परमार्थत्वांशनाशेऽपि जन्महेत्वज्ञाननाशायोगात् । अन्यथा वेदान्तेषूपास्तिविधीनामैकाग्र्यद्वाराऽद्वितीयब्रह्मपरत्वं न स्यात् अतस्तेषां श्रुत्यन्तरप्रसिद्धप्रणवोच्चारणपूर्वकमप्रतिबद्धसाक्षात्काराय निरन्तरं निर्गुणब्रह्मभावनं कार्यम् । अत एवाधस्तनग्रन्थेषु विदुषो विधिर्नास्तीत्युक्त्वा पुनर्विद्वानज्ञवद्विधिमर्हति, ब्रह्मनिष्ठा विधीयत इत्याद्युक्तिर्न विरुध्यते । सर्वत्राधिकारिभेदेन व्यवस्थासम्भवादिति ॥ ७७९ ॥ ७८० ॥ किञ्च तत्त्वधियः पूर्वमप्यात्मानुभवो नित्यप्राप्त एवेत्याह *देहादीति । भावनाशब्दो ज्ञानपरः । देहः स्वातिरिक्तद्रष्टृकः दृश्यत्वादित्यनुमानेनाहमित्यध्यक्षेण च सदेक्षत इत्यर्थः । इयांस्तु विशेषः—यं पूर्वं कर्तृत्वेनापश्यत्तमेवाकर्तृत्वेन पश्यतीत्याह *तमेवेति ॥ ७८१ ॥ अ-

ततश्च प्राकृतो यद्वत्कर्त्रात्मानं सदा स्मरन् ॥
अस्ति विद्वांस्तथा ब्रह्म स्मरत्वेनं विधिं विना॥७८२॥
दुःखात्मनि चिदाभासे सत्यायातं किमात्मनि ॥
चिदाभासे भोजते स्यादारब्धचरितार्थता ॥ ७८३ ॥
नष्टो मोहस्त्वात्मतत्त्वे भोगं मन्येत न क्वचित् ॥
नहि नाम विनिद्रोऽपि सुप्तवत्स्वप्नमीक्षते ॥ ७८४ ॥
बलाद्विक्षिप्यते चित्तमित्यादि यदुदीरितम् ॥
अस्त्वेवैतत्तावताऽत्र नित्यप्राप्तिर्न बाध्यते ॥ ७८५ ॥
विक्षिप्तमपि तच्चित्तमनात्मग्रहणोद्यतम् ॥
प्रत्यगर्थमनालिङ्ग्य न पराग्बोधनक्षमम् ॥ ७८६ ॥
आत्मानं सर्वदोपास्ते तत्प्रत्ययसमन्वयात् ॥
निःशेषानात्मबुद्धीनां यथैतत्स्यात्तथोच्यते ॥७८७॥
प्रत्यङ्मोहः सर्वदैव भास्वच्चैतन्यबिम्बितः ॥

नुभवात्स्मृतेरपि नित्यप्राप्तिमाह *तत इति। उक्तानुभवादित्यर्थः ॥ ७८२ ॥ आत्मनि स्मृत्यनुभवयोरन्यतरस्य नित्यप्राप्तत्वे प्रारब्धप्रापितभोगो न स्यादित्याशङ्क्याह *दुःखात्मनीति । दुःखभोक्तरीत्यर्थः ॥७८३॥७८४॥ चित्तविक्षेपे सत्यात्मस्मृत्यसम्भवान्न तस्य नित्यप्राप्तिरिति यदुक्तं तदनूद्य प्रत्याह *बलादिति ॥७८५॥७८६॥ उक्तमेव विशदयति *आत्मेति । तत्र हेतुः *तत्प्रत्ययेति । सर्वानात्मवृत्तीनामात्मचैतन्यव्याप्तत्वादित्यर्थः । उक्तहेतुं साधयितुं प्रतिजानीते *यथेति ॥ ७८७ ॥ प्रत्यगाश्रयमज्ञानं तावत्सदैवापरोक्षचैतन्यव्याप्तम् अतस्तत्कार्यवृत्तयोऽपि तद्वच्चैतन्यव्याप्ता एवेत्याह *प्रत्यगिति । द्वयो-

बुद्धितद्वृत्तयश्चैव तप्तायोविस्फुलिङ्गवत् ॥ ७८८ ॥
प्रागप्यनात्मसम्बन्धाज्जन्मप्रभृतिवृत्तयः ॥
आत्मना पूरिताः सत्यः सम्बद्धाः स्युरनात्मनि॥७८९॥
खपूर्ण एव सन्कुम्भो द्रव्यैर्नानाविधैर्युतम् ॥
वियोगं वा यथा गच्छेच्चैतन्येद्धास्तथा धियः ॥७९०॥
एवं सत्यर्थतः प्राप्ता सदात्मस्मृतिसन्ततिः ॥
विमूढस्यापि तुल्या चेदस्तु नः किं विनङ्क्ष्यति ॥७९१॥
यदि मोहाविनाशेन सत्यप्येषाऽतिनिष्फला ॥
विदुषस्तर्ह्यमूढस्य सफलेत्यभ्युपेयताम् ॥ ७९२ ॥
यः किं फलमिति प्रश्नो विधिपक्षेऽप्यसौ समः ॥
विधावदृष्टमिति चेदविधावपि तत्समम् ॥ ७९३ ॥

श्चैतन्यव्याप्तौ दृष्टान्तः *तप्ताय इति ॥ ७८८ ॥ उक्तमेव व्यनक्ति *प्रागिति ॥ ७८९ ॥ विषयसम्बन्धात्पूर्वं वृत्तीनां चैतन्यव्याप्तावपि नोर्ध्वं तद्व्याप्तिः विषयसम्बन्धेनैवानाकाङ्क्षत्वादित्याशङ्क्याह *खेति । यथा कुम्भो नभोव्याप्त एव दध्यादिभिः संयोगविभागावनुभवति, तथा बुद्धिवृत्तयोऽपि चिद्व्याप्ता एव विषयैः संयोगादि प्रतिपद्यन्ते । नहि कदाचिदपि चिदव्याप्तं किञ्चिदस्तीति भावः ॥ ७९० ॥ फलितमाह *एवमिति । यद्यपीयं स्मृतिर्मूढानामप्यस्ति तथापि चितिव्याप्ता वृत्तिरितिबुद्ध्यभावात्तेषां निष्फला, विदुषस्तु तद्धीसम्भवात्साफल्यमाह *विमूढस्येत्यादिना ॥७९१॥७९२॥ आत्मस्मृतेर्वस्तुस्वाभाव्याद्धर्मजनकत्वस्य सर्वैर्वक्तव्यत्वात्तत्फलचिन्ता न कार्येत्याह *यः किमित्यादिना ॥ ज्ञानसन्ततेर्विधेयत्वपक्षेऽपि साक्षात्कारानन्तरमात्मस्मृतिजन्यादृष्टस्य वैफल्यं तुल्यमिति भावः ॥७९३॥

प्रासङ्गिकनदीस्नानान्नादृष्टं नहि जन्यते ॥
अथ सिद्धब्रह्मचिन्ताऽप्येवं पुण्यं प्रदापयेत् ॥ ७९४॥
जन्महीनस्य किं पुण्यैरिति चोद्यं समं द्वयोः ॥
अनिर्वाच्या वस्तुशक्तिरिति तुल्यं तदुत्तरम् ॥७९५॥
देहात्मचिन्ता मूढानां नित्यप्राप्ता यथा तथा ॥
विदुषां ब्रह्मचिन्ताऽपि नातो नैयमिको विधिः॥७९६॥
नन्वेषा परिसङ्ख्या स्यादुभयत्र प्रसङ्गतः ॥
यथाऽऽत्मनि स्मृतिः प्राप्ता प्राप्ताऽनात्मनि सा तथा७९७॥
श्रुत्याऽनुभूतमद्वैतं द्वैतमक्षादिमानतः ॥
उभयोरविशेषेण प्राप्यते स्मृतिसन्ततिः ॥ ७९८ ॥
द्वैतस्मृतिनिवृत्त्यर्थमद्वैतस्मृतिसन्ततिः ॥
विधीयते, विधेर्द्वैतस्मृतिरोधः फलिष्यति ॥ ७९९ ॥
मैवं किं वास्तवद्वैतस्मृतिः प्राप्तोत बाधिता ॥
नाद्यो वेदान्तवाक्योत्थज्ञानेन द्वैतबाधनात् ॥८००॥
सम्यग्ज्ञानाग्निनिर्दग्धे प्रत्यङ्मोहे संबान्धवे ॥

७९४॥७९५॥ उक्तमर्थं दृष्टान्तमुखेनोपसंहरति *देहेति ॥७९६॥ तृतीयमुत्थापयति *नन्विति ॥ ७९७ ॥ उभयत्र स्मृतौ सामग्रीसद्भावं दर्शयति *श्रुत्येति । आत्मानात्मनोः स्मृतिप्राप्तिमभिधाय तत्र विधेयं तत्फलं चाह *द्वैतेति ॥७९८॥ विकल्पासहत्वान्नायं पक्षः साधुरिति दूषयति *मैवमिति॥७९९॥ब्रह्मधीबाधितद्वैते वास्तवधीर्नोदेत्येतत्स्पष्टयति *सम्यगिति । सकार्ये मोहे नष्टेऽन्यत्रानात्मनि वस्तुत्वेन स्मृतिर्नोदेतीत्यर्थः ॥८००॥ ननु द्वैतज्ञानमेवाद्वैतज्ञानबाधकं किं न स्यादिति तत्राह *मानेति । अज्ञानं तत्कार्यं च मानापेक्षाया दुर्वारत्वात्तेन बाध्यं

मुक्त्वा ब्रह्मस्मृतिं नान्यद्वस्तुस्मृतिरुदेति हि ॥८०१॥
मानाननुविधानेन स्मृतिरन्या न बाधिका ॥
प्रमाणानुविधायिन्या तत्त्वस्मृत्या तु बाध्यते ॥८०२॥
लौकिकानुभवो बाध्यो वैदिको बाधको यथा ॥
तज्जन्ययोरपि स्मृत्योर्बाध्यबाधकता तथा ॥ ८०३ ॥
स्वास्थ्यास्वास्थ्यप्रदे यस्माद्ब्रह्मानात्मस्मृती ततः ॥
मुक्त्वाऽनात्मस्मृतिं ब्रह्मस्मृतिमेवाश्रयेत्ततः ॥८०४॥
ब्रह्मधीप्रचुरत्वेऽपि बाधितद्वैतधीः क्वचित् ॥
कदाचिज्जायते सैषा निरोद्धव्येत्यसङ्गतम् ॥ ८०५ ॥
जीवनार्थं द्वैतभानं निरोधे जीवनं कथम् ॥
अतो ऽशक्यतया नात्र परिसङ्ख्याविधिर्भवेत्॥८०६॥
तव श्रद्धाजडत्वं यत्तन्निवृत्त्यै प्रवर्त्तिता ॥
विधिचिन्ता, वस्तुतत्त्वास्थितिं संक्षेपतः शृणु॥८०७॥

मानं पुनर्बलवत्त्वेन बाधकमिति रज्ज्वादिज्ञानेन निर्धारितं, तेन प्रमाजन्यसंस्कारजस्मृतेरपीतरस्मृतिबाधकत्वमिति भावः ॥८०१॥ ॥ ८०२ ॥ तत्रैव दृष्टान्तान्तरमाह *लौकिकेति । देहात्मबुद्धेस्तदतिरिक्तात्मज्ञानबाध्यत्वं सर्वसम्मतमिति भावः॥८०३॥अपि च ब्रह्मस्मृतिसन्ततिर्न विधेया तस्याः सुखविषयत्वेन तत्र स्वत एव प्रवृत्तिसम्भवादित्याह *स्वास्थ्येति ॥ ८०४ ॥ बाधितद्वैतस्मृतिनिवृत्त्यर्थं ब्रह्मधीसन्ततिर्विधेयेति द्वितीयं पक्षमनुभाष्य दूषयति *ब्रह्मेत्यादिना ॥ ८०५ ॥ ८०६ ॥ एवमात्मस्मृतिमङ्गीकृत्य तत्र विधिर्निराकृतः । वस्तुतस्त्वात्मस्मृतिरेव न सम्भवतीत्याह *तव श्रद्धेति ॥ ८०७ ॥ वस्तुस्थितिमेवाह *सकृदिति । आत्मनि स्फुरणविस्मरणयोः सम्भावना नेत्यत्र

सकृद्विभाते चित्तत्त्वे रवौ रात्र्यहनी यथा ॥
स्मृतिर्वा विस्मृतिर्वैते सम्भाव्येते तथा नहि ॥८०८॥
उपासीतेतिवाक्योक्ताविध्यर्थे यदि पृच्छसि ॥
तर्ह्यर्थं द्विविधं विद्धि शब्दलक्षणलक्षितम् ॥ ८०९ ॥
अज्ञातज्ञापनं तद्वदप्रवृत्तप्रवर्त्तनम् ॥
विध्यर्थं द्वयमेतत्तु वाक्येऽस्मिन्योजयिष्यति ॥८१०॥
अज्ञाता ज्ञाप्यते तत्त्वे प्रत्यक्कूटस्थरूपता ॥
उपासीतेतिशब्देन, तथा प्राक्प्रतिपादितम् ॥८११॥
कोऽहं कस्य कुतोऽभूवं कथं वेति विचारकम् ॥
प्रवर्त्तयेदप्रवृत्तमुपासीतेति गीरियम् ॥ ८१२ ॥
तथोत्पत्तिस्थितिध्वंसो जगतोऽस्य कुतो न्विति ॥
विचारोऽत्र विधेयः स्यादुपासीतेति शब्दतः ॥८१३॥
विजिज्ञासस्व तपसा ब्रह्मेत्यन्यत्र च श्रुतम् ॥

हेतुः *सकृद्विभात इति । स्वप्रकाश इत्यर्थः । तत्रैव दृष्टान्तमाह *रवाविति । नोदेता नास्तमेतेति श्रुतेर्न दृष्टान्तासिद्धिः ॥८०८॥ एवमुपासनशब्दस्य परोक्तमर्थं निरस्य स्वोक्तमर्थं सोपपत्तिकमुपसंहर्त्तुं प्रश्नपूर्वकं विधायकशब्दस्य सम्मतमर्थमाह *उपासीतेत्यादिना ॥ ८०९ ॥ *अज्ञातेति ॥ आत्मनः प्रसिद्धत्वेऽपि तस्याद्वितीयकूटस्थत्वमज्ञातमुपासनशब्दितमुक्तमित्यर्थः ॥८१०॥ ॥ ८११ ॥ अप्रवृत्तप्रवर्त्तनार्थत्वं तस्य दर्शयति *कोऽहमिति । विचारकं मुमुक्षुम् ॥ ८१२ ॥ ८१३ ॥ उपासीतेत्यस्य जीवजगत्परमात्मविचारविधायकत्वे श्रुत्यन्तरं संवादयति *विजिज्ञासस्वेति । श्रुतं विचारविधानमित्यनुषङ्गः । ननु न तत्र विचारविधिः तपस एव ब्रह्मप्राप्तिहेतुत्वश्रवणात्, तत्राह *अन्वयेति

अन्वयव्यतिरेकाख्यो व्यापारोऽत्र तपो मतम्॥८१४॥
पर्यालोचनवाच्येष तपःशब्दः श्रुतौ मतः ॥
सन्तापार्थे वृथैव स्याद्ब्रह्मलक्षणवर्णनम् ॥ ८१५ ॥
यतो भूतानि जायन्ते तद्ब्रह्मेति समीरितम् ॥
लक्षणं च विचारार्थश्चैव तत्रोपयुज्यते ॥ ८१६ ॥
एवं चोपास्तिरत्रात्मविचारः स विधीयते ॥
सूत्रानुग्राहको न्याय इत्युक्तोऽन्यव्युदासतः ॥८१७॥
ननु प्राणाद्यपूर्णात्मबोधोऽकात्स्न्र्येन दूषितः ॥
सोऽकात्स्न्र्यदोषः शुद्धात्मबोधे कस्मान्न सम्भवेत्८१८॥
इत्याशङ्कापनुत्त्यर्थमत्रेदं श्रूयते स्फुटम् ॥
अत्र ह्येते सर्व एकंभवन्तीति श्रुतेर्वचः ॥ ८१९ ॥
प्राणाद्युपाध्युपहिताः सर्वे ऽप्यात्मान ईश्वरे ॥
शुद्धात्मन्येकतां यान्ति पुत्रभ्रात्रादयो यथा ॥८२० ॥

॥ ८१४ ॥ उक्तमेव व्यनक्ति *पर्यालोचनेति । तत्र तपःशब्दस्य प्रसिद्धार्थं विहाय विचारार्थकत्वकल्पने को हेतुरित्याशङ्क्याह *सन्तापेति। तपस एव ब्रह्मधीहेतुत्वे अन्नं प्राणश्चक्षुरित्यादिना ब्रह्मोपलब्धिद्वारकथनमनन्तरं यतो वेत्यादिना ब्रह्मलक्षणवर्णनं च व्यर्थं स्यादित्यर्थः ॥ ८१५ ॥ ८१६ ॥ तस्य विचारार्थत्वे फलितमाह *एवं चेति । प्रकृतमुपसंहरति *सूत्रेति ॥ ८१७ ॥ उत्तरसूत्रव्यावर्त्यामाशङ्कामाह *नन्विति । प्राणाद्यपूर्णत्वं तदुपाहितत्वम् । *कस्मादिति । शुद्धस्यापि पराग्व्यावृत्तत्वादिति भावः ॥८१८॥८१९॥ तात्पर्यमुक्त्वा श्रुत्यक्षराणि योजयति *प्राणादीति ॥ ८२० ॥ दृष्टान्तं विवृणोति *पुत्र इति । यथैक एव नरो ज्येष्ठापेक्षया कनिष्ठः,

पुत्रो भ्राता पितेत्येको भिद्यते प्रतियोगिभिः ॥
पुत्रादयस्तु एकस्मिंस्तस्मिन्यान्त्येकतां स्वतः॥८२१॥
आत्मनो ऽनवशेषेण सम्बन्धोऽनात्मवस्तुनः ॥
रज्जुसर्पादिवन्नातः प्रतीचः शिष्यते पराङ् ॥ ८२२ ॥
सर्वमज्ञातमेव स्याद्यस्मिन्नज्ञातआत्मनि ॥
ज्ञाते ज्ञातं च कृत्स्नोऽसौ तावत्त्वात्सर्ववस्तुनः॥८२३॥
युक्त्या निरूप्यमाणस्य ह्यात्मा तत्त्वमनात्मनः ॥
प्रत्याख्यातः स चेत्तेन त्वनात्मा शिष्यतां कथम्॥८२४॥
अनात्मनोऽस्य यत्तत्त्वमात्मनाऽपह्नुतं च तत् ॥

पुत्रापेक्षया पिता, पित्राद्यपेक्षया पुत्रः, इति बहुधा भिन्नोऽपि ज्येष्ठादिप्रतियोग्यविवक्षायां स्वत एक एव, तद्वदित्यर्थः॥८२१॥ एवमपि कथं नात्मनोऽकृत्स्नत्वं घटादिपराग्व्यावृत्तत्वादत आह *आत्मन इति । यथा रज्जुः सर्पतादात्म्यमनुभवति तस्य पृथगवशेषं न मृष्यते, तथैवात्मनो ऽनात्मना सम्बन्धो निरवशेषेणैवेष्यते । तथाच प्रतीचः सकाशादवशिष्टस्य पराचोऽभावात्तस्य कृत्स्नतेत्यर्थः ॥ ८२२ ॥ किञ्च येनाश्रुतमित्यादिवाक्यप्रामाण्यादात्मनोऽद्वयत्वसिद्धिरित्याह *सर्वमिति । तत्र युक्तिमाह *तावत्त्वादिति । आत्मनः सर्वोपादानत्वात्तावन्मात्रत्वं सर्वस्येत्यात्मज्ञानेन सर्वज्ञानसिद्धिरित्यर्थः ॥ ८२३ ॥ अपि च दृश्यत्वादियुक्त्या विविच्यमानस्यानात्मनः सर्पादेः रज्जुवदात्मैव तत्त्वमिति वक्तव्यम् । अतो युक्तं तस्याद्वयत्वमित्याह *युक्त्येति । विपक्षे दोषमाह *प्रत्याख्यात इति ॥ ८२४ ॥ एतदेव स्पष्टयति *अनात्मन इति

निस्तत्त्वोऽयमनात्माऽतः कथं सिद्ध्यतु कुत्र वा॥८२५॥
स्वरूपप्रदमात्मानं सोवित्वा सेद्धुमर्हति ॥
तदकारुण्यरोगस्य किमन्यद्भेषजं भवेत् ॥ ८२६ ॥
ज्ञातायां स्रजि तन्मोहकल्पितानां यथैकता ॥
प्रतीच्येवं तदज्ञानक्षिप्तानामेकतेष्यते ॥ ८२७ ॥
एवं व्यवस्थितं वाक्यं केचिद्याचक्षतेऽन्यथा ॥
समस्तव्यस्तरूपेण कृत्स्नात्मा प्रोच्यते किल॥८२८ ॥
विशेषसामान्यरूपो व्यक्तिजात्यात्मधेनुवत् ॥
आत्मावस्था इमे भेदा बाल्याद्या वपुषो यथा॥८२९॥

॥ ८२५ ॥ तस्मादात्मप्रसादादेवानात्मसिद्धिरित्याह *स्वरूपेति । नन्वन्यदेव अनात्मसाधकमस्तु, अत आह *तदिति । आत्मानात्मभ्यामर्थान्तराभावादात्माऽपि चेत्कृपया स्वरूपं न दद्यात्तदाऽनात्मसिद्धिरेव न स्यादित्यर्थः ॥ ८२६ ॥ श्रुतियुक्तिभ्यामात्मनोऽद्वयत्वमभिधाय अत्र हीत्यादिवाक्यं सदृष्टान्तमुपसंहरति *ज्ञातायामिति ॥८२७॥ भर्तृप्रपञ्चमतमुत्थापयति *एवमिति । अत्रात्मशब्दाभिधेये एते पूर्वोक्तप्राणनादिव्यापाराः सर्वे एकीभवन्तीति व्याचक्षत इत्यर्थः । कथं तर्हि ब्रह्मणः कृत्स्नता ? तत्राह *समस्तेति । स्वाभाविकानामपि दृष्टत्वादिविशेषाणामात्मन्यन्तर्भूतत्वात्तदन्तर्णीतविशेष आत्मनि या बुद्धिः सा कृत्स्नग्राहिणीत्यर्थः ॥ ८२८ ॥ नन्वेकस्योभयात्मकत्वं विरुद्धं ? न, दृष्टान्तेषु दृष्टत्वादित्याह *विशेषेति । यथा गोशब्दवाच्यं वस्तु गोत्वेन सामान्यरूपं, खण्डमुण्डत्वादिना विशेषरूपम् , एवं ब्रह्मापि प्रत्यक्त्वेन सामान्यरूपं,द्रष्टृत्वादिभिर्विशेषरूपमित्यर्थः। परमात्मा अवस्थावान् द्रष्टृत्वादयोऽवस्था इति वा कृत्स्नत्वमिति सदृष्टान्तमाह *आत्मेति ॥८२९॥

भूम्याद्या आत्मनः कार्या मृदो यद्वद्घटादयः ॥
नाभिनेम्यरवच्चक्रस्यात्मनोंशा इमे मताः ॥ ८३० ॥
एवं वृक्षादिदृष्टान्तैः समस्तव्यस्तताऽऽत्मनः ॥
वास्तव्येव श्रुतेत्याहुस्तदेतन्नैव युज्यते ॥ ८३१ ॥
समस्तव्यस्तता किन्ते ज्ञेयत्वेनोपदिश्यते ॥
उपास्यत्वेन वा द्वेधाऽप्यशक्यानुष्ठितिर्भवेत् ॥८३२॥
अनन्तत्वात्पदार्थानां क्रमशो ऽक्रमशोऽथ वा ॥
ज्ञानोपास्ती अशेषेण कर्तुं शक्ये न केनचित्॥८३३ ॥
नचैकदेशविज्ञाने कृत्स्नत्वं लभ्यते क्वचित् ॥
तस्मादशेषवेदान्ता निर्विशेषात्मनि स्थिताः ॥८३४॥
न समस्तं न च व्यस्तं नोभयं प्रत्यगात्मनि ॥
प्रत्यक्प्रवणया दृष्टया ईक्ष्यतां यदि शक्यते ॥८३५॥
विशेषाणां कल्पितत्वान्निर्विशेषस्य वस्तुता ॥

ब्रह्म कारणं जगत्कार्यमिति वा तस्य कात्स्न्र्यमिति सदृष्टान्तमाह *भूम्याद्या इति । यथा रथचक्रस्यावयविनो नाभिर्नेमिरराश्च अवयवाः, यथा वा एक एव वृक्षः शाखादिना नानाविधः एवमेकस्यात्मनः समस्तव्यस्तरूपत्वमविरुद्धमित्याह *नाभीत्यादिना ॥८३०।८३१॥ अयुक्तत्वमेव दर्शयितुं विकल्पयति *समस्तेति ॥ ८३२ ॥ ज्ञानोपास्त्योरशक्यत्वमाह *अनन्तत्वादिति । सामान्यादीनामसङ्ख्यत्वात्पुरुषायुषस्य च परिमितत्वात्तद्ध्यानं दुःशकमित्यर्थः ॥ ८३३ ॥ *न चेति । एकदेशध्यानेन पूर्णब्रह्मसाक्षात्कारायोगादित्यर्थः ॥ ८३४ ॥ ब्रह्मणो नानारसत्वं विद्वदनुभवविरुद्धं चेत्याह *नेति । उभयं वा नेत्यनुषज्यते ॥ ८३५ ॥ तस्मादेकरसं ब्रह्मैव कृत्स्नमित्युपसं-

अतोऽकात्स्न्यर्मनाशङ्क्यं विशुद्धात्मविबोधने ॥८३६॥
प्रमाभासत्वमेतेन वाक्येनास्य निवारितम् ॥
मात्वं सम्भाव्यते तस्य पदनीयत्ववाक्यतः ॥८३७॥
श्रुतिः-तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा ॥
वार्त्ति०अस्य सर्वस्य जगत आत्मेति यदुदीरितम् ॥
तदेतत्पदनीयं स्यादिति वाक्यस्य योजनम् ॥८३८॥
पदनीयेतिशब्देन प्रमातुं योग्यतोच्यते ॥
अज्ञातत्वात्पुमर्थत्वात्प्रमातुं योग्यताऽऽत्मनः ॥८३९॥
अव्याकृतव्याकृतयोरज्ञानात्मकता यतः ॥
अत आत्मातिरेकेण नाज्ञातार्थोऽस्ति कश्चन ॥८४०॥
ज्ञेयार्थानर्थयोर्यस्मात्समाप्तिः प्रत्यगात्मनि ॥
परमः पुरुषार्थोऽत आत्मा भवति नेतरः ॥ ८४१ ॥
अज्ञातत्वं पुरा प्रोक्तमव्याकृतगिरा यथा ॥
ज्ञेयार्थस्य समाप्तिं तां वक्त्यनेनेति वाक्यतः ॥ ८४२ ॥

हरति *विशेषाणामिति ॥ ८३६ ॥ उक्तानुवादपूर्वकमुत्तरवाक्यतात्पर्यमाह *प्रमेति ॥ ८३७ ॥ तात्पर्यमुक्त्वाऽक्षराणि योजयति *अस्येति ॥ ८३८ ॥ अन्वयमुक्त्वा पदनीयपदार्थमाह * पदनीयेति ॥ ८३९ ॥ अज्ञातत्वमाह *अव्याकृतेति । अज्ञानतत्कार्ययोरज्ञानाश्रयविषयत्वलक्षणाज्ञातताया असम्भवादात्मैवाज्ञातार्थ इत्यर्थः ॥ ८४० ॥ पुमर्थत्वमुपपादयति । *ज्ञेयेति ॥ ८४१ ॥ आत्मनः पुमर्थत्वसिद्धये आत्मनि ज्ञाते ज्ञातव्यान्तराभावो निरतिशयानन्दत्वं चेत्युक्तहेतुद्वयपरतयोत्तरवाक्यं योजयिष्यन्नात्मनः पदनीयसाधकत्वेनोक्तमज्ञातत्वं स्मारयति *अज्ञातत्वमिति । तत्राद्यहेतुपरम् अनेन ह्येतत्सर्वं वेदेति

श्रुतिः-अनेन ह्येतत्सर्वं वेद ॥
वार्त्ति० अनेन तद्वेद सर्वमित्यात्मज्ञानमात्रतः ॥
सार्वज्ञ्यमुक्तमानन्दसमाप्तिस्तु प्रवक्ष्यते ॥ ८४३ ॥
अन्यज्ञानेन नान्यस्य क्वचिदस्त्यवबुद्धता ॥
आत्मज्ञानेन सर्वस्य ज्ञानं कथमुदीर्यते ॥ ८४४ ॥
सत्यमेवं भवेदेतद्यद्यात्माऽप्यन्य इष्यते ॥
आत्माऽसावन्य इति च नानुन्मत्तस्य गीरियम् ॥८४५॥
अनन्यत्वे तृतीयेयमनेनेति कथं भवेत् ॥
साधनार्थेति चेदस्तु तर्हीत्थम्भूतलक्षणा ॥ ८४६ ॥
आत्माख्यं यज्जगद्रूपं तेन रूपेण तज्जगत् ॥
ज्ञातं तत्त्वविदा तस्य प्रत्यङ्मात्रसतत्त्वतः ॥ ८४७ ॥
उपलब्धौ जगत्सर्वमुपलभ्यं प्रकल्पितम् ॥

वाक्यमित्याह *यथेति ॥ ८४२ ॥ वाक्यं योजयन्नुक्तमर्थं स्पष्टयति *अनेनेति ॥८४३॥ आत्मनि ज्ञाते सर्वं ज्ञातं भवतीत्युक्तमाक्षिपति *अन्येति ॥ ८४४ ॥ अन्यज्ञानेनान्यत् नावबुद्धमित्यङ्गीकरोति *सत्यमिति । यद्यात्मा ऽनात्मनो वस्तुतो भिद्येत तदाऽऽत्मज्ञानादनात्मा न ज्ञायेत । नचैवमस्ति, आत्मत्वेऽन्यत्वायोगादित्याह *यदीति ॥ ८४५ ॥ एवं तर्ह्यनेनेति करणार्था तृतीया कथमिति शङ्कते । *अनन्यत्व इति । तस्यां इत्थम्भावार्थत्वान्न दोष इत्याह *अस्त्विति ॥ ८४६ ॥ तृतीयाया इत्थम्भावार्थत्वे वाक्यार्थनिष्पत्तिप्रकारमाह *आत्माख्यमिति । तत्र हेतुमाह *तस्येति ॥ ८४७ ॥ जगतः प्रत्यक्तत्त्वमात्रत्वं कथमिति तत्राह *उपलब्धौ इति । तत्र हेतुः *प्रतीयत इति । अयं सर्प इत्यधिष्ठानरज्जुधीपूर्वं प्रतीयमानभुजङ्गवत्स-

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः। (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम्। महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः। पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः। (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम्। महामहोपाध्यायश्रीकर्काचार्यविराचतभाष्यसहितम्। १३

(२०) ब्रह्मसूत्रभाष्यम्। श्रीभास्कराचार्यविरचितं असंपूर्णम् (वेदान्तः) २

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम्। आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम्। (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम्। ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) २

(२५) क्रोडपत्रसंग्रहः। अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्याः व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः। बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः। मणिभद्रकृतटीकया सहितः। हरिभद्रसूरिकृतः। १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः। प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका। १३

(३०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः। सापिण्ड्यदीपकश्च ... ११

(३१) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः। ४

(३३) वेदान्तरत्नमञ्जूषा। श्रीभगवत्पुरुषोत्तमाचार्यकृता। १

(३४) प्रस्थानरत्नाकरः। गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम्। १

(३६) योगदर्शनम्। परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम्। २

(३७) वेदान्तदर्शनम्। परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम्। ४

(३८) विश्वप्रकाशः। कोशः। विद्वद्वरश्रीमहेश्वरसूरिविरचितः। २

(३९) श्रीसुबोधिनी। श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता। २

(४०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः। ... ४

(४१) वेदान्तसिद्धान्तसंग्रहः। श्रुतिसिद्धान्तापरनामकः। श्रीब्रह्मचारिवनमालिमिश्रविरचितः। द्वैताद्वैतदर्शनानुगतः। ३

(४२) स्वानुभवादर्शः। श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः। स्वकृतटीकाविभूषितश्च। १

(४३) याज्ञवल्क्यस्मृतिः। बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता। व्यवहाराध्यायः ११

(४४) गादाधरी। श्रीगदाधरभट्टाचार्यचक्रद-

र्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता। ३

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता। रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्ययातथासोमनाथकृतया मयुखमालिकया च व्याख्यया समलङ्कृता । ३

(४६) वैयाकरणसिद्धान्तमञ्जूषा । श्रीमदुपाध्यायोपनामक श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्यविरचितकुञ्जिकाटीका-श्रीमद्वालम्भट्टविरचितकलाटीका—इति टीकाद्वयसंवलिता । ... २

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ३

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ४

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः। ४

पत्त्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी ।

March 1918.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 243.

बृहदारण्यकवार्तिकसारः ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SASTRI VAJHE.

FASCICULUS V-९

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE BENARES.

AGENTS:—

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२४३

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः७आनकाः८
अन्यैर्देयं प्रतिस्तवकं ... ... " " १ "

५ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १२

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया-व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्री-गागाभट्टविरचिता । तर्कपादः(मीमांसा) २

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता संपूर्णा (मीमांसा) ... २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २

(१०) सिद्धित्रयम्-विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री६श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् वेदान्तः १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) ... २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

प्रतीयते जगत्तस्मादधिष्ठानपुरःसरम् ॥ ८४८ ॥
उपलब्धोऽस्ति सन् कुम्भो लम्बोष्ठो देशकालवान् ॥
पूर्वपूर्वातिरेकेण नोत्तरार्थोऽनुभूयते ॥ ८४९ ॥
मात्रादिव्यापृतेः पूर्वं संवित्स्वात्मन्यवस्थिता ॥
अकस्मादुदिता बुद्धिः कुम्भादींस्तत्र कल्पयेत् ॥८५०॥
अक्रियेऽपि यथा व्योम्नि द्युदूभूतिस्थितिहानिभिः ॥
जगन्नर्नर्ति मय्येवं सदसद्विश्वरूपधृक् ॥ ८५१ ॥

श्रुतिः–यथा ह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं विन्दते य एवं वेद ॥ ७ ॥

वार्ति०प्रत्यक्तत्त्वे परिज्ञाते जगत्तत्त्वं प्रबुध्यते ॥
इत्यत्र पददृष्टान्तो यथावत्स विविच्यते ॥ ८५२ ॥
एकं पदं यथाऽश्वस्य दृष्ट्वाऽश्वत्वमशेषतः ॥
दृष्टवानेव भवति दृष्टोऽश्व इति वर्णनात् ॥ ८५३ ॥

त्तास्फूर्त्तिपुरःसरं प्रतीयमानं जगदपि तत्र कल्पितमित्यर्थः॥८४८॥ जगतः सत्तादिपूर्वकप्रतीतिमभिनीय दर्शयति *उपलब्ध इति ॥ ८४९ ॥ चितोऽधिष्ठानत्वसिद्ध्यर्थं प्रमात्राद्यारोपात्प्रागप्यवस्थानं दर्शयति *मात्रादीति । पूर्वं स्वापादौ । अकस्मात् अविद्यातिरिक्तहेतुं विना ॥ ८५० ॥ सक्रियस्यैव शुक्त्यादेराधिष्ठानत्वदृष्टेराक्रियस्य प्रतीचो नाधिष्ठानतेत्याशङ्क्य व्यभिचारमाह *अक्रिये इति । जगत् गन्धर्वनगरमिति यावत् । नर्नर्त्ति नृत्यति ॥ ८५१ ॥ यथा ह वै पदेनानुविन्देदित्यस्य तात्पर्यमाह *प्रत्यगिति । प्रतिज्ञापूर्वकमक्षराणि योजयति *यथावदित्यादिना ॥ ८५२ ॥ उक्तेऽर्थे गमकमाह *दृष्टोऽश्व इति ॥ ८५३ ॥

एवं स्वदेहमात्रस्थे साक्षितत्त्वेऽवलोकिते ॥
अशेषजगतस्तत्त्वं लभ्येतैव न संशयः ॥ ८५४ ॥
ज्ञानार्थे प्रकृतेऽप्यत्र लाभार्थेनोपसंहृतिः ॥
युक्ता ब्रह्मात्मतत्त्वेऽस्मिन्नैकार्थ्याद् ज्ञानलाभयोः॥८५५॥
नित्यलब्धस्वरूपस्याप्यज्ञानात्स्यादलब्धता ॥
ज्ञानमात्रं तस्य लाभः कण्ठचामीकरादिवत् ॥८५६॥
कीर्त्तिं च शिष्यसङ्घं च लभते ब्रह्मवेदनात् ॥
नित्यानुवादोऽप्येषोऽत्र प्रवृत्त्यर्थमुदीर्यते ॥ ८५७ ॥
आनन्दस्य समाप्तिर्या प्रत्यगात्मनि सूत्रिता ॥
सा वर्ण्यतेऽनुभूत्याऽत्र स्पष्टं सार्वजनीनया ॥ ८५८ ॥
वित्तात्पुत्रः प्रियः पुत्रात्पिण्डः पिण्डात्तथेन्द्रियम् ॥
इन्द्रियेभ्यः प्रियः प्राण आत्मा प्रियतरस्ततः ॥८५९॥

श्रुत्युक्तं दृष्टान्तं दार्ष्टान्तिके योजयति *एवमिति ॥८५४॥ अनेन ह्येतदित्यत्र वेदेति ज्ञानोपक्रमाद् ज्ञानार्थे प्रकृतेऽनुविन्देदिति श्रुतौ लाभार्थत्वोक्तिरयुक्तेत्यत्राह *ज्ञानार्थ इति ॥ ८५५ ॥ ज्ञानलाभयोरैक्यमाह *नित्येति ॥ ८५६ ॥ एवं कीर्तिमित्यादेरर्थमाह *कीर्तिं चेति । सर्वकामस्यात्मज्ञानफलेऽन्तर्भूतत्वेनाऽस्यापि प्राप्ते नेदं फलं वक्तव्यमिति तत्राह *नित्येति ॥ ८५७॥ यदुक्तमात्मनः पदनीयत्वोक्त्या पुमर्थत्वं सूचितं तस्यानतिशयानन्दरूपत्वादिति, तदेवानन्दत्वं सर्वजनानुभवसिद्धत्वेन साधयत्युत्तरा श्रुतिरित्याह *आनन्दस्येति ॥ ८५८ ॥ आत्माऽऽनन्दरूपः प्रियतमत्वादित्यभिप्रेत्य परिशेषानुभवाभ्यां प्रियतमत्वं साधयति *वित्तात्पुत्र इति ॥ ८५९ ॥ आत्मनि प्राणादौ च प्रीतेः समत्वात्कथमात्मनः प्रियतमत्वं तत्राह

स्वात्मभोगस्य हेतुत्वात्प्राणादौ प्रीतिरिष्यते ॥
न स्वतोऽतो न सा मुख्या ह्यात्मप्रीतिर्यथा तथा॥८६०॥
प्रतीचि निर्निमित्तैव सर्वावस्थासु वीक्ष्यते ॥
प्रीतिरग्न्यौष्ण्यवत्तस्मान्मुख्याऽसाविति गम्यताम्८६१
सर्वान्तरतरत्वेन युज्यते निर्निमित्तता ॥
बाह्येषु सनिमित्तत्वं प्रीतेः स्पष्टं गवादिषु ॥ ८६२ ॥
व्याध्याद्युपद्रुतो लोके मृतिमप्यभिवाञ्छति ॥
निर्निमित्तप्रियत्वे तु देहादेस्तन्न युज्यते ॥ ८६३ ॥
अनात्मा प्रिय इत्येवं यो विमुह्यति पामरः ॥
विनाशित्वमुदाहृत्य मूढं तं बोधयेद् बुधः ॥ ८६४ ॥
अनात्मा भोगकालेऽस्य सुखं यावत्प्रयच्छति ॥
तत्सहस्रगुणं दुःखं नाशकाले ददाति हि ॥ ८६५ ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥
व्युत्थाप्य विषयेभ्यस्तां प्रतीच्येव निवेशयेत् ॥८६६॥
विषया इव न प्रत्यक्कदाचिदपि नश्यति ॥

---

*स्वात्मेत्यादिना॥८६०॥८६१॥आत्मप्रीतेर्निर्निमित्तत्वं साधयति *सर्वान्तरेति । आत्मा निर्निमित्तप्रीतिविषयः सर्वान्तरत्वाद्व्यतिरेकेण गवादिवदित्यर्थः ॥ स्वभोगसाधने गवादौ प्रीतिरन्यत्र नेति सनिमित्तत्वं स्पष्टमित्याह *बाह्येष्विति ॥ ८६२ ॥ प्राणादिषु प्रीतेरमुख्यत्वे हेत्वन्तरमाह *व्याध्यादीति ॥८६३॥ स योऽन्यमात्मन इत्यादेरर्थमाह *अनात्मेत्यादिना ॥ ८६४ ॥ ॥ ८६५ ॥ आत्मानमेव प्रियमित्यादेरर्थमाह *या प्रीतिरिति ॥ ८६६ ॥ न हास्य प्रियमित्यादेरर्थमाह *विषया

अतो दुःखप्रदत्वं तु शङ्कितुं न च शक्यते ॥ ८६७ ॥
इत्यानन्दज्ञेयवस्तुसमाप्तिभ्यां पुमर्थता ॥
सिद्धा प्रतीचः, स प्रत्यक्पदनीयो भवेदतः ॥ ८६८ ॥
कृत्स्नं च पदनीयं च स्वात्मतत्त्वं यतस्ततः ॥
यदात्मविद्यासूत्रं तद्व्याख्यातुं योग्यतामियात् ॥८६९॥

इति ॥ ८६७ ॥ विद्यासूत्रमारभ्य भवतीत्यन्तमुत्तरोत्तरहेतुत्वेन व्याख्यातमर्थमुपसंहरति *इत्यानन्देत्यादिना ।

तदेतदित्यादेरयमक्षरार्थः—तदेतदात्मतत्त्वं प्रेयः प्रियतरमन्यस्मादिति । यद्यल्लोके प्रियत्वेन प्रसिद्धं तस्पात्सर्वस्मादित्यर्थः ॥ आत्मनः प्रियतरत्वे सर्वान्तरत्वं हेतुमाह *अन्तरतरमिति । अन्तरतमत्वेऽप्यात्मत्वं हेतुरित्याह *यदयमात्मेति । यदेतदात्मतत्त्वमित्यर्थः । एवमात्मनः प्रियतरत्वे सिद्धे सर्वो यः कश्चिदात्मप्रियवादी आत्मनोऽन्यं प्रियं ब्रुवाणमनात्मा प्रीतिविषय इति भ्रान्त्या वदन्तम् इत्थं ब्रूयात् हे अनात्मप्रियवादिन् तवाभिमतं प्रियं रोत्स्यति नङ्क्ष्यतीति यावत् । आत्मप्रियवादिनोऽन्यं प्रत्येवंवदने हेतुमाह *ईश्वर इति । समर्थः अतोऽन्यदार्त्तमित्यादिश्रुत्यर्थाभिज्ञ इति यावत् । अतस्तदुक्तं सर्वं तथैव स्यात्सत्यं भवेदित्यर्थः । एवमनात्मनः प्रियत्वाभावे प्रियमुपासीत य एवमुपास्ते विषयेषु स्वरसतो विद्यमानं प्रीतिं तत आकृष्यात्मन्येव निवेशयति अस्य प्रियं प्रमायुकं मरणशीलं न भवति, आत्मनो नित्यत्वादिति ।

ननु विद्यासूत्रस्योत्तरग्रन्थो वृत्तिरित्युक्तं, तथाच सूत्रस्थपदानामर्थ एवोत्तरग्रन्थेन वक्तव्यः, किमिदमुच्यते तदाहुरित्यनेनेत्याशङ्क्य अस्यापि प्रकृतत्वं दर्शयितुं व्याख्यानलक्षणमाह

श्रुतिः—तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात् प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा । स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यात् आत्मानमेव प्रियमुपासीत स य आत्मानमेवं प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥

वार्त्ति०पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ॥
आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम् ॥८७०॥
पदच्छेदादयः सूत्रे विस्पष्टत्वादुपेक्षिताः ॥
तत्राक्षेपसमाधाने क्रियेते बुद्धिशुद्धये ॥ ८७१ ॥

श्रुतिः–तदाहुर्यद् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद् ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ ९ ॥

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् ।

वार्त्ति०सूत्रार्थज्ञमनुष्याणां मतिं विज्ञाय केचन ॥
मुमुक्षवो गुरुं प्राप्य चोदयन्त्यतिसम्भ्रमात् ॥८७२॥
यद्ब्रह्मविद्यया सर्वभावाप्तिं मन्वते नराः ॥
तद् ब्रह्म किं विदित्वाऽभूत्सर्वमित्येतदीर्यताम्॥८७३॥
एवं मुमुक्षुभिश्चोद्ये कृते करुणया गुरुः ॥

---

*पदच्छेद इति ॥८७०॥ क्रियेते, श्रुत्येति शेषः ॥८७१॥ एवं प्रकृतत्वमुपपाद्य तदाहुरित्यस्यार्थमाह *सूत्रेति ॥ ८७२ ॥ आक्षेपवाक्यतात्पर्यं सङ्ग्रहेणाह *यदिति । विद्यासूत्रे ब्रह्मणः कृत्स्नत्वाभिधानाद्ब्रह्मविद्यायाः कृत्स्नभावाप्तिर्भवतीति केचिन्मनुष्या यन्मन्यन्ते तन्मतं विरुद्धं, कर्तृकर्मणोर्दुर्निरूपत्वेन

अनायासेन तच्चोद्यं परिहर्तुं वचोऽब्रवीत् ॥ ८७४ ॥
ब्रह्मैव बोधात्प्राग्जीवो भूत्वाऽऽत्मानमवेत्पुनः ॥
अहं ब्रह्मेति तद्बोधात्सर्वात्मकमभूत्तदा ॥ ८७५ ॥
न्यायेनैते विचार्येते शिष्यचोद्यगुरूत्तरे ॥
तद्विचारेण सूत्रार्थो व्याख्यातो विशदीभवेत् ॥८७६॥
अव्यावृत्ताननुगतं वस्तु ब्रह्मगिरोच्यते ॥
मुख्यो बृहतिधात्वर्थ एवं सत्युपपद्यते ॥ ८७७ ॥
तद्यया वेद्यते बुद्ध्या वेदवाक्येन जन्यया ॥
ब्रह्मविद्येति तां साक्षाच्छेमुर्षी प्रतिजानते ॥ ८७८ ॥
विद्यायाः कृत्स्नभावाप्तौ साधनत्वं तृतीयया ॥
श्रुतं, तस्मादकृत्स्नत्वमविद्याकल्पितं मतम् ॥ ८७९ ॥

ब्रह्मज्ञानस्यैवासम्भावितत्वादिति भावः । ब्रह्मेत्यत्र तद् अनुपपन्नमिति शेषः ॥८७३॥८७४॥ अनुपपत्तिं वक्ष्यति । उक्ताक्षेपपरिहारपरस्य "ब्रह्म वा" इत्यादिवाक्यस्य तात्पर्यं संक्षिप्य दर्शयति *ब्रह्मैवेति ॥ ८७५ ॥ एवं सङ्क्षेपेणोक्तमर्थं प्रपञ्चयितुं प्रतिजानीते *न्यायेनेत्यादिना । न्यायतः प्रतिपादने फलमाह *तदिति ॥ ८७६ ॥ यद्ब्रह्मविद्ययेत्यत्र यच्छब्दस्य मन्यन्त इत्यनेनान्वयमभिप्रेत्य ब्रह्मपदस्यार्थमाह *अव्यावृत्तेति । ब्रह्मशब्दस्य कमलासनादिबोधकत्वं किन्न स्यात्, तत्राह *मुख्यः इति । मुख्यः सन्नुपपद्यत इत्यन्वयः ॥ ८७७ ॥ विद्यापदस्य प्रातिपदिकार्थमाह *तदिति । उक्तलक्षणं ब्रह्मेत्यर्थः । शेमुषीं बुद्धिं ब्रह्मधीवृत्तिम् ॥ ८७८ ॥ तस्य प्रत्ययार्थमाह *विद्याया इति । तस्या मुक्तिहेतुत्वोक्तेरार्थिकमर्थमाह *तस्मादिति॥८७९॥ विद्याया मुक्तिहेतुत्वेऽपि कथमकृत्स्नत्वस्य विकल्पितत्वं त-

द्योतिकैव भवेद्विद्या कारिका न यतस्ततः ॥
सर्वात्मभावः सर्वेषां सिद्धः प्रागपि बोधतः ॥८८०॥
दृष्टार्थत्वात्तु विद्याया नाग्निहोत्राधिकारवत् ॥
अधिकारो वैधहेतुरपेक्ष्यः कश्चिदिष्यते ॥ ८८१ ॥
विहिताः शान्तिदान्त्याद्या दृष्टादृष्टोपकारिणः ॥
स्त्रीशूद्रा अपि शान्त्यादियुक्ताश्चेदधिकारिणः ॥८८२॥
अग्निहोत्रमिवैतेषां नैव विद्या निषिध्यते ॥
वेदाधिकृत्यभावेऽपि पुराणेष्वधिकारतः ॥ ८८३ ॥
मनुष्यमात्रो विद्यायामधिकारी भवेद् ध्रुवम् ॥
यतोऽतः सर्वभावाप्तिं मनुष्या इत्युदीरितम् ॥८८४॥
कर्मभ्य इव विज्ञानात्फलप्राप्तिं सुनिश्चिताम् ॥

त्राह *द्योतिकेति। सिद्धस्यैव द्योतकत्वं दीपादौ दृष्टमिति भावः। तस्मात्सर्वं भविष्यन्त इति वाक्यस्य अविद्यापिहितं विद्यमानमेव कृत्स्नत्वं कामयमाना इत्यर्थः फलतीत्याह *सर्वेति ॥ ८८० ॥ मनुष्यग्रहणस्य तात्पर्यमाह *दृष्टेत्यादिना। विद्यायाः शोकादिनाशाख्यदृष्टफलत्वात्तत्कामो विवेकादिसाधनसम्पन्नः सर्वोऽप्यत्र विद्यायामधिकारी, न त्वग्निहोत्राद्यधिकारवदत्र तन्नियमोऽस्ति इत्यर्थः ॥ ८८१ ॥ ॥ ८८२ ॥ नन्वेवमपि शूद्रादीनां वेदाध्ययनाभावादुपायाभावेन न ब्रह्मविद्याधिकारस्तत्राह *वेदेति। *पुराणेष्विति। श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रत इत्यादीति भावः॥८८३॥ एवं च सर्वभावाप्तिं त्रैवर्णिका इच्छन्तीति वक्तव्ये उक्ताभिप्रायेण मनुष्यग्रहणमुपपन्नमित्याह *यतोऽत इति। सर्वभावाप्तिम्, इच्छन्त इति शेषः॥८८४॥ मन्यन्त इत्यस्य तात्पर्यमाह *कर्मभ्य इवे-

मन्यन्त उभयत्रापि श्रुतिमानाविशेषतः ॥ ८८५ ॥
मनुष्यवेद्यं यद् ब्रह्म तदकृत्स्नं मतं यदि ॥
बृहत्यर्थाविहीनत्वादमुख्यार्थः प्रसज्ज्यते ॥ ८८६ ॥
मुख्यं ब्रह्मैव चेन्न स्याद्गौणं ब्रह्माप्यसम्भवि ॥
गौणस्य मुख्यपूर्वत्वान्निरर्था ब्रह्मगीर्भवेत् ॥ ८८७ ॥
अथ कृत्स्नं ब्रह्म तर्हि स्वतो वा परतोऽथवा ॥
तत्कृत्स्नत्वं, स्वतस्त्वे तु ब्रह्मविद्या निरर्थिका॥८८८॥
परतोऽपि च कृत्स्नत्वे ब्रह्मत्वं दुःस्थासिद्धिकम् ॥
क्रियातो ज्ञानतो वा तद्यदि वोभयसंश्रयात्॥८८९ ॥
न क्रियातो ब्रह्मता स्यादुत्पत्त्यादिप्रसङ्गतः ॥

ति । कर्मफले स्वर्गादौ यथा संदेहो नास्ति एवं ज्ञानफलेऽपीत्यत्र हेतुमाह *उभयत्रेति ॥ ८८५ ॥ किमु तद् ब्रह्मेत्यत्र यन्मुमुक्षुभिर्वेद्यं तत्किं परिच्छिन्नमुत नेति विकल्प्याद्यमनूद्य प्रत्याह * मनुष्येति ॥ ८८६ ॥ ब्रह्मशब्दस्य मुख्यार्थाभावात्परिच्छिन्नं ब्रह्मोपेयमिति शङ्कामनूद्य दूषयति *मुख्यमिति। *निरर्थेति । अतो ब्रह्मशब्दस्य मुख्यार्थो वक्तव्य इति स एव ब्रह्मपदेन ग्रहणमर्हतीति भावः ॥८८७॥ द्वितीयमनूद्य विकल्पयति *अथेति। आद्यं दूषयति *स्वतस्त्व इति। ब्रह्मातिरिक्तचेतनस्य ब्रह्मविद्याकर्तृत्वे ब्रह्मणः परिच्छिन्नत्वेन ब्रह्मत्वायोगात् ब्रह्मैव विद्याकर्त्रिति वाच्यम्। तथाच विद्याफलस्य कृत्स्नत्वस्य स्वतःसिद्धत्वे विद्यावैफल्यं स्फुटमिति भावः ॥८८८॥ द्वितीयं निरस्यति *परत इति । ब्रह्मणः सर्वात्मकत्वरूपस्यान्याधीनत्वे तदव्यवस्थितं स्वर्गादिवदनित्यं स्यादित्यर्थः । उक्तमेव स्पष्टयितुं विकल्पयति *क्रियात इति ॥ ८८९ ॥

नाद्यन्तौ ब्रह्मणो युक्तावपूर्वाजादिशास्त्रतः ॥८९०॥
परस्परविरोधेन ज्ञानकर्मसमुच्चयः ॥
पुरैव दूषितः पश्चादप्यसौ दूषयिष्यते ॥ ८९१ ॥
अथ ज्ञानात्कृत्स्नता स्यात्तदा ज्ञेयं तु कीदृशम् ॥
किं स्वस्वरूपमन्यद्वा, स्वरूपत्वं विरुध्यते ॥ ८९२ ॥
स्वयं ज्ञाता स्वयं ज्ञेयमित्येकस्मिन्कथं भवेत् ॥
नहि स्वस्कन्धमारोढुं निपुणोऽपीह शक्नुयात् ॥८९३॥
ब्रह्मणो ज्ञेयमन्यच्चेत्तत्किं ब्रह्मान्तरं भवेत् ॥
अब्रह्म वा,ऽग्रिमे कल्पे ह्यनवस्था प्रसज्यते ॥ ८९४ ॥
द्वितीये ब्रह्मणः कार्त्स्न्यं भवेदब्रह्मविद्यया ॥

आद्यं प्रत्याह *नेति ॥ अस्तु तर्हि ब्रह्मणो जन्मादिमत्त्वं तत्राह *नाद्यन्ताविति ॥ ८९० ॥ ज्ञानकर्मभ्यां ब्रह्मत्वं साध्यमिति कल्पं दूषयति *परस्परेति ॥ ८९१ ॥ मध्यमं कल्पमनुवदति *अथेति । ब्रह्मत्वस्य ज्ञानसाध्यत्वे ज्ञानात्पूर्वं तस्यैव संसारित्वं वक्तव्यं, तथाच ब्रह्मणो नित्यमुक्तत्वादिबहुश्रुतिविरोध इति भावः । किञ्च ब्रह्मण एव ज्ञानत्वेऽपि तज्ज्ञानस्य विषयो दुर्निरूप इत्याह *तदा ज्ञेयमिति । दुर्निरूपत्वं दर्शयितुं विकल्पयति *किमिति । आद्यं निराचष्टे *स्वरूपत्वमिति ॥ ८९२ ॥ विरोधमेवाह *स्वयमिति ॥ ८९३ ॥ द्वितीयमनूद्य विकल्पयति *ब्रह्मण इति । ब्रह्मान्तरस्य ज्ञेयत्वे तस्य च ब्रह्मणो ब्रह्मान्तरज्ञानादेव ब्रह्मत्वं वाच्यमित्येवं ब्रह्मानवस्था स्यादिति दूषयति *अग्रिम इति ॥ ८९४ ॥ चरमे दोषमाह *द्वितीय इति । ब्रह्मज्ञेयमब्रह्मेति पक्षे तस्य कृत्स्नत्वमप्यब्रह्मज्ञानादेवेति वाच्यम्, इत्थं चास्मदादीना-

५२

तथा सत्यसमदादेश्च ब्रह्मविद्या निरर्थिका ॥ ८९५ ॥
इत्यादिखण्डनैरेव चोदयन्ति मुमुक्षवः ॥
एतावता च विद्याया आक्षिप्ते कर्तृकर्मणी ॥ ८९६ ॥
कृत्स्नाकृत्स्नविकल्पाभ्यां विद्यायाः कर्म दूषितम् ॥
स्वरूपान्यविकल्पाभ्यां विद्याकर्त्तापि दूषितः॥८९७॥
श्रुतौ किंशब्दमावर्त्य चोद्यद्वयमुदीरयेत् ॥
किं तद्ब्रह्मेत्येवमेकं किमवेदिति चापरम् ॥ ८९८ ॥
शिष्यचोद्यस्य तात्पर्यमेवं तावद्व्यवस्थितम् ॥
गुरूत्तरस्य तात्पर्यं यथावत्प्रतिपाद्यते ॥ ८९९ ॥
यो गुरूत्तरवाक्यादौ ब्रह्मशब्दोऽस्त्यनेन कः ॥
उक्तोऽर्थः किं विराट् किंवा मर्त्यो वा परमेश्वरः॥९००॥
विराट् स्यात्स परब्रह्मविद्याकर्त्तेति युज्यते ॥
यतो ऽपरब्रह्मविद्याफलं सर्वमवाप्तवान् ॥ ९०१ ॥
मैवं न पराविद्यार्थं शास्त्राद्यधिकृतिर्भवेत् ॥

मपि ब्रह्मत्वप्राप्त्यर्थं ब्रह्मविद्या न प्रार्थनीयेत्यर्थः ॥ ८९५ ॥ उक्तं चोद्यं संक्षिप्याह *एतावतेति ॥ ८९६ ॥ ८९७ ॥ उक्ताक्षेपपरत्वेन श्रुत्यक्षराणि योजयति *श्रुताविति ॥ ८९८ ॥ ॥ ८९९ ॥ ब्रह्म वा इदमितिवाक्यस्थब्रह्मपदस्य स्वाभिमतमर्थं विवक्षुः सम्भावितानर्थान्विमृशति *य इति ॥ ९०० ॥ पूर्वपक्षमाह *विराडिति । तत्र हेतुमाह *यत इति । फलपर्यन्तयाऽपरब्रह्मोपासनया निरस्तकामकर्मादिबन्धत्वाद्विराजः परब्रह्मविद्याकर्तृत्वं युक्तमिति भावः ॥ ९०१ ॥ प्रकरणविरोधेनाद्यपूर्वपक्षं प्रतिक्षिप्य द्वितीयं परिशेषयति *मैवमिति । ब्रह्म वा इदमित्यादिवाक्यस्य विद्यासूत्रविवरण-

विराजः किं त्वनायासात्परविद्योदिता सतः ॥१०२॥
उपासीतेतिसूत्रस्य व्याख्यानत्वाद्विचारणा ॥
प्रस्तुताऽधिकृतिस्तत्र मनुष्यस्य भविष्यति ॥ १०३ ॥
चोद्यवाक्ये मनुष्याणां विचाराधिकृतिः श्रुता ॥
तस्मान्मर्त्यो ब्रह्मभावी ब्रह्मशब्देन भण्यते ॥ १०४ ॥
भाविनीं वृत्तिमाश्रित्य प्रयोगो दृश्यते यथा ॥
ओदनं पचतेत्यादिस्तथेहापि भविष्यति ॥ १०५ ॥
इति व्याचक्षते केचित्तदप्यत्र न युज्यते ॥
अब्रह्मत्वं स्वतः किंवा कल्पितं ब्रह्मभाविनः ॥१०६॥
स्वतस्त्वे विद्यया नैतन्निवर्त्तेत कदाचन ॥
ब्रह्मत्वं चेत्तथोत्पाद्यं मुक्त्यनित्यत्वमापतेत् ॥ १०७ ॥
अब्रह्मत्वं कल्पितं चेत्स्वतः स्याद्ब्रह्मता तदा ॥

त्वात्तत्र चोपासीतेति विचाराधिकारिण एव प्रकृतत्वान्न सहसिद्धज्ञानस्य विराजः परविद्याकर्तृत्वमित्यर्थः ॥ १०२ ॥ १०३ ॥ अत्र मनुष्य एव ब्रह्मशब्दवाच्य इत्यत्र हेत्वन्तरमाह *चोद्येति । कथं तर्हि ब्रह्मपदवाच्यता मर्त्यस्येति शङ्कां निरस्यन्नुपसंहरति *तस्मादिति ॥१०४॥ भाविनीं वृत्तिमाश्रित्यापि शब्दप्रयोगोऽस्तीत्येतद् दृष्टान्तेन साधयति *भाविनीमिति ॥१०५॥ अयुक्तिमेव स्फुटयितुं विकल्पयति *अब्रह्मत्वमिति ॥१०६॥ आद्यं निराह *स्वतस्त्व इति । स्वाभाविकधर्मस्याग्न्यौष्ण्यवन्निवृत्त्ययोगादित्यर्थः । किञ्चाब्रह्मत्वस्य स्वाभाविकत्वे ब्रह्मभावस्यागन्तुकत्वमुक्तं स्यात् तथा च तस्यापुमर्थता स्यादित्याह *ब्रह्मत्वमिति ॥ १०७ ॥ द्वितीयमनूद्य प्रत्याह *अब्रह्मत्वमित्यादिना । ब्रह्मभाविजीवो ब्रह्मेति या कल्पना

कल्पनैवं वृथैव स्याद्ब्रह्मभावीति या कृता ॥ ९०८ ॥
बोधात्पूर्वमपि ब्रह्म सर्वो जन्तुः स्वभावतः ॥
अब्रह्मत्वमविद्योत्थं विद्यया तन्निवर्तते ॥ ९०९ ॥
अतः सन्त्यज्य मुख्यार्थं ब्रह्मभावीति कल्पने ॥
श्रुतार्थहानिरत्र स्यादश्रुतार्थस्य कल्पना ॥ ९१० ॥
अनुत्पन्नाविनाश्येकभास्वद्विज्ञानमात्रके ॥
ब्रह्मण्यताद्धिया ऽविद्या न सम्भाव्येति चेन्न तत्॥९११॥
अविद्याविषयत्वं किमसम्भाव्यमुतात्मनः ॥
अविद्याकर्तृता, तत्र नाद्यो विद्याविधानतः ॥९१२॥
अविद्यारहितत्वे तु ज्ञातं ब्रह्म सदा ततः ॥
विद्याविधानं विज्ञाते पिष्टपेषणवद्भवेत् ॥ ९१३ ॥
न वेद्मीत्यनुभूतिश्च सर्वेषां स्वात्मसाक्षिका ॥

कृता सा व्यर्था स्यान्मुख्यस्यैव ब्रह्मणो ग्रहणसम्भवादित्यर्थः ॥ ९०८ ॥ सर्वस्यापि ब्रह्मत्वं स्वतःसिद्धं चेदकृत्स्नत्वानुभवविरोधो विद्यावैयर्थ्यं चेति तत्राह *अब्रह्मत्वमिति॥९०९॥ तस्माद्ब्रह्मभाविकल्पनं ब्रह्मशब्दस्य मुख्यार्थत्यागादयुक्तमिति निगमयति *अत इति ॥ ९१० ॥ ब्रह्मण्याविद्याध्वास्तिर्विद्याफलमित्यत्र चोदयति *अनुत्पन्नेति । कूटस्थस्वप्रकाशज्ञप्तिमात्रत्वाद्ब्रह्मणस्तत्राज्ञानमयुक्तं, ज्ञानाज्ञानयोर्विरुद्धत्वादित्यर्थः । तत्त्वमसीति ब्रह्मणि विद्याविधानान्यथानुपपत्त्या ब्रह्मण्यज्ञातत्वं सिध्यतीति समाधत्ते *न तदिति ॥ ९११ ॥ उक्तमेव विकल्पपूर्वकमुपपादयति *अविद्येति ॥ ९१२ ॥ विद्याविधानेऽपि कथं तत्राज्ञानसिद्धिस्तत्राह *अविद्येति । अज्ञातार्थगन्तृत्वात्प्रमाणानामिति भावः ॥ ९१३ ॥ किञ्चानुभव-

कुम्भानुभूतिवत्तस्मान्नैवाविद्याऽपलप्यताम् ॥११४॥
द्वितीये ब्रह्मकर्तृत्वं वार्यते वाऽन्यकर्तृता ॥
आपाद्यते चेष्टमेव ब्रह्मकर्तृत्ववारणम् ॥ ११५ ॥
अकार्याया अविद्यायाः कर्त्रपेक्षा कुतो भवेत् ॥
अन्यकर्तृत्वमप्यत्र तदन्यासम्भवान्नहि ॥ ११६ ॥
नहि ब्रह्मातिरेकेण कश्चिच्चेतन इष्यते ॥
नान्योऽतोऽस्तीति शास्त्रेण द्रष्ट्राद्यन्तरवारणात्॥११७॥
ननु शास्त्रोपदेशोऽयमेवं सत्यफलो भवेत् ॥
नासौ ब्रह्मणि साफल्यं नाप्यन्यस्मिन्समश्नुते॥११८॥
उपदेशानपेक्षं तद्ब्रह्मत्वं परमात्मनः ॥
असम्भवात्तदन्यस्य ह्युपदेशो ऽफलो भवेत् ॥ ११९ ॥
ज्ञाते ब्रह्मण्युताज्ञाते शास्त्रवैफल्यमुच्यते ॥
आद्य इष्टो, द्वितीये तु बोधः शास्त्रात्फलिष्यति॥१२०॥

विरोधाच्च न ते युक्तिरुल्लसेदित्याह *नेति ॥ ११४ ॥ अज्ञानकर्तृत्वमसम्भाव्यमित्यत्रापि किं ब्रह्मणो ज्ञानकर्तृत्वमात्रं निराचिकीर्षितमुत तदन्यस्य तत्कर्तृत्वं सिषाधयिषितमिति विकल्प्य क्रमेण दूषयति *द्वितीय इत्यादिना ॥ ११५ ॥ ॥ ११६ ॥ ११७ ॥ ब्रह्मणोऽन्यस्य चेतनस्याभावे शास्त्रारम्भानर्थक्यमिति शङ्कते *नन्विति । कथमित्याशङ्क्य स ब्रह्मण्यन्यत्र वा फलवानिति विकल्प्य क्रमेण निरस्यति *नेति ॥ ११८ ॥ उभयत्र वैफल्यमुपपादयति *उपदेशेति । ब्रह्मणोऽन्यस्यासम्भवः सिद्धो मानयुक्तिभ्यामिति वक्तुं हिशब्दः । अतः शास्त्रारम्भवैयर्थ्यमिति फलितमाह *उपदेश इति॥११९॥ सिद्धान्ती ब्रह्माणि तत्साफल्यं विकल्पपूर्वकमुपपादयति *ज्ञात

नच बोधस्य वैयर्थ्यं तेनाबोधनिवर्त्तनात् ॥
तन्निवृत्तिस्तु दृष्टत्वान्नाद्वैतेऽपि विरुध्यते ॥ ९२१ ॥
न दृष्टेऽनुपपन्नत्वं शङ्काया अवसानतः ॥
आशङ्क्यते तावदेव यावत्स्वानुभवो नहि ॥ ९२२ ॥
अबुद्धत्वं विबोधात्प्रागनुभूतं यथा तथा ॥
बोधादूर्ध्वमबोधस्य निवृत्तिरनुभूयते ॥ ९२३ ॥
ननु जीवेशवाक्याभ्यां कर्त्रकर्त्रोर्विबोधनात् ॥
तर्कशास्त्रप्रसिद्धेश्च स्याज्जीवो ब्रह्मणः पृथक् ॥९२४॥
दुःखापनयनार्थत्वाच्छास्त्रेऽधिक्रियते हि सः ॥
तथाच ब्रह्मभावीति युक्तैवैषाऽत्र कल्पना ॥ ९२५ ॥
मैवं ब्रह्मोपदेशार्थशास्त्रानर्थक्यसक्तितः ॥

इत्यादिना ॥ ९२० ॥ अध्यस्तसंसारित्वस्याद्वितीयवस्तुस्वरूपेणाविरोधाच्छास्त्रजन्यज्ञानस्य च जडत्वात्कथमबोधनिवृत्तिरित्याशङ्क्य स्वानुभवसिद्धेऽर्थे न चोद्यावतार इत्यनुभवमवलम्ब्य परिहारमाह *तन्निवृत्तिरित्यादिना। वृत्त्युपारूढं चैतन्यमविद्यादाहकमिति प्रागुक्तपरिहारोऽप्यनुसन्धेयः॥९२१॥९२२॥९२३॥ ब्रह्मभाविपुरुषो ब्रह्मेति पक्षं निरस्तमपि पुनर्युक्त्यन्तरोपजीवनेनोत्थापयति *नन्विति । एष हि द्रष्टा स्प्रष्टा श्रोतेत्यादिना जीवस्य कर्तृत्वं, स एष नेति नेत्येष आत्माऽपहतपाप्मेत्यादिना चेश्वरस्याकर्तृत्वं बोध्यत इत्यर्थः। जीवपरयोर्भेदे सर्ववादिप्रसिद्धमप्यनुकूलयति *तर्केति ॥ ९२४ ॥ तत्रोपपत्तिमाह *दुःखापनयनेति । दुःखनिवृत्तिकामः शास्त्राधिकारी, नेश्वरस्य दुःखमस्त्यतस्तयोर्भेद इत्यर्थः ॥ ९२५ ॥ ब्रह्मभाविनो जीवस्य ब्रह्मशब्दत्वे ब्रह्मोपदेशानर्थक्यमिति दूषयति

संसारिविद्ययैवास्य पुरुषार्थसमापनात् ॥ ९२६ ॥
ब्रह्मभाविनिजात्मानमेवावेद्वि धिया तया ॥
अभूत्सर्वमिति प्राप्तः पुमर्थो जीवविद्यया ॥ ९२७ ॥
ततश्च सत्यज्ञानादिवाक्येन ब्रह्मबोधनम् ॥
व्यर्थं स्याद्ब्रह्मविद्यायाः फलान्तरविवर्जनात् ॥९२८॥
अथ ब्रह्मण्यविज्ञाते ब्रह्मास्मीत्यात्मनीदृशी ॥
सम्पत्कर्त्तुमशक्या स्यात्तस्मिन्ज्ञाते तु शक्यते ॥९२९॥
ब्रह्मविज्ञानमात्रेण न कस्यापि कृतार्थता ॥
पारार्थ्येनैव सर्वत्र विज्ञानं फलवन्मतम् ॥ ९३० ॥
नैतदेवं भट्टपादैर्ब्रह्मज्ञानातिरेकिणः ॥

---

*मैवमिति । तदुपपादयति *संसारीत्यादिना । यदत्र ब्रह्मशब्दं तज्ज्ञानादेव मुक्तिरिहेष्टा, तदात्मानमित्यादिश्रुतेः । अतो जीवो ब्रह्मशब्दश्चेज्जीवज्ञानादेव तत्सिद्धेः सत्यज्ञानादिब्रह्मोपदेशो वृथा स्यादित्यर्थः ॥९२६॥९२७॥ *फलान्तरेति । ब्रह्मविदाप्नोति परमित्यादिना श्रुतं ब्रह्मप्राप्तिफलं विहायाऽन्यफलकल्पने मानाभावादिति भावः ॥ ९२८ ॥ उपास्तिविधिशेषतया ब्रह्मोपदेशस्यार्थवत्त्वं शङ्कते *अथेति । अहं ब्रह्मेत्युपास्तेरपि तज्ज्ञानापेक्षत्वे व्यतिरेकमुक्त्वा तत्रैवान्वयमाह *तस्मिन्निति ॥ ९२९ ॥ ननु तत्त्वमादिवाक्याज्ज्ञानं चेदुत्पन्नं तर्हि तेनैव कृतार्थस्य किं सम्पदा, तत्राह *ब्रह्मेति । ब्रह्मधीर्न स्वतन्त्रा पुमर्थहेतुः ज्ञानत्वादाज्याादिज्ञानवदित्यर्थः ॥ ९३० ॥ ज्ञानत्वहेतो रज्ज्वादिज्ञाने व्यभिचारात् भट्टाचार्यवचनाविरोधाच्चात्मज्ञानस्य नान्यशेषताऽतो न सम्पच्छेषत्वेन ब्रह्मोपदेशः इति समाधत्ते *नैतदिति । सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ।

ज्ञानस्यैव परार्थत्वमिति स्पष्टमुदीरितम् ॥ ९३१ ॥
सर्वत्रैव हि विज्ञानं संस्कारत्वेन निश्चितम् ॥
पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधार्यताम् ॥ ९३२ ॥
अतो ब्रह्मणि विज्ञाते तावतैव कृतार्थता ॥
सम्पत्पक्षे त्वहं ब्रह्मेत्येतद्गौणं प्रसज्यते ॥ ९३३ ॥
सामानाधिकरण्योक्तिर्वस्त्वैक्ये मुख्यतां व्रजेत् ॥
खं छिद्रमुत्पलं नीलमित्यादौ तदवेक्षणात् ॥ ९३४ ॥
अन्यस्यान्यत्र सम्पत्स्यात्सिंहस्य पुरुषे यथा ॥
सामानाधिकरण्यं च गौणं सिंहः पुमानपि ॥९३५॥
ब्रह्मैव भवतीत्यादि ब्रह्मभावफलं च यत् ॥
सम्पत्तौ तन्न युज्येत नान्यदन्यद्भवेत्क्वचित् ॥ ९३६ ॥
सम्पदाऽपि ब्रह्मभावः स्याद्वाक्यादिति चेन्मतम् ॥
न मानसक्रियामात्रादमानाद्वस्त्वसिद्धितः ॥ ९३७॥

पराङ्गं चात्मविज्ञानादन्यत्रेति स्पष्टमुक्तत्वादित्यर्थः॥९३१॥९३२॥ आत्मधियः स्वतन्त्रत्वे फलितमाह *अत इति। अहं ब्रह्मास्मीति सम्पदमङ्गीकृत्य तच्छेषत्वं ब्रह्मोपदेशस्य निरस्य सम्पदमेव निरस्यति *सम्पदिति ॥९३३॥ एकवस्तुबोधिपदयोरेव मुख्यं सामानाधिकरण्यमित्यत्रोदाहरणमाह *खमिति ॥९३४॥ सम्पत्पक्षे तस्य गौणत्वमुदाहरणमुखेनाह *अन्यस्येति । अन्यत्र, आरोप इति शेषः ॥ ९३५ ॥ किञ्च सम्पत्पक्षे ब्रह्म वेद ब्रह्मैव-भवतीत्यादिफलवचनविरोधः स्यादित्याह *ब्रह्मैवेति ॥९३६॥ ब्रह्मोपास्तेरपि तद्भावः फलं स्याद्वचनबलादिति शङ्कते *सम्पदाऽपीति । सम्पत्तेरमानत्वान्न तद्बलादन्यस्यान्यत्वसिद्धिरिति दूषयति *नेति । अमानत्वे हेतुः *मानसेति ॥९३७॥ अमाना-

अन्यथा योषितोऽग्नित्वं सिद्धं स्याद् ध्यानमात्रतः ॥
ब्रह्मत्वं ध्यानजन्यं चेदनित्यं स्वर्गवद्भवेत् ॥ ९३८ ॥
तमोमात्रान्तरायत्वादाप्तमप्याप्यते तु तत् ॥
नच सम्पत् तमो हन्ति मिथ्याज्ञानात्मकत्वतः॥९३९॥
नच सम्पत्तिमात्रेण दुःखिनो दुःखसंक्षयः ॥
आनन्दरूपता वाऽतः फलशास्त्रस्य बाधनम् ॥९४०॥
अहं ब्रह्मेत्यतो नैव सम्पत्तिः किन्तु तादृशम् ॥
ब्रह्मात्माखण्डवस्त्वत्र शास्त्रेण प्रतिपाद्यते ॥९४१॥
कौटस्थ्यान्मम देहादौ ब्रह्मता न मदन्यता ॥
साक्षित्वाद् ब्रह्मतत्त्वस्य तस्मात्प्रत्यङ् न भिद्यते॥९४२॥
कौटस्थ्यं ब्रह्मणो रूपं साक्षित्वं प्रत्यगात्मनः ॥

दपि वस्तुसिद्धावतिप्रसङ्गमाह *अन्यथेति । यद्यपि मानादपि न वस्तुसिद्धिस्तथापि नान्यदन्यद्भवति इत्यत्र तात्पर्यम् । तत्रैव दोषान्तरमाह *ब्रह्मत्वमिति ॥ ९३८ ॥ ब्रह्मत्वस्य स्वतःसिद्धत्वेऽप्यसमन्मते विस्मृतसुवर्णवज्ज्ञानात्तदाप्तिर्न विरुद्धेत्याह *तम इति । तर्हि तमोनिवृत्तिहेतुः सम्पदेष्टव्या, तत्राह *न चेति ॥ ९३९ ॥ किञ्च सम्पदो मिथ्याज्ञानत्वेन दुःखनिवृत्त्याद्यहेतुत्वात्तरति शोकमित्यादिफलवचनबाधः स्यादित्याह *न च सम्पत्तीति ॥ ९४० ॥ ९४१ ॥ अखण्डस्यैव शास्त्रगम्यत्वमुक्तं द्रढयितुं जीवब्रह्मणोरन्योन्यात्मत्वमुपपादयति *कौटस्थ्यादिति । देहादिष्वागमापायिषु सत्सु निर्विकारब्रह्मधर्मस्य कौटस्थ्यस्य देहद्वयाधिष्ठाने आत्मनि दृष्टेरात्मा ब्रह्म, तद्धर्मस्यापरोक्षत्वस्य यत्साक्षादिति ब्रह्मणः श्रुतेर्ब्रह्म आत्मेत्यर्थः ॥९४२॥ एतदेव विशदयति * कौटस्थ्यमि-

अन्योऽन्यव्यत्ययेनैतद् दृष्टं तेनैकता तयोः ॥ ९४३ ॥
अव्यावृत्तानुगतमखण्डं ब्रह्म चेत्तदा ॥
तद्विद्यायां समाख्यैषा ब्रह्मविद्येति निश्चिता ॥९४४॥
सम्पत्तौ ब्रह्मविद्यैषा जीवविद्याऽथ वेत्ययम् ॥
सन्देह एव पुंसः स्यात्संशयात्मा विनश्यति ॥९४५॥
सर्वथा ब्रह्मभावीति कल्पना नैव युज्यते ॥
परब्रह्मैव विद्यायामधिकार्यत्र वर्णितम् ॥ ९४६ ॥
परब्रह्मण्ययुक्तैषा साधकत्वप्रकल्पना ॥
इति चेत्, श्रुतिमेवैवं त्वमुपालभसे न माम् ॥९४७॥
विद्याधिकारिणि ब्रह्मशब्दं प्रायुङ्क्त वेदवाक् ॥
उपालम्भस्त्वदीयोऽत आगमे पर्यवस्यति ॥ ९४८ ॥
अक्षमा भवतः केयं साधकत्वप्रकल्पने ॥
किं न पश्यति संसारं तत्रैवाज्ञानकल्पितम् ॥९४९॥

ति ॥ ९४३ ॥ किञ्चाहं ब्रह्मास्मीत्यस्याखण्डवस्तुबोधकत्वे तद्विद्यायां ब्रह्मविद्येति संज्ञा निर्णीता स्यात्, सम्पत्पक्षे तु नैवमित्याह *अव्यावृत्तेत्यादिना ॥ ९४४ ॥ ९४५ ॥ फलितमाह *परब्रह्मेति ॥ ९४६ ॥ परस्याज्ञातृत्वमयुक्तं तस्य ज्ञानमूर्त्तित्वादिति शङ्कते *परेति । शास्त्रं ब्रह्मणि साधकत्वादि दर्शयति, तच्चापौरुषेयमदोषं नोपालम्भार्हम् अतस्तस्मिन्नविद्यासाधकत्वादि स्वीकार्यमित्याह *श्रुतिमेवेत्यादिना । ॥ ९४७ ॥ ९४८ ॥ सर्वस्यापि ब्रह्मण्यध्यस्तत्वात्तदन्तर्भूतसाधकत्वं तत्राध्यस्तामित्यभ्युपगमे नानुपपत्तिरित्याह *अक्षमेति ॥ ९४९ ॥ ननु संसारस्य जीवनिष्ठत्वानुभवान्न ब्रह्मनिष्ठतेति, नेत्याह *अनात्मेति। न तावज्जीवपदवाच्यः संसारी संसारान्त-

अनात्मवस्तु यत्किञ्चित्तद् ब्रह्मानवबोधतः ॥
ब्रह्मण्येव समध्यस्तं शुक्तिकारजतादिवत् ॥ ९५० ॥
यच्चोद्यं वादिभिः प्रोक्तं कृत्स्नाकृत्स्नादिखण्डनम् ॥
तत्र ग्राह्यः कृत्स्नपक्षो न दोषोऽत्र मनागपि ॥९५१॥
न कार्त्स्न्यग्राहिमानेन द्वैतापत्तावकृत्स्नता ॥
शङ्कनीया, यतो मानं मेयस्पर्द्धि न कुत्रचित् ॥९५२॥
ऐकात्म्यस्यैव मेयत्वात्तत्तथैवावबोधनात् ॥
अन्यथा स्यादमानत्वमयथावस्तुबोधिनः ॥ ९५३ ॥
अवास्तवत्वान्मानस्य द्वैतं नैतत्प्रसज्यते ॥
अवस्तुनोऽपि मानत्वं वस्तुतत्त्वावबोधनात् ॥९५४॥
प्राग्बोधान्मानमात्रादेर्वस्तुत्वमवभासताम् ॥
ऊर्ध्वं नैव तु वस्तुत्वं भासते बाधितत्वतः ॥ ९५५ ॥
स्वतो वा परतो वेति कृत्स्नत्वे यद्विकल्पनम् ॥

र्भावाज्जीवपदलक्ष्यो ब्रह्मैवेति तत्रैव स्वाज्ञानादनात्मवस्त्वध्यस्तम् अनात्मत्वात्सम्मतवदित्यर्थः ॥ ९५० ॥ पूर्वपक्षोक्तचोद्यमनूद्य परिहरति *यदिति ॥ ९५१ ॥ ननु कृत्स्नत्वग्राहिमानमस्ति न वा ? अन्त्ये तदासिद्धिरिति मत्वाऽऽद्ये दोषमाह *नेति । नकारस्य शङ्कनीयेत्यनेन सम्बन्धः । मानस्याद्वितीयवस्तुबोधकत्वान्न द्वैतप्रसक्तिरिति परिहरति *यत इति ॥ ९५२ ॥ उक्तमेव व्यनक्ति *ऐकात्म्यस्येति ॥ ९५३ ॥ एवमपि मानस्य वस्तुपरिच्छेदकत्वात्कृत्स्नत्वासिद्धिरिति, नेत्याह *अवास्तवत्वादिति । अवस्तुत्वे बाध्यवदमानत्वमाशङ्क्याह *अवस्तुन इति ॥ ९५४ ॥ बाधानुपलम्भात्प्रमात्रादेर्वस्तुत्वमाशङ्क्यासिद्धिमाह *प्रागिति ॥ ९५५ ॥ चोद्यान्तरमनूद्य समाधत्ते *स्वत इ-

तत्र स्वतस्त्वमादेयं न च विद्या निरर्थिका ॥ ९५६ ॥
स्वतः कृत्स्नमपि ब्रह्म स्यादकृत्स्नमविद्यया ॥
तदविद्यापनुत्त्यर्थं ब्रह्मविद्योपयुज्यते ॥ ९५७ ॥
अहमेव परब्रह्मेत्यस्यार्थस्याप्रबुद्धता ॥
अविद्येति वयं ब्रूमो येह नास्ति सदात्मनि ॥ ९५८ ॥
परात्मनि च चैतन्यं नित्यं स्याच्छशिशैत्यवत् ॥
अविद्या न तथा तत्र युक्ता चन्द्रे यथोष्णता ॥९५९॥
अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ॥
अविचारेण मूढानां वज्रादपि दृढायते ॥ ९६० ॥
बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् ॥
बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवत् ॥९६१॥
बुद्धतत्त्वो हि संसारिलोकचेष्टाविडम्बकः ॥
संसारिलोकोऽप्येतस्य बोधभाषाविडम्बकः ॥९६२॥

त्यादिना ॥ ९५६ ॥ ९५७ ॥ अविद्यायाः विद्याऽपनोद्यत्वयोग्यतां वक्तुं तत्स्वरूपमाह *अहमेवेति । तस्याः विद्यया निवृत्तिं विद्वदनुभवेन साधयति *येह नास्तीति ॥ ९५८ ॥ प्रकाशाप्रकाशयोर्विरुद्धत्वेनात्मन्यविद्याया एवायोगान्न तन्निवर्तकत्वेन ब्रह्मविद्याया अर्थवत्त्वमिति शङ्कते *परात्मनीति ॥ ९५९ ॥ किमात्मनि वास्तव्याविद्याऽनुपपन्ना उत कल्पिताऽपि, नाद्यः, इष्टत्वादित्याह *अविद्यमानेति । द्वितीयं प्रत्याह *अविचारेणेति । युक्त्यसहत्वेऽप्यविचारदशायां न जानामीत्यनुभवसिद्धत्वात्कल्पिता सा दुरपह्नवेति भावः ॥ ९६० ॥ विद्वद्दृष्ट्याऽविद्यमानाऽप्यविद्याऽज्ञानां वस्तुवद्भासत इत्यत्र गमकमाह *बुद्धेति ॥ ९६१ ॥ तद्व्याचष्टे*बुद्धतत्त्व इति ॥ ९६२ ॥

तस्मादुत्पन्नतत्त्वस्य माऽस्त्वविद्या चिदात्मनि ॥
अव्युत्पन्नस्य दृष्टैवैषा न वेद्मीत्यनुभूयते ॥ ९६३ ॥
नालुप्तचित्यविद्येति यो ब्रवीति दुराग्रहात् ॥
सोऽलुप्तचित्त्वं वेत्त्यस्य केनेति तदुदीर्यताम् ॥९६४॥
मानेनं चेत्, तदा मानमज्ञातार्थं विना नहि ॥
ततो बलादविद्येयमङ्गीकार्या चिदात्मनि ॥ ९६५ ॥
अङ्गीकृताऽप्यवस्तुत्वाद्बाधिका नेति चेन्न तत् ॥
अवस्तुतामजानानां बाधतैवाहिवस्तुवत् ॥ ९६६ ॥
रज्जुसर्पोऽप्यप्रबुद्धं भीषयेत्तात्त्विकाहिवत् ॥
विद्यावैयर्थ्यदोषोऽतो नैवास्मान्प्रति ढौकते ॥९६७॥
अनादेरपि बाधोऽस्ति तमसो विद्ययाऽन्यथा ॥
प्रमाणानां प्रमाणत्वं न क्वचिद्वः प्रसिद्ध्यति ॥ ९६८ ॥
अज्ञातज्ञापकं मानमनाद्यज्ञानबाधया ॥
घटादावपि मानत्वं लभते किमुतात्मनि ॥ ९६९ ॥

उक्तमर्थमुपसंहरति *तस्मादिति ॥९६३॥ किञ्च चिद्रूपे ब्रह्मण्यविद्याऽनुपपन्नेति वदता मानेन तज्ज्ञातमिति वक्तव्यं, मानं विना मेयासिद्धेः । मानं चाज्ञातवस्तुबोधीति तत्राऽनिच्छताऽप्यज्ञानं स्वीकार्यमित्याह *नेत्यादिना ॥९६४॥९६५॥९६६॥ कल्पिताऽप्यविद्या यावदधिष्ठानसाक्षात्कारं भासत एवेत्यत्र दृष्टान्तमाह *रज्जुसर्प इति । विद्ययाऽविद्यानिवृत्तौ फलितमाह *विद्येति । न ढौकते न स्पृशति ॥ ९६७ ॥ अनाद्यज्ञानस्यात्मवदनिवृत्तिमाशङ्क्यातिप्रसङ्गेन प्रत्याह *अनादेरिति । लौकिकवैदिकसर्वप्रमाणानां स्वविषयाज्ञाननिवर्त्तकत्वेनैव प्रामाण्यादिति भावः ॥ ९६८ ॥ तदेव स्पष्टयति *अज्ञातेति ॥ ९६९ ॥ उक्तमर्थं बुद्धिसौकर्याय पुनः स-

एतावता मुमुक्षूणां चोद्ये यत्कर्तृदूषणम् ॥
तन्निराकृत्य विद्यायाः कर्तृ ब्रह्मेति साधितम् ९७०॥
ब्रह्मणो ज्ञानकर्तृत्वं यदुक्तं तदिहाधुना ॥
ब्रह्म वा इदमग्रेऽभूदिति वाक्येऽपि योज्यते ॥९७१॥
निर्णीतो ब्रह्मशब्दार्थो वैशब्दोऽवधृतौ भवेत् ॥
दृश्यमानं जीवरूपमिदंशब्देन कथ्यते ॥ ९७२ ॥
विद्यायाः प्राक्तनः काल उक्तोऽग्रइति शब्दतः ॥
अभूतभवनं चैवमासीदितिपदोदितम् ॥ ९७३ ॥
मुख्यब्रह्मैव बोधात्प्राङ्नामरूपप्रवेशनात् ॥
जीवरूपमभूत्तेन विद्यायाः कर्तृ तद्भवेत् ॥ ९७४ ॥
एवं स्थितेऽत्र वाक्यार्थे वैशब्देनावधारणात् ॥
सूचितं जीवमिथ्यात्वं यत्तत्स्पष्टमुदीर्यते ॥ ९७५ ॥
जीवभावदशायां च ब्रह्मैव न तदन्यथा ॥

क्षिप्य दर्शयति *एतावतेति ॥ ९७० ॥ एवं ब्रह्मपदार्थकथनप्रसङ्गाद्ब्रह्म वा इदमग्र आसीदिति वाक्यार्थं सङ्क्षेपतोऽभिधाय उक्तार्थपरत्वेन वाक्यं योजयितुं प्रतिजानीते *ब्रह्मण इति। परकीयचोद्यनिरासानन्तरं वाक्ययोजनावसरं दर्शयति *अधुनेति ॥ ९७१ ॥ वाक्यस्थपदानि क्रमेण विभजते *निर्णीतइत्यादिना ॥९७२॥९७३॥ पदार्थमुक्त्वा वाक्यार्थमाह *मुख्येति ॥ फलितमाह *तेनेति। येनापरिच्छिन्नं ब्रह्मैवाविद्यातत्कार्ययोः प्रतिबिम्बरूपेण प्रविश्य तद्धर्मानात्मन्यारोप्य स्वस्वरूपभूतबिम्बाज्ञानान्मुह्यति तेनेत्यर्थः ॥९७४॥ उक्तार्थस्य ब्रह्मेदमिति सामानाधिकरण्येनैव सिद्धे किमवधारणवाचिना वैशब्देनेति, तत्राह *एवमित्यादिना ॥ ९७५ ॥ *अनिर्ज्ञातेति। एवं च

अनिर्ज्ञातात्मतत्त्वं सदब्रह्मेव विभाति तत् ॥९७६॥
अज्ञानतज्जजीवत्वसङ्गतिर्ब्रह्मणोऽत्र का ॥
कार्यकारणताऽहो स्विदात्मात्मीयत्वलक्षणा ॥९७७॥
ब्रह्माकार्यमनादित्वादविकारादकारणम् ॥
आत्मात्मीयत्वसम्बन्धो ब्रह्मणेतरवस्तुनः ॥ ९७८ ॥
स्वतो निरात्मनोर्ब्रह्म भवेदज्ञानकार्ययोः ॥
स्वरूपं तेन सम्बन्ध आत्मात्मीयत्वलक्षणः ॥९७९॥
निरात्मा सात्मकत्वाय स्वात्मप्रदमपेक्षते ॥
तेनाविद्या स्वयं सेद्धुं ब्रह्मतत्त्वमपेक्षते ॥ ९८० ॥
कूटस्थत्वादसङ्गत्वान्मोहतत्कार्यसङ्गतिम् ॥
ब्रह्म नापेक्षते नापि ताभ्यां युज्येत कर्हिचित् ॥९८१॥

जीवपरभेदो वास्तव एव विद्यया निवर्त्तत इति मतमवधारणेन निरस्तमिति भावः ॥ ९७६ ॥ अज्ञानतत्कार्यप्रतिबिम्बितं ब्रह्मैव मोहाज्जीवत्वमापन्नमित्यनुपपन्नं तस्यासङ्गतस्य जडेन सम्बन्धायोगादित्याक्षिपति *अज्ञानेति । सम्बन्धायोगं प्रकटयितुं विकल्पयति *कार्येति ॥ ९७७ ॥ आद्यं प्रत्याह *ब्रह्मेति । द्वितीये जडस्य चेतनसम्बन्धापेक्षत्वेऽपि ब्रह्मणस्तत्सम्बन्धानपेक्षत्वान्न तेन सम्बन्धसिद्धिरित्याह *आत्मेति ॥९७८॥ अनात्मनो ब्रह्मसम्बन्धापेक्षामुपदर्शयति *स्वत इत्यादिना । जडस्य ब्रह्माधीनसत्ताकत्वात्तत्सम्बन्धाभावे शून्यत्वापातात्स्वसिद्ध्यर्थमेव जडं ब्रह्मसम्बन्धमपेक्षत इत्यर्थः ॥ ९७९ ॥ ९८० ॥ ब्रह्मणो जडसम्बन्धानपेक्षत्वे हेतुमाह *कूटस्थत्वादिति । अनन्याधीनसिद्धिकत्वादित्यर्थः । न केवलं सम्बन्धानपेक्षा ऽसङ्गस्यान्यसम्बन्धोऽपि न घटत इत्याह *नापीति ॥ ९८१ ॥

नीलत्वेन वियद्योगः स्ववृत्तापेक्षया न सन् ॥
आत्मनैवं तमोयोगो नात्मविद्यानुरोधतः ॥ ९८२ ॥
अविद्यावृत्तवीक्षायामन्यसङ्गतिरात्मनि ॥
भात्यात्मात्मीयरूपेण स्याज्जगत्सात्मकं ततः ॥९८३॥
प्रत्यग्रूपातिरेकेण नान्यद्रूपमनात्मनः ॥
वादिभिर्युक्तिभिः शक्यं क्वचित्साधयितुं सदा॥९८४॥
स्वरूपशब्दवाच्योऽयं सर्वत्रात्मैव नेतरः ॥
तथा चात्मातिरेकेण स्वरूपं कस्य सम्भवेत् ॥९८५ ॥
अतोऽविद्यामहानिद्रासंवीतमनसामसौ ॥
जन्मादिविक्रियाषट्कस्वप्नदर्शनविभ्रमः ॥ ९८६ ॥

आत्मनो वास्तवतादात्म्याभावेऽपि काल्पनिकं तदुपपद्यत इति दृष्टान्तमुखेन परिहरति *नीलत्वेनेत्यादिना । यथा वियतो वास्तवसम्बन्धाभावेऽपि नीलं नभ इति तादात्म्यानुभवात्तयोर्योगः कल्प्यते, एवमात्मनो जडतादात्म्यानुभवादविद्यासम्बन्धो वक्तव्य इत्यर्थः ॥ ९८२ ॥ चिज्जडयोरितरेतरतादात्म्ये फलितमाह *जगदिति । अन्यथा सन् घट इति सामानाधिकरण्यबुद्धिर्न स्यादिति भावः ॥ ९८३ ॥ आत्मातिरेकेणानात्मनो न निरात्मत्वं, वादिभिस्तस्य वस्तुत्वाङ्गीकारादिति, तत्राह *प्रत्यगिति ॥ ९८४ ॥ अशक्तिमेवोपपादयति *स्वरूपेति ॥ ९८५ ॥ जगतो जन्मादिदृष्टेर्ब्रह्मणोऽर्थान्तरत्वसिद्धिरित्याशङ्क्य तस्य ब्रह्माव्यतिरेकत्वेन सत्त्वस्य सदेव सोम्येत्यादिश्रुतिसिद्धत्वाज्जन्मादिधीः स्वप्नधीवद् भ्रान्तिरित्याह *अत इति । जगज्जन्मादिरूपविक्रियाषट्कमधिकृत्य स्वप्नदर्शनवद्विभ्रमो जगत्यविवेकिनामिति योजना ॥९८६॥

ब्रह्मैव सत्स्वतः साक्षात्तदबोधैकहेतुतः ॥
इदंरूपं समापेदे रशनेवाहिरूपताम् ॥ ९८७ ॥
अविद्याफलकारूढं वस्तु विद्याधिकारिताम् ॥
वेद्यवेदितृरूपेण द्वैविध्यात्प्रतिपद्यते ॥ ९८८ ॥
स्वतो मुक्तं ब्रह्म यस्मात्तस्माद्वेद्यत्वमर्हति ॥
संसारित्वमविद्यातो मुमुक्षुत्वं ततोऽर्हति ॥ ९८९ ॥
ब्रह्म वा इदमग्रेऽभूदिति वाक्ये गुरूत्तरे ॥
श्रुतं विद्याधिकारित्वं यत्तद् ब्रह्मणि सुस्थितम् ॥ ९९० ॥
किमवेदिति वेद्यस्य य आक्षेप उदीरितः ॥
तं समाधित्सुराहैतत्तदात्मानमवेदिति ॥ ९९१ ॥
स्वरूपस्यैव वेद्यत्वे स्वस्कन्धारोहदूषणम् ॥
यदुक्तं तदसत्, तस्मात्सोपाधिर्वेदिता ततः ॥ ९९२ ॥
अवेत्सोपाधिरात्माऽयमात्मानं निरुपाधिकम् ॥
ज्ञातृज्ञानज्ञेयभेदान्न दोषोऽत्र मनागपि ॥ ९९३ ॥
अविविक्तस्तु देहाद्यैरात्मा भवति वेदिता ॥

एवमवधारणार्थमुपपाद्य वाक्यार्थमुपसंहरति *ब्रह्मैवेति । कथमबोधादपि विरुद्धाकारता तत्राह *रशनेति ॥ ९८७ ॥ एवं वाक्यार्थनिष्पत्तौ फलितमाह *अविद्येत्यादिना । परं हि ब्रह्मानाद्यविद्याख्यं फलकमधिरोहति । तदेव पुनर्बुद्ध्याद्युपहितं सत् अनुपहितब्रह्मविद्यायामधिकारित्वमधिगच्छतीत्यर्थः ॥ ९८८ ॥ ९८९ ॥ उक्तवाक्यार्थस्य निरवद्यतामाह *ब्रह्मेति ॥ ९९० ॥ उत्तरवाक्यतात्पर्यमाह *किमिति ॥ ९९१ ॥ आत्मन एव ज्ञेयत्वे यद् दूषणमुक्तं तदनूद्य निराचष्टे * स्वरूपस्येति ॥ ९९२ ॥ उक्तमेव व्यनक्ति *अवेदि-

विविक्तात्मा वेदितव्यो धीवृत्तिर्वेदनं भवेत् ॥९९४॥
यो वेदिता घटादीनामात्मनोऽप्येष वेदिता ॥
घटादीनामात्मनश्च बुद्धिरेव हि वेदनम् ॥ ९९५ ॥
वेद्यं वेदनसामग्रीत्युभयं तु विशिष्यते ॥
प्रत्यक्षादीनि सामग्री घटादौ श्रुतिरात्मनि ॥९९६॥
यद्गोचरा स्यात्सामग्री ज्ञानं तद्गोचरं यथा ॥
रूपगोचरदृग्जन्यवेदनं रूपगोचरम् ॥ ९९७ ॥
तथाऽऽत्मगोचरश्रुत्या जन्या धीरात्मगोचरा ॥
स्वाभाविकात्मा वेद्योऽत्र सर्वोपाधिविवर्जितः॥९९८॥
प्राणित्यपानिति व्यानित्युदानीति समानिति ॥
प्रविश्य देहं यः सोऽयमात्मा स्वाभाविको मतः ॥९९९॥
प्राणनादिक्रियैवात्र विस्पष्टा ऽऽत्मा तु न स्फुटः ॥

ति ॥ ९९३ ॥ ज्ञात्रादिभेदमाह *अविविक्त इति ॥ ९९४ ॥ किञ्चानात्मद्रष्टुरेव ब्रह्मविद्याकर्तृत्वान्न ज्ञेयाभेदशङ्केत्याह *य इति । तत्र हेतुमाह *घटादीनामिति । घटादिज्ञानवदात्मधियोऽपि बुद्धिपरिणामत्वादुभयोरेव कर्तृत्वमिति भावः ॥ ९९५ ॥ एवं ज्ञातृज्ञेययोरविशेषेऽप्यात्मानात्मधियोर्न साङ्कर्यमित्याह *वेद्यमिति । सामग्रीभेदं दर्शयति *प्रत्यक्षादीनीति ॥ ९९६ ॥ ज्ञानस्य स्वतो विशेषाभावे नियताविषयत्वं न स्यादिति, नेत्याह *यदिति । उक्तमर्थमुदाहरणेन स्फुटयति *यथेति ॥ ९९७ ॥ श्रुतिजन्यधीविषय आत्मा कीदृशस्तत्राह *स्वाभाविकेति । आत्मतत्त्वस्यासकृदुक्तत्वेऽपि तस्य दुर्बोधत्वात्पुनः प्रसङ्गं सम्पाद्य बोध्यत इति बोध्यम् ॥ ९९८ ॥ कोऽसावात्मा स्वाभाविकस्तत्राह *प्राणितीति ॥ ९९९ ॥

इति चेत्, तर्ह्यसौ द्रष्टा श्रोता मन्तेति निश्चिनु ॥१०००॥
ज्ञानशक्तिषु चैतन्यमाविर्भवति यद्यपि ॥
तथापि तदुपाधित्वान्न शुद्ध इति चेच्छृणु ॥ १००१ ॥
स्पृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्तेति गम्यताम् ॥
अनित्यदृग्घटद्रष्टा दृष्टेर्द्रष्टा तु नित्यदृक् ॥ १००२ ॥
घटः कालविभेदेन दृश्यते च न दृश्यते ॥
न कदाचिन्न दृश्यन्ते दृष्टिश्रुत्यादिवृत्तयः ॥ १००३ ॥
स्पृश्यमाने घटे रूपं नेक्षते पिहितेक्षणः ॥
अपश्यतो रूपदृष्टिरनित्येत्यवगम्यते ॥ १००४ ॥
दृष्टिश्रुत्यादिविषया या दृष्टिः सा त्वनाशिनी ॥
विषयव्यभिचारेऽपि नैव व्यभिचरत्यसौ ॥ १००५॥

प्राणनादिक्रियाव्यतिरिक्तत्वेनात्मा स्पष्टं न स्फुरतीति शङ्कित्वा प्रकारान्तरेण बोधयति *प्राणनेति ॥ १००० ॥ दर्शनादिक्रियाशक्तिमत्स्वरूपोक्तिमात्रेण जिज्ञासा न शाम्यतीति शङ्कते *ज्ञानेति ॥ १००१ ॥ तर्हि दृष्ट्यादिसाक्षित्वेन आत्मानं बुध्वा तुष्यतु भवानित्याह *दृष्टेरिति । ननु घटादिद्रष्ट्रपेक्षया तद्ज्ञानद्रष्टरि को विशेषस्तत्राह *अनित्यदृगिति ॥ १००२ ॥ घटद्रष्टुरनित्यत्वमुपपादयति *घट इति । घटादेः स्वसत्तायां ज्ञायमानत्वनियमाभावात् न तद्द्रष्टा नित्यदृग्रूप इत्यर्थः ॥ दृष्टिद्रष्टरि ततो विशेषं दर्शयति *नेति । बुद्धिवृत्तयो विद्यमानदशायां सदा दृश्यन्त एवेत्यर्थः ॥ १००३ ॥ अमुमेव श्लोकं व्याकरोति *स्पृश्यमान इत्यादिना ॥१००४॥ *विषयेति ॥ विमता दृष्टिर्नित्या अव्यभिचारित्वात्परेषामात्मवदिति प्रयोगोपपत्तेरिति भावः ॥ १००५ ॥ स्वप्नसाक्षित्वेना-

घटाद्याभासदृष्टिस्तु स्वप्नेऽन्धस्यापि विद्यते ॥
चक्षुर्दृष्टिविनाशेऽपि या दृष्टिः सा चिदात्मदृक् ॥१००६॥
वासनाप्रत्ययौ दृष्टौ स्वप्नजाग्रदवस्थयोः ॥
ययाऽसौ नित्यदृष्टिः स्यात्सा सुप्तौ च न नश्यति १००७
द्रष्टुर्दृष्टेर्न लोपोऽस्ति मुग्धानां लोपविभ्रमः ॥
दृश्यलोपकृतो नो चेत्सुप्तिः केन प्रसिद्ध्यति ॥१००८॥
सुप्त्यादिसाधिका दृष्टिरेव रूपं चिदात्मनः ॥
वह्नेरिवौष्ण्यमात्मानमेतमेवाधिकार्यवेत् ॥ १००९ ॥
अधिकारित्वमापन्नं ब्रह्म सोपाधिरूपधृक् ॥
नित्यदृग्रूपमात्मानमेवावेन्निरुपाधिकम् ॥ १०१० ॥
विज्ञातारं न विज्ञातेर्विजानीया इति श्रुतेः ॥

ऽपि तस्य नित्यत्वमाह *घटादीति ॥ अपिशब्दादनन्धो गृह्यते । या स्वप्नकल्पितघटाद्युपलब्धिः सैव स्वप्रकाशात्मचैतन्यमित्यर्थः । कथं तर्हि स्वप्नघटादौ चाक्षुषत्वानुभवस्तत्राह *चक्षुरिति । तदेन्द्रियाणामुपरतत्वात्सोऽपि भ्रम एवेति भावः ॥ १००६ ॥ जाग्रत्स्वप्नकालिकसाक्षिणः सुप्त्यवस्थायामप्यवस्थानमाह *वासनेति ॥ १००७ ॥ तत्र मानमाह *द्रष्टुरिति । कथं तर्हि सुप्तौ ज्ञानं नास्तीत्यनुभवस्तत्राह *मुग्धानामिति । सुप्तौ चैतन्यानङ्गीकारे दण्डमाह *नो चेदिति ॥१००८॥ चैतन्यस्य नित्यत्वेऽपि मुमुक्षुवेद्यं ब्रह्म किंरूपं ? तत्राह *सुप्त्यादीति ॥ १००९ ॥ उक्तमेव विवृणोति *अधिकारित्वमिति ॥ १०१० ॥ वाक्यशेषविरोधं चोदयति *विज्ञातारमिति । किमात्मनो वृत्तिविषयत्वं विरुध्यते किंवा चिद्विषयत्वं ? नाद्य इत्याह *न तथेत्यादिना । बुद्धिवृत्तिसाक्षिचैत-

नैवात्मा वेदितुं शक्य इति चेत्, न, तथेक्षणात्॥१०११॥
विज्ञातेरपि विज्ञाता न विज्ञेयः कदाचन ॥
इत्येवं वेदने ब्रूहि स्यादशक्तिस्तवात्र का ॥ १०१२ ॥
नैतावता स्फुरत्यात्मा स्फोरकज्ञानवर्जनात् ॥
इति चोद्यमचोद्यं स्यादन्यज्ञानानपेक्षणात् ॥१०१३॥
नित्यदृग्रूप आत्मेति धीवृत्तिः शास्त्रतो यदि ॥
असन्दिग्धा समुत्पन्ना तदाऽस्य स्फोरकेण किम्॥१०१४॥
निश्चिनोति यदा शास्त्रादात्मनोऽस्फोर्यरूपताम् ॥
तदा स्फोरकमाकाङ्क्षन्ननुन्मत्तः कथं भवेत् ॥ १०१५ ॥
नाविद्यमाने विषये स्यादाकाङ्क्षाऽत्र धीमतः ॥
दृगात्मस्फोरिका दृष्टिर्न सम्भवति कुत्रचित् ॥१०१६॥
द्वे एव दृष्टी धीवृत्तिरात्मा चेत्यनयोर्न धीः ॥
शक्ताऽऽत्मानं स्फोरयितुमात्मना स्फोर्यते यतः॥१०१७॥
आत्मदृष्टिश्च नात्मानं स्फोरयेदविकारतः ॥
स्फोरकासम्भवाद्धीमान्न स्फोरकमपेक्षते ॥ १०१८ ॥

न्याविषयब्रह्मैवाहमित्येवमाकारवृत्त्यङ्गीकृतौ विरोधाभावात्, चिद्विषयत्वं तु नाङ्गीकृतमिति भावः। तर्हि वृत्तेर्जडत्वादात्मस्फोरकं ज्ञानान्तरमपेक्षितव्यमिति कुतो न विरोध इति शङ्कित्वा परिहरति *नेति ॥ १०११ ॥ १०१२ ॥ १०१३ ॥ उक्तहेतुं विवृणोति *नित्येति ॥ १०१४ ॥ अपि चात्मनः स्फुरणविषयत्वाभावे शास्त्रान्निश्चिते तद्विषयस्फुरणाकाङ्क्षा व्याघातादेव नोदेतीत्याह *निश्चिनोतीति ॥ १०१५ ॥ आत्मस्फोरकज्ञानस्य असम्भावितत्वादपि न तद्विषयाकाङ्क्षेत्याह *नेति ॥ १०१६ ॥ दृष्टिविभागपूर्वकं तस्यासम्भावितत्वमेव विशदयति। *द्वे एवेति ॥ १०१७ ॥ १०१८ ॥ आत्मनो

अविद्यारोपनिह्नुत्यै तमात्मानमवेदिति ॥
आत्माभिमुखधीवृत्तिरात्मवेदनमुच्यते ॥ १०१९ ॥
आत्मानमेव तदवेदित्युक्तादेवकारतः ॥
निर्माल्यवत्परित्याज्यं देहादीत्यवगम्यते ॥ १०२० ॥
त्यज्यमाने तु देहादावात्मैवैकोऽवशिष्यते ॥
परित्यक्तुमशक्यत्वादात्मानं निह्नुतेऽत्र कः ॥१०२१॥
अन्योऽन्यं विवदन्ते ये वादिनस्तेऽस्मदात्मनि ॥
संवदन्ते हि सर्वेऽपि तस्यानुभवरूपतः ॥ १०२२ ॥
साधनं दूषणं सर्वमनुभूतिबलाश्रयात् ॥
सिद्ध्यते वादिनां साऽनुभूतिस्तेन सम्मता ॥१०२३॥
अभावो येन भावेन ज्ञायते शून्यवादिना ॥
तस्य भावस्य सद्भावो वद केन निवार्यते ॥ १०२४ ॥
व्यभिचारि न यत्रास्ति प्रमाणं सर्ववादिनाम् ॥

वृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वानङ्गीकृतेर्न वाक्यशेषविरोध इत्युपसंहरति *अविद्येति ॥ १०१९ ॥ १०२० ॥ इदं नेदं नेति देहादेरनात्मत्वनिश्चये फलमाह *त्यज्यमान इति ॥ ॥ १०२१ ॥ सर्ववादिसम्मतत्वाच्चास्मदभिमतात्मा दुरपह्नव इत्याह *अन्योऽन्यमिति ॥ १०२२ ॥ भवदभिमतात्मनोऽनुभवरूपत्वेऽपि कथं तत्र वादिनां सम्मतिस्तत्राह *साधनमिति । स्वमतसाधनार्थं परमतदूषणार्थं च योऽनुभवः सर्ववादिभिरुपन्यस्यते तस्यैवास्माभिरात्मत्वेनाङ्गीकारादिति भावः ॥ १०२३ ॥ शून्यवादिनाऽनुभवस्याप्यनङ्गीकारात्कथं तत्सम्मतिस्तत्राह *अभाव इति । अनुभवानङ्गीकारे तदभिमतशून्यस्याप्यसिद्धिः स्यादिति भावः ॥ १०२४ ॥ सर्वप्रत्यय-

स्वमहिम्ना च यत्सिद्धं तदपह्नूयते कथम् ॥ १०२५ ॥
अनुभूत्यवसानानि सर्वमानानि मानताम् ॥
लभन्ते, नान्यथा, नातो व्यभिचारः कथञ्चन ॥१०२६॥
सिद्ध्यन्ति सर्वमानानि यत्प्रसादात्तदन्यतः ॥
कस्मात्सिद्ध्येदतस्तत्तु स्वमहिम्नैव सिध्यति ॥१०२७॥
अप्राप्तः प्राप्यते योऽयमत्यक्तस्त्यज्यते तथा ॥
जानीयात्तमनात्मानं बुद्ध्यन्तं वपुरादिकम् ॥ १०२८ ॥
त्यज्यमानेऽपि न त्यक्तः प्राप्यमाणेऽपि नाप्यते ॥
आगमापायसाक्षी यः स आत्माऽनुभवात्मकः ॥१०२९॥

साक्षित्वाच्चात्मानुभवो दुरपह्नव इत्याह *व्यभिचारीति । आगमापायशीलं वादिनां सम्मतं प्रत्यक्षादि यद्विषये नास्ति यत्साधकं न भवतीति यावत् । तस्य प्रमित्युत्पत्तिसाक्षित्वेन पूर्वमेव सिद्धत्वादिति भावः । केन तर्हि तत्सिद्धिस्तत्राह * स्वेति । चोऽवधारणे ॥ १०२५ ॥ प्रमित्युत्पत्तिसाक्षिणोऽप्यनन्तरं विनाशात्कथं दुरपह्नवत्वं तत्राह *अनुभूतीति । प्रमितिस्थितिकालेऽपि तत्साधकानित्यसाक्ष्यनभ्युपगमे तस्याः प्रमात्वमेव न सिद्ध्येत्, साधकान्तराभावादिति भावः । फलितमाह *नात इति । व्यभिचारो नाशः, साक्षिण इति शेषः ॥१०२६॥ उक्तमेव व्यनक्ति*सिध्यन्तीति ॥ १०२७ ॥ किञ्चात्मनो यथा प्राप्तत्वं नास्ति तथा त्याज्यत्वमपि नेति वक्तुं तयोरनात्मविषयत्वमाह *अप्राप्त इति । यः प्रलयादावनाप्तः सन्पश्चादाप्यते योऽयं विवेकादिदं नेदं नेति पृथक् क्रियते तद्देहादिबुद्धिपर्यन्तं पञ्चकोशमप्यनात्मानं विद्यादित्यर्थः ॥ १०२८ ॥ आत्मनि तद्वैलक्षण्यमाह *त्यज्यमान इति । आत्मन आप्तित्यागाभावे हेतुमाह *आगमेति ॥ १०२९ ॥ एवकारार्थमुक्त

उत्सार्यानात्मनः सर्वानन्वयव्यतिरेकतः ॥
प्रत्यक्प्रधानया दृष्ट्या निजात्मानमवेत्परम् ॥१०३०॥
अहं ब्रह्मास्मि नो जीव इत्यवेद्ब्रह्मरूपताम् ॥
शोधितस्याहमर्थस्य युज्यते ब्रह्मरूपता ॥१०३१॥
ब्रह्मता नात्मनोऽन्यत्र नात्मता ब्रह्मणोऽन्यतः ॥
तद्याथात्म्याप्रबोधात्तु तयोरेष विपर्ययः ॥ १०३२ ॥
अब्रह्मानात्मताहेतौ प्रत्यग्ध्वान्ते निवर्त्तिते ॥
आत्मानमेव ब्रह्मेति निर्विघ्नं प्रतिपद्यते ॥ १०३३ ॥
अविश्वासोऽत्र विघ्नश्चेन्न तस्याविषयत्वतः ॥
सर्वविश्वासहेतुत्वादविश्वासः क आत्मनि ॥१०३४॥
सर्वोऽप्यात्मनि विश्वस्य ततोऽनात्मनि तद्वशात् ॥
आविद्वदङ्गनाबालं विश्वसित्यनपेक्षतः ॥ १०३५ ॥
चैतन्यमात्ररूपोऽयं सदाऽनस्तमयोदयः ॥

मुपसंहरति *उत्सार्येति ॥ १०३० ॥ आत्मवेदनमभिनीय दर्शयन्नहं ब्रह्मास्मीत्यस्यार्थमाह *अहमिति । परिच्छिन्नस्य जीवस्य कथं ब्रह्माभेदः ? तत्राह *शोधितेति ॥ १०३१ ॥ आत्मन्यब्रह्मतायाः ब्रह्मणि चानात्मतायास्तर्हि कथं प्रथा तत्राह *तद्याथात्मेति ॥१०३२॥ विपर्ययबीजमुक्त्वा तस्य तन्निवृत्तौ निवृत्तिमाह *अब्रह्मेति॥१०३३॥वाक्यबोधितमप्यात्मनो न ब्रह्मत्वं निश्चेतुं शक्यतेऽविश्वासप्रतिबन्धादिति शङ्कते *अविश्वास इति । आत्मनि स्वत एव प्रकाशमाने नाविश्वाससम्भव इति परिहरति *नेति ॥ १०३४ ॥ *सर्वोऽपीति । आत्मन्यादौ विश्वासं कृत्वा तद्वशादनात्मनि सर्वलोको विश्वासं करोति, कुतस्तस्याविश्वासाविषयतेत्यर्थः ॥ १०३५ ॥ आत्मन्यब्रह्मत्वारोपहेत्वावि-

अविद्यामस्पृशन्नास्ते निष्क्रियोऽकारकोऽफलः॥१०३६॥
आत्मस्थामप्यविद्यां तामसङ्गो न स्पृशत्यसौ ॥
वृष्ट्यातपौ वियन्निष्ठावस्पृष्टौ वियता यथा ॥ १०३७ ॥
न वृष्ट्या क्लिद्यते व्योम नातपेनापि शुष्यते ॥
अविद्यया विद्यया वा नात्मन्यतिशयस्तथा ॥ १०३८ ॥
प्रत्याख्याताऽप्यात्मनेयमाश्रयान्तरवर्जनात् ॥
अविद्या सिध्यतीवात्मन्यज्ञैरेव प्रकल्पिता ॥ १०३९ ॥
कल्पिताया अविद्याया हानिः कल्पितविद्यया ॥
यादृग्यक्षो बलिस्तादृगिति न्यायविदो विदुः ॥१०४०॥
विद्याया अप्यविद्यायाः कल्पितत्वे समे सति ॥
आत्मनो ब्रह्मता तुल्या भवेत्संसारमोक्षयोः ॥१०४१॥
निवर्त्यभेदाद्भिन्नोऽर्थो ब्रह्माहम्पदयोर्भवेत् ॥

द्याङ्गीकृतौ तत्सम्बन्धस्यानादेः कथं ज्ञानान्निवृत्तिरित्याशङ्क्याऽवि-द्यातत्कार्याभ्यामात्मनः स्वाभाविकसम्बन्धाभावात्कल्पितस्या-विद्यावन्निवृत्त्युपपत्तिरित्यभिप्रेत्याह *चैतन्येति । अविद्यास्पर्श-वत्तत्कार्येणापि स्पर्शो नास्तीत्याह *निष्क्रिय इति ॥१०३६॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *आत्मस्थामिति॥१०३७॥१०३८॥ आत्मनोऽविद्यया सम्बन्धाभावे साविद्यजगदसिद्धेर्बन्धासिद्धि-रित्याशङ्क्याह *प्रत्याख्यातेति । आत्मनि अविद्यासम्बन्धो-ऽप्यविद्यानिमित्त इति इवशब्दार्थः ॥ १०३९ ॥ सर्वस्याप्या-त्मनि कल्पितत्वे शास्त्रजन्यतत्त्वज्ञानस्यापि तथात्वान्न तेनाज्ञा-नहानिः स्यादिति तत्राह *कल्पिताया इति ॥ १०४० ॥ अविद्यादेरवास्तवत्वे फलितमाह *विद्याया इति ॥ १०४१ ॥ नन्वेवं सत्येकेनैव पदेनैकरसार्थे सिद्धेऽलं पदान्तरेणेत्यत्रा-

अब्रह्मानात्मते वार्ये एकस्मिन्नपि वस्तुनि ॥ १०४२ ॥
स्वानुभूत्यवसेयेऽस्मिन्प्रतीच्यब्रह्मतां जनः ॥
आरोप्य शास्त्रगम्येऽस्मिन्ननात्मत्वमकल्पयत् ॥१०४३॥
अनुभूत्यवसेयोऽहं ब्रह्म शास्त्रसमर्पितम् ॥
अस्मीति बोधादारोपद्वयमत्र निवर्त्तते ॥ १०४४ ॥
त्यक्त्वाऽऽरोपद्वयं वस्तु ब्रह्माहम्पदलक्षितम् ॥
अद्वयप्रत्यगात्मत्वरूपेण व्यवतिष्ठते ॥ १०४५ ॥
अनन्यापेक्षमात्मत्वमहंशब्देन लक्ष्यते ॥
तथैव ब्रह्मशब्देन प्रतीचोऽस्याद्वयात्मता ॥ १०४६ ॥
अस्मीति वर्त्तमानोक्तेर्विद्याकालैव मुक्तता ॥
सिद्धाऽतोऽसौ न साध्या स्यादग्निहोत्रादिकार्यवत्१०४७
तस्मात्तत्सर्वमभवदिति वाक्येन वेदनात् ॥

ह *निवर्त्येति । निवर्त्यभेदमेव स्फुटयति *अब्रह्मेति । वार्ये निवर्तनीये ॥ १०४२ ॥ एकस्मिन्वस्तुनि विरुद्धोभयारोपः कथमित्याशङ्क्य बिम्बप्रतिबिम्बभावेन द्विधा भिन्ने एकस्मिंश्चैतन्ये उभयारोप उपपद्यत इत्याह *स्वेति ॥ १०४३ ॥ आरोपमुक्त्वा तन्निवृत्तिप्रकारमाह *अनुभूत्यवसेय इति । अहम्प्रत्ययाविषय इत्यर्थः ॥ १०४४ ॥ निवृत्तस्याप्यब्रह्मत्वादेः पुनरारोपादनिर्मोक्षप्रसङ्ग इत्याशङ्क्य तद्धेत्वविद्याऽभावान्नैवमित्यभिप्रायेणाह *त्यक्त्वेति ॥१०४५॥ ब्रह्माहम्पदयोर्लक्ष्यार्थमाह *अनन्यापेक्षमिति। निष्कृष्टाहंकारादिरूपमित्यर्थः॥१०४६॥ अस्मीतिपदेन मुक्तेर्ज्ञानेन तुल्यकालत्वासिद्धौ फलितमाह *अत इति । तत्र वैधर्म्यदृष्टान्तमाह *अग्निहोत्रेति ॥ १०४७ ॥

उच्यते सर्वभावाप्तिरसर्वत्वापवादतः ॥ १०४८ ॥
स्वतः सर्वात्मकं ब्रह्म भात्यसर्वमिव भ्रमात् ॥
विद्यया भ्रान्तिबाधेऽस्य सर्वत्वमवशिष्यते ॥ १०४९ ॥
विद्यायां सर्वभावाप्तिहेतौ ये कर्तृकर्मणी ॥
मुमुक्षुभिरिहाक्षिप्ते गुरुणा ते समाहिते ॥ १०५० ॥
नन्वसौ सर्वभावाप्तिर्न विद्यामात्रतो भवेत् ॥
विनोत्तमत्वानुष्ठानकालदेवाद्यनुग्रहम् ॥ १०५१ ॥
विप्रस्य फलदो वेदो न शूद्रस्याधमत्वतः ॥
देवादेरुत्तमस्यैव तथा विद्या फलप्रदा ॥ १०५२ ॥
यागज्ञानमनुष्ठानाद्विना न स्वर्गदं यथा ॥
ब्रह्मज्ञानमनुष्ठानाद्विना सर्वाप्तिदं कथम् ॥ १०५३ ॥
गर्भाधानमृतावेव नान्यकाले तथोत्तमे ॥
विद्या कृतयुगे सर्वभावं यच्छति नान्यथा ॥ १०५४ ॥
राज्ञा कृषिफलं यद्वत्करार्थं प्रतिबध्यते ॥
सर्वभावस्तथा देवैर्यागभुग्भिर्निवार्यते ॥ १०५५ ॥
तस्मादनुत्तमे जन्मन्यननुष्ठायिनः कलौ ॥

॥ १०४८ ॥ १०४९ ॥ १०५० ॥ तद्यो य इत्याद्युत्तरवाक्यव्यावर्त्यामाशङ्कामाह *नन्विति ॥ १०५१ ॥ उत्तमत्वं देवादि । अनुष्ठानम् अहं ब्रह्मेति भावना । कालः कृतयुगादिः । देवादेरेव विद्या फलति नान्यस्येत्येतद् दृष्टान्तेन उपपादयति *विप्रस्येत्यादिना ॥ १०५२ ॥ १०५३ ॥ १०५४ ॥ देवाद्यनुग्रहस्याप्यावश्यकतां निदर्शनपूर्वकमुपपादयति *राज्ञा कृषिफलमिति ॥ १०५५ ॥ उक्तं चोद्यमुपसंहरति *तस्मादिति । अनुत्तमे अधमे । *देवाद्यृणवत इति । जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा

युगे देवाद्यृणवतो न विद्या सर्वभावदा ॥ १०५६ ॥
इति चोदयितुर्येऽत्र चत्वारश्चोद्यहेतवः ॥
तद्यो य इत्यादिवाक्यैश्चतुर्भिस्तान्निरस्यति ॥१०५७॥
न तावदुत्तमं जन्म सर्वभावप्रयोजकम् ॥
उत्तमस्यापि देवादेः सर्वत्वं ब्रह्मबोधतः ॥ १०५८ ॥
श्रुतिः ॥ तद्यो यो देवानां प्रत्यबुध्यत स एव तदभव-
त्तथा ऋषीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वा-
मदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति ।
वार्त्ति०॥यो यो देवेष्वृषीणां वा मध्ये ब्रह्म व्यबुध्यत ॥
असावसावेव सर्वमभून्नान्यस्तु कश्चन ॥ १०५९ ॥
मनुष्याणां तथा मध्ये ब्रह्मवित्सर्वभावभाक् ॥
विद्याविद्ये एव तस्मात्सर्वत्वान्यत्वकारणे ॥ १०६० ॥
ब्रह्म वा इदमग्रेऽभूदिति विद्याधिकारिता ॥
श्रूयते ब्रह्मणो ब्रह्म सर्वजातिषु तत्समम् ॥ १०६१ ॥

जायत इति श्रुतेः ब्राह्मणा देवाद्यृणवन्त इत्यर्थः ॥ १०५६ ॥ उक्तचोद्यपरिहारपरः उत्तरवाक्यसंदर्भ इत्याह*इतीति॥१०५७॥ किं सर्वभावाप्तौ देवत्वादिजातिरेव हेतुरुत ब्रह्मविद्याऽपि? नाद्यः, मानाभावात् । द्वितीये ब्रह्मविद्यैव सर्वत्वहेतुरस्तु किं जात्या । तथाच मनुष्याणामपि विद्यया तद्भावो न विरुद्ध इति मत्वाऽऽह *नेति ॥१०५८॥ श्रुत्यक्षराणि योजयन्नुक्तमेवार्थं विशदयति *य इति द्वाभ्याम् ॥ १०५९ ॥ *सर्वत्वेति । सर्वत्वासर्वत्वकारणे इत्यर्थः ॥ १०६० ॥ उपक्रमपर्यालोचनयाऽपि सर्वाधिकारकं ब्रह्मज्ञानमित्याह *ब्रह्मेति । बुद्ध्याद्युपहितं ब्रह्मैव विद्याधिकारीत्युक्तं, तच्च सर्वजन्तुषु सममित्यर्थः ॥ १०६१ ॥

न पश्वादेः सर्वभावप्रसङ्गो बोधवर्जनात् ॥
शूद्रजातिस्तु विदुरः सति बोधे त्वमुच्यत ॥ १०६२ ॥
यागविद्येवात्मविद्या नानुष्ठानमपेक्षते ॥
फलदान इति ज्ञेयं वामदेवनिदर्शनात् ॥ १०६३ ॥
ब्रह्मात्मत्वं वामदेवः पश्यन्मन्वादिरूपताम् ॥
प्रतिपेदे ह्यनुष्ठानावसरस्तस्य को वद ॥ १०६४ ॥
प्रयोजनं च विद्याया अनुष्ठानेन किं भवेत् ॥
किमन्तरायापगमः किंवा जन्मनिरोधनम् ॥ १०६५ ॥
पुमर्थावसितिः किंवा यद्वा बाह्यार्थबाधनम् ॥
अन्यद्वा किञ्चिदत्र स्यात्सर्वमेतदसम्भावि ॥ १०६६ ॥
ब्रह्मप्राप्त्यन्तरायस्य प्रत्यक्संमोहरूपिणः ॥
प्रत्यग्विज्ञानतो ध्वस्तौ कोऽन्तरायोऽन्य उच्यताम् १०६७

सर्वभावाप्तेः सर्वाधिकारत्वेऽतिप्रसङ्गादाह *नेति ॥ १०६२ ॥ यदुक्तं यागज्ञानवद्ब्रह्मज्ञानमप्यनुष्ठानं विना न फलप्रदमिति, तन्निराचष्टे *यागविद्येति । यागज्ञानमित्यर्थः । उक्तेऽर्थे हेतुः *वामदेवेति ॥ १०६३ ॥ तद्धैतादित्यादिवाक्यं व्याकुर्वन्नुक्तहेतुं स्पष्टयति *ब्रह्मेति ॥ १०६४ ॥ किञ्च विद्योत्पत्त्यनन्तरं तदनुष्ठानप्रयुक्तप्रयोजनाभावादपि न तदपेक्षेत्याह *प्रयोजनमिति । अत्र विदुषि प्रयोजनाभावं स्फुटयितुं विकल्पयति *किमित्यादिना ॥ १०६५ ॥ १०६६ ॥ आद्यं प्रत्याह *ब्रह्मेति । ब्रह्मप्राप्तावज्ञानातिरिक्तव्यवधानाभावात्तस्य च ज्ञानादेव नष्टत्वात्तदर्थमनुष्ठानं व्यर्थमित्यर्थः ॥ १०६७ ॥ द्वितीयं प्रत्याह * सकृदिति । आत्मप्रसूत्या आत्माभिमुख्येनानात्मविषयीकरणेनेति यावत् । विद्ययैव सविलासाविद्यानि-

सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम् ॥
विद्या मोहनिरासेन रोद्धव्यं जन्म किं ततः ॥१०६८॥
अविद्याध्वंसमात्रेण पुमर्थश्च समाप्यते ॥
आनन्दस्य स्वरूपत्वादर्थनीयान्तरं नहि ॥ १०६९ ॥
नाबाधित्वेह बाध्यार्थं बाधको बाधकात्मताम् ॥
लभते ऽतः स्वलब्ध्यैव विद्या बाध्यं प्रबाधते ॥१०७०॥
सम्यग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः ॥
अपेक्ष्यं शिष्यते नान्यदतः स्यादननुष्ठितिः ॥ १०७१॥
अनात्मबुद्धिसत्यत्वनिवारणमपेक्षते ॥
अनुष्ठित्येति चेन्मैवं सत्यत्वस्याप्रसक्तितः ॥ १०७२ ॥
ध्वान्तादिघस्मरे प्रत्यगद्वैतात्मावबोधने ॥
प्रत्यर्थिनि स्थितेऽनात्मधियां स्यात्सत्यता कुतः॥१०७३॥
तस्मात्पश्यन्वामदेवः प्रतिपेदे इतीरणात् ॥
विद्याकालैव सर्वाप्तिर्न विलम्बादितीक्ष्यताम्॥१०७४॥
वामदेवस्य मन्वादिरूपाप्तिर्न विरुध्यते ॥

वृत्तौ कुतो जन्मप्रसक्तिरिति भावः ॥ १०६८ ॥ तृतीयं प्रत्याह *अविद्येति ॥ १०६९ ॥ चतुर्थं प्रत्याह *नेति ॥ यदि विद्याऽविद्यामबाधित्वोत्पद्येत तर्ह्यविद्यायाः बाधिकैव न स्यादतोऽन्धकारमिव प्रदीप उत्पत्तिमात्रेण तां बाधत इत्यर्थः॥१०७०॥ पञ्चमं प्रत्याह *सम्यगिति । निवृत्ताविद्यस्यापेक्षाऽभावे फलितमाह *अतः स्यादिति ॥ १०७१ ॥ प्रकारान्तरेण प्रयोजनं शङ्कते *अनात्मेति ॥ १०७२ अप्रसक्तिमेव व्यनक्ति *ध्वान्तादिघस्मर इति । अविद्यातत्कार्यनिवर्त्तके इत्यर्थः ॥१०७३॥ *तद्वैतादिति । वाक्यार्थमुपसंहरति *तस्मादिति ॥ १०७४ ॥

उपाधिमात्रभेदेन वस्तुतस्त्वैक्यसम्भवात् ॥ १०७५ ॥
वामदेवो मनुः सूर्य इति शब्दैरुपाधयः ॥
मूढव्यवहृतौ भान्ति विद्वद्व्यवहृतौ तु चित् ॥१०७६ ॥
न चितो वामदेवे वा मनौ वाऽन्येषु वा भिदा ॥
तेन मन्वादिचिद्वामदेवेन प्रत्यपद्यत ॥ १०७७ ॥
यत्तु पुण्ययुगे सर्वभावो न तु कलाविति ॥
तदसत्, बोधसाध्यस्य पुण्यकालानपेक्षणात् ॥१०७८॥
न सूर्यग्रहणापेक्षो बोधान्निद्राक्षयः क्वचित् ॥
तथा न सर्वभावोऽयं कालभेदमपेक्षते ॥ १०७९ ॥
श्रुतिः ॥ तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति ॥
वार्त्ति० ॥ य एतर्ह्यपि वेदाहं ब्रह्मास्मीति सदैव सः॥
इदं सर्वं भवत्येव यदिदं जगदीक्ष्यते ॥ १०८० ॥
अविचारितरम्यस्य नामरूपात्मकस्य यत् ॥

वामदेवस्य विद्यया निरुपाधिकचैतन्यात्मत्वेऽपि मन्वादिस्वरूपप्राप्तिः कथमत आह *वामदेवस्येति। मन्वाद्युपाधेः कल्पितत्वेन तदुपहितचैतन्यस्य वास्तवभेदाभावाच्छास्त्रदृष्ट्या तद्रूपप्राप्तिर्न विरुद्धेति भावः ॥१०७५॥१०७६॥१०७७॥ यदुक्तं कृतयुगादावेव ब्रह्मविद्या फलवती, तदनुभाष्य दूषयति *यत्त्विति। ज्ञानफलस्यान्वयव्यतिरेकासिद्धत्वान्न पुण्यकालापेक्षेत्यर्थः॥१०७८॥ एतदेवोदाहरणेन स्पष्टयति *नेति ॥ १०७९ ॥ तदिदमित्यादेरर्थमाह *य इति । श्रुतौ तदिदंशब्दाभ्यां प्रकृतं ब्रह्म निर्दिश्यत इति ध्येयम् । एतर्ह्यस्मिन् काले इदं सर्वमिहात्र, इदंपदार्थं विवृणोति *यदिदमिति ॥ १०८० ॥ जडप्रपञ्चात्मत्वे

जगतो वास्तवं रूपं सत्तत्त्वं ब्रह्म तद्भवेत् ॥ १०८१ ॥
तादृग्ब्रह्माहमस्मीति साक्षात्कृतवतः कथम् ॥
सर्वभावे विवादः स्यात्सर्वाख्यं ब्रह्म नेतरत् ॥१०८२॥
नामरूपे तु नो सर्वे तयोर्मायामयत्वतः ॥
ब्रह्मैव वास्तवं सर्वं ज्ञानेनैव तदाप्यते ॥ १०८३ ॥
ब्रह्मैव निखिलो जन्तुर्बोधात्प्रागपि वस्तुतः ॥
अब्रह्मत्वमबोधात्स्याद्बोधात्तु ब्रह्मता ततः ॥ १०८४ ॥
ब्रह्मबोधात्सर्वभावो भवेत्कृतयुगेन किम् ॥
न निवारयितुं शक्यः सर्वभावः कलावपि ॥ १०८५ ॥
नराणामधमर्णित्वात्सर्वभावं दिवौकसः ॥
वारयन्ति हविर्भोक्तुं तैर्दत्तमिति चेन्न तत् ॥ १०८६ ॥
श्रुतिः । तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवति ॥

विदुषो जाड्यं स्यादित्याशङ्क्य अविद्याकल्पितनामरूपात्मकप्रपञ्चस्याधिष्ठानव्यतिरेकेणाभावात्कल्पितप्रपञ्चाधिष्ठानचिदात्मत्वमेव सर्वभावाप्तिरतो नोक्तदोष इत्येतदुपपादयति *अविचारितेति ॥१०८१॥१०८२॥१०८३॥ अपिच सर्वत्वस्य स्वतःसिद्धत्वात्तद्व्यवधायकाज्ञाननिवृत्तौ पुण्यकालापेक्षाशङ्कैव नेत्याह *ब्रह्मेत्यादिना ॥ १०८४ ॥ १०८५ ॥ मर्त्यानां देवादीन् प्रति ऋणित्वान्न तदनुग्रहं विना सर्वभावाप्तिरिति यदुक्तं तदनूद्य निराचष्टे *नराणामिति ॥ १०८६ ॥ तस्य हेत्यादिवाक्यमुक्तशङ्कानिरासपरतया योजयति *तस्येति । ज्ञानयोग्यमधिकारिणमाह *यतेरिति । श्रुतिगतस्य चनेत्यस्य व्याख्या *अपीति । देवाः चन इति च्छेदः । अभूत्या इति

वार्त्ति० तस्य ज्ञातात्मतत्त्वस्य प्रध्वस्ततमसो यतेः ॥
इन्द्रादयोऽपि नैवालं सर्वभावाप्तिवारणे ॥ १०८७ ॥
यद्यपीशा नृणां देवास्तथापि ब्रह्मवेदिनः ॥
अनीशाः प्रत्युतैतेषामात्मा भवति तत्त्ववित् ॥१०८८॥
ईशेशितव्यसम्बन्धः प्रत्यगज्ञानहेतुजः ॥
ज्ञानी ज्ञानात्तमोध्वस्तावीश्वराणामपीश्वरः ॥१०८९॥
अधमर्णो भवेदज्ञो देवादेर्नतु तत्त्ववित् ॥
देवाद्यैश्वर्यविषयव्यतिक्रान्तत्वहेतुनः ॥ १०९० ॥
नन्वज्ञस्य न विस्रम्भः कर्मानुष्ठान आपतेत् ॥
देवपित्राद्युत्तमर्णैः फलवारणसम्भवात् ॥ १०९१ ॥
नैवं, देवेशकालादीनपेक्ष्यैव कृतत्वतः ॥

पदव्याख्या *सर्वभावेति ॥ १०८७ ॥ अभूत्यै देवा न समर्था इत्यनुपपन्नं, तेषां स्वतन्त्रत्वादिति शङ्कते *यद्यपीति । अज्ञान् प्रति तेषामीश्वरत्वेऽपि ते विदुषो नेशा इत्याह *तथाऽपीति । उक्तेऽर्थे आत्मा ह्येषां स भवतीति श्रुत्युक्तं हेतुमाह *प्रत्युतेति ॥१०८८॥ एतदेव विवृणोति *ईशेति । *ईश्वराणामिति । सर्वात्मत्वे परतन्त्रो न भवतीत्यर्थः ॥ १०८९ ॥ देवादीनामैश्वर्यप्रतिपादकवाक्यविरोधमाशङ्क्य तस्यान्यत्र सावकाशत्वान्न विरोध इत्याह *अधमर्ण इति । विदुषो विद्याफलावाप्तौ विघ्नकरणे देवादीनां न शक्तिरित्यत्र हेत्वन्तरमाह *देवादीति ॥१०९०॥ अज्ञान्प्रति देवादीनामीशत्वेऽतिप्रसङ्गं शङ्कते *नन्विति । विस्रम्भो विश्वासः। उत्तमर्णैः ऋणदातृभिः । तथाच कर्मकाण्डाप्रामाण्यादुपनिषदामपि तद्वदप्रामाण्यमिति भावः॥१०९१॥ देवादीनां कर्मस्वरूपसिद्धिहेतुत्वेन तत्फलप्राप्तावनुकूलत्वान्न

कर्मणः फलदानायानुकूला ईश्वरादयः ॥ १०९२ ॥
प्रतिबध्नन्ति यत्रैते फलं तत्रान्यकर्मणः ॥
प्रबलस्य फलं दातुमेवैतदवजानते ॥ १०९३ ॥
अतः कर्मप्रधानत्वं श्रुतिस्मृतिषु सम्मतम् ॥
तत्तच्छास्त्रेषु कालादेरपि प्राधान्यमीरितम् ॥ १०९४॥
कर्मकालेश्वरादीनां फलदानविवक्षया ॥
प्राधान्यं, वस्तुतः सर्वं सर्वत्रापि ह्यपेक्ष्यते ॥ १०९५ ॥
सत्यप्यृणित्वे देवाद्या नाज्ञानां कर्मणः फलम् ॥
प्रतिबध्नन्ति, वक्तव्यमनृणज्ञानिनां किमु ॥ १०९६ ॥
न चेहाविदुषोऽपि स्याद्दणित्वं हेत्वसम्भवात् ॥

विघ्नकरत्वमिति समाधत्ते *नैवमिति ॥ १०९२ ॥ ननु तेषामप्रतिबन्धकत्वे कारीर्याद्यनुष्ठानानन्तरमपि नियमेन फलोत्पत्तिः कुतो न स्यात्तत्राह *प्रतिबध्नन्तीति । यत्र फलप्रतिबन्धो दृश्यते तत्र पूर्वकृतप्रबलकर्मफलदानाय तदुपेक्षन्ते, न तु घ्नन्तीत्यर्थः ॥ १०९३ ॥ तस्मात्कर्मोत्पत्तिहेतूनां तेषां न तत्फलविघातकत्वमित्युपसंहरति *अत इति । कर्म हैवेत्यादिश्रुतयः । कर्मणा बध्यते जन्तुरित्याद्याः स्मृतयः । एवं कर्मणः प्रधानत्वे सिद्धे क्वचित्कालादेः प्राधान्यकथनं तेषामपि फलोत्पत्तौ सहकारित्वमस्तीत्येवम्परमित्याह *तत्तदिति सार्धेन । कर्मादीनां मध्ये एकैकस्य क्वचिद्यत्प्राधान्यमीरितं तत्सर्वं सर्वत्रापेक्ष्यत इत्येतावन्मात्रविवक्षयोक्तमिति योजना ॥१०९४॥१०९५॥ एवं सति विदुषां विद्याफले विघ्नाभावः कैमुतिकन्यायेन सिद्ध्यतीत्याह *सत्यपीति ॥ १०९६ ॥ वस्तुतस्त्वज्ञानामप्यृणित्वं नेत्याह *नचेति । हेत्वसम्भवः क-

न किञ्चिन्नः सुरैः प्रत्तमृणित्वं येन नो भवेत् ॥१०९७॥
शास्त्रादृणित्वमिति चेत्, न, शास्त्रस्यार्थवादतः ॥
अवदानविधेरर्थवादो ह्यृणिवचः श्रुतौ ॥ १०९८ ॥
पूर्वमप्यनृणः पश्चाद्देवानामन्तरात्मताम् ॥
गतो बोधादस्य देवाः कथं स्युः प्रतिबन्धकाः॥१०९९॥
इत्थं ये सर्वभावस्य वारकाश्चोद्यहेतवः ॥
उन्मूलितास्ते निर्विघ्नः सर्वभावो भवेत्ततः ॥११००॥
अत्र केचित्सर्वभावो जीवतो नेति मन्वते ॥
विद्यासन्तत्यभावाच्च रागादिप्रत्ययोत्थितेः ॥ ११०१ ॥
जीवतो यद्यविद्येयं निवर्तेत तदाऽऽनिशम् ॥

थमित्याशङ्क्य, किं देवादिभ्यो धनग्रहणान्मर्त्यानामृणित्वम् उत शास्त्रप्रामाण्यात्, नाद्य इत्याह*नेति । प्रत्तं दत्तम् ॥ १०९७ ॥ द्वितीयमनूद्य प्रत्याह *शास्त्रादिति । जायमानो वै ब्राह्मण इत्यादिशास्त्रादित्यर्थः । हृदयस्याग्रेऽवद्यतीत्याद्यवदानविधिशेषत्वेनास्य स्वार्थपरत्वाभावादिति भावः ॥ १०९८ ॥ ऋणवचसोऽतत्परत्वे फलितमाह *पूर्वमिति ॥ १०९९॥ उक्तार्थमनुवदन्फलवचनस्य निरवद्यतामाह *इत्थमिति ॥११००॥ फलवचनस्य परोक्तमर्थं दूषयितुं तन्मतमनुभाषते *अत्रेति । तत्र हेतुः *विद्येति । सन्तत्यभावे हेतुः *रागादीति । विमतो न निवृत्ताविद्यः रागादिमत्त्वादज्ञवदिति भावः ॥ ११०१ ॥ उक्तसाध्यानङ्गीकारे हेतूच्छित्तिर्बाधकस्तर्क *इत्याह *जीवत

---

* निवृत्ताविद्यत्वाभावरूपसाध्यस्यानङ्गीकारे हेतोः रागादिमत्त्वस्योच्छित्तिः अभावः बाधकस्तर्कः, यदि निवृत्ताविद्यः स्यात् तर्हि रागादिमान् न स्यात् इत्येवंरूपस्तर्कः निवृत्ताविद्यत्वाभाव—रागादिमत्त्वयोर्व्याप्तिसाधक इत्यर्थः ॥

विद्यां सन्तनुयात्तेन रागाद्यवसरो नहि ॥ ११०२ ॥
दृश्यन्त एवामरणं रागाद्या विदुषामपि ॥
अतोऽन्त्य एव बोधोऽयमविद्याविनिवर्त्तकः ॥११०३॥
नचानिवृत्ताविद्यस्य सर्वभावोऽस्ति जीवतः ॥
तस्मान्मरणकालीनाविद्यया सर्वतो भवेत् ॥ ११०४ ॥
मैवं, बोधः किमन्त्यत्वादविद्याया निवर्तकः ॥
ब्रह्मैकविषयत्वाद्वा किंवाऽन्त्यब्रह्मधीत्वतः ॥११०५॥
अनैकान्तिकमन्त्यत्वमज्ञानिमृतिबोधने ॥
ब्रह्मैकविषयत्वं च प्रथमे ब्रह्मबोधने ॥ ११०६ ॥
अन्त्यब्रह्ममतित्वस्य न दृष्टान्तोऽस्ति कश्चन ॥
केवलव्यतिरेकित्वं न, सपक्षस्य सत्त्वतः ॥ ११०७ ॥

इति ॥ ११०२ ॥ वाक्यजन्यधियोऽविद्यानिवर्तकत्वाभावे फलितमाह *अत इति । *अन्त्य एवेति । चरमकालीनसाक्षात्कार इत्यर्थः ॥ ११०३ ॥ नन्वेवमपि सर्वभावप्राप्त्यभावे किमायातं तत्राह *नचेति । तथात्वेऽश्रुतवेदान्तस्यापि तत्प्रसङ्गादिति भावः । पूर्वपक्षमुपसंहरति *तस्मादिति ॥११०४॥ विकल्पासहत्वान्नायं पक्षः साधुरिति दूषयति *मैवमिति । अज्ञस्य मरणकालीनज्ञानेऽन्त्यप्रत्ययत्वमस्ति, न तस्याविद्यानिवर्तकत्वमिति प्रथमहेतोस्तत्र व्यभिचार इत्यर्थः ॥ ११०५॥ द्वितीयहेतोरहं ब्रह्मेति प्राथमिकसाक्षात्कारे व्यभिचारमाह *ब्रह्मैकेति ॥ ११०६ ॥ तृतीयं निराह *अन्त्येति । तथाच पक्षमात्रवृत्तित्वादस्य हेतोरसाधारणानैकान्तिकतेति भावः ॥ सति सपक्षे पक्षमात्रवृत्तिरसाधारणः । अस्य हेतोः सपक्षाभावात्केवलव्यतिरेकित्वमाशङ्क्य सपक्षाभावोऽसिद्ध इत्याह *केवलेति ॥ ११०७ ॥ हेतोरनैकान्तिकत्वमुपसंहरति *अनध्यवसित

अविद्याघातिनी शुक्तिधीः सपक्षो भवेदिह ॥
अनध्यवसितो हेतुः सपक्षावर्त्तनाद्भवेत् ॥ ११०८ ॥
यद्येकैकोऽन्त्य आद्यो वा बोधोऽविद्यां न नाशयेत् ॥
विद्यासन्ततिरेवास्तु तर्ह्यविद्यानिवर्त्तिका ॥ ११०९ ॥
अविच्छिन्नैवामरणं सन्ततिः किं निवर्त्तिका ॥
विच्छिन्ना वा तत्र तावदविच्छिन्ना न सम्भवेत्॥१११०॥
सति भोजनसुप्त्यादावविच्छेदः कथं भवेत् ॥
भोजनादिनिरोधेऽपि धीग्लान्या नास्ति सन्ततिः॥११११
यदि विच्छिन्नसन्तानः स्यादविद्यानिवर्तकः ॥
तदा मरणकालीनः प्राचीनो वेति कथ्यताम् ॥१११२॥
मरणे तु न विश्वासो हिक्किकावशवर्त्तिनः ॥
ज्ञानसन्ततिनिष्पत्तौ तमोमात्रसमाप्तितः ॥ १११३ ॥
प्राचीनोऽप्येष सन्तानो निश्चितः किमियत्तया ॥
उतानिश्चित आद्ये तु नास्ति निश्चयकारणम्॥१११४॥

इति । अनैकान्तिक इत्यर्थः॥११०८॥उक्तविधयाऽन्त्यप्रत्ययस्य तमोनिवर्तकत्वाभावे ब्रह्मधीसन्ततिस्तन्निवर्त्तिकेति शङ्कते *यदीति । आद्यो वेति दृष्टान्तार्थमुक्तम् ॥ ११०९ ॥ अविद्यानिवर्त्तकत्वेनाभिमतां धीसन्ततिं विकल्प्य दूषयति *अविच्छिन्नेत्यादिना॥१११०॥११११॥सुप्तिभोजनातिरिक्तकालीना सन्ततिस्तमोनिवर्तिकेति द्वितीयमनूद्य विकल्पयति *यदीति॥१११२॥ आद्यं प्रत्याह *मरणेति । हिक्कादिमरणाव्यभिचारिचिह्नविशेषेण परवशस्य निबिडे तमोमात्रे मग्नत्वादात्मधीसन्तत्युत्पत्तौ न विश्वास इत्यर्थः ॥ १११३ ॥ द्वितीयं विकल्पयति *प्राचीन इति । प्रथमे दोषमाह *आद्य इति ॥ १११४॥ निश्चयहेत्वभावे

सन्तत्यारम्भकधियामियत्तानवधारणात् ॥
इयता मुक्तिरित्येव न स्याच्छास्त्रार्थनिर्णयः ॥१११५॥
अस्त्वनिश्चितसन्तानो मोक्षोऽप्यत्रास्त्वपाक्षिकः ॥
ततः कृत्वा कर्म कार्या कर्मच्छिद्रेण सन्ततिः॥१११६॥
इति मत्वा कुर्वते ये कर्मच्छिद्रेषु सन्ततिम् ॥
नूनं ते नासिकाग्रेण वीक्षन्ते सूर्यमण्डलम् ॥ १११७ ॥
वस्तुतन्त्रा तत्त्वविद्या नृतन्त्रा नैव तेन सा ॥
नृभिः कर्त्तुमकर्तुं वा स्वेच्छया नैव शक्यते ॥ १११८॥
यत एवमतो यो नः प्रत्यक्संमोहहानिकृत् ॥
आद्योऽन्त्यः सन्ततोऽन्यो वा स बोधः सर्वभावदः१११९
नचानिवर्त्तको बोधो मोहस्येत्यपि शङ्क्यताम् ॥

किं बाधकं तत्राह *सन्ततीति । एतावज्ज्ञानारब्धा सन्ततिरज्ञानध्वंसिनीति शास्त्रार्थानिर्णये शास्त्राप्रामाण्यापत्तिरित्यर्थः । ॥ १११५ ॥ द्वितीयमनुवदति *अस्त्विति । नच शास्त्रार्थानिर्णये तदप्रामाण्यापत्तिः, आत्मेत्येवोपासीतेतिश्रुत्या तद्धीसन्ततिमात्रसद्भावे ततो विद्याद्वाराऽविद्याध्वस्तिसम्भवादित्याह *मोक्ष इति । एवंच प्रत्यहं नित्यकर्म समाप्यान्तराले धीसन्ततिः कार्येत्याह *तत इति ॥ १११६ ॥ ज्ञानस्येच्छया कर्तुमशक्यत्वान्नेयं कल्पना शोभत इति दूषयति *इतीति ॥ १११७ ॥ ज्ञानस्यापुंतन्त्रत्वमेवोपपादयति *वस्तुतन्त्रेति ॥ १११८ ॥ यस्माद्धीसन्ततेर्नाविद्यानिवर्त्तकत्वं तस्मादप्रतिबन्धः प्रत्यक्तत्त्वसाक्षात्कार एवाविद्यानिवर्त्तनद्वारा सर्वभावाप्तिहेतुरित्युपसंहरति *यत इति ॥ १११९ ॥ ज्ञानस्यापि मोहानिवर्तकत्वं न सम्भवति तत्कार्यरागाद्यनुवृत्तिदर्श-

यतोऽनुभूयते मोहनिवृत्तिस्तत्त्ववेदिभिः ॥ ११२० ॥
विद्यासन्तत्यभावो यो जीवतः पूर्ववादिना ॥
प्रागुक्तस्तत्र सन्तानमात्रं तावदवारणम् ॥ ११२१ ॥
प्रमेयमानसम्बन्धे धारावाहिकसन्ततिः ॥
केन वारयितुं शक्या सर्वमेयेषु दर्शनात् ॥ ११२२ ॥
यावज्जीवमविच्छिन्ना सन्ततिश्चेन्न शक्यते ॥
मा शक्यतामविच्छिन्नसन्तत्या किं फलं तव ॥११२३॥
तादृक्सन्ततिहीनस्य पुनर्भ्रान्त्युदये सति ॥
रागद्वेषानिरोधेन न मुक्तिरिति चेच्छृणु ॥ ११२४ ॥
मुक्तिरायुःक्षयात्पूर्वं पश्चाद्वा तव सम्मता ॥
नाद्यः, प्रारब्धभोगस्य देवैरप्यनिवारणात् ॥ ११२५ ॥
पश्चात्तनी तु या मुक्तिः सा केनापि न वार्यते ॥
रागादिभिर्वार्यते सेत्येतत्स्याद्बालभाषितम् ॥११२६॥

नादिति चोद्यं विद्वदनुभवविरोधेन प्रत्याह *नचेति ॥११२०॥ यदुक्तं विद्यासन्तत्यभावान्नाविद्यानिवृत्तिरिति तदनुवदति *विद्येति । तत्र किं धीसन्ततिमात्रं नास्तीत्युच्यते उताविच्छिन्नसन्ततिः ? नाद्यः, तत्सामग्रीसद्भावादित्याह *तत्रेत्यादिना ॥ ११२१ ॥ ११२२ ॥ द्वितीयमनूद्य प्रत्याह *यावदिति ॥ ११२३ ॥ अविच्छिन्नसन्तत्यभावे बाधकं शङ्कते *तादृगिति ॥ ११२४ ॥ किं रागाद्यनिरोधे ज्ञानानन्तरमेव शरीरपातलक्षणा मुक्तिः प्रतिबध्यते उत प्रारब्धक्षयानन्तरमिति पृच्छति *मुक्तिरिति । आद्ये नानिष्टं किञ्चिदित्याह *नाद्य इति ॥११२५॥ द्वितीयं प्रत्याह *पश्चादिति । *बालेति । प्रारब्धनाशेन नष्टस्य रागादेरप्रतिबन्धकत्वादिति भावः ॥११२६॥

सञ्चितारब्धयोर्ज्ञानभोगाभ्यां कर्मणोः क्षये ॥
जन्महेतोरसद्भावान्मुक्तिरेवावशिष्यते ॥ ११२७ ॥
रागादिजन्येनागामिकर्मणा श्लिष्यते नहि ॥
प्रियाप्रिये ज्ञातयोऽस्य जगृहुः पुण्यपातके ॥ ११२८ ॥
ब्रह्मात्मबोधमात्रेण शास्त्रार्थस्य समाप्तितः ॥
रागादयः सन्तु कामं न तद्भावोऽपराध्यते ॥ ११२९ ॥
रागादिरोधाद्ये मुक्तिमाहुस्ते प्रलये कुतः ॥
न मुक्तास्तत्र रागादेर्निरोधोऽभूदशेषतः ॥ ११३० ॥

मुक्तिः केनापि न निवार्यत इत्युक्तमेव विशदयाति *साञ्चितेति ॥ ११२७ ॥ रागाद्यनिवृत्तौ तत्प्रयुक्तकर्मभिः पुनर्बन्धः स्यादित्याशङ्क्याश्लेषवचनान्नैवमित्याह *रागादीति । *आगामीति ॥ ज्ञानोत्तरभाविकर्मणेत्यर्थः ॥ तस्य पुत्रा दायमित्यादिश्रुतेश्च विदुषः कर्माश्लेष इत्याह *प्रियेति ॥ ११२८ ॥ एवं सत्यप्रतिबद्धसाक्षात्कारवतो रागाभासानुवृत्त्या न किञ्चिद् बाधकमित्याह *ब्रह्मेति । नचैतावता विदुषो यथेष्टचेष्टा, तत्प्रापककर्मारब्धे फलपर्यन्तज्ञानानुत्पत्तेः । न नियामकाभावः, यथेष्टचेष्टोपनायकाधर्मारब्धे देहे तथाविधचेष्टासंस्कारविशिष्टस्याशुद्धबुद्धेस्तद्विरुद्धज्ञानहेतुशमाद्युत्पत्त्यनुपपत्त्या तदयोगस्यैव नियामकत्वात् । श्रुतिस्मृत्युपदर्शितविद्वल्लक्षणस्य यथेष्टचेष्टाप्रतिस्पर्द्धित्वात् । ज्ञानादूर्ध्वं तत्प्रापकस्य दुर्वचनत्वात् । यथेष्टचेष्टया तद्धेत्वारब्धकर्मकल्पने तद्वतोऽप्रतिबद्धसाक्षात्कारवत्त्वस्यासम्मतत्वात् पापाश्लेषवाक्यस्याज्ञानकृतहिंसादिजन्यपापविषयत्वेनोपपत्तिरिति दिक् ॥ ११२९ ॥ रागादिनिरोधो मुक्तिहेतुरिति केचित् । तत्र तन्निरोधमात्रं हेतुरुत ब्रह्मबो-

तावानपि न पर्याप्तो निरोधो मुक्तये, कथम् ॥
अल्पीयोऽहःसमभ्यस्तो निरोधोऽलं विमुक्तये॥११३१॥
बोधाभावादमुक्तिश्चेत्प्रलये तर्हि बोधतः ॥
मुक्तिरित्येव वक्तव्यं कोऽर्थो रागादिरोधतः॥११३२॥
रागादिष्वनिरुद्धेषु बोध एव न सम्भवेत् ॥
यदि तर्हि निरुध्यन्तामाबोधं ते बुभुत्सुभिः॥ ११३३ ॥
पश्चात्तु यदि बोधेन बाध्यन्तेऽस्तु तथैव तत् ॥
अथारब्धेन जन्येरन्जन्यन्तां भोगसिद्धये ॥ ११३४ ॥
निरोद्धुं नहि शक्यन्ते रागाद्या भोगहेतवः ॥
बुभुत्सुबुद्धमूढानां मध्ये केनापि धीमता ॥ ११३५ ॥
अभोगहेतवो ये स्युरविचारैकनिर्मिताः ॥
ते तु बुद्धबुभुत्सुभ्यां निरुध्यन्ते विचारतः ॥ ११३६ ॥
ये भोगहेतवस्तेऽपि प्रबुद्धे भ्रष्टबीजवत् ॥

धोऽपीति विकल्पाद्यमनूद्य प्रत्याह *रागादीत्यादिना ॥ ११३० ॥ ११३१ ॥ द्वितीयमनुभाष्य दूषयति *बोधाभावादिति । आवश्यकबोधादेव मुक्तिसम्भवे रागादिनिरोधस्यापि तद्धेतुत्वकल्पने मानाभावादिति भावः ॥ ११३२ ॥ बोधोत्पत्तिपर्यन्तं तद्धेतुत्वेन रागादिनिरोधमङ्गीकरोति *यदीति । ते रागादयः ॥ ११३३ ॥ बुद्धस्यापि बोधबाधितत्वान्न रागाद्युत्पत्तिरित्याशङ्क्य तदप्यङ्गीकरोति *पश्चादिति। किमर्थं तर्हि "रागादयः सन्तु कामम्" इति तदङ्गीकारस्तत्राह *अथेति ॥ ११३४ ॥ ११३५ ॥ प्रबलारब्धकर्मप्रापितरागादेर्दुर्निरोधत्वेऽप्यविवेकप्रापिताः विवेकिभिः निरोद्धुं शक्या इत्याह *अभोगेति ॥ ११३६ ॥ प्रारब्धप्रापितरागाद्याश्च विदुषि दग्धबीजत्वादविद्यमानसमा एवेति शङ्कते *य इति ।

दृश्यन्ते बोधदग्धाश्चेन्नीरागादिः सुखी भवेत् ॥११३७॥
आगमाद्वेद चेद्ब्रह्म ब्रह्मैव भवति स्वयम् ॥
फलावस्थस्य च सतः कोऽतो रागादिसम्प्लुतिः॥११३८॥
ज्ञाततत्त्वस्य न पुनर्भ्रान्त्युत्पत्तिरहेतुतः ॥
विशेषाज्ञानजा भ्रान्तिर्विशेषज्ञानिनः कुतः ॥११३९॥
यः सामान्यग्रहो यच्च विशेषाग्रहणं तथा ॥
आरोप्यस्यैव संस्कारस्तत्त्रयं भ्रान्तिकारणम् ॥११४०॥
चिदात्मत्वं तु सामान्यं विशेषो ब्रह्मरूपता ॥
भवेदारोप्यसंस्कारो ह्यनादिर्द्वैतवासना ॥ ११४१ ॥
तत्र ब्रह्मात्मविज्ञाने निर्हेतुर्विभ्रमः कथम् ॥
उदेति, द्वैतधीस्तेषां बाधितैवानुवर्त्तते ॥ ११४२ ॥

इष्टापत्तिमाह *नीरागादिरिति । अयं भावः—बोधोत्पत्त्यनन्तरं रागादि न सम्भवतीति वदन्तं प्रति जीवन्मुक्तिप्रतिपादकशास्त्रान्यथानुपपत्त्या विदुषोऽपि रागानिवृत्तिरस्तीत्येतावत्साधितं, तद्रागस्य गात्रयात्रामात्रनिमित्तप्रवृत्तिहेतुत्वेऽपि निषिद्धप्रवृत्तिजननासमर्थत्वादाभासत्वमिष्टमेवेति ॥ ११३७ ॥ प्रारब्धप्रापितस्यापि विद्वद्रागादेराभासत्वे युक्तिमाह *आगमादिति । ब्रह्मास्मीति ज्ञानाद्ब्रह्मीभूतस्य रागाद्यसंसर्गान्न तस्य यथापूर्वं प्रवृत्तिजनकत्वमित्यर्थः॥११३८॥यदुक्तं रागाद्यनुवृत्तौ भ्रमोऽपि पुनर्भवेदिति तत्राह *ज्ञातेति । अहेतुत्वं विवृणोति *विशेषेति॥११३९॥न केवलं विशेषाज्ञानाभावः किन्तु हेत्वन्तरमपि नेति वक्तुं सर्वसम्मतां भ्रमसामग्रीं दर्शयति *य इति ॥११४०॥ ब्रह्मणि प्रपञ्चारोपेऽप्युक्तहेतुत्रयसद्भावमाह *चिदिति॥११४१॥ ज्ञाततत्त्वस्य हेतुनिवृत्त्या द्वैतभ्रमानुत्पत्तेर्न यथापूर्वं तदनुवृत्तिरित्याह *तत्रेति ॥ ११४२ ॥ द्वैतानुवृत्तौ विदुषः सर्वभावाप्तिः

तयाऽनुवृत्त्याऽऽरब्धस्य शेषोऽप्यत्रोपभुज्यते ॥
विद्यया सर्वभावश्च भुञ्जानेनानुभूयते ॥ ११४३ ॥
देहादिरेव भोगस्य हेतुर्न त्वस्य वस्तुता ॥
अनृतेनापि भोगोऽस्ति स्वप्ने देहादिना यतः ॥ ११४४ ॥
वस्तुत्वमेव विद्येयं बाधते नानृतात्मताम् ॥
नादर्शस्थमुखं बाध्यं स्वमुखैकत्वविद्यया ॥ ११४५ ॥
वास्तवांशस्य दग्धत्वात्प्रतीत्या भोगसम्भवात् ॥
जीवन्मुक्तिकथा प्रोक्ता प्रारब्धान्तमनिन्दिता ॥ ११४६ ॥
तस्मान्न जीवतः सर्वभावः क्वापि विरुध्यते ॥
अहं ब्रह्मेति यो वेत्ति सद्यः सर्वं भवत्यसौ ॥ ११४७ ॥
आत्मेत्येवेति विद्यायाः सूत्रं यत्सूत्रितं पुरा ॥
तद्व्याख्यानमिदं श्रुत्या सङ्क्षेपेण समापितम् ॥ ११४८ ॥
इत्थमादेयविद्यायाः सूत्रवृत्ती उदाहृते ॥
हेयाविद्यां स्वकार्येण युक्तां सूत्रयति श्रुतिः ॥ ११४९ ॥
श्रुतिः—अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद ॥

कथं स्यादित्याशङ्क्य सर्वत्वविरोधिद्वैतसत्यत्वांशस्य विद्यया बाधितत्वादसत्यत्वांशानुवृत्तिमात्रेण प्रारब्धभोगसम्भवान्न विरोध इत्याह *तयाऽनुवृत्त्येति ॥ ११४३ ॥ उक्तमर्थं सदृष्टान्तमुपपादयति *देहादिरिति ॥ ११४४ ॥ ११४५ ॥ ११४६ ॥ परमतनिराकरणमुपसंहरति *तस्मादिति ॥ ११४७ ॥ तदाहुरित्यादिश्रुतितात्पर्यं निगमयति *आत्मेति ॥ ११४८ ॥ वृत्तानुद्रवणपुरःसरम् अथ योऽन्यामित्याद्यविद्यासूत्रमवतारयति *इत्थमिति ॥ ११४९ ॥ अथशब्दस्य विद्यासूत्रानन्तर्यं स्पष्टं मत्वा

वार्त्ति० स्वस्मादन्यां देवतां य उपास्ते स्वं न वेद सः ॥
इति सूत्रमविद्यायाः सकार्यायाः श्रुतीरितम् ॥११५०॥
स्वब्रह्मत्वापरिज्ञानमविद्याऽनर्थकारिणी ॥
अन्योपास्त्या पारतन्त्र्यमिहानर्थ इतीर्यते ॥ ११५१ ॥
नन्वव्याकृतमज्ञानं व्याकृतं कार्यमीरितम् ॥
तदेव द्वयमत्रापि भूयः कस्मादुदीर्यते ॥ ११५२ ॥
शृणु विद्याफले पुंसां विसंवादभ्रमोदयम् ॥
विनिवारयितुं बोधविनिवर्त्यं विविच्यते ॥ ११५३ ॥
अध्यात्ममधिदैवं च जीवत्वेशत्वकल्पिका ॥
द्विधा शक्तिरविद्याया द्वैविध्यं तद्विविच्यते ॥११५४॥
स्वाश्रयं मोहयेद्या ऽसौ शक्तिर्जीवत्वकल्पिका ॥
साऽस्य ब्रह्मत्वमावृत्य जनयेज्जीवताभ्रमम् ॥ ११५५ ॥
जीवोऽहमिति मूढोऽन्यामुपास्ते देवतामयम् ॥

ऽवशिष्टाक्षराणि योजयति *स्वस्मादिति । स्वम्—आत्मतत्त्वम् ॥ ११५० ॥ अविद्याया उक्तहेयत्वसिद्धये तत्स्वरूपकथनपूर्वकं तत्कार्यं प्रकटयति *स्वेति । स्वस्य ब्रह्मत्वाज्ञानमेवाविद्या सा चानर्थहेतुस्तत्कृतानर्थश्च पारतन्त्र्यमेवेत्यर्थः । ॥ ११५१ ॥ तद्वेदं तर्हीत्यादिवाक्येनाविद्यासूत्रस्य पौनरुक्त्यमाशङ्क्य परिहरति *नन्वित्यादिना ॥ ११५२ ॥ *विसंवादेति । अव्याकृतशब्दितमायातत्कार्ययोर्ब्रह्मबोधानन्तरमप्यनुवृत्त्या तयोरनिवर्त्यत्वेन वैयर्थ्यशङ्कायां बोधनिवर्त्यस्वरूपविवेचनेनेदं वाक्यमर्थवदित्यर्थः ॥ ११५३ ॥ निवर्त्यस्वरूपं विवेचयितुं शक्तिद्वैविध्यमाह *अध्यात्ममिति ॥ ११५४ ॥ तत्र तावज्जीवत्वापादकशक्तिं तत्कार्यं च दर्शयन्विद्यया तान्नि-

सेयं मोहकरी शक्तिर्विद्ययैव निवर्त्तते ॥ ११५६ ॥
न मोहयति या शक्तिः स्वाश्रयं साधिदैविकी ॥
आविर्भावतिरोभावौ व्याकृताव्याकृताभिधौ ॥ ११५७॥
प्रतिभासत एवैषा विदुषोऽप्यत्र जीवतः ॥
तस्याः प्रारब्धभोगान्ते प्रतिभासो निवर्त्तते ॥११५८॥
तामाधिदैविकीं शक्तिमाहुर्मायेति केचन ॥
आध्यात्मिकीं मोहकरीमविद्येति प्रचक्षते ॥ ११५९ ॥

वृत्तिमाह *स्वाश्रयमित्यादिना ॥ ११५५ ॥ ११५६ ॥ ईशत्वापादिकां शक्तिमाह *नेति । पूर्वोक्ताव्याकृतेनैव प्रपञ्चोत्पत्त्युपपत्तेः किमाधिदैविकशक्तिकल्पनयेत्याशङ्क्यास्या एव सृष्टिप्रलययोर्व्याकृताव्याकृताभिधत्वान्नातिरिक्तं किञ्चित्कल्प्यत इत्याह *आविर्भावेति ॥ ११५७ ॥ अस्याः शक्तेर्ब्रह्मधीनिवर्त्यत्वाभावाद्विदुषोऽप्येतद्भानमविरुद्धमित्याह *प्रतीति । तद्भानावधिमाह *तस्या इति । अयं भावः—मूलप्रकृतिरेव विक्षेपशक्तिप्राधान्यादाधिदैविकशक्तिर्मायेति चाभिधीयते, सैवावरणशक्तिप्राधान्यादध्यात्मशक्तिरविद्येति च कथ्यते। आवरणशक्तयश्च प्रतिजीवं भिन्नाः, तथाच एकस्मिञ्जीवे विद्योत्पत्तौ तदावरणनिवृत्त्या तत्र प्रकृतौ जीवत्वापादकाविद्यात्वनिवृत्तावपि जीवान्तरसंसारहेतुमायास्वरूपं न निवर्त्तते, तत्प्रारब्धप्रतिबद्धत्वात्। तथापि विदुषो देहपातानन्तरमसङ्गशुद्धचैतन्येनैकीभूतस्य सम्बन्धाभावान्न मायातत्कार्यप्रतिभास इति॥११५८॥ एकदेशिनस्तु–मायाऽविद्ययोरात्यन्तिकभेदमाहुः, तन्मतमनुवदति *तामिति ॥११५९॥ "माया चाविद्या च स्वयमेव भवति"

अविद्यामाययोर्भेदमात्यन्तिकमपाकरोत् ॥
यत्नाद्विवरणाचार्य ऊचे त्वाकारभिन्नताम् ॥ ११६० ॥
सृष्टिप्रकरणे तत्र मायाकारः पुरोदितः ॥
अव्याकृतगिरा तस्य कार्यं व्याकृतमीरितम् ॥११६१॥
कर्मप्रकरणे त्वस्मिन्नविद्याकार ईर्यते ॥
स्वस्माद्भिन्ना देवतेति धीरविद्याविजृम्भिता ॥११६२॥
श्रुतिः—यथा पशुरेवं स देवानां, यथा ह वै बहवः प-

"मायैवाज्ञानशब्देन पठ्यते मुनिसत्तम" इत्यादिश्रुतिस्मृतिविरोधात्, मायाऽविद्याभेदव्यवहारस्योक्तविधयाऽऽकारभेदमात्रेणाप्युपपत्तेर्न तयोरात्यन्तिकभेद इति श्रीप्रकाशात्मचरणैरेव तन्मतस्य निराकृतत्वान्नास्माभिरत्र यत्यत इत्याह *अविद्येति ॥ ११६० ॥ एवं प्रकृतेर्द्वैविध्यमुपपाद्य पौनरुक्त्यं परिहर्तुमव्याकृतवाक्योक्तमर्थमनुवदति *सृष्टीति ॥ ११६१ ॥ अविद्यासूत्रार्थमाह *कर्मेति । तथा चानेन वाक्येन ज्ञानानिवर्त्याज्ञानशब्दिताविद्यात्वांशनिरूपणान्न पौनरुक्त्यमिति भावः । अस्मिन्वाक्ये न स वेदेत्यनेनाविद्यात्वांशः कथितः, अवशिष्टेन तत्कार्यमिति विवेकः ॥ ११६२ ॥

यथा पशुरित्यादिश्रुतेरयमर्थः—यथा गवादि वहनदोहनाद्युपकारैरुपभुज्यते एवमविद्वानिज्याद्यनेकोपकारैरुपभोग्यत्वाद्देवानां पशुतुल्य इत्यर्थः । उक्तमेव व्यनक्ति *यथा ह वा इति । यथा लोके बहवो गवादयो मनुष्यमात्मनोऽधिष्ठातारं भुञ्ज्युः पालयेयुरेवं पशुस्थानीय एकैकोऽविद्वान् देवानिति पित्राद्युपलक्षणार्थं स्तुतिनमस्कारेज्यादिना भुनक्ति पालयति ।

शवो मनुष्यं भुज्युरेवमेकैकः पुरुषो देवान्भुनक्ति ॥
वार्त्ति० ॥ स्वस्य तत्त्वमविज्ञाय यागदानादिकर्मभिः ॥
स्वतोऽन्यदेवताः पाति ह्यनड्वान्वणिजं यथा ॥११६३॥
श्रुतिः ॥ एकस्मिन्नेव पशावादीयमाने ऽप्रियं भवति
किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः॥१०॥
वार्त्ति०अपि भूरिपशोः पुंस एकस्मिन्नपि तस्करैः ॥
ह्रियमाणे पशोर्दुःखं किमु सर्वापहारतः ॥ ११६४ ॥
सर्वस्वतुल्ये नृपशौ ब्रह्मधीपरिमोषिणा ॥
ह्रियमाणे महद्दुःखं स्यात्सर्वेषां दिवौकसाम्॥११६५॥
तस्मादेषां तन्न प्रियं यन्मनुष्या विजानते ॥
ब्रह्मात्मत्वमतो देवाः प्रतिबध्नन्ति बोधजम् ॥ ११६६॥
प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः ॥
संन्यासिनोऽपि दृश्यन्ते देवसंदूषिताशयाः ॥ ११६७ ॥
मुमुक्षुः कर्मभिर्देवानाराध्यैषामनुग्रहात् ॥

एतत्सर्वमभिप्रेत्याह *स्वस्येति । स्वतः स्वस्मात्॥११६३॥ एकस्मिन्नित्यादिवाक्यं व्याचष्टे *अपीति ॥ ११६४ ॥ तस्मादेषामित्यादेरर्थमाह *सर्वस्वेत्यादिना । परिमोषिणा तस्करेण। ब्रह्मज्ञाने जाते कर्माधिकारहेत्वभिमानस्य प्रत्यङ्मात्रत्वेनावसानात्परिमोषित्वं ब्रह्मधियः स्फुटमित्यर्थः ॥ ११६५ ॥ देवानामप्रीतौ को दोषस्तत्राह *ब्रह्मेति ॥ ११६६ ॥ तत्र लिङ्गमाह *प्रमादिन इति । श्रवणादिषु मनःसमाधानवैधुर्यं प्रमादः, स च चेतसो बाह्यार्थप्रावण्ये हेतुस्तच्च परोत्कर्षासहिष्णुत्वे कारणं, तच्च कलहकुतूहलित्वे निदानं, प्रमादे च हेतुर्देवादिभिरनाराधितैरवज्ञातैर्दूषितत्वमिति विभागः ॥ ११६७ ॥

अन्तःस्थितो वेत्ति चेत्स्वं पारतन्त्र्यान्निवर्तते ॥११६८॥
यो देवपारतन्त्र्यस्य हेतुर्मोहश्चिदात्मनः ॥
ब्रह्मत्वबुध्या हेयो ऽसावित्येतदिह वर्ण्यते ॥ ११६९ ॥
प्रामाण्यं कर्मकाण्डस्य देवानां प्रभुता तथा ॥
पशुकल्पेषु मूढेषु भवेन्न तु विवेकिनि ॥ ११७० ॥
इत्थमाध्यात्मिकाज्ञानं कर्माधिकृतिकारणम् ॥
बोधहेयं जगद्धेतोरव्यक्तात्प्रविवेचितम् ॥ ११७१ ॥
नन्वब्रह्मत्वधीर्यद्वदहं ब्रह्मेति बोधतः ॥
निवर्तते, तथा द्वैतधीरप्यद्वैतबोधतः ॥ ११७२ ॥
ततश्च जीवतो बोधहेयं किञ्चिदथेतरत् ॥
भुक्तभोगस्य देहान्ते नश्यतीत्यसदीरितम् ॥ ११७३ ॥
नैषदोषो यतो बोधः कृत्स्नाज्ञानं दहन्नपि ॥

देवादीनां मनुष्येषु ब्रह्मज्ञानस्याप्रियत्वे तन्मुमुक्षा विफलेत्याशङ्क्य देवाप्रियवाक्येन ध्वनितं दर्शयति *मुमुक्षुरिति । चित्तशुद्धिपर्यन्तं देवादीन् स्वकर्मभिराराध्यान्तर्मुखो भूत्वा स्वस्वरूपं पश्यतः फलमाह *पारतन्त्र्यादिति ॥ ११६८ ॥ देवादिपशुत्वेनाज्ञनिन्दावचनस्य तात्पर्यमाह *य इत्यादिना ॥११६९॥ ॥११७०॥ अविद्यासूत्रार्थमुपसंहरति *इत्थमिति ॥ ११७१ ॥ उक्तमेवार्थं द्रढयितुमाक्षिपति *नन्विति । अद्वितीयब्रह्मज्ञानादब्रह्मत्ववत्सर्वद्वैतमपि बाध्येत विरोधित्वाविशेषादित्यर्थः ॥ ११७२ ॥ अस्तु ते किमायातं तत्राह *ततश्चेति । सर्वद्वैतनिवृत्त्युपगमेऽविद्यात्वांशो बोधनिवर्त्यः, मायाकार्यं तु यावत्प्रारब्धं प्रतिभासत इति त्वदुक्तमनुपपन्नमित्यर्थः ॥ ११७३ ॥ अद्वैतब्रह्मज्ञानं विरोधित्वाविशेषेऽप्यब्रह्मत्वमेव दहति न प्रार-

न दहेद्भोगहेतुत्वमारब्धप्रतिबन्धतः ॥ ११७४ ॥
मण्यादयो यथा वह्नेः प्रतिबध्नन्ति दग्धृताम् ॥
न तु प्रकाशसामर्थ्यं तथांशप्रतिबन्धनम् ॥ ११७५ ॥
भोगोपयुक्तं देहादि यावत्तावन्न बाध्यते ॥
विद्ययाऽनुपयुक्तस्तु बाध्यते जीवताभ्रमः ॥ ११७६ ॥
ननु देहाभिमानेन विना भोगो न दृश्यते ॥
सुप्तौ, तेनात्र भोगाय जीवभ्रान्तिरपेक्षिता ॥११७७॥
मैवं, देहाभिमानस्य जीवभ्रान्तेः पृथक्त्वतः ॥
कर्मजन्योऽभिमानः स्याद् भ्रान्तिस्त्वज्ञानमात्रजा ११७८
कर्मक्षयेऽभिमानोऽयं सुषुप्तौ प्रविलीयते ॥
पुनः कर्मोद्भवे सोऽयमुदेत्येव हि जागरे ॥ ११७९ ॥
लिङ्गदेहस्थूलदेहसम्बन्धो लिङ्गकर्मजः ॥
कर्माभावाद्ब्रह्मणस्तु जीवता नैव कर्मजा ॥ ११८० ॥

ब्धभोगसाधनं द्वैतं तेनैव प्रतिबद्धत्वादिति परिहरति *नेति। दहन्नपि दग्धुं समर्थोऽपीत्यर्थः ॥ ११७४ ॥ उक्तमर्थं दृष्टान्तपूर्वकमुपपादयति *मणीत्यादिना ॥११७५॥११७६॥ जीवत्वभ्रमस्य भोगानुपयुक्तत्वमसिद्धमिति शङ्कते *नन्विति ॥११७७॥ आरब्धभोगहेतुदेहाभिमाने सत्यप्यविद्याप्रयुक्तजीवत्वभ्रमनिवृत्तौ न किञ्चिद्बाधकं तयोरैक्यासिद्धेरिति परिहरति *मैवमिति ॥ ११७८ ॥ अभिमानस्य कर्मजन्यत्वमुपपादयति *कर्मेति ॥ ११७९ ॥ एवं जीवस्य देहद्वयाभिमानः कर्मजन्यो, ब्रह्मणि जीवत्वारोपो न कर्मजन्य इत्याह *लिङ्गेति । *लिङ्गकर्मज इति । लिङ्गोपहितात्मककर्मजन्य इत्यर्थः ॥ ११८० ॥ ननु किमिदं जीवत्वं को

लिङ्गदेहस्य सान्निध्यादविवेकेन जीवता ॥
प्राणधारणरूपैषा भ्रमाद्ब्रह्माणि कल्पिता ॥ ११८१ ॥
अविवेककृतं यत्तद्विवेकेन विलीयते ॥
कर्मोपादितसम्बन्धो लीनः स्यात्कर्मणः क्षये ॥११८२॥
अज्ञानजत्वात्कर्मापि बाध्यं यद्यपि विद्यया ॥
तथाऽप्यतीतकर्मैतद्बाध्यते विद्यया कथम् ॥ ११८३ ॥
फलं नारभते यावत्तावत्कर्म स्वरूपतः ॥
वर्तते, फलमुत्पाद्य निवर्त्तेतैव बीजवत् ॥ ११८४ ॥
यथोत्पाद्याङ्कुरं बीजं जहात्येव हि बीजताम् ॥
सोऽङ्कुरो वृक्षरूपेण वर्द्धते न विनश्यति ॥ ११८५ ॥
तथा देहादिमुत्पाद्य युक्तं कतिपयायुषा ॥
कर्म त्यजति कर्मत्वं देहादिरनुवर्त्तते ॥ ११८६ ॥
मुक्तो बाणो यथा वेगक्षये पतति नान्यथा ॥
असौ देहस्तथैवायुःक्षये शाम्यति नान्यथा ॥ ११८७ ॥

वा ब्रह्मणि तदारोपहेतुस्तत्राह *लिङ्गेति ॥ भ्रमशब्दस्तद्धेत्वनादिवासनावचनः ॥ ११८१ ॥ एवं जीवत्वदेहाभिमानयोर्भेदे सिद्धे फलितमाह *अविवेकेति ॥ ११८२ ॥ अज्ञाननिवृत्तौ तत्कार्यकर्मणः स्थित्ययोगात्कथं तदधीनदेहाभिमानानुवृत्तिरिति शङ्कते *अज्ञानेति । प्रारब्धकर्मणो ज्ञानोत्पत्तिकालेऽभावान्न तन्निवर्त्यत्वमिति परिहरति *तथाऽपीति ॥ ११८३ ॥ कर्मणोऽतीतत्वमुपपादयति *फलमिति ॥ ११८४ ॥ बीजदृष्टान्तं विवृणोति *यथेति । कतिपयायुषा युक्तं देहादिकमित्यन्वयः ॥ ११८५ ॥ ११८६ ॥ कथं तर्हि देहनाश इत्याशङ्क्य सदृष्टान्तमाह *मुक्त इति । असौ देहः, इदं प्रारब्धशरीरम् ॥ ११८७ ॥

यावदायुस्तावदेष भुङ्क्ते भ्रमविवर्जितः ॥
अन्तरेणापि जीवत्वभ्रमं भोगोऽत्र सम्भवेत् ॥११८८॥
सुखदुःखविकाराढ्यधियः साक्ष्यवभासता ॥
भोगः प्रोक्तः, स भोगश्च समानो मूढबुद्धयोः ॥११८९॥
भोक्तृत्वमपि कर्तृत्वं चिदाभासगतं चिति ॥
मूढ आरोपयेद् बुद्धो नेति वैषम्यमेतयोः ॥ ११९० ॥
इत्युक्तयुक्तितस्तस्य तावदेव चिरं त्विति ॥
श्रुतेर्ज्ञान्यनुभूतेश्च भोगो बाध्यो न बोधतः ॥ ११९१ ॥
कर्माधिकारिजीवस्य भ्रान्तिकृद्यदवेदनम् ॥
तद्बोधबाध्यं तद्बाधे याति देवाद्यधीनता ॥ ११९२ ॥
ननु बोधात्पुराऽप्यात्मा न देवादिवशं गतः ॥
देहादि तूर्ध्वमप्यस्ति यद्देवादिवशानुगम् ॥ ११९३ ॥

जीवत्वभ्रमशून्यस्यापि भोगसम्भवमुक्तं निगमयति *यावदिति ॥ ११८८ ॥ भोगस्वरूपपर्यालोचनयाऽपि विदुषस्तत्सम्भवमाह *सुखेति ॥ ११८९ ॥ कस्तर्हि मूढाद् बुद्धस्य विशेषस्तत्राह *भोक्तृत्वमिति ॥ ११९० ॥ विदुषो यावत्प्रारब्धभोगोऽस्ति इत्यत्र युक्त्यनुग्राह्यं मानमाह *इतीति॥११९१ ॥ एवं सति ब्रह्मज्ञानं भोगानुपयुक्तकर्तृत्वादिभ्रान्तितत्साधनमात्रं बाधत इत्युक्तमित्याह *कर्मेति । कर्तृत्वादिभ्रमनिवृत्तेः फलमाह *यातीति । निवर्त्तत इत्यर्थः ॥११९२॥ विदुषो देवादिपारतन्त्र्यं नेत्युक्तमयुक्तं विद्वत्पदाभिधेयदेहद्वयस्य देवाद्यधीनत्वादात्मनस्तदभिधेयत्वे तस्य सर्वदा स्वतन्त्रत्वादिति शङ्कते *नन्वित्यादिना ॥ ११९३ ॥ विदुषो ब्रह्मीभूतस्य भाविजन्माभावनिश्चयान्न कर्मणि प्रवृत्तिः, मूढस्तु वस्तुतः स्वतन्त्रोऽप्यात्मनि

तथाच सत्यबुद्धस्य कर्मित्वं न विवेकिनः ॥
इति व्यवस्थापयितुं न शक्यमिति चेत्, न तत् ॥११९४॥
मुक्तोऽहमात्मा देहादिरारब्धान्ते विलीयते ॥
भाविजन्म न कस्यापीत्येवं ज्ञाने कुतः क्रिया ॥११९५॥
अवाप्स्याम्युत्तमं देहमित्यध्यस्यात्ममोहतः ॥
तद्देहसाधने पुण्ये यथाशास्त्रं प्रवर्त्तते ॥ ११९६ ॥
अतः कर्मप्रकरणे कर्महेतुमवेदनम् ॥
सूत्रयित्वाऽथ तत्कार्यं पारतन्त्र्यादि वर्ण्यते ॥ ११९७॥
स्पष्टीकृतं पारतन्त्र्यं पशुदृष्टान्ततो नृणाम्—॥
श्रुतिः ॥ ब्रह्म वा इदमग्र आसीदेकमेव तदेकꣳ सन्न व्यभवत् तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि देव-

---

पारतन्त्र्यपारोप्योत्तमजन्मप्रेप्सया कर्म करोतीत्युक्तव्यवस्था सम्भवतीति समाधत्ते *न तदित्यादिना ॥ ११९४ ॥११९५॥ ॥ ११९६ ॥ तस्मादविद्यासूत्रार्थः पूर्वोक्तो निरवद्य इत्युपसंहरति *अत इति ॥ ११९७॥ कस्मिन्वाक्ये पारतन्त्र्यवर्णनमिति तत्राह *स्पष्टीकृतमिति— ।

ब्रह्म वा इदमित्यादिश्रुतेरयमर्थः—योऽन्यां देवतामित्यादिना सह कार्येणाविद्या सूत्रिता तामेव प्रपञ्चयिष्यन्नव्यवहितोक्तकर्माधिकारिसिद्धये अविद्याविवर्तचातुर्वर्ण्यसृष्टिं तावदाह । अत्र यद्यपि अथेत्यभ्यमन्थदित्यत्र प्रजापतिसृष्टिपरिपूर्तये सकलदेवसर्गोपलक्षणत्वेन प्रधानभूताग्निसृष्टेरुक्तत्वान्न पुनरिन्द्रादिसर्गो वक्तव्यस्तथापि तस्याप्यविद्यात्वसिद्ध्यर्थं पुनर्वचनमिति ध्येयम्। ब्रह्म वा इदमग्र आसीद् यदग्निं सृष्ट्वाऽग्निरूपापन्नं ब्राह्मणजात्यभिमानवद् ब्रह्मेत्युच्यते । अग्नेरपि देव-

त्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात्क्षत्रात्परं नास्ति, तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये, क्षत्र एव तद्यशो दधाति, सैषा क्षत्रस्य योनिर्यद् ब्रह्म । तस्माद्यद्यपि

ब्राह्मणत्वादिदं क्षात्रियादिजातमग्रे क्षत्रादिसृष्टेः पूर्वं ब्रह्ममात्रं संवृत्तमित्यर्थः । एकमेव–क्षत्रादिभेदो नास्तीति । तद्ब्रह्म एकं क्षत्रादिपरिपालयितृशून्यं सन्न व्यभवत् कर्मणे नालमासीत्, चातुर्वर्ण्यसाध्यत्वात्कर्मण इति भावः। तद्ब्रह्म आत्मनः कर्मकर्तृत्वविभूत्यै श्रेयोरूपं प्रशस्तरूपं क्षत्रं क्षत्रियजातिमतिशयेनासृजत सृष्टवत् । तामेव व्यक्तिभेदेन प्रदर्शयति–यान्येतानि प्रसिद्धानि लोके देवत्रा देवेषु क्षत्राणि । तत्राप्यभिषिक्तान्विशेषतो निर्दिशति *इन्द्र इत्यादिना ॥ इन्द्रो देवानां राजा, वरुणो यादसां, सोमो ब्राह्मणानां, रुद्रः पशूनां, पर्जन्यो विद्युदादीनां, यमः पितॄणां मृत्युरोगादीनाम्, ईशानो भासामित्येवमादीनि देवक्षत्राणि सृष्ट्वाऽनन्तरं मनुष्यक्षत्राणि पुरूरवः प्रभृतीनि सृष्टवदेवेति द्रष्टव्यानि। तदर्थ एव देवक्षत्रसर्गः प्रस्तुतः। यस्मादातिशयेन सृष्टं क्षत्रं तस्मात् तस्मात्परं नास्ति, ब्राह्मणजातेरपि नियन्तृत्वादिति भावः ॥ क्षत्रस्योत्कर्षे हेत्वन्तरमाह *तस्मादिति । राजसूयाभिषिक्तेन मश्चिकायां स्थितेन राज्ञा ब्रह्मन्नित्यामन्त्रित ऋत्विक् तं प्रतिवदति त्वं राजन्ब्रह्मासीति, तदेतदाह *क्षत्र एव तदिति । तद् ब्राह्मण्याख्यं यशः क्षत्रिये स्थापयतीत्यर्थः ॥ एवं ब्राह्मणस्य क्षत्रं प्रति नीचत्वोपगमेऽपि एषा प्रकृता यद्ब्रह्म ब्राह्मणजातिः सा क्षत्रस्य योनिरेव, पुरोहितं विना क्षत्रासम्भवादिति भावः । त-

राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ११ ॥ स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥ १२ ॥ स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किञ्च ॥ १३ ॥ स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्ति।

स्मात् क्षत्रस्य ब्राह्मणाधीनत्वाद्यद्यपि राजा परमतां राजसूयाभिषिक्तगुणं प्राप्नोति ब्रह्मैव ब्राह्मणजातिमेवान्ततः कर्मसमाप्तावुपनिश्रयति, पुरोहितं पुरतः सन्निधत्त इत्यर्थः। यः पुनर्बलाभिमानात्स्वां योनिं ब्राह्मणम् उ एनं हिनस्ति न्यग्भावेन पश्यति स स्वां योनिमृच्छति प्रसवं विनाशयति, स एतत्कृत्वा पापीयान्भवति पापतरो भवति यथा लोके श्रेयांसं हिंसित्वा परिभूय पापतरो भवति, तद्वदित्यर्थः ॥ ११ ॥ क्षत्रे सृष्टेऽपि स ब्राह्मणोऽस्मीति अभिमानी पुरुषः पूर्ववन्न व्यभवत्, कर्मसाधनवित्तोपार्जयितुरभावात्। विशं वैश्यम्। कः पुनरसौ विट्? यान्येतानि देवजातानि य एते देवजातिभेदा इत्यर्थः। गणशः गणं गणं कथ्यन्ते वसवोऽष्टसङ्ख्यो गणः एकादश रुद्राः,द्वादशादित्याः,त्रयोदश विश्वेदेवाः,मरुतःसगणाः॥१२॥ स परिचारकाभावात्पुनरपि न व्यभवत्। शूद्र एव शौद्रः स्वार्थेऽण् वृद्धिः। कः पुनरसौ पूषा? शूद्रवर्ण इति निर्दिशति *इयमिति। पृथिवीत्यर्थः ॥ स्वयमेव निर्वचनमाह *इयं हीति ॥१३॥ स

अथो अबलीयान्बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥ १४॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रि-

---

चतुरो वर्णान् सृष्ट्वाऽपि न व्यभवत् । क्षत्रस्य नियन्तृत्वेऽपि क्रूरत्वात्तस्यापि नियन्तुरभावे कर्मानुष्ठानासम्भवादिति भावः । तच्छ्रेयोरूपमित्यत्र स्रष्टृ ब्रह्म तच्छब्दार्थः । तदेतच्छ्रेयोरूपं सृष्टं क्षत्रस्य क्षत्रं नियन्तृ यो धर्मस्तस्मादुग्रक्षत्रस्यापि नियन्तृत्वाद्धर्मस्य वैशिष्ट्यसिद्ध्यर्थं लोकप्रसिद्धिं दर्शयति *अथो इति । आशंसते कामयते, जेतुमिति शेषः । धर्मेण धर्मबलेन । यथा राज्ञा स्पर्द्धमानः कुटुम्बिको दुर्बलोऽपि भूपं जेतुमुत्सहते एवमित्यर्थः ॥ सत्याभिन्नत्वादपि धर्मः सर्वनियन्तेत्यभिप्रेत्य तदभेदमाह *यो वा इति । तत्र लोकप्रसिद्धिं प्रमाणयति *तस्मादिति । यथाशास्त्रं निर्णेतुं व्यवाहियमाणोऽग्निहोत्रादिः सत्यमित्युच्यते, स एवानुष्ठीयमानो धर्म इति ॥ ज्ञानानुष्ठानयोश्च कार्यकारणरूपत्वान्मृद्घटवत्सत्यधर्मयोरैक्यमित्याह *एतद्ध्येव तादिति ॥ उभयमप्यभिन्नमित्यर्थः । तथाच सत्यलक्षणो धर्मः शास्त्रज्ञानमपि नियमयति इति भवति सर्वनियन्तेति भावः ॥ १४ ॥ उक्तां सृष्टिमुपसंहरति *तदेतद्ब्रह्मेत्यादिना॥ देवेषु क्षत्रादिवद्ब्राह्मणं मनुष्येषु क्षत्रादिकं च दर्शयति *तदग्निनेत्यादिना ॥ यत्स्रष्टृ ब्रह्म देवेष्वग्निं सृष्ट्वा तदात्मनाऽभवत्तदेव मनुष्येषु च ब्राह्मणात्मनाऽऽसीत्, तदेवोभयरूपेण विकृतात्मना इन्द्रादिदेवक्षत्राद्यधिष्ठितमानुष्यक्षत्राद्यात्मनाऽप्य

येण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्या ँ हि रूपाभ्यां ब्रह्माभवत ॥

वार्त्ति०॥ वर्णाश्रमादितद्धर्मसृष्टिः कर्मार्थमारिता ११९८
नन्वेवं तर्हि मुक्तिश्च स्यादेवात्मधियं विना ॥
अज्ञानकर्मणो श्रुत्या चादरेणोपवर्णनात् ॥ ११९९ ॥
नैवमात्मा किमज्ञातो मुक्तिदः कर्म वा बृहत् ॥

भूदिति ब्रह्मैव सर्वात्मकं जातमित्यर्थः ॥ एवमविकृतस्य ब्रह्मणोऽग्न्यादिना विकृतस्येन्द्रादिनाऽवस्थानमुक्तम्, इदानीमविकृतब्रह्मणोऽग्न्यादिरूपेणावस्थानफलमाह *तस्मादित्यादिना ॥ यस्मादाकाशाद्यात्मना विकृतमपि ब्रह्म क्षत्रादिरूपेणाविकृतमेवाग्न्यात्मना मनुष्यब्राह्मणात्मना चाभवत्तस्माद्देवेषु देवानां मध्ये ऽग्नौ अग्निसम्बद्धमेव कर्म कृत्वा मनुष्याणां मध्ये ब्राह्मण्यप्रयुक्तजप्यादिमात्रं कृत्वा लोके कर्मफलमिच्छन्ते कामिन इति योजना ॥ तदुक्तम्—जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति। मैत्रः सर्वभूताभयप्रदः। अथ यो ह वे त्यादिवाक्यमवतारयितुं सृष्टिश्रुतितात्पर्यमाह *वर्णेति ॥ ११९८ ॥ उत्तरग्रन्थव्यावर्त्यां शङ्कामाह *नन्विति। अविद्याया वर्णाश्रमादिसृष्टेश्च कर्मार्थत्वेनाभिधाने श्रुतितात्पर्यगम्यत्वेन तयोरेव मुक्तावपि हेतुत्वसम्भवात्कृतं ज्ञानेनेत्यर्थः ॥ ११९९ ॥ तयोर्मुक्तिहेतुत्वमनुपपन्नमिति दूषयति *नैवमिति। कुतोऽनुपपत्तिरित्याशङ्क्य किमविदितोऽपि परमात्मा वस्तुतः पुरुषार्थत्वात्स्वरूपत्वाच्च जीवस्य पुमर्थहेतुरिति तद्विशेषणीभूतावेदनमपि पुमर्थहेतुरित्युच्यते उताश्वमेधादि कर्मैवेति विकल्पमाह *आत्मा

आम्नायकृषिवन्नायमज्ञातात्मा फलप्रदः ॥ १२०० ॥
अनधीतो यथा वेदो नार्थज्ञानेन पालयेत् ॥
अकृता वा कृषिः पाति नाकर्त्तारं फलार्थिनम् ॥१२०१॥
श्रुतिः ॥ अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतम् ॥
वार्त्ति० ॥ तथा स्वात्माऽप्यविज्ञातो मुमुक्षुं मोक्षदानतः ॥
न पालयत्यतो मुक्तिरज्ञस्य न हि कस्यचित् ॥१२०२॥
स्वात्माख्यलोकमज्ञात्वा यो देहादस्वलोकतः ॥
प्रैत्यसौ पुनरप्यन्यं देहलोकं व्रजेद् दृढम् ॥ १२०३ ॥
श्रुतिः ॥ यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एव ॥
वार्त्ति० ॥ अनात्मविन्महत्पुण्यमश्वमेधादिकं यदि ॥
कुर्यान्नित्यपदायैतदथाप्यन्ते विनश्यति ॥ १२०४ ॥

किमिति ॥ अज्ञातात्मनो मुक्तिहेतुत्वं न सम्भवति सर्वस्यापि नित्यमुक्तत्वप्रसङ्गादिति मत्वा पाठक्रममनादृत्य तत्रैव यथा वेदो वेत्यादिना श्रुत्युक्तदृष्टान्तद्वयं व्याचष्टे *आम्नायेत्यादिना ॥ १२०० ॥ १२०१ ॥ स एनमित्यादिदार्ष्टान्तिकश्रुतिं व्याचष्टे *तथेति । फलितमाह *अत इति ॥ १२०२ ॥ अज्ञस्य न मोक्ष इत्ययमेवाथ यो ह वेत्यत्र निपातत्रयार्थ इति मत्वा ऽवशिष्टाक्षराणि योजयति *स्वात्माख्येति । *अस्वलोकत इति । अनात्मभूतादित्यर्थः । अपेक्षितं पूरयति *असौ पुनरिति ॥ १२०३ ॥ यदिह वेत्यादिवाक्यं व्याकुर्वन्कर्मैव मुक्तिहेतुरिति द्वितीयकल्पं प्रत्याह* अनात्मविदित्यादिना । नित्यपदाय

कृतस्य हि क्षयोऽवश्यं गोष्ठागारादिवद्भवेत् ॥
न मोक्षायादरस्तस्माच्छ्रुतावज्ञानकर्मणोः ॥ १२०५ ॥
किन्तु जीवन्मुक्तिकाले बोधहेयं विवेचितम् ॥
मुक्तिस्तु विद्यासूत्रेण सूत्रिता स्याद्विचारतः ॥१२०६॥
श्रुतिः ॥ आत्मानमेव लोकमुपासीत स य आत्मान-
मेव लोकमुपास्ते न हास्य कर्म क्षीयते । अस्माद्ध्ये-
वात्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥
वार्त्ति० ॥ आत्मानमेव निर्द्वैतं स्वप्रभं प्रविचारयेत् ॥
विचारयति यस्तस्य फलं न क्षीयते क्वचित् ॥१२०७॥
कामी कामयते यद्यत्सुखं स्वर्गादिजं पुमान् ॥
अस्मादेवात्मनस्तत्तत्सृजते कर्मपूजितात् ॥ १२०८ ॥

मोक्षाय ॥ १२०४ ॥ कर्मफलस्यानित्यत्वे फलितमाह *नेति । यस्मात्कर्मजन्यत्वे मुक्तेरनित्यत्वं दुर्वारं तस्माच्छ्रुतौ मोक्षहेतुत्वे-नाज्ञानकर्मणोस्तात्पर्येण प्रतिपादनं नास्तीत्यर्थः ॥ १२०५ ॥ किम्परं तर्ह्यविद्यातत्कार्यबोधिवचनमित्याशङ्क्य पूर्वोक्तं स्मारयति *किन्त्विति । कस्तर्हि मुक्तिहेतुरित्याशङ्क्य विचारतो ज्ञानद्वारा मुक्तिरित्युक्तमेवेत्याह *मुक्तिरिति ॥ १२०६ ॥ विद्यासूत्रवि-वरणरूपमात्मानमेवेत्यादिवाक्यं व्याख्याति *आत्मानमिति । य आत्मानमित्यादेरर्थमाह *विचारयतीति । कर्मपदव्याख्या *फलमिति । विचारवाचिकर्मशब्दस्तत्प्रयोज्ये विद्याफले लक्षण-या वर्तत इति भावः ॥१२०७॥ अस्माद्ध्येवेत्यादेरर्थमाह *का-मीति । सृजते प्राप्नोति । प्रत्यक्त्वस्य परमानन्दरूपत्वात्तदेव तत्कर्मानुसारेण जायमानं विषयानन्दरूपमित्यर्थः ॥ १२०८ ॥

अविनाशोऽखिलानन्दहेतुत्वं चेत्यदो द्वयम् ॥
न कर्मणां फले युक्तं, युक्तं विद्याफले तु तत् ॥१२०९॥
सिद्धस्य व्यञ्जिका विद्या व्यक्तात्मा फलमुच्यते ॥
न ह्यात्मनो विनाशोऽस्ति नित्यं विद्याफलं ततः॥१२१०॥
सार्वभौमादिकाः प्रोक्ता उत्तरोत्तरवृद्धितः ॥
हिरण्यगर्भपर्यन्ता आनन्दा आत्मबिन्दवः ॥ १२११ ॥
ब्रह्मानन्दस्य भूतानि मात्रां यान्तीत्युदीरणात् ॥
तत्तत्कर्मानुसारेण ब्रह्मानन्दः स्फुरेन्नृणाम् ॥१२१२॥
तत्तद्विषयकामेन चित्तेऽस्मिन् व्याकुलीकृते ॥
आनन्दः स्वात्मभूतोऽपि स तिरोधीयते नृणाम्॥१२१३॥
पुण्येन विषये लब्धे चित्ते स्वास्थ्यमुपागते ॥
आत्मानन्दः स्फुरेत्तावद्यावद् व्याकुलतान्तरम्॥१२१४॥

एवं न हास्य कर्म क्षीयत इत्यादिनाऽक्षयत्वविषयानन्दहेतुत्व- वचनात्कर्मशब्दो विद्याफलपर इत्युक्तम् । केचित्तु कर्मशब्दः कर्मफलपर इत्याहुः तदयुक्तं, वाक्यशेषविरोधादित्याह *अवि- नाश इति । अदो द्वयम् इदं द्वयम् । अमुत्र पुण्यचितो लोकः क्षीयते इत्यादिश्रुतेः कर्मफलस्यानित्यत्वावगमात्तस्य विषया- नन्दाहेतुत्वाच्च न कर्मशब्दस्य कर्मफलपरत्वं युक्तमित्यर्थः। स्वमते उक्तहेतुद्वयोपपत्तिमाह *युक्तमिति ॥ १२०९ ॥ तत्र विद्याफलस्य नित्यत्वमुपपादयति *सिद्धस्येति ॥१२१०॥ तस्य विषयानन्दहेतुत्वमाह *सार्वभौमेति ॥ १२११ ॥ एतस्यैवानन्द- स्येत्यादिश्रुतिं तत्र प्रमाणयति *ब्रह्मेति। ननु ब्रह्मणोऽस्मतस्व- रूपत्वात्तदानन्दः सर्वदा किमिति न स्फुरेत्? तदाह *तत्तदित्या- दिना ॥१२१२॥१२१३॥१२१४॥ उपसंहरति *इत्यत इति ।

एवं च विषयानन्दा ब्रह्मानन्दस्य बिन्दवः ॥
सर्वानन्दनिधिर्विद्याफलमित्यत ईरितम् ॥ १२१५ ॥
आनन्दबिन्द्वभिव्यक्तिहेतुकर्मप्रसिद्धये ॥
ब्रह्मक्षत्रादिवर्णानां सृष्टिर्यत्नेन वर्णिता ॥ १२१६ ॥
श्रुतिः ॥ अथो अयं वा आत्मा सर्वेषां भूतानां लोकः ॥
वार्त्ति० ॥ वर्णाश्रमाभिमानी सन्नतत्त्वज्ञः पराङ्मतिः ॥
देवादीनामाश्रयः स्यात्सर्वेषामापिपीलिकम् ॥१२१७॥
श्रुतिः ॥ स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोकः।

यस्माच्छ्रुत्युक्तहेतुद्वयं विद्याफले सङ्गच्छतेऽतः कर्मपदं विद्याफलपरमित्युक्तमित्यर्थः ॥ १२१५ ॥ विद्याफलमेवं चेदत्र विवक्षितं किमर्थं तर्हि श्रुत्या कर्माधिकारसिद्धये चातुर्वर्ण्यसृष्टिरुक्ता तत्राह *आनन्देति ॥ १२१६ ॥ उत्तरकण्डिकातात्पर्यमाह *वर्णेति ॥ १२१७ ॥

श्रुतावथो इत्ययं वाक्यारम्भार्थः । अयं प्रकृतकर्माधिकारी शरीरेन्द्रियादिविशिष्टात्मेत्युच्यते । सर्वेषां भूतानां लोको भोग्य इत्यर्थः ॥

कैः पुनः कर्मविशेषैरुपकुर्वन्केषां भूतविशेषाणां लोक इत्याशङ्क्य तद्विभागप्रदर्शनपरं स यज्जुहोतीत्यादिकं व्याचष्टे *देवानामित्यादिना । देवतोद्देशेन द्रव्यत्यागो यागः,

वार्त्ति० ॥ देवानां यागहोमाभ्यामृषीणां वेदपाठतः ॥
पितृणां श्राद्धतो नृणां वस्त्रान्नगृहदानतः ॥ १२१८ ॥
कर्मणाऽनार्जितो यस्मान्न कश्चिदुपकारकृत् ॥
गृही देवादिभिस्तस्मादर्जितो ऽभूत्स्वकर्मभिः ॥१२१९॥
पशूनां तृणनीराभ्यामुच्छिष्टकणधान्यतः ॥
श्वाऽऽखुटिट्टिभमुख्यानामेवं सर्वाश्रयो गृही ॥१२२०॥
स्वस्वकर्मार्जितत्वेन देवाद्याः स्वस्वदेहवत् ॥
अविनाशं सदेच्छन्ति गृहिणः स्वोपकारिणः॥१२२१॥
तत्त्वं बुध्वाऽननुष्ठानं नाशोऽयं गृहिणो महान् ॥
एष देवादिभिः सर्वैर्नहि शक्यश्चिकित्सितुम् ॥१२२२॥
कर्मणामननुष्ठानं मृतिरोगादिना तु यत् ॥
नासावात्यन्तिको नाशो यस्मात्पश्चात्करिष्यति॥१२२३॥
मा भूत्सर्वस्वहानिर्नो ब्रह्मयाथात्म्यविद्यया ॥

स एव देशविशेषप्रक्षेपाद्यधिको होमः ॥ १२१८ ॥ श्रुतौ निपृणाति इत्यस्य प्रयच्छतीत्यर्थः । विन्दति लम्भयतीत्यर्थः ॥ यथोक्तहोमादिभिर्देवादीन्प्रत्युपकुर्वतो गृहिणोऽपि विद्यायां सत्यां तया प्रतिबन्धसम्भवात्तदुपकारित्वव्यावृत्तिरित्याशङ्क्य गृहस्थशरीरस्य स्वशरीरवत्स्वकर्मार्जितत्वात्तन्निवर्तकब्रह्मविद्यां प्रतिबध्नन्तीत्यभिप्रेत्य तस्य स्वकर्मार्जितत्वं साधयति *कर्मणेति ॥ १२१९ ॥ १२२० ॥ तस्य कर्मार्जितत्वे फलितं दर्शयन् यथाहेत्यादिवाक्यतात्पर्यमाह *स्वस्वेति ॥ १२२१ ॥ गृहस्थस्य विनाशमनिच्छतां देवादीनां तद्रोगादिप्रतिबन्धकत्वमेवोचितं नतु विद्याप्रतिबन्धकत्वमित्याशङ्क्य गृहिणा स्वस्य बोधेन कर्मत्याग एव दुश्चिकित्स-

इति देवादयो ह्येतां प्रतिबध्नन्ति यत्नतः ॥ १२२४ ॥
श्रुतिः ॥ यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ है-
वंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्वि-
दितं मीमाꣳसितम् ॥ १६ ॥
आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे
स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति ॥
वार्त्ति० ॥ नन्वनर्थकरे केन गृही त्वेवं प्रवर्त्तितः ॥
पारतन्त्र्यमृते नैव धीमानत्र प्रवर्तते ॥ १२२५ ॥

सर्वस्वविनाशो देवानां नतु तस्य शरीरप्राणवियोगादिरित्याह *तत्त्वमित्यादिना ॥ १२२२ ॥ १२२३ ॥ १२२४ ॥

यथा हेत्यादिश्रुतेरयमर्थः—स्वाय लोकाय स्वस्मै देहाय। अरिष्टं शुभम्। एवंविदे कर्तृत्वाभिमानिने। यथोक्तं कर्म कुर्वन् यद्यपि देवादीन्प्रत्युपकरोति तथापि न तत्कर्तव्यत्वमावश्यकं मानाभावादित्याशङ्क्याह *तद्वा एतदिति। तदेतत्कर्मकर्तव्यत्वं पञ्च वा एते महायज्ञाः अहरहर्भूतेभ्यो बलिं हरेत् अहरहर्दद्यादित्यादिश्रुतिस्मृतिषु विदितमित्यर्थः। श्रुतमपि विचारं विना नानुष्ठेयम्। नहि रुद्ररोदनादि श्रुतमित्येवानुष्ठीयत इत्याशङ्क्याह *मीमांसितमिति। विचारेणाप्यधिकारिणा कर्मावश्यं कार्यमिति निर्णीतम्। ऋणवाँ जायते जायमानो योऽस्तीत्याद्यर्थवादेनेत्यर्थः।

आत्मैवेत्याद्युत्तरग्रन्थस्य पातनिकां करोति *नन्विति। उभयत्र त्रैवर्णिकस्य सामर्थ्ये तुल्ये निवृत्तिमार्गं त्यक्त्वा प्रवृत्तिमार्गे सर्वानर्थमूले केन प्रवर्त्यत इत्यर्थः। हेतुं विना तर्हि पुरुषस्य प्रवृत्तिर्नेत्याह *पारतन्त्र्यमृत इति। बलात्कृत्य प्रवर्त्तकं विनेत्यर्थः ॥ १२२५ ॥ कर्मणो ऽनर्थहेतुत्वं प्रदर्शय-

देवादिपारतन्त्र्यं तु गृहिणामधिकारिणाम् ॥
मिथ्याधीमात्रहेतुत्वान्नाप्यविद्या प्रवर्त्तिका ॥१२२६ ॥
तर्हि प्रवर्त्तकं ब्रूमः काम एव प्रवर्त्तकः ॥
काम एष क्रोध एष इत्यादिस्मृतिवाक्यतः ॥ १२२७ ॥
अकामतः क्रिया काचिद् दृश्यते नेह कस्यचित् ॥
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥ १२२८ ॥
तस्मात्कामयते पूर्वं ब्रह्मचारी चतुष्टयम् ॥
जाया मे स्यादथापत्यमथ वित्तमथ क्रिया ॥ ११२९ ॥
श्रुतिः ॥ एतावान्वै कामो नेच्छंश्चनातो भूयो विन्दे-

न्तदधिकारिणां परतन्त्रत्वं साधयति *देवादीति । पारतन्त्र्यं, स्फुटमिति शेषः । अकरणे प्रत्यवायश्रवणादिति भावः । प्रत्यगविद्या यथोक्ताधिकारिणो नियमेन प्रवृत्त्यनुरागे हेतुः, तत्राह *मिथ्येति । अविद्याया वस्त्वावरणमात्रत्वाद्वस्तुनि मिथ्याधीजनकत्वमेव, न स्वरूपेण प्रवर्त्तकत्वं, स्वापादावदर्शनादित्यर्थः ॥ १२२६ ॥ कर्मण्येव नियमेन प्रवृत्तौ काम एव हेतुरिति श्रुत्यभिप्रायं सप्रमाणमाह *तर्हीति ॥ १२२७ ॥ मनुवचनमपि तत्र प्रमाणयति *अकामत इति ॥ १२२८ ॥ उक्तेऽर्थे श्रुतिं पातयति *तस्मादिति ॥ १२२९ ॥

दारसम्बन्धात्पूर्वं कार्यकरणसङ्घातलक्षणो ब्रह्मचारी श्रुतावात्मपदेनोच्यते । इदं जायादिभेदरूपं तस्मादात्मनः पृथग्भूतं नासीत्किन्तु स एक एवासीत्प्रजापतिः । जायाया हेतुत्वख्यापकोऽथशब्दः । प्रजाया मनुष्यवित्तान्तर्भावमभ्युपेत्य द्वितीयोऽथशब्दः, तृतीयस्तु वित्तस्य कर्मानुष्ठानहेतुत्वविवक्षयेति विभागः ॥

त्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते ॥

वार्त्ति० एतावानेव संसारे कामो नातोऽधिकः क्वचित् ॥
लोकान्तरं कर्मफलं कर्मोक्त्यैवेरितं भवेत् ॥ १२३० ॥
असम्भवे तु जायादेर्मनोवागादिषु क्रमात् ॥
आत्मा जायादि सङ्कल्प्य ध्यायेज्जायादिसिद्धये॥१२३१॥

श्रुतिः ॥ तस्यो कृत्स्नता मन एवास्यात्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दते श्रोत्रं दैवं श्रोत्रेणैव तच्छृणोत्यात्मैवास्य कर्म आत्मना हि

एतावान्वै काम इत्यादेरर्थमाह *एतावानिति । कामानामेतावन्मात्रत्वमसिद्धम् उक्तव्यतिरिक्तस्वर्गादिकामनाया विद्यमानत्वादित्याशङ्क्य कर्मकामनाया अर्थतस्तत्फलविषयत्वान्मैवमित्याह *लोकान्तरमिति ॥ १२३० ॥

एतदभिप्रायेणैवाह श्रुतिः *नेच्छन्निति । चन अपि । यस्मादिच्छन्नपि अत उक्तकामाद् भूयोऽधिकतरं न विन्देन्न लभेत तस्मादेतावानेव काम इति पूर्वेण सम्बन्धः । उक्ते ऽर्थे लिङ्गमाह श्रुतिः *तस्मादिति । यस्मादविद्वान्पूर्वमेवं कामयामास तस्मादेतर्हि एतस्मिन्काले । *स यावदिति । स एवं कामयमानो यथोक्तजायादीनां मध्ये एकैकमपि यत्किञ्चिदपि यावन्न प्राप्नोति तावदकृत्स्नोऽसम्पूर्णोऽस्मीत्यात्मानं मन्यते पारिशेष्यात्समस्तानेवैतान्यदा सम्पादयति तदाऽस्य कृत्स्नता परिपूर्णता भवति ॥

उत्तरश्रुतितात्पर्यार्थमाह *असम्भवे त्विति ॥ १२३१ ॥

कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदꣳ सर्वं यदिदं किञ्च तदिदं सर्वमाप्नोति य एवं वेद ॥ १७ ॥

इत्युपनिषदि तृतीयाध्यायस्य चतुर्थब्राह्मणं समाप्तम् ।

वा० एवं कामप्रेरितः सन् याति कर्माधिकारिताम् ॥
अवरुन्धन्ति गृहिणं देवाद्या अधिकारिणम् ॥ १२३२ ॥
इत्यविद्यासूत्र उक्तोऽनर्थो यत्नेन विस्तृतः ॥
अयं निवर्त्यो विदुषा जीवतेति श्रुतेर्मतिः ॥ १२३३ ॥

इति वार्त्तिकसारे प्रथमाध्यायस्य चतुर्थं पुरुषविधब्राह्मणं समाप्तम् ॥

श्रुतौ तस्य उ इति छेदः । तस्याकृत्स्नत्वाभिमानिनः कृत्स्नता वक्ष्यमाणसम्पदुपासनेन भवतीत्यर्थः । सम्पत्तिप्रकारं विशदयति श्रुतिः—मन एवास्यात्मा, स्वस्य मनसि यजमानदृष्टिः कार्येत्यर्थः । एवं वाचि जायादृष्टिः, प्राणे पुत्रदृष्टिश्च कार्या । वित्तं द्विविधं मानुषं दैवं च, तदुभयदृष्टिः क्रमेण चक्षुःश्रोत्रयोः कार्या । तत्र हेतुमाह *चक्षुषेति । हि यस्मात्तत् मानुषं वित्तं गोहिरण्यादि चक्षुषा विन्दते उपलभते, यस्माच्च दैववित्तं देवाप्तिसाधनविज्ञानं शब्दद्वारा श्रोत्राधीनं तस्मादुभयत्र तद्दृष्टिः कार्येत्यर्थः । आत्मशब्दितशरीरे उक्तसाधननिर्वर्त्यकर्मदृष्टिः कार्येत्यत्र देहस्य कर्मनिर्वर्तकत्वं हेतुमाह *आत्मना हीति । स एष आध्यात्मिको ध्यानयज्ञः यश्च पशुपुरुषसाध्यो बाह्ययज्ञश्च पाङ्क्तः पञ्चभिर्निर्वर्त्यः, एवं बाह्ययज्ञसाधनपशुः पुरुषश्च पाङ्क्त एव, पूर्वोक्तमनआदिपञ्चयोगित्वात् । किम्बहुना यच्च किञ्चिच्चराचरं

जीवतः कर्मकर्तृत्वलक्षणोऽनर्थ ईरितः ॥
मृतस्याविदुषः कर्मफलानर्थ इहोच्यते ॥ १ ॥
पूर्वजन्मन्यनुष्ठाय कर्मोपास्ती अनात्मवित् ॥
जगत्सप्तान्नरूपेण सृजत्युत्तरजन्मनि ॥ २ ॥
चतुर्थब्राह्मणप्रोक्तं यद्यपि ज्ञानकर्मणोः ॥
फलं तथापि वैषम्यमस्ति जीवेशरूपतः ॥ ३ ॥
उत्कृष्टज्ञानकर्मभ्यां वैराजं पदमाप्य यत् ॥

तत्सर्वं पञ्चभूतकार्यत्वात्पाङ्क्तम् । एवं साध्यं साधनं च पाङ्क्तं सूत्रात्मना ज्ञात्वा तच्च पाङ्क्तं सूत्रमात्मत्वेनानुसन्धेयं, यतस्तदाप्तिरेव फलं तक्रतुन्यायादित्यर्थः ॥१७॥ अविद्यातत्कार्यमुपसंहरन् तत्प्रतिपादकश्रुतितात्पर्यमाह *एवमित्यादिना ॥१२३२॥१२३३॥

इति वार्त्तिकसारव्याख्याने प्रथमाध्यायस्य चतुर्थं पुरुषविधब्राह्मणं समाप्तम् ।

वृत्तानुवादपूर्वकं सप्तान्नब्राह्मणतात्पर्यमाह *जीवत इति । *कर्मफलेति वक्ष्यमाणज्ञानफलस्याप्युपलक्षणम् ॥ १ ॥ अस्मिन्ब्राह्मणे प्रथमकण्डिकोक्तमन्त्रान् द्वितीयकण्डिकामारभ्य श्रुतिरेव व्याकरोति । तत्र प्रथममन्त्रब्राह्मणे मेधया हीत्यत्र हिशब्दसूचितं यत्सप्तान्नानीत्यादिमन्त्रार्थं स्फुटयति *पूर्वेति । श्रुतौ मेधातपःशब्दौ ज्ञानकर्मपरौ प्रकरणात्तदाह *कर्मोपास्ती इति । ताभ्यां च लौकिकं वैदिकं देवतादर्शननग्नस्त्रीदर्शनरूपं ज्ञानं यागकलञ्जभक्षणादि कर्म च गृह्यते । पितृशब्दो जीववचनः तस्य जगज्जनकत्वात्, तथाच जीवः पूर्वजन्मकृतकामकर्मभ्यां सप्तान्नात्मकं जगद्यदजनयत्तस्य पितृत्वाद्युक्तमिति श्रुत्यभिप्रेतोऽर्थः ॥ २ ॥ उक्तार्थस्य पौनरुक्त्यं परिहरति *चतुर्थे-

जगत्सृजति तत्प्रोक्तं चतुर्थब्राह्मणे पुरा ॥ ४ ॥
निकृष्टज्ञानकर्मभ्यां मनुष्यादिपदं गतः ॥
स्वभोग्यं सृजते यत्तत्पञ्चमेऽस्मिन्नुदीर्यते ॥ ५ ॥
सृष्ट्या क्रीडत्यविश्रान्त ऐन्द्रजालिकवद्विराट् ॥
स्वप्नदृष्ट्येव विश्रान्तः सृष्ट्या क्लिश्नाति मानवः ॥ ६ ॥
येन यद् दृश्यते तत्तु तेन सृष्टं स्वकर्मणा ॥
दृश्यस्य भ्रान्तिरूपत्वाद्दर्शनं सृष्टिरुच्यते ॥ ७ ॥
सृष्टं जगद्विराजेदं सदेवपशुमानुषम् ॥
मर्त्येनापि जगत्सृष्टं सविराण्नरदेवतम् ॥ ८ ॥
तेन तेनेक्षितः स्वप्नस्तत्तत्कर्मानुसारतः ॥

ति ॥३॥ वैषम्यमेवाह *उत्कृष्टेति ॥४॥ स्वभोग्यं भोग्यत्वाकारम् ॥ ५ ॥ साधनवैषम्यमुक्त्वा फलवैषम्यमाह *सृष्ट्येति ॥ ६ ॥ ईश्वरेण साक्षाद् विराड्द्वारा च सर्वप्रपञ्चस्य सृष्टत्वात्तद्व्यतिरिक्तजीवसृज्यप्रपञ्चानुपलब्धेः कथं तस्य सृष्टिकर्तृत्वमित्याशङ्क्य स्वभोग्यं सृजत इत्युक्तं व्यक्तीकुर्वन्नाह *येनेति । भ्रान्तिरूपत्वं प्रतिभासमात्रत्वम् । अयं भावः—प्रपञ्चस्वरूपस्येश्वरसृष्टत्वेऽपि तत्र हेयोपादेयत्वादेः स्वप्नप्रपञ्चवत्प्रातिभासिकत्वेन जीवकर्तृत्वात्तद्विशिष्टेनाकारेण वियदादेरपि जीवकर्तृकत्वमिति । एतच्च द्वैतविवेके प्रमाणयुक्तिभ्यां प्रपञ्चितमिति नात्र प्रयत्यते ॥ ७ ॥ अमुमेवार्थं स्फोरयति *सृष्टमिति । प्रपञ्चस्वरूपमात्रस्य विराट्कर्तृकत्वेऽपि भोग्याकारविशिष्टः कार्यकारणात्मकः सर्वोऽपि प्रपञ्चो जीवकर्तृक इत्यर्थः ॥ ८ ॥ एवं जीवस्य सृष्टिकर्तृत्वमुक्त्वा तत्सृष्टजगतो दुःखादिहेतुत्वं सनिदर्शनं दर्शयति *तेनेति । जीवसृष्टप्रपञ्चस्य प्रातिभास-

सुखदुःखे तस्य तस्य यथा दृत्ते तथा जगत् ॥ ९ ॥
ब्रह्मादिस्तम्बपर्यन्तं जीवानां स्रष्टृता समा॥
सप्तान्नान्यत्र मूढोऽतः सृजतीत्यभिधीयते ॥ १० ॥
एकं व्रीहियवाद्यन्नं सर्वसाधारणं तु तत् ॥
द्वे दर्शपूर्णमासाख्ये देवानामेव ते मते ॥ ११ ॥
क्षीरमेकं पशूनां तत्, मनोवाक्प्राणरूपकम् ॥
अन्नत्रयं चिदात्मार्थं तेन व्यवहरत्ययम् ॥ १२ ॥
नन्वन्नान्यत्र भुज्यन्ते कुसूलस्थितधान्यवत् ॥
कस्मात्तेषां क्षयो न स्यादिति चेत्तदुदीर्यते ॥ १३ ॥
भुञ्जानः पुरुषो भूयः करोति ज्ञानकर्मणी ॥
शास्त्रीये अप्यशास्त्रीये अनुच्छिन्नं ततो जगत् ॥ १४ ॥
एवं प्रबन्धरूपेण साध्यसाधनलक्षणम् ॥
अविद्यावृतदृष्टीनां जगन्नित्यमिवेक्ष्यते ॥ १५ ॥
इह जन्मनि कर्तृत्वं भाविजन्मनि भोक्तृता ॥
पुनस्तत्रापि कर्तृत्वं तत ऊर्ध्वं च भोक्तृता ॥ १६ ॥
तत्र कर्तृत्वविस्तारः पूर्वब्राह्मण ईरितः ॥

मात्रशरीरत्वेन रज्जुसर्पवत्प्रतिजीवं सिद्धत्वात्तत्तत्कर्मानुसारेण दुःखादिहेतुत्वं युक्तमित्यर्थः ॥ ९ ॥ अस्यां सृष्टावविशेषेण सर्वजीवानामपि कर्तृत्वमाह *ब्रह्मेति । प्रथममन्त्रार्थमुपसंहरति *सप्तेति ॥ १० ॥ एकमस्येत्यादिवाक्यं विभजते *एकमित्यादिना ॥ ११ ॥ १२ ॥ कस्मात्तानीत्यादेरर्थमाह *नन्विति ॥ १३ ॥ पुरुषो वा अक्षितिरित्यादेस्तात्पर्यमाह *भुञ्जान इति ॥ १४ ॥ एवं प्रवाहानादित्वेन जगतो विच्छित्त्यभावादेव तत्र मूढानां नित्यत्वभ्रम इत्याह *एवमिति

इह भोक्तृत्वविस्तार इत्यविद्या द्विधोदिता ॥ १७ ॥
श्रुतिः । यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं, द्वे देवानभाजयत्, त्रीण्यात्मनेऽकुरुत, पशुभ्य एकं प्रायच्छत् । तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वै तामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपिगच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥ १ ॥
यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति मेधया हि तपसाऽजनयत्पिता एकमस्य साधारणमिति । इदमेवास्य तत्साधारणमन्नं यदिदमद्यते । स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳह्येतत् । द्वे देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति । तस्मान्नेष्टियाजुकः स्यात् । पशुभ्य एकं प्रायच्छदिति तत्पयः । पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनु धापयन्त्यथ वत्सं जातमाहुरतृणाद इति । त-

---

॥ १५ ॥ प्रबन्धरूपेणेत्युक्तं व्यनक्ति *इहेति ॥ १६ ॥ १७ ॥

अक्षरार्थस्तु—एकमस्य साधारणमिति मन्त्रपदं व्याचष्टे *इदमेवेति । यदिदमद्यते सर्वप्राणिभिरहरहर्भुज्यते तदिदमन्नमस्य भोक्तृवर्गस्य साधारणमकल्पयत् पितेति योजना । यो—यः कश्चित्सर्वप्राणिस्थितिकारणमन्नमुपास्ते । अत्रोपासनं नाम तत्परत्वं, केवलं स्वोदरपोषणमात्रप्रधानो भवतीत्यर्थः । स एवम्भूतः पाप्मनो न व्यावर्तते न मुच्यते । तत्र हेतुः *मिश्रं ह्येतादिति । हिशब्देन "केव-

लाद्यो भवति केवलादी" "नात्मार्थं पाचयेदन्नम्" इत्याद्यन्नसाधारणत्वप्रतिपादकश्रुतिस्मृती सूचयति । द्वे देवानभाजयदिति मन्त्रपदं व्याचष्टे *हुतं चेति । हुतमित्यग्नौ हवनं, प्रहुतं हुत्वा बलिहरणम् । तयोर्देवान्नत्वे लिङ्गमाह *तस्मादिति । यस्माद्हुतप्रहुते अन्ने पिता देवानभाजयत्तस्मादेतस्मिन्नपि काले गृहिणो देवेभ्यो जुह्वति प्रजुह्वति च हुत्वा बलिहरणं च कुर्वत इत्यर्थः । पूर्वत्रास्वरसात् मतान्तरमाह *अथो अपि अन्ये आहुः, देवेभ्यो दत्ते अन्ने न हुतप्रहुते, किं तर्हि ? दर्शपूर्णमासाविति । द्वित्वश्रवणाविशेषेऽपि दर्शपूर्णमासयोः श्रौतत्वेन स्मार्तहुतप्रहुतापेक्षया प्रधानत्वात्तयोरेव ग्रहणं युक्तमित्यर्थः । *तस्मान्नेष्टियाजुकः स्यादिति । यस्माद्दर्शपूर्णमासयोः प्रधानत्वं तस्मात्तद्विघातककाम्येष्टिप्रधानो न भवेदिति भावः । त्रीण्यात्मनेऽकुरुतेत्यस्य विस्तीर्णविषयत्वात्पाठक्रममुल्लङ्घ्याल्पविषयं पशुभ्यएकमित्यादिमन्त्रपदं व्याचष्टे *तत्पय इत्यादिना । हि यस्मादग्रे जन्मोत्तरकालं पय एव पशव उपजीवन्ति तस्मात्पयोरूपमन्नं तेभ्यः पित्रा दत्तमित्यर्थः । पशवो द्विपादश्चतुष्पाद इति श्रुतेः मनुष्याणामपि पशुभ्य एकमिति पशुशब्देन सङ्ग्रहः कृत इति मत्वाऽऽह *यस्मादिति । यस्मात्पश्वन्नं पयस्तस्माल्लोके कुमारं जातं जातकर्मणि स्वर्णसहितं पयोविकारं घृतमग्रे प्रलिलेहयन्ति प्राशयन्ति स्तनं वाऽनु घृतासम्भवे धापयन्ति पाययन्ति । अथ वत्समिति द्विपात्पश्वधिकाराविच्छेदार्थोऽथशब्दः । जातं वत्सं "कियत्प्रमाणस्ते वत्सः" इत्यन्येन पृष्टा "अतृणाद" इत्याहुः, तृणं नात्ति पयसैवाद्यापि वर्त्तते इत्यर्थः । तस्मिन्नित्यादिमन्त्रं व्याचष्टे *पयसीति । स्थावरजङ्गमात्मकं सकलं जगत्कथं पयसि प्रतिष्ठितमिति शङ्कां हिशब्देन

स्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हदिꣳ सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न। तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्त्सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति। कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति पुरुषो वा अक्षितिः।

व्यावर्तयति। अयमर्थः—अग्निहोत्रे हूयमानं पयोऽपूर्वमयं तेजोद्वाराऽऽदित्यमुपसर्पति ततो वृष्टिरूपेण जायते ततो व्रीह्यादिरूपेण परिणतं सद् रेतोद्वारा प्रजाभावमापद्यते। तदुक्तं मनुना—अग्नौ प्रास्ता ऽऽहुतिः सम्यगादित्यमुपतिष्ठते।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ इति।

यथाच पयःपरिणामत्वाज्जगतः "तस्मिन्निदं जगन्मग्नम्" इति सर्वं पयसि प्रतिष्ठितमिति विधित्सितदर्शनस्तुतये शाखान्तरीयमतं निन्दितुमनुवदति *यदिदमिति। नच संवत्सरं पयसाऽग्निहोत्रमात्रेण कथं मृत्युजय इति शङ्क्यम्। संवत्सरावधिकेऽग्निहोत्रे सायम्प्रातराहुतिभेदेन प्रयोगभावाद्विंशत्युत्तरसप्तशतसङ्ख्याः सन्ति ताश्चाहुतीश्चित्यग्न्यवयवभूतयाजुष्मतीसञ्ज्ञकेष्टकाः तद्रूपेणाहुतीर्ध्यायन् सङ्ख्यासामान्यात्पुरुषनाडीस्थसङ्ख्यासामान्येन तन्नाडीस्तान्येवाहोरात्राणि सम्पाद्य नाड्यहोरात्रयाजुष्मतीनां परस्पराभेदसम्पादनद्वारा पुरुषसंवत्सरचित्यानां समत्वमापाद्य "अहमग्निः संवत्सरात्मा प्रजापतिरेव" इति ध्यायतो विद्यासहितहोमवशान्मृत्युजयस्य विवक्षितत्वादिति। एकीयमतनिन्दापूर्वकं मतान्तरमाह *न तथेति। तथा न द्रष्टव्यं किन्तु हूयमाने पयसि मग्नं जगदिति पयो ध्यायन्नग्निहोत्रं

स हीदमन्नं पुनः पुनर्जनयते यो वै तामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्,स देवानपिगच्छति स ऊर्जमुपजीवतीति प्रशंसा ॥ २ ॥

तेन जुह्वदेकयैवाहुत्या जगद्रूपं प्रजापतिं प्राप्य मृत्युमपजयति सकृन् मृत्वा पुनः परिच्छिन्नं शरीरं न गृह्णातीत्यर्थः । तत्र हेतुमाह *सर्वं हीति । पयो जगदात्मकं पश्यन्पयसा जुह्वदेकयैवाहुत्या सर्वं जगद्देवेभ्योऽन्नाद्यं प्रयच्छन् देवानां तृप्तिमापाद्य तदनुग्रहवशात् मृत्युं जयतीति भावः । विदुषो भावनासामर्थ्यादेकयैवाहुत्या देवेभ्यो जगदर्पणसामर्थ्यमस्तीति वक्तुं हिशब्दः । कस्मादित्यादिप्रश्नमन्त्रपदं व्याचष्टे *पुरुष इति पुरुषस्याक्षयत्वेऽप्यन्नस्याक्षयत्वे किमायातं ? तत्राह *स हीदमिति । स जीवो यस्मादिदं भुज्यमानं सप्तविधान्नं ज्ञानकर्मभ्यां भूयो भूयो जनयते तस्मादक्षीणेन पुरुषेण सृज्यमानान्नस्याप्यक्षयत्वमित्यर्थः । अक्षयहेतुत्वगुणकसप्तान्नात्मकप्रजापतिरूपपुरुषोपासकस्य फलं वक्तुं यो वै तामित्यादिमन्त्रमवतार्य फलोक्तेः पूर्वं पुरुषो वा अक्षितिरित्यादिनोक्तमर्थं पुनरुपपाद्योक्तोपासकस्य फलप्रतिपादकं सोऽन्नमत्तीति मन्त्रं व्याचष्टे *मुखमिति । मुखेन मुख्येन प्राधान्येनान्नमत्ति विद्वानन्नात्मभूतो भोक्तैव न भोज्यतामापाद्यत इत्यर्थः । स देवानपिगच्छत्यूर्जममृतत्वं चोपजीवतीति । यदुक्तं सा प्रशंसामात्रं सोऽन्नमत्तीत्यत्रैव देवभावादेः सिद्धेरपूर्वार्थाभावाद्विद्यास्तुतिरेवेति भावः ॥ २ ॥ त्रीण्यात्मनेऽकुरुतेति मन्त्रब्राह्मणतात्प-

वार्त्ति० एवमाध्यात्मिकाविद्यामग्नस्याप्याधिदैवतम्॥
विराट्त्वं वाञ्छतः पुंसस्त्यन्नात्मोपास्तिरीर्यते ॥१८॥
सृष्टो यद्यपि मर्त्येन वर्तमानो विराट् स्वयम् ॥
तथाऽप्यस्येश्वरो भूत्वा भाति तादृशकर्मणा ॥१९ ॥
स्वस्वप्नकल्पितो राजा गुरुर्वा स्वनियामकः ॥
यथा तथा विराडेष स्वस्रष्टारं नियच्छति ॥ २० ॥
स्वप्नेऽहमेव राजेति द्रष्टा सर्वं नियच्छति ॥
न त्वन्येन नियम्यः स्यात्स्वविराट्त्वे तथा भवेत्॥२१॥
विनोपास्तिं विराडेष स्वाभिन्नत्वेन कल्प्यते ॥
उपासकस्य स्वत्वेनेत्येषा कल्पकयोर्भिदा ॥ २२ ॥
कर्मोत्कर्षापकर्षौ च स्वत्वभिन्नत्वकारणम् ॥
तस्मादुपासनोत्कृष्टा वर्ण्यते स्वत्वसिद्धये ॥ २३ ॥
अश्वाद्युपासनं पूर्वं स्वत्वार्थं यद्यपीरितम् ॥
तथाऽप्यविद्याकार्यत्वसिद्धयेऽत्राप्युदीर्यते ॥ २४ ॥

र्यमाह *एवमिति ॥ १८ ॥ विराजो भोग्यत्वाकारविशिष्टत्वेन जीवकल्पितत्वोक्तेस्तस्य शुक्तिरजतादिवदनुपास्यत्वं स्यादिति शङ्कते *सृष्ट इति । कल्पितस्यापि स्वामित्वेन प्रतीयमानस्योपास्यत्वमविरुद्धम्, इति समाधत्ते *तथाऽपीति ॥ १९ ॥ उक्तमर्थं सदृष्टान्तमुपपादयति *स्वप्नेत्यादिना ॥ २० ॥ २१ ॥ एवं कल्पितस्याप्युपास्यत्वमभिधाय तदुपास्तेरपि कल्पनाभेदेन फलवत्त्वमाह *विनेत्यादिना ॥ २२ ॥ कर्मोत्कर्षः फलपर्यन्तोपासनम् ॥ २३ ॥ उक्तोपास्तेः पुनरुक्तिमाशङ्क्याह *अश्वेति ॥ २४ ॥ एवमन्नत्रयात्मोपासनोक्तेः प्रकृतत्वमभिधाय तदुपासनाप्रकारं वक्तुं तस्य सर्वव्यापित्वमाह *अ-

अध्यात्ममधिभूतं च विज्ञेयमधिदैवतम् ॥
उपासनाय व्यापित्वं विराजोऽन्नत्रयात्मनः ॥ २५ ॥
अन्नत्रयस्य संव्याप्तिरध्यात्मं स्वानुभूतितः ॥
शास्त्रैकगम्यमन्यत्र तत्राध्यात्मं प्रदर्श्यते ॥ २६ ॥
अनुमेयं मनोरूपं साक्षिवेद्यास्तु वृत्तयः ॥
कादाचित्कार्थविज्ञानं लिङ्गं तद्वद्विशेषधीः ॥ २७ ॥
आत्मेन्द्रियार्थसान्निध्ये सन्ततेऽप्यर्थवेदनम् ॥
क्षणिकं दृश्यतेऽतस्तदन्तःकरणपूर्वकम् ॥२८ ॥
लोचनागोचरे पृष्ठे त्वचाऽस्य स्पर्शवेदनम् ॥
पादस्य स्पर्श इत्येष विशेषो ज्ञायते धिया ॥ २९ ॥
लिङ्गद्वयानुमेयेऽस्मिन् चित्ते कामादिवृत्तयः ॥

ध्यात्ममिति । मनोवाक्प्राणात्मकविराजो यदध्यात्मादित्रयं वक्ष्यमाणमस्ति तेषु व्यापित्वं विज्ञेयमित्यर्थः ॥ २५ ॥ अन्नत्रयात्मकविराजः सर्वव्यापित्वज्ञापकमानमाह *अन्नेति ॥२६॥ प्रतिज्ञातमर्थमाह *अनुमेयमिति । विशेषधीरपि, लिङ्गमित्यनुषङ्गः ॥ २७ ॥ कादाचित्कार्थविज्ञानं लिङ्गमित्युक्तं विवृणोति *आत्मेति । विमतमर्थवेदनम् आत्मादित्रयातिरिक्तासाधारणकारणापेक्षं तस्मिन्सत्यपि कादाचित्कत्वात् घटवदिति प्रयोगो द्रष्टव्यः ॥ २८ ॥ विशेषधीर्लिङ्गमित्युक्तं स्पष्टयति *लोचनेति । विमतम् असाधारणकारणजन्यं विशेषज्ञानत्वाद्रूपज्ञानवदित्यर्थः । नच त्वगिन्द्रियेणार्थान्तरत्वं तस्य, स्पर्शसामान्यग्रहोपक्षीणत्वात्, विशेषस्य स्पर्शस्य चेतसोऽवधानाभावेऽनुपलम्भात्तत्सिद्धिरिति भावः ॥ २९ ॥ साक्षिभा-

भास्यन्ते साक्षिणा रूपं नेत्रेणेवापरोक्ष्यतेः ॥ ०३ ॥
अनेन मनसा रूपप्रपञ्चोऽत्रोपलक्ष्यते ॥
वागिन्द्रियेण निष्पाद्यं नाम वागिह गीयते ॥ ३१ ॥
पञ्चवृत्त्यात्मकात्प्राणादिह कर्मोपलक्ष्यते ॥
नामरूपक्रिया एवमध्यात्मं सूपवर्णिताः ॥ ३२ ॥
देहेन्द्रियादिसङ्घातरूपा एतास्त्रिदण्डवत् ॥
एकीभूता इहाध्यात्मं चिन्तनीया उपासकैः ॥ ३३ ॥
श्रुतिः ॥ त्रीण्यात्मने ऽकुरुतेति मनो वाचं प्राणं तान्यात्मने ऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृ-

---

स्यास्तु वृत्तय इत्युक्तं प्रकटयति *लिङ्गेति ॥ ३० ॥ अन्नत्रयस्याध्यात्मव्यापित्वे मानमुक्त्वा मनो वाचं प्राणमित्यत्र मनोवाक्प्राणशब्दैर्विवक्षितमाह *अनेनेत्यादिना । मनसा मनःशब्देनेत्यर्थः । वाग्, इतीति शेषः ॥३१॥ *पञ्चेति । पञ्चवृत्त्यात्मकप्राणवाचकशब्दादित्यर्थः । इहेति पुनः पुनः कथनं वाङ्मनःप्राणशब्दानां नामरूपक्रियालक्षकत्वमवश्यं प्रकृतब्राह्मणे वक्तव्यमिति सूचनार्थं, मुख्यार्थग्रहे वक्ष्यमाणग्रन्थेन विरोधप्रसङ्गादिति ध्येयम् । उक्तमर्थमुपसंहरन्नध्यात्ममन्नत्रयोपासनप्रकारमाह *नामेत्यादिना ॥३२॥३३॥ त्रीण्यात्मन इत्यादेरयमक्षरार्थः-जीवः सप्तान्नानि सृष्ट्वा चत्वारि भोक्तृभ्यो विभज्य त्रीण्यात्मार्थं कृतवानिति मन्त्रार्थमभिप्रेत्यान्नत्रयं विभजते श्रुतिः *मनो वाचं प्राणमिति ॥ *आत्मने–उपासनद्वारा स्वस्य विराट्त्वप्राप्तये । मनःसद्भावेऽनुमानमाह *अन्यत्रेति । प्रयोगस्तु प्रागेव दर्शितः । किञ्च सर्वोऽपि लोको मनसैव

णोति । कामः सङ्कल्पो विचिकित्सा श्रद्धा ऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सा एषा ह्यन्तमायत्तैषा हि न प्राणो ऽपानो व्यान उदानः समानः ।

पश्यति मनसा शृणोति तद्व्यग्रत्वेन तददर्शनात्, तस्मादन्वयव्यतिरेकाभ्यां मनो नाम किञ्चिदस्तीत्यर्थः ॥ एवं मनसोऽस्तित्वं प्रसाध्य तत्स्वरूपमाह *काम इत्यादिना । विषयाभिलाषः कामः, सामान्यतो दृष्टे शोभनत्वाध्यवसायः कामहेतुः सङ्कल्पः, विचिकित्सा संशयः, अदृष्टार्थे कर्मादिष्वास्तिक्यबुद्धिः श्रद्धा, तद्विपरीतबुद्धिरश्रद्धा, धृतिर्धारणं देहाद्युत्तम्भनम्, तद्विपर्ययोऽधृतिः, ह्रीर्लज्जा, धीः प्रज्ञा, भीर्भयमित्येवमादिकं सर्वं मन एव, मनोवृत्तित्वात्तद्रूपमेवेत्यर्थः ॥ मनसोऽस्तित्वे पृष्ठलग्नकरादिस्पर्शविशेषधीरपि लिङ्गमित्याह *तस्मादपीति । मनःसद्भावादेवेत्यर्थः । इत्थं च मनो निरूप्य क्रमप्राप्तां वाचं निरूपयति *य इति । यः कश्चिल्लोके शब्दो ध्वन्यात्मको वर्णात्मकश्च सर्वोऽपि वागेव । एवं वाचः स्वरूपमुक्त्वा तत्कार्यमाह । एषा वाग् यस्मादन्तमभिधेयनिर्णयमायत्ताऽभिधेयप्रकाशिकेति यावत् । प्रकाशिकाऽपि वाग् अन्यप्रकाश्या चेदनवस्थेति शङ्कां परिहरति श्रुतिः *एषा हि न इति ॥ एषा वाक् दीपवत्सजातीयप्रकाशमनपेक्ष्य प्रकाशकत्वान्नान्यप्रकाश्या, तथाच प्रकाशकत्वमेव वाचः कार्यमित्यर्थः ॥ अथ प्राणं निरूपयति । मुखनासिकासञ्चरणयोग्यो हृदयादिवर्त्युच्छ्वासहेतुः प्राणः, नाभ्यादिस्थानोऽधोवृत्तिर्मूत्रा-

अन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

वार्ति०॥ अधिभूतं तथोपास्या वाङ्मनःप्राणशब्दिताः । नामरूपक्रियाः—

व्यपनयनहेतुरपानः, सर्वशरीरव्यापिवीर्यवत्कर्महेतुर्व्यानः, उत्साहपूर्वकक्रियाहेतुः कण्ठादिस्थान उदानः, अशितपीतसमीकरणहेतुः कोष्ठादिस्थानः समानः । एवं प्राणादिपञ्चवृत्तीरभिधाय वृत्तिमद्वायुस्वरूपमाह *अन इति । एतत्सर्वं प्राणादिवृत्तिपञ्चकं प्राण एव, अत्रत्यप्राणशब्दोऽनन्तरोक्तानविषयः, प्राणवृत्तेः सर्वात्मत्वानुपपत्तेरिति बोध्यम् । अन्नत्रयात्मकविराज उपासनायाध्यात्मादिव्यापित्वं वक्तुमुपक्रम्य प्रसङ्गान्मनआदिस्वरूपं तत्कार्यं च वर्णितम् । इदानीमध्यात्मशब्दिते शरीरेऽन्नत्रयव्याप्तिं दर्शयति *एतन्मयो वा अयमात्मेति । आत्मा शरीरम् । एतन्मय इत्युक्तं विवृणोति *वाङ्मय इत्यादिना ॥ नच शरीरस्य कथं वागादित्रयविकारित्वमिति वाच्यम् । एतद्विरोधपरिहारायैव वागादीनां नामरूपक्रियालक्षकत्वस्योक्तत्वात् । नन्वेवमपि शरीरस्य कथं नामविकारित्वमिति चेदुच्यते । अत्र नामशब्देन प्रकाशकमात्रं विवक्षितं रूपशब्देन च प्रकाश्यमात्रं, तथा च यद्यत्प्रकाशकमिन्द्रियादि तत्सर्वं नामैव यद्यत्प्रकाश्यं शरीरादि तत्सर्वं रूपमेव । प्राणशब्दितक्रियायाः प्रकाश्यत्वेऽप्युपासनार्थं पृथग्ग्रहणम् ॥ ३ ॥

एवमाधिदैविकनामादिकार्ये शरीरेन्द्रियादावनुगता नामरूपक्रियाः सम्पिण्डितात्रिदण्डवदेकीभूता इति ध्यातव्या इत्युक्तम् । इदानीं त्रयो लोका इत्यादिकण्डिकासप्तकस्य तात्पर्यं सङ्गृह्णाति

श्रुतिः । त्रयो लोका एत, एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥४॥ त्रयो वेदा एत एव, वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः॥५॥ देवाः पितरो मनुष्या एत एव, वागेव देवा मनः पितरः प्राणो मनुष्याः ॥ ६ ॥ पिता माता प्रजैत एव, मन एव पिता वाङ्माता प्राणः प्रजा ॥ ७ ॥ विज्ञातं विजिज्ञास्यमविज्ञातमेत एव, यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद् भूत्वाऽवति ॥८ ॥ यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद् भूत्वाऽवति॥९॥यत्किञ्चाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति॥१०॥

---

*अधिभूतमिति ॥

त्रयो लोकाः भूर्भुवःसुवआख्याः । एते वागादय एवेत्युक्तं स्वयमेव विभजते श्रुतिः *वागेवेत्यादिना । एवमुत्तरत्रापि द्रष्टव्यम् । यत्किञ्च विज्ञातं वाचस्तद्रूपमित्यत्र हेतुं स्वयमेवाह *वाग्घीति । प्रकाशकत्वादित्यर्थः ॥ वाग्विभूतिविदः फलमाह *वागेनमिति । यथोक्तवाग्विदं तद्विज्ञातं भूत्वाऽवति विज्ञातरूपेणैवास्य भोज्यतामापद्यत इत्यर्थः। *मनो हीति । मनःसङ्कल्पात्मकत्वाज्ज्ञातुमिष्टं सर्वं मनोरूपमित्यर्थः। *प्राणो हीति । निरुक्तं चानिरुक्तं चेत्यादौ प्राणेऽनिरुक्तपर्यायाविज्ञातत्वस्य श्रुतिसिद्धत्वादित्यर्थः । न च लोके विज्ञातस्यैव भोज्यत्वोपलम्भान्मन एनं तद् भूत्वाऽवतीत्यादौ मनःप्राणयोः सन्दिह्यमानत्वेनाविज्ञातरूपत्वेन च भोज्यत्वकथनमयुक्तमिति वाच्यम् । यथा शिष्यैरविवेकतः स-

वार्त्तिकं ॥ शास्त्रप्रोक्तलोकादिरूपतः ॥ ३४ ॥
अधिदैवं तु पृथिवी वागाधिष्ठानगोलकम् ॥
अग्निर्वाचः स्वरूपं स्यान्मनो रविरिहेष्यते ॥ ३५ ॥
श्रुतिः ॥ तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमय-
मग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयम-

न्दिद्यमाना अपि गुरवस्तेषां भोगहेतुतामापद्यमाना दृश्यन्ते, यथा वा बालैरविज्ञातोपकाराः पित्रादयस्तेषां भोज्यत्वमापद्यन्ते, तथा मनःप्राणयोरपि भोज्यत्वसम्भवादिति । यद्यपि भूरादिष्वेकैकत्र विज्ञातादित्रयं सम्भवति तथापि वागादिषु वचनबलादेव विज्ञातादिदृष्टिर्लोकदृष्टिश्च व्यवस्थिततया कर्तव्येति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

एतदभिप्रेत्याह *शास्त्रेति ॥ ३४ ॥ एवमन्नत्रयोपासकस्याध्यात्मशब्दितस्वदेहे ध्यानप्रकारमुक्त्वाऽधिभूतशब्दितेषु स्वातिरिक्तस्थावरजङ्गमात्मकसर्वशरीरेषु वागादिशब्दलक्षिता या नामरूपक्रियाः सन्ति तासु लोकादिदृष्टिं विधायाधिदैविकवागादिविभूतिप्रदर्शनपरा तस्यै वाच इत्याद्युत्तरश्रुतिरित्याह *अधिदैवमिति ॥ ३५ ॥

श्रुत्यक्षरार्थस्तु—तस्या अनन्तत्वेन प्रस्तुताया अधिदैवशब्दितस्य प्रजापतेर्वाचः वाक्पदाभिधेयवागिन्द्रियतदधिष्ठानगोलकयोर्मध्ये इयं पृथिवी शरीरं वागिन्द्रियाधिष्ठानगोलकमित्यर्थः ॥ अयं प्रसिद्धोऽग्निर्ज्योतीरूपं प्रकाशात्मकं गोलकाधेयमिन्द्रियमित्यर्थः । एवं वाक्पदवाच्यार्थमुक्त्वा तस्या आधिदैविकवाचः स्वकार्येष्वध्यात्माधिभूतेषु व्यापित्वं दर्शयति *तद्यावत्येवेति । तत्राध्यात्माधिभूतभेदभिन्ना वाक् यावती यत्परिमाणा

ग्निः ॥ ११ ॥ अथैतस्य मनसो द्यौः शरीरं ज्योती-
रूपमसावादित्यस्तद्यावदेव मनः तावती द्यौस्तावा-
नसावादित्यस्तौ मिथुनꣳ समैतां ततः प्राणोऽजायत
स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य स-
पत्नो भवति य एवं वेद ॥ १२ ॥

रव्यग्नियोगादुत्पन्नो वायुरेषोऽन्तरिक्षगः ।
इन्द्रो ऽसपत्न इत्येवं ध्यातुर्वैरी न सम्भवेत् ॥३६॥

भवति तावती पृथिवी तावानयमग्निः यदध्यात्मादिषु वागिन्द्रियं तद्गोलकं चास्ति तत्र प्रजापतेर्वागिन्द्रियरूपोऽग्निस्तदक्षाधिगोलकरूपा पृथिवी च व्याप्य वर्तत इत्यर्थः ॥ ११ ॥ आधिदैविकवाङ्निरूपणानन्तरं मनो निरूप्यत इत्याह *अथेति । अर्थस्तु पूर्ववद्बोध्यः । अत्र यद्यपि चन्द्रस्तत्राधिदैवतमित्यादिश्रुतौ मनसश्चन्द्राधिष्ठितत्वश्रवणाच्चन्द्ररूपत्वं वक्तुमुचितं न आदित्यरूपत्वं तेन सम्बन्धाभावात्, तथापि सविता बुद्धिदेवतेति गायत्रीविदां मर्यादामङ्गीकृत्य बुद्धिमनसोरैक्यं विवक्षित्वा मनस आदित्यरूपत्वमुक्तमिति ध्येयम् ।

तौ मिथुनꣳसमेतामित्यादिश्रुतेस्तात्पर्यमाह*रव्यग्नीति॥३६॥ अयमर्थः। अध्यात्मं मन एवास्यात्मा वाग्जाया प्राणःप्रजेत्युक्तम्। तथाऽधिभूते च मन एव पिता वाङ्माता प्राणः प्रजेत्युक्तम् । तथाऽधिदैवमुपासनार्थं प्राणशब्दितस्य कस्यचिद्वायोः प्रजात्वं दर्शयति श्रुतिः *तौ मिथुनमिति । तौ वाङ्मनसत्वेन निर्दिष्टावग्न्यादित्यौ मिथुनमन्योन्यसंसर्गं समैतां प्राप्तौ, ततः सर्वोत्पत्तिनिमित्तयोस्तयोर्योगात्प्रकृतान्नातिरिक्तः प्राणशब्दि-

श्रुतिः ॥ अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एते सर्व एव समाः सर्वेऽनन्ताः ।

वार्त्ति०॥ चन्द्रोऽधिदैवं प्राणस्य त एतेऽत्राधिदैविकाः ॥
अध्यात्ममधिभूतं च सर्वं व्याप्य व्यवस्थिताः ॥३७॥

तोऽन्तरिक्षगो वायुरजायत । ननु कालपरिपाकहेतोरादित्यस्य कालात्मत्वेन सर्वोत्पत्तिहेतुत्वेऽपि कथमग्नेस्तद्धेतुत्वमिति चेत्, उच्यते। उत्पत्तिर्नाम सत एव वस्तुनोऽभिव्यक्तिः, सा च प्रकाशव्याप्तिः, प्रकाशश्चाग्निः इत्येतावताऽस्यापि हेतुत्वमस्तीति श्रुत्यभिप्रायः । तं वायुमिन्द्रत्वासपत्नत्वगुणविशिष्टत्वेन य उपास्ते तस्यासपत्नत्वं फलमित्याह *स इन्द्र इति । असपत्नशब्दार्थं स्पष्टयितुं सपत्नशब्दार्थमाह *द्वितीय इति । प्रतिपक्षभूत इत्यर्थः ॥ १२ ॥ एतत्सर्वमभिप्रेत्याथैतस्येत्यादेस्तात्पर्यमाह *चन्द्र इति ।

एवं प्रासङ्गिकमुपासनमुक्त्वाऽन्नत्वेन प्रस्तुताधिदैविकप्राणविभूतिमाह श्रुतिः* अथेति। वाङ्मनसोर्विभूतिवर्णनानन्तरमेतस्य प्रजापतेः प्राणस्यापः शरीरमधिष्ठानम् असौ चन्द्रः ज्योतीरूपं ध्येयं प्राणस्वरूपमित्यर्थः । प्राणस्य तदधिष्ठानस्य च पूर्ववत्सर्वव्याप्तिमाह *तद्येति । त एत इत्यादेरर्थमाह *त एत इति । आधिदैविकवागादीनामनन्तत्वे श्रुतौ हेतुरुक्तः *समा इति ।

तत्र समशब्दार्थमाह *अध्यात्ममिति । सर्वव्यापित्वं यस्मात्तस्मादधिदैवतप्रजापतिसम्बन्धिवागादीनामनन्तत्वमित्यर्थः ॥ ३७ ॥ अस्मिन्प्रकरणे पूर्ववद्वागादिशब्दा नामाद्युपलक्षका

नामरूपक्रियास्तस्मादनन्ता अधिदैवतम् ॥
विराड्रूपा इति ध्यात्वा ध्यायेत्कालात्मतां पुनः॥३८॥

श्रुतिः ॥ स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति ॥ १३ ॥

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥

वार्त्ति०॥ कालात्मको विराडेष चन्द्रः षोडश तत्कलाः।

इति मत्वोक्तं *नामरूपेति ।

परिच्छिन्नोपास्तिनिन्दापूर्वकं तेषामनन्तत्वेनोपास्तिमाह श्रुतिः*स य इत्यादिना । अपरिच्छिन्ननामरूपक्रियात्मकोऽहमिति ध्यायेदित्यर्थः ॥ १३ ॥ एतदभिप्रायेणैवाह *विराड्रूपा इति । स एष संवत्सर इत्याद्युत्तरखण्डतात्पर्यमाह *ध्यायेदिति । अत्र पाठक्रममुल्लङ्घ्य सफलोपास्तिरुक्तेति न पुनर्ध्यानकथनमनुपपन्नमिति ध्येयम् । स एष त्र्यन्नात्मत्वेन प्रकृतप्रजापतिः संवत्सरकालात्मक इत्यर्थः ॥ ३८ ॥ एवं विराजं कालात्मत्वेन ध्यात्वा पुनस्तमेव चन्द्रत्वेन ध्यायेदिति मत्वाऽऽह श्रुतिः *षोडशकल इति । तस्य रात्रय एवेत्यादेरर्थमाह *तिथय इति । रात्रिपदं तिथि-

तिथयः प्रतिपन्मुख्याः कलाः पञ्चदशेरिताः ॥ ३९ ॥
आगमापायरूपास्ता ध्रुवैका षोडशी कला ॥
तया सर्वं प्राणजातं दर्शे विशति चन्द्रमाः ॥ ४० ॥

श्रुतिः ॥ यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदश कला आत्मैवास्य षोडशी कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते। तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाहुः ॥ १५ ॥

लक्षकमिति भावः ॥ ३९ ॥ सोऽमावास्यामित्यादेरर्थमाह *तयेति ॥४०॥ सोमस्य प्राणभृत्सु प्रविष्टत्वादेव प्राणिनां प्राणविच्छेदं न कुर्यादिति प्रसङ्गादाह श्रुतिः* तस्मादिति। कृकलासो दृष्टोऽप्यमङ्गलहेतुरिति कृत्वा प्राणिभिः स्वभावेनैव हिंस्यते तस्मिन्दिने तस्यापि हिंसा न कार्या इत्याह *अपि कृकलासस्येति। एतस्याः सोमदेवतायाः अपचित्यै पूजायै। यद्यपि न हिंस्यादिति शास्त्रेण सामान्यतो हिंसा निषिद्धा तथापि सोमदेवतापूजार्थममावास्यायां ब्रह्महत्यादिवद्विशेषतः परिहरेद्धिंसामात्रमिति भावः ॥१४॥ यो वै स संवत्सर इत्यादेरर्थमाह *इति ध्यात्वेति। यः प्रजापतिः संवत्सरात्मत्वेन पुनश्चन्द्रत्वेन च ध्यातः सोऽयमेवेति श्रुतियोजना। *अयमेवेति। सामान्येनोक्तं विशिष्य दर्शयति श्रुतिः *योऽयमेवंविदिति। अनेन प्रकृतत्र्यन्नात्मकोपासक उच्यते। चन्द्रत्वेन सम्पादितो यः प्रजापतिः सोऽहमिति भावयेदिति वाक्यार्थः। तस्य वित्तमेवेत्यादेरर्थमाह *देह इति। चन्द्रत्वेन सम्पादितस्य प्रजा-

वा० इति ध्यात्वाऽथ चन्द्रत्वं स्वास्मिन्सम्पादयेद्बुधः ॥
देहो ध्रुवा कला वित्तं कलाः पञ्चदशेरिताः ॥ ४१ ॥
आपूर्यते क्षीयते च क्रमाद्वित्तेन विग्रहः ॥
स्वामी देहोऽस्य तद्वित्तं भृत्या इत्यत्र चिन्तयेत् ॥४२॥

श्रुतिः ॥ अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा, कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति ॥ १६ ॥

पतेर्याः पञ्चदश कलास्ता एव गवादिवित्तमेवोपचयापचयवत्त्वादिति स्ववित्ते पञ्चदशकलादृष्टिं कृत्वा ध्रुवां षोडशीं कलां स्वदेहं कल्पयित्वा षोडशकलः प्रजापतिरहमेवेत्युपासीतेत्यर्थः ॥ ४१ ॥ तदेतन्नभ्यमित्यादेरर्थमाह *स्वामी देह इति ॥ ४२ ॥ देहस्य स्वामित्वं वित्तस्य परिवारत्वं चक्रदृष्टान्तेन स्पष्टयति श्रुतिः *यदयं योऽयमात्मा शरीरं तदेतल्लोकप्रसिद्धं नभ्यं नाभ्यमिति यावत् । चक्रपिण्डिकानाभिस्थानीयं शरीरमिति वाक्यार्थः । प्रधिर्वित्तमिव परिवारस्थानीयं वित्तं चक्रस्येवारनेम्यादिरित्यर्थः ॥ तस्माच्छरीरस्य रथचक्रपिण्डिकास्थानीयत्वाद्यद्यपि सर्वज्यानिं जीयते सर्वस्वापहरणं प्राप्नोति तथाऽप्यात्मना शरीरेण चेज्जीवति प्रधिना परिवारेणागात्क्षीणोऽभूत् यथा चक्रमरनेमिवियुक्त इत्येव वदन्ति । तथाच शरीरवित्तयोः स्वामिभृत्यदृष्टिकरणमुपपन्नमिति भावः ॥ १५ ॥ वृत्तानुवादपूर्वकमुत्तरखण्डतात्पर्यमाह *त्र्यन्नेति । पुत्रश्चाग्निहोत्रादि कर्म च विराडाद्युपासनं च पुत्रकर्मोपासनानि तेषामि-

वार्त्ति०॥अथात्रात्मोपासनं प्रोक्तं तत्फलोक्तिप्रसङ्गतः॥
पुत्रकर्मोपासनानां फलं वक्ति यथायथम् ॥ ४३॥
पुत्रेण जय्यो लोकोऽयं पितृलोकस्तु कर्मणा ॥
विद्यया देवलोकोऽतो द्वाभ्यां विद्या प्रशस्यते ॥४४॥
क्रियात्वाल्लोकहेतुत्वं युज्यते कर्मविद्ययोः ॥
द्रव्यात्मनस्तु पुत्रस्य कथमित्युच्यते शृणु ॥ ४५ ॥
प्रव्रजिष्यन्मरिष्यन्वा पिता कर्तव्यमात्मनः ॥
पुत्रेऽध्ययनयागादि सर्वमप्यर्पयत्यसौ ॥ ४६ ॥

श्रुतिः ॥ अथातः सम्प्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याह ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किञ्चानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ये वै केच यज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ये वै के च लोकाः तेषां सर्वेषां लोक

त्यर्थः ॥ ४३ ॥ भावमुक्त्वाऽक्षरार्थमाह *पुत्रेणेति । द्वाभ्यां पुत्रकर्मभ्याम् । श्रुतावथेति प्रारम्भार्थः ॥ त्रयो वावेत्यवधारणार्थः ॥ १६ ॥ कर्मविद्ययोरुक्तं फलमङ्गीकुर्वन्मनुष्यलोकः पुत्रेणैव जय्यो नान्येनेत्युक्तमाक्षिपति *क्रियात्वादिति । कथं लोकहेतुत्वमित्यनुषङ्गः । पुत्रस्य लोकहेतुत्वाभावे हेतुः* द्रव्येति। फलस्य क्रियासाध्यत्वादिति भावः ॥ ४५ ॥ उक्ताक्षेपपरिहारत्वेनोत्तरखण्डतात्पर्यमाह *प्रव्रजिष्यन्निति ॥ ४६ ॥

अक्षरार्थस्तु—अथ कर्मोपासनयोरनुष्ठानानन्तरम् अतः वक्ष्यमाणविधया पुत्रस्य मनुष्यलोकहेतुत्वात्सम्प्रत्तिसंज्ञकं स्नातपुरुषवत्संस्काररूपं कर्म विधीयते इत्यर्थः । तत् कस्मिन्काले कर्त्तव्यं? तत्राह *स पिता यदा प्रैष्यन्मरिष्यन् प्रव्राजिष्यन्वा म-

इत्येकतैतावद्वा इदं सर्वमेतन्मा सर्वं सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किञ्चिदक्षणया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम, स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥ १७ ॥

न्यते मरणं च ज्योतिःशास्त्रेण निश्चेतुं शक्यत इति भावः ॥ अथ तदा पुत्रमाहूयाह त्वं ब्रह्मेत्यादि । स पुत्रः पूर्वमेवानुशिष्टो जानामि त्वयैतत्कर्त्तव्यमिति प्रत्याह *अहं ब्रह्मेति ॥

उक्तवाक्यत्रयं स्वयमेव व्याकरोति श्रुतिः *यद्वै किञ्चानूक्तमित्यादिना ॥ यत्किञ्चानूक्तमधीतमनधीतं चावशिष्टं तस्य सर्वस्यैव ब्रह्मेत्येतस्मिन्पदे एकत्वं, यो वेदविषयोऽध्ययनव्यापार एतावन्तं कालं मम कर्त्तव्यः आसीत्स इत ऊर्ध्वं ब्रह्म त्वत्कर्तृकोऽस्तु इत्यर्थः ॥ एवं मत्कर्तृकयज्ञविषयव्यापारः सर्वोऽपि त्वत्कर्तृकोऽस्तु, लोकस्त्वया जेतव्य इत्यर्थः ॥ पदार्थस्तु पूर्ववत् । पदार्थमुक्त्वा वाक्यार्थमाह श्रुतिः *एतावद्वा इदं सर्वमिति ॥ इदं गृहिणा कर्तव्यम्—अध्येतव्या वेदा, यष्टव्या यज्ञा, जेतव्या लोका इत्येतावदेवेत्यर्थः । न च यज्ञे गृहीते तत्फलस्यापि ग्रहणाद्ये वै के च लोका इति पुनरुक्तिरिति वाच्यम् । लोकानामुपसर्जनत्वेन काम्यकर्मणोऽविवक्षितत्वनुत्यर्थं पृथग्ग्रहणादिति । *एतन्मा सर्वमिति । अत्र चिकीर्षुरिति पदमध्याहार्यम् । अयं पुत्र एतन्मदुक्तं सर्वं चिकीर्षुस्सन्नितोऽस्मान्मनुष्यदेहतो मा माम् अभुनजत्पालयि-

वार्त्ति० ॥यागाध्ययनकाम्यानि कुर्वन्पुत्रः पितुर्गृहे॥
वसत्येतावता पुत्राजितोऽयं लोक उच्यते ॥ ४७ ॥
पुत्रकर्मोपासनानां प्रसङ्गात्फलमीरितम् ॥

ष्यतीति मत्वा पुत्रमाह पितेत्यन्वयः । यस्मादनुशिष्टः सम्यादिष्टमध्ययनादि चिकीर्षति पुत्रस्तस्मादनुशिष्टं पुत्रं लोक्यं लोकहितं पितुराहुः ब्राह्मणाः तस्मादेनं पुत्रमनुशासति लोक्योऽयं स्यादिति पितरः । स कृतसम्प्रत्तिक एवंविद्विराडुपासको यदा प्रैति म्रियतेऽथ मरणानन्तरमेव हि प्रजापतिरस्मीति संस्कृतैर्वागादिभिः सर्वत्र प्रविशद्भिः सह पिता पुत्रमाविशति । ननु कोऽयं प्रवेशः ? नहि विशिष्टस्य केवलस्य वा सर्पादेर्बिलादाविव प्रवेशः सम्भवति । उच्यते । पिता पूर्वमध्येतव्या वेदा इत्यादियादृशसङ्कल्पवानासीत्तादृशसङ्कल्पस्तस्मिन्प्रवेश्यमानः स्वसुते विदुषः प्रवेश इत्युपचर्यत इति । इदानीं पुत्रनिर्वचनमाह *स यदि कदाचिदनेन पित्रा कर्तव्यमक्ष्णया छिद्रितं कृतं भवति तस्मात्कर्मच्छिद्रान्मुञ्चति मोचयति । यस्मात्पूरणेन पितरं त्रायति तस्मात्पुत्रो नाम, यद्यत्पित्रा पूर्वमध्ययनादि प्रमादान्न कृतं तस्य सर्वस्याहं ब्रह्माहं यज्ञ इत्यनुशासनग्रहणेन पूरणात्पुत्रस्य पुत्रतेत्यर्थः । स पिता एवंविधपुत्रेणास्मिन्लोके प्रतितिष्ठति । एवमप्यक्रियारूपस्य पुत्रस्य मनुष्यलोकप्राप्तिहेतुत्वं कथमिति शङ्कायाः कः परिहार इत्याशङ्क्य खण्डसमुदायतात्पर्यं स्फुटयति *यागाध्ययनेति । यागशब्दो नित्यनैमित्तिककर्ममात्रपरः । पित्रनुशासनग्रहणेन तत्कर्मच्छिद्रं पूरयित्वा पित्राऽर्जितगृहे वसतः पुत्रस्य पितुरस्मिन्लोके प्रीतिहेतुत्वमात्रेणैतल्लोकजयहेतुत्वमिति भावः

ऽयन्नात्मोपासकस्याथ विराट्प्राप्तिरुदीर्यते ॥ ४८ ॥
पूर्वसिद्धविराजो वाक् पृथिव्यग्न्यात्मिका सती ॥
उपासिता तत्प्रसादाद्दैवी वागाविशत्यमुम् ॥ ४९ ॥
मनःप्राणौ तथा दैवौ विशतोऽत उपासकः ॥
सर्वेषामपि भूतानां भवत्यात्मा विराडिव ॥ ५० ॥

श्रुतिः ॥ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥१८॥

दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शोचति ॥१९॥ अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः सञ्चरंश्चासञ्चरंश्च न व्यथतेऽथो न रिष्यति स एष एवंवित्सर्वेषां भूतानामात्मा भवति ॥

॥४७॥४८॥ अथैनमित्यादेस्तात्पर्यमाह *पूर्वेत्यादिना ॥ पूर्वसिद्धविराजो या वागस्ति सा पृथिव्यग्न्यात्मत्वेनोपासिता सती दैवी वाग्भूत्वाऽमुमुपासकमाविशतीत्यर्थः ॥४९॥५०॥ एनं कृतसम्प्रत्तिकम्। श्रुतावथशब्दः पुत्रप्रकरणविच्छेदार्थः। दैवा देवात्मकाः अमृता अजन्याः प्राणाः वागादय आविशन्ति, सूत्रेषु प्राणेषु आत्मभावनाकरणात्तेषु परिच्छिन्नाभिमानो निवर्त्तत इत्यर्थः। एवं सामान्यत उक्तमर्थं विशिष्य दर्शयति श्रुतिः *पृथिव्यै चेति। पृथिव्या इत्यर्थः। दैव्या वाचः स्वरूपमाह *सा वा इति। अमोघेत्यर्थः ॥ आनन्द्येव सुख्येव भवति। अथो अपि न शोचति सञ्चरन्जङ्गमेषु असञ्चरन् स्थावरेषु न व्यथते दुःखनिमित्तेन भयेन न युज्यते न रिष्यति न हिंसामापद्यते स यथोक्तऽयन्नात्मदर्शी सर्वभूतात्मा भवति। सर्वभूतात्मत्वे फलितमाह

वार्त्ति० ॥ सर्वभूतात्मभूतोऽसौ सर्वानन्यत्ववेदनः ॥
जगदुत्पत्तिसंहारैः क्रीडन्निव विचेष्टते ॥ ५१ ॥
ननु पूर्वविराज्येष विशद्विन्दुरिवोदधौ ॥
विराडन्तररूपेण जायते वोभयं न तत् ॥ ५२ ॥
नोपास्तिकार्यता त्वाद्ये विराजः पूर्वसिद्धितः ॥
द्वितीये द्विगुणीभूतो विराट् दृश्येत जन्तुभिः ॥५३॥
नैषदोषः कल्पनायां द्वैगुण्यस्याप्रसङ्गतः ॥
न रज्जुसर्पो द्विगुणो भाति द्वाभ्यां प्रकल्पितः ॥५४॥
विराट् स्वेभ्यो ऽन्य इत्येवं कल्पयन्त्यनुपासकाः ॥
उपासकाः कल्पयन्ति स्वयमेव विराडिति ॥ ५५ ॥
तद्यथा कल्प्यते येन तत्तथा तेन वीक्ष्यते ॥
अन्येन कल्पितं त्वन्यो न कश्चिद्वीक्षितुं क्षमः ॥५६॥
कल्पितस्य फलत्वं च युज्यते स्वप्नभोगवत् ॥
कल्पितं निखिलं दृश्यमिति वेदान्तडिण्डिमः ॥५७॥
तस्मादुपास्तिजन्योऽयं विराट् तस्योपमा श्रुतौ ॥

---

*सर्वभूतेति ॥ ५१ ॥ उपासकस्य सर्वात्मभावापत्तिं निर्णेतुमाक्षिपति *नन्विति ॥५२॥५३॥ द्वितीयं पक्षमादाय समाधत्ते *नैषदोष इति । तत्रोक्तं दोषं धुनीते *कल्पनायामिति ॥ उक्तं तावदधस्तात्भोग्यत्वाकाराविशिष्टत्वेन तत्तज्जीवकल्पितप्रपञ्चो नानेति । तथा चोपासकेनोपासनमहिम्ना स्वाभिन्नत्वेन कल्पितः स्वस्वप्नकल्पितराजत्ववत्स्वस्यैव प्रतीयते नान्यस्येति न कस्यापि द्वैगुण्यभानप्रसक्तिरिति भावः ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ विराट्प्राप्तेः उपास्तिफलकत्वमुक्तमुपसंहरति *तस्मादिति । यथेत्यादिश्रुतेस्ता-

श्रुतिः ॥ यथैषा देवतैवं स यथैतां देवतां सर्वाणि
भूतान्यवन्त्येवं हैवंविदꣳ सर्वाणि भूतान्यवन्ति ॥
पूर्वसिद्धविराट्प्रोक्ता यथैषा देवतेति हि ॥ ५८ ॥
सर्वभूतैर्यथा पूज्यो विराट् पूर्वस्तथा विराट् ॥
पूज्यते नूतनोऽप्येष सर्वभूतात्मकत्वतः ॥ ५९ ॥
न च सर्वप्रजादुःखप्रसङ्गोऽस्मिन्नुपासके ॥
कृत्स्नाभिमानिनस्तस्य प्रजामात्रेऽनहम्मतेः ॥ ६० ॥
कुक्षिस्थकृमिदुःखैर्नो न मनागपि सङ्गतिः ॥
तथाऽस्मदादिगैर्दुःखैर्न विराजोऽस्ति सङ्गतिः ॥ ६१ ॥
ईश्वरत्वाच्च तस्यान्यदुःखैर्न स्यात्समागमः ॥

त्पर्यमाह *तस्योपमेति । श्रुतौ, कथ्यत इति शेषः । यथैषेत्यत्रैतच्छब्दार्थमाह *पूर्वसिद्धविराट् इति । कल्पादौ वैराजपदं प्राप्तो यथा सर्वात्मभूतो बभूव एवं स नवीनोऽपि विराट् सर्वात्मतां प्राप्नोतीत्यर्थः ॥५८॥ यथैतामित्यादेरर्थमाह *सर्वभूतैरिति । श्रुतावव‍न्तीत्यस्य पूजार्थत्वमाह *पूज्यत इति ॥ ५९ ॥ यदु किञ्चेत्यादिवाक्यनिरस्यां शङ्कामनूद्य तद्वाक्यतात्पर्यकथनेन निरस्यति *नचेति । विदुषः सर्वभूतात्मतोत्पत्तौ सर्वदुःखैरपि सम्बन्धप्रसङ्गादनर्थकारिविराट्प्राप्तिरिति शङ्का न कार्या, विदुषो दुःखहेतुपरिच्छेदाभिमानाभावादित्यर्थः ॥ ६० ॥ स्वसम्बन्धिनामपि दुःखं स्वस्य न स्फुरतीत्यत्र दृष्टान्तमाह *कुक्षिस्थेति ॥ ६१ ॥ ननु विषमो दृष्टान्तः, कुक्षिस्थकृमिष्वभिमानाभावाद्विदुषोऽपरिच्छिन्नधीत्वेऽपि सूत्रात्मतामापन्नस्य स्वांशसर्वभूताभिमानित्वाद् दुःखयोगो दुर्वार इत्यरुचेः परिहारान्तर-

अस्माकं दुःखसम्प्राप्तिरनैश्वर्यकृतैव हि ॥ ६२ ॥
सत्यसङ्कल्पयुक्तस्य यदिष्टं तद्भवेत्तथा ॥
अनिष्टं न भवत्येव कुतो दुःखं प्रसज्यते ॥ ६३ ॥
उपास्त्याऽखिलपापस्य दग्धत्वाद् दुःखकारणम् ॥
नास्ति, पुण्यैकसाध्यत्वात्सुखमेव विराट्पदे ॥ ६४ ॥
श्रुतिः । यदु किञ्चेमाः प्रजाः शोचन्त्यमैवासां तद्भव-
ति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति॥२०॥
वार्त्ति० इत्थं प्रोक्ता विराट्प्राप्तिर्मृतस्य प्यन्नदर्शिनः ॥
प्यन्नात्मदर्शी जीवेच्चेत्तदा कर्त्तव्यमुच्यते ॥ ६५ ॥
सर्वकर्माणि सन्न्यस्य प्राणापानावनुस्मरन् ॥
सर्वव्यापारकालेषु नान्यत्किञ्चिद्विचिन्तयेत् ॥ ६६ ॥
श्रुतिः ॥ अथातो व्रतमीमांसा प्रजापतिर्ह कर्माणि
ससृजे तानि सृष्टान्यन्योन्येनास्पर्द्धन्त वदिष्याम्य-

माह *ईश्वरत्वादित्यादिना ॥६२॥६३॥६४॥ यदु किञ्चेत्या-देरयमर्थः—यदु प्रजाः आध्यात्मिकादितापैर्यत्किञ्चिच्छोचन्ति तदासां प्रजानाम् अमैव सहैव भवति प्रजाभिरेव दुःखं भोक्तव्य-मित्यर्थः । देवताभावमापन्नस्येतरेभ्यो विशेषमाह *पुण्यमिति । पुण्यफलमित्यर्थः ॥२०॥ वृत्तानुद्रवणपूर्वकमुत्तरकण्डिकातात्प-र्यमाह *इत्थमिति । प्रैष्यन्नित्यत्र प्रव्रजिष्यन्मरिष्यन्वेत्यर्थद्वय-स्याभिहितत्वादिति भावः ॥ ६५ ॥ कर्त्तव्यमेवाह *सर्वेति ॥ ६६ ॥ श्रुतौ—अथ संन्यासानन्तरमतः कर्त्तव्यजिज्ञासायाः सत्त्वाद् व्रतमीमांसा व्रतशब्देनावश्यकर्त्तव्यतोच्यते तद्वि-चारः प्रवर्त्तते इत्यर्थः । तदर्थमाख्यायिकामाह *प्रजापतिर्ह किल प्रजाः सृष्ट्वा कर्माणि करणानि वागादीनि ससृजे ।

हमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म, तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत् ॥

तान्याप्त्वा मृत्युरवारुन्धत्, तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्यो ऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे यं वै नः श्रेष्ठो यः सञ्चरंश्चासञ्चरंश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन ह

स्पर्द्धाप्रकारमेवाह *वदिष्यामि स्वव्यापाराद्वदनरूपादनुपरतैवाहं स्यामिति वाग्दध्रे धृतवती। *यथाकर्मेति। यद्यस्य कर्म तत्करोमीति सर्वाणि करणानि व्रतं दध्रिर इत्यर्थः। तानि करणानि मृत्युर्मारकः श्रमरूपी भूत्वोपयेमे उपसञ्जग्राह। उक्तमेव प्रपञ्चयति *तानि करणानि मृत्युराप्नोच्छ्रमरूपेणात्मानं दर्शितवान्, आप्त्वा च तान्यवारुन्धत् स्वकर्मभ्यः प्रच्यावितवानित्यर्थः। प्रजापतेर्वागादिषु श्रमद्वारा स्वकर्मप्रच्युतिरासीदित्यत्र तत्कार्यप्रजास्वपि तद्दर्शनं लिङ्गमित्याह *तस्मादिति। अथ वागादीनां निर्धारणानन्तरमिममेव मुख्यं प्राणं श्रमरूपी मृत्युर्नाप्नोन्न प्राप्तवान्। अत्रापि कार्यलिङ्गकानुमानमाह *योऽयं प्राणिषु मध्यमः प्राण इदानीमपि न श्राम्यतीत्यर्थः। यानि करणानि मुख्यप्राणं ज्ञातुं मनो दध्रिरे। ज्ञानार्थमनुसन्धानप्रकारमेवाह *अयं वै मुख्यप्राण एव नोऽस्माकं मध्ये श्रेष्ठः। श्रेष्ठत्वे हेतुः *य इति। तस्य श्रेष्ठत्वे फलितमाह *हन्त इदानीमस्यैव प्राणस्य सर्वे रूपमसाम प्राणमात्मत्वेन प्रपद्ये-

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हारिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित–योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः–प्रकाशः गोस्वामि श्रीश्रीपुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमाविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य- बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाख्यटीकाद्वयसंवलिता। १०

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । १

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वा-
मिविरचितः । महेश्वरतीर्थकृतयालघुस-
प्रज्ञाख्यया टीकया समलंकृतः ।

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महा-
महोपाध्यायश्रीमित्रमिश्रविरचितः ।

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्म-
हामहोपाध्याय पं० रामकृष्णभट्टाचार्य-
विरचिता परिशिष्टाधिकरणनिरूपणपूर्व-
कं टिप्पण्या परिष्कृता ।

(५२) प्रशस्तपादभाष्यटीकासंग्रहः । तत्र क-
णादरहस्यम् । श्रीशंकरमिश्रविरचितम्

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्या-
काश्मीरिककेशवभट्टविरचिता । विद्यावि-
नोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महा-
महोपाध्याय श्रीमित्रमिश्रविरचितः ।

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः,
चौखम्बा बनारस सिटी